THE

# BAUDHAYANA SRAUTA SUTRA

BELONGING TO THE

# TAITTIRIYA SAMHITĀ

EDITED BY

DR. W. CALAND

*Extra Professor of Sanskrit at the University of Utrecht.*

VOLUME II.

CALCUTTA

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57 PARK STREET

1907.

*kalpavivarane tatau dvitīyo 'dhyāyaḥ*, and the Mackenzie MS. agrees exactly with this numbering, as it gives the number *dvitīyaḥ* precisely at the end of the passage treated lastly by Bhavasvāmin, there is no doubt at all that the Mackenzie MS. is *right* and that the uttarā tatiḥ begins with the atirātra and the *immediately following* ekādaśinī. This being the case, the statement of B and Be, that the 17th praśna should have contained the atirātra, sautrāmaṇī and ekādaśinī must be false. On account of the fact that the Mackenzie MS. agrees in this respect with Bhavasvāmin and that in other points this MS., of all those known to me, also seems to have preserved the correct order, I have adopted the arrangement of the materials as given by this MS. In consequence of this arrangement, the one adopted previously has been abandoned: thus the numbering of the praśnas and partially that of the adhyāyas in the text coming after the gavām ayana is wholly different from the numbering followed by me in citing passages from Baudhāyana in my above paper on this sūtra. But however valuable this Mackenzie MS. may be, it has not cleared up all the *dubia* regarding the arrangement of the materials. There are two more points to be settled. The first is a question analogous to a difficulty in the construction of the text of Vol. I (the place where the pravargya had to be put in), viz., the place to be assigned to the Kāṭhakasūtra. In the MSS. from Benares (Be) and Bombay (B) it is numbered as the 18th, in the MS Haug it is numbered as the 21st. The Mackenzie MS. assigns a place to this praśna between the agnicayana and the vājapeya, without, however, giving a praśna-*number* to it.[1] As the contents of this praśna are mentioned neither in the Dvaidha- nor in the Karmāntasūtra, no further information is to be obtained from these texts. But as it is highly improbable that this praśna should have formed part of the uttarā tatiḥ, the number 18 assigned to it by Be and B can by no means be right. In accordance with the MS. Haug.[2] and with the place occupied by this material in the brāhmaṇa (viz., *at the end* of the Taitt. Brāhm.) I have inserted it after the uttarā tatiḥ. In consequence of this new arrangment the numbers of the following praśnas (Dvaidha, Karmānta and Prāyaścitta) will have to be changed accordingly. By doing so I may come into collision with the original numbering, which, it seems, is unknown to us. But this is a point of minor importance.

Another question has also puzzled me greatly. In the uttarā tatiḥ, as handed down to us in the Mackenzie MS., two

---

[1] Praśna *numbers* are not found in the Mack. MS.

[2] This MS. gives as the number of the Kāṭhakapraśna: 21, the same MS. numbers the three Karmāntapraśnas 22, 23, 24; and the Dvaidhapraśna 25, etc. This is obviously an error (cp. my paper on the Baudh. sūtra, p. 13, 14) But at any rate this MS. inserts the Kāṭhaka *immediately before* the Dvaidha and Karmānta.

adhyāyas are found, the contents of which are entirely foreign to a śrautasūtra, viz. the adhyāyas 12 and 13 of praśna 17, treating of the samāvartana, a subject we would expect to be treated rather in the gṛhyasūtra. Now, the tradition of the gṛhyasūtra is in this respect not wholly consistent either. Most of the MSS. of the gṛhyasūtra have in the gṛhyasūtra proper (second praśna) a chapter commencing thus: *vedam adhītya snāsyann ity uktaṃ samāvartanam*, and in the so-called paribhāṣā-sūtra a chapter commencing: *vedam adhītya snāsyann ity upakalpayate*, etc. This last part is identical with the long passage found in the Mackenzie MS. of the śrautasūtra and here inserted as adhyāya 12 of the first uttarā tatiḥ praśna. This distribution of the material in the MSS. of the gṛhyasūtra cannot possibly be right, for obviously the passage *vedam adhītya snāsyann ity uktaṃ samāvartanam* refers to the passage *vedam adhītya snāsyann ity upakalpayate*, which therefore must have *preceded*. I possess a very good copy in Grantha writing of the whole [illegible] kindly procured me by Professor Hultzsch. In this MS. the long passage commencing: *vedam adhītya snāsyann ity upakalpayate* (the passage given by the Mackenzie MS. as forming part of the śrautasūtra) stands where the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam* is inserted by the other MSS. Before the Mackenzie MS. came into my hands I thought this was all right. But not long ago I received one more copy of the gṛhyasūtra, copied from an original preserved at Madras. This MS. throws some light on this hitherto obscure point. Where the other MSS. (except the one from Madras, designed by me as M) have the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam*, this MS. reads: *vedam adhītya snāsyann ity uktaṃ samāvartanam; asya samāvartanasya nātra pāṭhaḥ, kiṃtu anyatra pathitam; atra saṃgṛhya vilikhitam atropayoqāt;* then comes the text given by Mackenzie as xvii. 12 and 13, and the rest of the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam*. Now, as it is impossible that the passage referred to in the opening words *ity uktaṃ samāvartanam* could have *followed*, it seems highly probable that the treatment of the samāvartana was originally incorporated in the uttarā tatiḥ, and that here the Mackenzie MS. is right too. I possess now another copy of the complete gṛhyasūtra, which confirms this statement. This MS. gives in the second praśna the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam*, but in the paribhāṣā the text given by the Mackenzie MS. (as xvii. 12, 13) is *not* found. It is not improbable that the scribes of our śrautasūtra, finding the treatment of the samāvartana foreign to a śrautasūtra, omitted it and inserted it in a more proper place (the gṛhyasūtra), disturbing, in doing so, the first praśna of the uttarā tatiḥ. For it is remarkable that none of all the other MSS. of the śrautasūtra give for this praśna (the 17th) any adhyāya- or khaṇḍikā-number; the Mackenzie MS., on the other hand, gives the adhyāya- and khaṇḍikā-numbers, and, in accordance with this

fact, at the close of this praśna, all the pratīkas of the adhyāyas and khaṇḍikās, including those of the chapters on samāvartana. How it occurred to the diascenasts of the śrautasūtra to insert the samāvartana among the subjects treated in the śrautasūtra, I am, however, at a loss to explain

So this Mackenzie MS. was of the greatest help in constituting the text of Vol II The tradition of the cayana, vājapeya and rājasūya chapters is in this MS inferior to that of the following chapters. To these, however, it is of the greatest value entire passages, omitted by all the other MSS., are found *here*, and in many a passage it is easy to prove that only the reading found in M. (Mackenzie) is right, over against the oftentimes unanimous reading of all the other MSS. As no complete copy of the Vivaraṇa seems to be available, we are thrown upon our own resources to understand the meaning of this text Of some use are, of course, the cognate texts of Āpastamba and Hiraṇyakeśin, but, as these are much more real sūtras than the text of Baudhāyana, and consequently, on the whole, much shorter, the help procured from these texts is rather inefficient. In passages where new words or unknown expressions occur, I have, therefore, as a rule, adhered to the reading of M. The corruption of the other MSS. is so great, that it is not worth while mentioning all their various readings So, *e.g.*, in the description of the vrātyastomas: here the text of all the MSS., with the exception of M., is one hopeless confusion. It is highly to be regretted, that this Mackenzie MS. is not wholly complete some final leaves are wanting, consequently the text of the important last chapters of the second uttarātatiḥpraśna had to be edited as well as possible after the corrupt MSS. This is all the more to be regretted as they contain the legends of Purūravas and Uśanas.

After the above remarks, the reader and student of the second volume of Baudhāyana will be indulgent to the editor, who thought it better to give a text, however imperfect, rather than postpone its publication *ad calendas graecas*, as, after years of inquiry, no more help seemed to be forthcoming.

After these preliminary remarks, I shall now give a list of the MSS. used in editing Vol ii.

1. M, being No. xxviii. (new number · 92) of the Mackenzie Collection at the India Office, see Wilson, a descriptive catalogue of the Oriental MSS. collected by Lt.-Col. Mackenzie Vol I, p 6; old palmleaf MS. in Nandināgarī characters, 44 c.m. long, 2½ large, well-written but slightly injured; the pagination is continuous ·It contains the following parts:—

(*a*) karmāntasūtra, one leaf numbered 2 and containing Karm. i., kh. 3 from: ° *ta āvāpo bhavati taṃtraṃ tu* unto *jagatīti*, close of kh. 5; then on 20 leaves numbered 21-41, the rest of the Karmānta, beginning praśna II., kh. 27, from: ° *bṛhaspatibhyāṃ tvā juṣṭam* unto the end of the Karmānta

(*b*) śulbasūtra foll. 42-50 *a*

10. Bu, the text of the cayana as given in an appendix after the above mentioned MS. (Burnell 55), comprising the text up to kh 24, breaking off after the words *nihanty āvṛhyāśmānam upa.*

11. Be 11, cp. Preface to Vol. I., p. x, No. 9 dvādaśāha (without gavām ayana), rājasūya, vājapeya.

12. T, cp. Preface to Vol. I., p. x., No 12 rājasūya only. Of the rājasūya MSS. B Be and U agree mostly on the other hand Be 11 and T go together. M is independent.

13 Be 8, cp. Preface to Vol I., p. x., No 10 (here cited as B 4) contains the iṣṭikalpa

14. Be, a copy of the aupānuvākya praśna from Benares (Nāgarī, paper) on 14 foll., well-written but containing on the whole the same tradition as B and Be (115).

15. Be, a copy of the kāṭhakasūtra from Benares (see sūcīpattra, p 72, No. 10), paper, Nāgarī, 7 leaves.

16 Be (12), a copy of the atirātra from Benares (see sūcīpattra, p. 72, No. 12), paper, Nāgarī, 3 leaves.

17. G, an original MS. of the aupānuvākya from Gwalior on paper in Nāgarī, procured on loan by Professor Bhandarkar.

18 T, a copy of the sautrāmaṇī in the collection of Sanskrit MSS preserved at Tübingen (M.a. i., 317) Nāgarī, paper.

19. MS and MSc, text and commentary of the ekādaśinīsūtra contained in the MS. of the Mahāgnisarvasva, cp. supra No. 9

Other sources, which were of more or less help, are the Vivaraṇa of Bhavasvāmin up to the aupānuvākya, the Vivaraṇa of the atirātra, the aptoryāma and the sautrāmaṇī, and lastly the Prayogasāra of Keśavasvāmin on the contents of which cp. my paper on the Baudh.-sūtra, p. 15.

My thanks are due, for procuring me the use of some of these MSS. and for taking pains in having copied others for me, to Dr. Thomas, Librarian-in-Chief of the India Office, to Professor Hultzsch, to Professor Bhandarkar at Bombay, to Mr. A. Venis at Benares, and to the British Government, which enabled me to collate some of the originals of the above mentioned manuscripts

W. Caland.

*Utrecht, May 1906.*

# ॥ ऐतरेयब्राह्मणम् ॥

( ऋग्वेदस्य )

भगवत्सायणाचार्यकृत-'वेदार्थप्रकाश'-नामभाष्ययुतम्



वङ्गदेशीयास्थायितिकसमितेरनुमत्या व्ययेन च,

सामश्रमिश्रीसत्यव्रतशर्म्मणा

यथामति संशोध्य सटीक्य च सम्पादितम् ।

॥ द्वितीयभागः ॥

( द्वितीयचतुर्थपञ्चिकात्मकः );

कलिकाता-राजधान्याम्,

१९५३-संवत्सरायां सत्ययन्त्रेण यत्नतो मुद्रितम् ॥

## ॥ अथ सङ्केताक्षरसूची ॥

आर० आ० ... आरण्यार्चिकम् ।
आर० गा० ... आरण्यगानम् ।
आ० ब्रा० ... आर्षेयब्राह्मणम् ।
ऊ० गा० ... ऊहगानम् ।
ऊह्य० गा० ... ऊह्यगानम् ।
ऋग्वि० ... ऋग्विधानम् ।
गे० गा० ... गेयगानम् ।
चु० ... चुरादिः ।
प० ... परस्मैपदी ।
पार० ... पारस्करस्य ।
श्रा० भा० ... श्रावरं भाष्यम् ।

## ॥ अथ परिच्छेदसूची ॥

### ॥ अथ तृतीयपञ्चिका ॥


(११) अथ प्रथमाध्यायः ( निविदादिप्रकरणशेषः ) ... १
अथ प्रथमः खण्डः ( प्रउगशस्त्रनिरूपणम् ) ... ”
अथ द्वितीयः खण्डः ( प्रउगशस्त्रप्रशंसनम् ) ... ६
अथ तृतीयः खण्डः ( ,, ) ... १२
अथ चतुर्थः खण्डः ( तत्रैवाक्षेपोत्तरे ) ... १६
अथ पञ्चमः खण्डः ( वषट्कारविधिः ) ... २१
अथ षष्ठः खण्डः ( वषट्कारप्रशंसा ) ... २३
अथ सप्तमः खण्डः ( वषट्कारभेदाः ) ... २६
अथ अष्टमः खण्डः ( वषट्कर्त्तुर्देवताध्यानम् ) ३१

अथ नवमः खण्डः ( प्रैषादीनां प्रशंसा ) ... ३६
अथ दशमः खण्डः ( निविदां स्थानानि ) ... ३८
अथैकादशः खण्डः ( निविद्रूपदेशाः ) ... ४२
( १२ ) अथ द्वितीयाध्यायः ( तत्रैव माध्यन्दिनसवनीयानि ) ५१
अथ प्रथमः खण्डः ( आह्वप्रतिगरौ ) ... ,,
अथ द्वितीयः खण्डः ( अनुष्टुप्-प्रशंसा ) ... ५५
अथ तृतीयः खण्डः ( ,, ) ... ५८
अथ चतुर्थः खण्डः ( मरुत्वतीयशस्त्रविधिः ) ६४
अथ पञ्चमः खण्डः ( तत्र प्रगाथ-प्रशंसा ) ... ६७
अथ षष्ठः खण्डः ( तत्रैव विचारादिकम् ) ... ७०
अथ सप्तमः खण्डः ( तत्रैव धाय्याविधानादि ) ७६
अथ अष्टमः खण्डः ( तत्रैव प्रगाथान्तरविध्यादि ) ८२
अथ नवमः खण्डः ( तच्छस्त्रयाज्ययोः प्रशंसा ) ८८
अथ दशमः खण्डः ( निष्केवल्यशस्त्रविधिः ) ... ९३
अथैकादशः खण्डः ( तस्यैव प्रशंसादि ) ... ९७
अथ द्वादशः खण्डः ( तत्रैव स्तोत्रियविध्यादि ) १०४
अथ त्रयोदशः खण्डः ( ,, ) ... ११०
( १३ ) अथ तृतीयाध्यायः ( तत्रैव तृतीयसवनीयानि ) ११५
अथ प्रथमः खण्डः ( जगतीत्रिष्टुभोः कथा ) ... ,,
अथ द्वितीयः खण्डः ( गायत्रीकथा ) ... ११८
अथ तृतीयः खण्डः ( सवनत्रयकथा ) ... १२२
अथ चतुर्थः खण्डः ( छन्दोऽक्षरविचारः ) ... १२५
अथ पञ्चमः खण्डः ( वैश्वदेवाग्निमारुतयोः ) १३०
अथ षष्ठः खण्डः ( आर्भवं शस्त्रम ) ... १३५

गृहीत्वा दक्षिणेऽवान्तरग्नफे हिरण्यं निधाय संपरिस्तीर्याभिजुहोति जिघर्म्यग्निं मनसा घृतेनेत्यपरं चतुर्गृहीतं गृहीत्वोत्तरेऽवान्तरग्नफे हिरण्यं निधाय संपरिस्तीर्यैवाभिजुहोत्या त्वा जिघर्मि वचसा घृतेनेत्युपोद्धृत्य हिरण्यमभिमादाय पदं परि-
५ लिखति परि वाजपतिः कविः परि त्वाग्ने पुरं वयं त्वमग्ने द्युभिरिति तिसृभिः। खनति देवस्य त्वा सवितुः प्रसवे ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमिति द्वाभ्यामधोत्तरतः पार्श्वतः संभाराणां प्रचीनाग्राणि तृणानि संस्तीर्य तेषूपरि कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणात्यधापां पृष्ठमसीति पुष्करपर्ण-
१० माहरति। तदुपरिष्टात्कृष्णाजिने निधायाग्नेये संमृशति ग्रर्मं च स्थः संवसाथामिति द्वाभ्यामुपोद्धृत्य पुष्करपर्णमष्टाभिर्मृदं हरति ॥ ३ ॥

पुरीष्यो ऽसि विश्वभरा इति। तासां चतस्रो गायत्र्यस्तस्रस्त्रिष्टुभः। स पिण्डंपिण्डं वैवर्चा हरत्यपि वाष्टाभिरेकमेव
१५ पिण्डं हरत्यथैतमवटं[1] विश्वलोपेन पूरयित्वाद्भिरुपसृजति सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं यद्विलिष्टम्। देवानां यश्चरति प्राणथेन तस्मै च देवि वषडस्तु तुभ्यमित्युपरिष्टात्पुष्करपर्णं मृदि निधाय समुच्चित्य कृष्णाजिनस्यान्तान्योक्त्रेणोपनह्यति सुजातो ज्योतिषा सह ग्रर्म वरूथमासदः
२० सुवः। वासो अग्ने विश्वरूपं संव्ययस्व विभावसो दृत्यथैन-

---

१ Thus only M Bhāv; अथैनमवटं all the other MSS.

मादायोपोत्तिष्ठत्युदु[1] तिष्ठ स्वध्वरोर्ध्वऊ षु ण ऊतय इति द्वाभ्यामथैनमाहरति स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु । चित्रः शिशुः परि तमाꣳस्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गा इत्यथैनं गर्दभ आसादयति स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहन ५ इत्यथैनमुपतिष्ठते शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवी अभिशूशुचो मान्तरिक्षं मा वनस्पतीनित्यश्वं पूर्वं नयन्ति[1] तमनुमन्त्रयते प्रेतु वाजी कनिक्रददित्यन्वञ्चं गर्दभं नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ॥ रासभो वां कनिक्रदत्सुयुक्तो वृषणा रथे । स वामग्निं १० पुरीष्यमाशुर्दूतो वहादितः ॥ वृषाग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम् । अग्न आयाहि वीतय इत्यथेमे समीचत ऋतꣳ सत्यमृतꣳ सत्यमिति[1] प्रदक्षिणी वैश्वं कुर्वते[1] वैश्वः पृच्छति पुरुषाः किं भरयेत्यग्निं पुरीष्यमङ्गिरस्वन्नराम इतीतरे प्रत्याङ्गरयेनं खर उपावहरन्त्योषधयः[2] प्रतिगृह्णीताग्निमेतमोषधयः १५ प्रतिमोदध्वमेनमिति द्वाभ्यामङ्गिरभ्युच्छ्याश्वगर्दभावुत्सृजन्त्यपो रग्ने अभ्यवहरन्त्यपि वाङ्गिरभ्युच्छ्य भुञ्जते[1] ॥ ४ ॥ प्रथमः ॥

अथैनं विसृꣳसयति वि पाजसा पृथुना शोशुचान इत्य-

---

१ Thus M Tr U ; उप om. HB Ms. °पेतिष्ठ° Be.

२ उपावहरत्य° B Be.

उखाः संभरिष्यन्नुपकल्पयते ऽश्वं च गर्दभं च तयोरेव रथ्ये मौञ्जौ वा कुशमय्यौ वाभिं च ब्राह्मणसंपन्नां मृदं च भावितां करणीयां वल्मीकवपां कृष्णाजिनं च पुष्करपर्णं च योक्त्रमुदः कुम्भꣳ हिरण्यमर्मकपालानि शर्करा अवाञ्जनपिष्टा अज-
५ लोमानि कृष्णाजिनलोमानि वैश्वꣳ सप्तदशꣳ सूनामधि-करणीमुखाकृतं कुशलमित्यथामावास्येन वा हविष्येष्टा नक्तं वाग्नेय शालाꣳ ग्रम्यान्यासे गर्तं खानयति। तद्भावितां मृद-मवलेपयति। समां विलेन करोति। तदुपसादयति कृष्णाजिनं च पुष्करपर्णं च योक्त्रमुदकुम्भꣳ हिरण्यमित्यथ विधुवति
१० स्फ्येनोद्धत्यावोक्ष्य वल्मीकवपां निदधाति। तां दक्षिणतो वैश्यो गोपायन्नास्ते। ऽथोत्तरꣳ शालाखण्डमग्रेण स्फ्येनोद्धत्यावोक्ष्य सिकता निवपति। तं परिमण्डलं खरं करोत्यथैनꣳ सिक-ताभिराभ्राग्निं करोति। तं कुशतरुणकैर्दूर्वाग्रन्थिभिरिति संप्रच्छाद्याथैनं परिश्रयन्ति। तस्योदीचीं द्वारं कुर्वन्ति। तदुप-
१५ सादयत्यर्मकपालानि शर्करा अवाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि सूनामधिकरणीमुखाकृतं कुशलमित्यथैता-वश्वगर्दभावग्रेण शालां पल्यूलितौ तिष्ठतो। ऽन्तर्वेद्यग्निं निद-धात्युत्तरे वेद्यन्ते रथ्ये। परिस्तृणन्ति। दक्षिणत उप-विशतो ब्रह्मा च यजमानश्चाथ गार्हपत्य आज्यं विला-
२० प्योत्पूयं स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये सावित्राणि जुहो-त्यन्वारब्धे यजमाने। ॥ १ ॥

युञ्जानः प्रथमं मन इति षड्चो-ऽनन्तर्हिता देव सवितरि-

त्यृगेषेमं नो देव सवितरिति यजुरेतदृचा वा त्यजुषा वावस्यं-
त्याङ्गतिं नवमीꣳ ङ्गलोपतिष्ठत ऋचा स्तोमꣳ समर्धयेत्यथा-
भिमादत्ते देवस्य त्वा सवितुः प्रसव इति चतुर्भिः पर्यायैस्ता-
मग्नेणाहवनीयं पर्याहृत्य दक्षिणत आसीनाय ब्रह्मणे प्रयच्छ-
त्यथ रशनामादत्त इमामग्ऽभण्ऽग्रभणामृतस्येति तयाश्वमभि-
दधाति प्रवृत्तं वाजिन्नाद्रवेत्येवमेव द्वितीयाꣳ रशनामादत्ते
तया गर्दभमभिदधाति युञ्जाथाꣳ रासभं युवं योगेयोगे तव-
स्तरमिति द्वाभ्यामश्वं पूर्वं नयन्ति तमनुमन्त्रयते प्रवृत्वन्ने-
ह्यवक्रामन्नग्नेरित्येवञ्चं गर्दभं पूषणा सयुजा सह पृथिव्याः
सधस्यादग्निं पुरीष्यमङ्गिरस्वदच्छेहीति प्रदक्षिणी वेशं कुर्वते १०
वैश्यः पृच्छति पुरुषाः किमच्छेयेत्यग्निं पुरीष्यमङ्गिरस्वदच्छेम
इतीतरे प्रत्याऽरयेत्य वल्मीकवपामुपतिष्ठते ऽग्निं पुरीष्यम-
ङ्गिरस्वद्धरिष्याम इत्यथोपातियन्त्यवग्निरूषसामग्रमख्यदह्नानि
प्रथमो जातवेदाः। अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावा-
पृथिवी आततानेत्यथैतेनाश्वेन प्राचा मदमाक्रमयत्यागत्य १५
वाज्यध्वन आक्रम्य वाजिन्पृथिवीमिति द्वाभ्यामथास्य पृष्ठं मर्ज-
यते द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रस्ते योनिः।
विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यत इत्यथ यं यजमानो
द्वेष्टि तमश्वस्याधस्ताद्ध्यायत्यथैनं प्राञ्चमुत्क्रामयत्युत्क्रामोदक्र-
मीदिति द्वाभ्यामथैतं पदाग्रयमङ्गिरुपसृजति ॥ २ ॥ २०

आपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः। तासाꣳ
स्थानादुज्जिहतामोषधयः सुपिप्पला इत्यथ स्रुचि चतुर्गृहीतं

यैनमद्भिरुपसृजत्यापो[१] हि ष्ठा मयोभुव इति तिसृभि-
रनुच्छन्दसमथैनमर्मकपालैः शर्कराभिरवाञ्जनपिष्टाभिरजलोमैः
कृष्णाजिनलोमैरिति सꣳसृजति मित्रः सꣳसृज्य पृथिवीमय-
स्त्वाय त्वा सꣳसृजामीति द्वाभ्यामथैनꣳ संभरति रुद्राः संभृत्य
५ पृथिवीमिति पिण्डं करोति मखस्य शिरो ऽसीति यज्ञस्य
पदे स्थ इत्यङ्गुष्ठाभ्यामुपनिगृह्यात्यथ तृतीयं मृदो ऽपच्छिद्य
त्रीण्पिण्डान्करोति तेषामेकमुखाकृते प्रयच्छति सꣳसृष्टां
वसुभी रुद्रैरित्यनुमन्त्रयते वसवस्त्वा छन्दन्तु गायत्रेण छन्दसे-
त्यतिश्रिष्टायै मृदो ऽर्धं प्रयच्छति सिनीवाली सुकपर्देत्यनु-
१० मन्त्रयते रुद्रास्त्वा छन्दन्तु त्रैष्टुभेन छन्दसेति सर्वामन्ततो
मृदं प्रयच्छत्युखां करोतु शक्वेत्यनुमन्त्रयत आदित्यास्त्वा
छन्दन्तु जागतेन छन्दसा विश्वे त्वा देवा वैश्वानराः छन्दन्त्वा-
नुष्टुभेन छन्दसेत्यथ वै भवति प्राण्याभिर्यच्छत्यन्यैर्मन्त्रयते
मिथुनत्वाय शुद्धिं करोतीति स यदेव चिर्हरति चिरनु-
१५ लिम्पति तेन शुद्धिस्तां प्रादेशमात्रीमूर्ध्वामपरिमितां तिरश्चीं
करोत्यथास्यै अङ्गुले वा चतुरङ्गुले वा रास्नां पर्यस्यत्यदित्यै
रास्नासीत्यथास्या अनुदिशमष्टावश्रीरुन्नयति रास्नासन्धिषु
चाश्रिसन्धिषु चाष्टौ स्रुवान्करोति नवाश्रिमभिचरतः कुर्या-
दिति ब्राह्मणमस्तनां नवमीं करोत्यथास्यै बिलं गृह्णात्यदितिस्त्वे
२० बिलं गृह्णातु पाङ्क्तेन छन्दसेत्यथैनां खरे निदधाति क्षत्राय

---

१ Thus M Be Tr HU (pr.m.),. Bhav.; उपावसृजत्य॰ BU (sec. m.) Ms.

सा महीमुखामित्यान्तादनुवाकस्यैवमेव द्वितीयां करोत्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳस्तिस्रश्च[१] मण्डलेष्टकाः ॥ ५ ॥

अथ या मृदतिग्रिष्यते तया प्रवाते प्रतिलेपमुपवातयति तामूपवातामूपकल्पयत एकविꣳशतिं तूष्णीं अश्वस्य शक्त्यि- ण्डानभिमꣳशं पचनमित्यथाश्वशकमादीप्य मुखामुखां धूपयति वसवस्त्वा धूपयन्तु गायत्रेण छन्दसेति प्रतिपद्य वरुणस्त्वा धूपयत्वित्यातोऽन्तरतश्च बाह्यतश्च सुधूपितां कृत्वा निदधा- त्येवमेव द्वितीयां धूपयत्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳ- स्तिस्रश्च मण्डलेष्टका अथोत्तरेण शालामुरुविलमिवावटं खानयत्यदितिस्त्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थे ऽङ्गि- रस्वत्खनत्ववटेति तं पचनेनावस्तीर्य तस्मिन्मुखामुखां प्रवृणक्ति देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे ऽङ्गि- रस्वद्धत्तख इत्येवमेव द्वितीयां प्रवृणक्त्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳस्तिस्रश्च मण्डलेष्टकास्ताः प्राचीर्वादीचीर्वायातयत्यथैनाः पचनेनोपरिष्टात्प्रच्छाद्य मृदावलिम्पति[२] चतुरङ्गुलमनुदिग्- मादीपनायातिग्निर्ह्यथोपोषति[३] ॥ ६ ॥

धिषणास्त्वेति पुरस्ताद् ग्रास्त्वेति दक्षिणतो वरूत्रयस्त्वेति

---

१ Here and infra some of the MSS. present the fem.: ०चर्षभास्ति० (or च ऋषभास्ति०); again some of the MSS. om. the first च।

२ Thus (cp. Vol. I. 269, 8) MUH Be; अभिलिंपति B Bu Tr Ms Keś.

३ Before चतुर० Bc B Bu Tr U (sec. m.) Ms ins. ताम्।

पश्चाज्जनयत्येतुल्लरतो ऽथैनाः परिदद्दाति मित्रैतामुखां पचैषा मा भेद्येतां ते परिदद्म्यभित्था इति ता अक्षा वा राज्ञा वा पचन्ते । यद्धि प्रातरुपोषति सायमुपैति यदि सायं प्रातस्तासु पक्वासूपकल्पयते गोपयश्छागापयो धृष्टिमग्नसंदावꣳ सतꣳ संदꣳशं खारीꣳ शिक्यं कृष्णाजिनमित्येतत्समादायाभ्येत्यभीमां महिना दिवं मित्रो बभूव सप्रथाः । उत अवसा पृथिवीम् ॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तममित्यथ धृष्टिमादाय मुख्याया उखाया अङ्गारानुद्वपति देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः । सुबाहुरुत प्रक्ष्वेत्यथैनामुच्छ्रयत्युत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्यथैनामाग्नये प्रतिष्ठापयत्यप्यमाना पृथिव्याग्ना दिग्न आपृणेत्यथैनाꣳ संदꣳशेन परिगृह्य सते ऽवधाय छागापयसाच्छृणत्ति ॥ ७ ॥

वसवस्त्वाच्छृन्दन्तु गायत्रेण छन्दसेति प्रतिपद्य विश्वे त्वा देवा वैश्वानरा आच्छृन्दन्त्वानुष्टुभेन छन्दसेत्यातो ऽन्तरतश्च बाह्यतश्च स्वाच्छृणां कृत्वा गोपयसाभिविष्यन्दयत्येवमेव द्वितीयामाच्छृणत्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳस्तिस्रश्च मण्डलेष्टका । अथ यदि विधुर्वा प्रदरो वा जायते ऽग्नचूर्णानि छागापयसि संप्रकीर्य तैः प्रत्युच्योल्मुकेनाभितपति । सꣳ हैव रोहति । यद्यु वै सर्वग्न एव भिद्यत[1] एतान्येव[1] कपालान्य-

---

१ भिद्येत तान्येव Be; भिद्येतैतान्येव U Tr (but cp. Vol. I. 270, 14).

वाञ्जनं पिष्ट्वा यैषां मृत्प्रायश्चित्ताय परिगेते तया सꣳसृज्य क्षत्वा पक्वाच्छृत्य निदधाति ' तासां यदा श्वसथ उपरमत्यथैनाः खार्याꣳ समवधाय कृष्णाजिनेनोपरिष्टात्प्रच्छाद्योत्तरे शालाखण्डे शिक्य आसजति ' ता आ कालात्परिगेरे ' ॥ ८ ॥ द्वितीयः ॥ ५

अथैतस्मिन्नेव पूर्वपक्षे वायव्येन पशुना यजते ' तस्य तदुपक्लृप्तं भवति यत्पशुना यक्ष्यमाणस्य संग्रामे हतयोरश्वस्य च वैश्यस्य च शिरसी ' दोग्धन्त ऋषभं पचन्ते ' वृष्णिं च वस्तं चाहरन्त्येतत्सर्पशिरो ' ऽथास्येषा पूर्वेद्युरेव पाशुबन्धिकी वेदिर्विमिता भवति ' तां परिस्तीर्य स्रुग्घ्यजुर्हरतीदमेव प्रसिद्धं पौरो- १०
डाशिकं चिर्यजुषा तूष्णीं चतुर्थं ' पूर्वं परिग्राहं परिगृह्णाति ' करणं जपत्युद्धन्त्युद्धृतादाग्नीध्रस्त्रिर्हरति ' यदाग्नीध्रस्त्रिर्हरत्यथ चात्वालस्यावृता चात्वालं परिलिखत्युत्तरवेदेरावृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्सादयाग्नेरावृताग्निं प्रणयत्यग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्रुचꣳ स्रुब्धा संप्रैषमाह १५
प्रोक्षणीरासादयेध्मबर्हिरुपसादय स्रुवꣳ[1] स्रुधितिꣳ[1] स्रुचञ्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च द्रप्सा चोदेहि प्रतिप्रस्थातः पशुग्रीवाणि विद्धीत्यध्वर्युरेव . प्रसिद्धं पाशुबन्धिकं कर्म चेष्टत्यथ प्रतिप्रस्थाता याचत्येकविꣳशतिं

---

१ Some of the MSS. ins. च after स्रुवं and after स्रुधितिं, some only after स्रुवं; M om. स्रुधितिं and has स्रुवं स्रुचञ्च; cp. Vol I. 112, 7.

माषाग्पर्णशाखां मृत्पिण्डमुदपाचमुत्कुषीꣳ[1] सप्तधा विदर्षां वल्मीकवपाꣳ संदꣳशमित्येतत्समादाय पशुशीर्षण्यैति दक्षिणत एतत्पुरुषशिर उपधत्ते ऽग्नेतराण्यथ प्राचीनावीतं कृत्वा सप्तभिर्माषैः पुरुषशिरः परिकीर्य चिरपसलैः पर्णशाखया परिकर्षति ॥ ९ ॥

अहरहर्नयमानो गामश्वं पुरुषं जगत् । वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यम दूत्यैपरैः सप्तभिः परिकीर्यैव परिकर्षति वैवस्वते विविच्यन्ते यमे राजनि ते जनाः । ये चेह सत्येनेच्छन्ते य उ चानृतवादिन दूत्यैपरैः सप्तभिः परिकीर्यैव परिकर्षति ते राजन्निह विविच्यन्ते ऽथा यन्ति लामुप । देवाꣳश्च ये नमस्यन्ति ब्राह्मणाꣳश्चापचित्यतीत्यैथादक्षे दक्षिणेन वल्मीकवपाꣳ सव्येन संदꣳशेन पुरुषशिरः[1] प्राणैः प्राणान्संनिधायाग्नये वल्मीकवपां निदधात्यैथैतत्पुरुषशिरो ऽभ्युच्योत्कृष्य[2] प्रक्षाल्य मृदाभिलिम्पत्यनभिलिम्पन्प्राणानैथेतराणि चये-

---

१ Thus (उत्कुषीꣳ or ०षीं) Tr Be H Bu U Bhav. (MS. Burnell), Ms and Msc (both the Burnell MS. and the MS. of Tubingen); उत्कर्षीं Bhav. (Cidambara MS.); उत्कर्षिं B; M उत्कुषीं or उत्कुषीं। According to the Bhāsya it is: सुसंवदा दर्णैरुत्का; Msc.: उत्का दर्णैः समावदा दीर्घीकारोत्कुषी भवेदिति गोपालः।

२ Thus U (pr. m.) Bhav.; भुच्योत्कृष्य Tr; भुत्कुष्य Be U (sec m); भुत्कृष्य B Ms; भुच्य only M; Bu is corr. and in H this whole chapter is missing.

णैव निस्तिष्ठन्त्यभ्युत्कुर्य्यैव[1] प्रचाल्य मृदाभिलिम्पन्त्यनभिलिम्पन्तः प्राणानेवैनान्यङ्गैः प्रोक्षणतो[2] निदधाति। तान्या कात्यात्परिशेरे[3]॥ १०॥

अथ पशोः सामिधेनीकल्पः। प्र वो वाजा अभिद्यव इत्येकादश। समास्वाग्न ऋतवो वर्धयन्विति दश। तासां ज्योतिष्मतीमपोद्धृत्य नव धाय्यालोके दधात्यथ पृथुपाजवत्यौ धाय्ये दधात्यथ युक्ष्वा हि देवहूतमानित्येतां दधाति। ताः परा-चीरनूच्यमानाश्चतुर्विंशतिः संपद्यन्ते। ज्योतिष्मतीं त्वेवोत्तमामन्वाहार्य हिरण्यगर्भः समवर्तताग्र इत्याधारमाधारयत्यथात आप्रीणामेव मीमाꣳसार्ध्या अस्य समिधो भवन्तीति द्वादश। १० तासां तानूनपातीमपोद्धृत्य नाराशꣳसीं वसिष्ठानां[4] दधात्यथो-

---

१ Thus only BU (sec. m.); Ms again अभ्युत्कुय्यैव; thus also Bu with var. r: अभ्युत्कुय्यैव; अभ्युय्यैव M Tr.; Bhav.: चयेण संधापयति तापयित्वा प्रचाल्य मृदाभिलिम्पति; as Bhav. has explained उत्कृष्य, supra p. 9, l. 14, by प्रताप्य रोमाणि दग्ध्वा perhaps here simply उत्कुय्यैव without अभि is to be read.

२ Thus M only in accordance with Bhav. (अङ्गैः प्रोक्षणतः पशोः प्रोक्षणेन सह यथा प्रोक्ष्यते तथा निदधाति); प्रोक्षन्दक्षिणतो Ms. and Msc. (but the commentary runs: अङ्गैः प्रोक्षणाय दक्षिणतो निदधाति। पशुप्रोक्षणेन यथा प्रोक्षितानि भवन्ति तथा दक्षिणतः पशोर्निदधातीति यावत्); प्रोक्ष्यन्दक्षिणतो U; प्रोक्ष्य दक्षिणतो Bu Tr B Be; H om. the whole chapter.

३ The last sentence is omitted by M Tr U; is it commented upon by Bhav. and Ms.

४ वासिष्ठानां some of the MSS.

हृत्य नाराशꣳसीं तानूनपातीमन्वेषां गोचाणामथ पीवो ऽन्नाꣳ राये ऽनु यमिति वपायै यः प्राणतो य आत्मदा इति पशु-पुरोडाशस्य प्र वायुमच्छा नो नियुद्भिरिति हविष[1] इति[2] नु यदि मिश्रो भवति[3] यद्यु वै सर्ववायव्य[4] एव भवति पीवो ऽन्नाꣳ राये ऽनु यमित्येतासां द्वे वपायै द्वे पशुपुरोडाशस्य द्वे हविषो[3] ऽथ यदि सर्वप्राजापत्य[5] एव भवति यः प्राणतो य आत्मदा इत्येतासां द्वे वपायै द्वे पशुपुरोडाशस्य[6] द्वे हविषः[3] सर्वसꣳस्थां पशोः कुर्वन्त्यथैतानि पशु-शीर्षाण्यभिपर्यग्निकृतान्युत्तरे शालाखण्ड अग्निष्वासजत्यथैत-त्सर्पग्निर स्वन्यया विग्रथ्य अग्निष्वपाग्ने प्रयङ्धीति[3] तान्या कालात्परिशेरे[3] ॥ ११ ॥ तृतीयः ॥

अथापरपक्षः प्रतिधीयते[3] स उपकल्पयत दृष्टकाग्नाग्नि-दक्षिणाश्च [7]यदि रात्रिसत्रं चेष्यमाणो भवति[3] यद्यु वै संव-त्सरसत्रं दीर्घो ऽध्वाजिरिति नाद्रियेत[3] स उपकल्पयत औदुम्बरीमुख्यामन्दीं तस्याः प्रादेशमात्राः पादा भवन्त्यरत्नि-मात्राणि शीर्षाण्यनूच्यानि सा मौञ्जीभी रज्जुभिर्यूता भव-

---

१ om. B Be U Ms.

२ Thus M, all the other MSS. सर्वो वा०, but cp. xvi. 11 and 19.

३ Thus again only M ; सर्वः प्रा० the other MSS.

४ पशु० fails in some of the MSS.

५ All the MSS. exc. B and Ms insert अथ before यदि ; but the clause यदि रात्रिसत्रं चे० भ० seems to be the protasis of the foregoing स उपक० दृष्ट० ; Msc. ०ग्निदक्षिणाश्चोपकल्पयते इति पूर्वेणान्वयः ।

त्येकसराभिः फलकाभिस्तीर्णा मृदावलिप्ता[1] षड्डयामं द्वादशो-
द्यामं वा मौञ्जꣳ ग्रिक्कां सुञ्जकुलायं क्रमुकमाज्यसंयुतं वैक-
ङ्कतीं च ग्रमीमयीं च समिधौ सप्तौदुम्बरीः समिधस्त्रिस्रो
नानादृच्या एकविꣳग्रतिनिर्वाधꣳ रुक्मं[1] प्रज्ञाता आग्निष्टो-
मिकाः संभारा[1] जुष्टे देवयजने शाला कारिता भवत्यथैनं ५
तीर्थादानीय पवयित्वा त्रिहविषमग्निदीक्षणीयामिष्टिं निर्वप-
त्याग्नावैष्णवमेकादशकपालमदित्यै घृते चरुं वैश्वानरं द्वादश-
कपालमिति[1] तस्यै तावन्त्युत्तीदन्ति यावन्ति दीक्षणीयाया
अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङादृत्य पत्नीः संयाज्य प्राङेत्य
ध्रुवामाप्याज्यस्थाल्यां प्रत्यवनीयाज्यस्थाल्याः स्रुवेणोपघात- १०
मग्निदीक्षाऽऽहुतीर्जुहोति ॥ १२ ॥

आकूतिमग्निं प्रयुजꣳ स्वाहा मनो मेधामग्निं प्रयुजꣳ
स्वाहा चित्तं विज्ञातमग्निं प्रयुजꣳ स्वाहा वाचो विधृतिमग्निं
प्रयुजꣳ स्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहे-
त्यथ स्रुचि चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णꣳ स्रुचमौद्गहणीं[2] १५
जुहोति विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय दृषु-
ध्यसि द्युम्नं वृणीत पुष्यसे स्वाहेत्यैतत्पूर्णपात्रमन्तर्वेदि निनय-
त्यथाग्नेराहवनीयं पर्याहृत्य यजमानाय प्रयच्छत्यथ मुख्या-

---

१ Thus MH Bhav.; ऋदाभिलि॰ B Be U Ms. Msc.

२ Thus M Tr Be Bu U Ms; the other MSS. औद्गह॰; but cp. TS. vi. 1.2.4.

मुखां याचति । तस्याꣳ शक्तीत्पिण्डान्पूतिदृणानीति संप्रकीर्या-ज्यस्रुवं प्रत्यस्याहवनीयस्यान्तमेष्वङ्गारेषु प्रवृणक्ति मा सु भित्था दृꣳहस्वेति द्वाभ्यामेनां परिददाति भिन्नैतामुखां तपैषा मा भेद्येतां ते परिदद्म्यभित्त्या इत्यथ वै भवति यदि भिद्येत-
५ तैरेव कपालैः सꣳसृजेदिति । सा यदि भिद्यत[1] एतान्येव[1] कपालान्यवाञ्चनं पिष्ट्वा यैषा मृत्प्रायश्चित्ताय परिग्रहीते तया सꣳसृज्य कृत्वा पक्त्वाच्छृद्य निदधात्यथान्यां प्रवृणक्त्यथ वै भव-त्यम्बरीषादन्नकामस्यावदध्यादित्यथ वै भवति यं कामयेत यजमानं भ्रातृव्यमस्मै जनयेयमित्यन्यतस्तस्याहृत्यावदध्यादित्यथ
१० वै भवति यो गतश्रीः स्यान्मथित्वा तस्यावदध्यादित्यथ वै भवति यो भूतिकामः स्याद्य उखाये संभवेत्स एव तस्य स्यादिति । स य एवैष उखाये संतापाज्जायते तस्मिन्नुञ्छ-कुलायमवदधाति या ते अग्न ओजस्विनी तनूरोषधीषु प्रविष्टा तां त एतेनावयजे स्वाहेत्यथ क्रुमुकमाज्यसंयुतमवदधाति
१५ द्रुन्नः सर्पिरासुतिरित्यथ वैकङ्कतीं च ग्रमीमयीं च समिधा-वादधाति परस्या अधि संवत इति वैकङ्कतीं परमस्याः परावत इति ग्रमीमयीमथ सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जातमुपतिष्ठते । अथ पञ्चौदुम्बरीः समिध आदधाति ॥ १३ ॥

---

१ भिद्येतैतान्येव U Be Ms, the others (exc. B which is corrupt and Bu, which is incomplete) भिद्यत एतान्येव ; cp. supra p. 7, 20.

यदग्ने यानि कानि च यदत्युपजिह्विका राचिरूराचिमप्रयावं नाभा पृथिव्या याः सेना अभीवरीरित्यथैनं पञ्चर्चेन राचोन्नेनोपतिष्ठते क्रुणुष्व पाजः प्रसितिं न पृथ्वीमित्यथ तिस्रो नानावृच्याः समिधो ऽभ्यज्यादधाति दृंहृभ्यां मलिम्लूनित्याश्वत्थीं ये जनेषु मलिम्लव इति वैकङ्कतीं यो अस्मभ्यमरातीयादिति शमीमयीमथ संशितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुम्बरी वाचयत्रेवाभ्यादधात्यथ कृष्णाजिने यजमानं वाचयति मुष्टी चैव न करोति वाचं च यच्छत्यथैतामासन्दीं व्यत्यग्निक्यपाग्रां जघनेनाहवनीयं निदधाति तस्यामिण्डाभ्यां परिगृह्योख्यमासादयति ॥ १४ ॥ १०

मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनौ बिभर्तु खा। तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा युनक्त्वित्यथासीन उत्तरनिर्बाधं रुक्मं प्रतिमुञ्चते कृशानो रुक्मं इत्यथ ग्निक्यपाग्रं प्रतिमुञ्चते विश्वा रूपाणि प्रतिमुञ्चते कविर्नक्रोषासेति द्वाभ्यां तूष्णीं कृष्णाजिनमुत्तरमथैनमवेक्षते १५
सुपर्णो ऽसि गरुत्मान्त्रिवृत्ते शिरो गायत्रं चक्षु स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं[1] पुच्छं छन्दाꣳस्यङ्गानि धिष्णियाः शफा यजूꣳषि नामेत्यथैनमुद्गृह्णाति सुपर्णो ऽसि गरुत्मान्दिवं गच्छ सुवः पतेति पुरस्तादेवास्यैते

---

१ यज्ञायज्ञीयं Tr H ; M abbreviates.

दीर्घाः शिक्यपाशाः[१] कारिता भवन्ति[1] सो[२] ऽच[२] वैव[२] सति[२] क्रमते ऽपि वैनमुपोद्यच्छते ॥ १५ ॥

विष्णोः क्रमो ऽस्यभिमातिहा गायत्रं छन्द आरोह पृथिवीमनुविक्रमस्व निर्भक्तः स यं द्विष्म इति चतुर्भिरनुच्छन्दसं[1] द्वितीये चतुर्थमनुवर्तयति[1] न चतुर्थाय प्रक्रामति[1] नाहवनीयमुल्लिखत्येत्यथाक्रन्ददित्येतामन्वाहाथ दक्षिणमूरुमभि पर्यावर्तते ऽग्ने ऽभ्यावर्तिन्नग्ने अङ्गिरः पुनरूर्जा सह रय्येति चतसृभिरेतैर्दङ् पर्यावृत्य कृष्णाजिनमुन्मुच्य शिक्यपाशमुन्मुञ्चत उदुत्तमं वरुण पाशमस्मदित्यथैनमाहरत्या त्वाहार्षमग्ने बृहन्नुषसामूर्ध्वो अस्थादिति द्वाभ्यामंच यं कामयेत राजन्यः राष्ट्रः स्यादिति तं मनसा ध्यायेद्राष्ट्रमेव भवतीति ब्राह्मणमथैनं यथाहृतं प्रतिपर्याहृत्यान्तर्वेद्यासादयति सीद त्वं मातुरस्या उपस्थ इति चतसृभिः सहस्राभिरंच मुष्टी च करोति वाचं च यच्छत्यथास्मै व्रतं प्रदास्यन्नन्नपतीयाः समिधमभ्यादधाति वा जपति वान्नपते ऽन्नस्य नो देहीत्यथोख्यमुपसमिन्द्धे येन देवा ज्योतिषोर्ध्वा उदायन्निति[1] स यावत्त्वत्तो ऽस्मै व्रतं प्रदास्यन्भवत्येवमेवान्नपतीयाः समिधमभ्यादधाति वा जपति वैवमुख्यमुपसमिन्द्धे[1] ऽथ प्रातरुदित

---

१ Thus M Tr Be BHU (sec. m.); ॰पादाः Ms. U (pr. m.) Bhav.

२ Thus M (only सतीं) Be BHU Bu Ms. Bhav. (one MS.); सोचैवसति Tr Bhav. (another MS.) Keś.; according to Msc. the words are: सो ऽच वा एव सति (sc. उख्ये)।

आदित्ये विसृष्टायां वाचि वात्सप्रेणोपतिष्ठते दिवस्परि प्रथमं जज्ञे अग्निरित्येतेनैकादशर्चेन ' स एवमेव पूर्वेद्युः प्रक्रामत्युत्तरेद्युरुपतिष्ठते । अथास्योपवसथीये ऽहन्वात्सप्रꣳ संपद्यते ' ॥ १६ ॥ चतुर्थः ॥

अथातः प्रयाणस्यैव मीमाꣳसा ' दीक्षितं वायोगच्छेमो विन्दत्यन्यच्च वा देवयजनाद्दीक्षते सꣳसृजन्ति व्रते ' संबध्नन्ति व्रतदुघयोर्वत्सावादधति यदाधेयं भवति नीडे गार्हपत्यं प्रउग आहवनीयमित्यथोख्यमुद्यच्छत[1] उदु त्वा विश्वे देवा इत्यथैनमनसः प्रउग आसादयति सीद त्वं मातुरस्या उपस्थ इति चतसृभिः सहꣳसाभिरथैतानासन्दीपादान्फल्गकेषु यथासुष्ठु विनिबध्नन्ति ' मध्यमे वꣳशे शिक्यपाशं प्रयच्छन्त्यपि वारण्योरग्नीन्समारोह्य प्रयाति भद्रादभि श्रेयः प्रेहि प्रेदग्ने ज्योतिष्मान्याहीति द्वाभ्यामथ यद्यच उत्सर्जत्यक्रन्ददित्येतामन्वाहाथावसिते घृतानुषिक्ताꣳ समिधमभ्यादधाति समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आग्निन्द्रव्या जुहोतन स्वाहेति गायत्र्या ब्राह्मणस्य प्रप्रायामग्निर्भरतस्य शृण्व इति त्रिष्टुभा राजन्यस्य स यावल्लघुः प्रयास्यन्भवत्येवमेवैतत्सर्वं करोति ' ॥ १७ ॥

अथातो भस्मन एवातिवृद्धस्य मीमाꣳसा ' भस्म चेदतिवर्धते स उपकल्पयते सतमयोदर्वीꣳ संदꣳशमित्येतत्समादाय

---

१ After आहवनीयम् M Tr H Bu om. इति ; Msc.: दक्षिणतो दक्षिणाग्निं स्थापयन्नीति इतिशब्द. सूचयति ; in the collateral passage (Vol. I, p. 165, 11) however, no इति is found.

यचापस्तद्यन्ति बोध्या । अथैतमग्निꣳ संदꣳशेन परिगृह्य सते ऽवधायायोद्व्यां भस्म प्रवेशयत्यापो देवीः प्रतिगृह्णीत भस्मैतदप्स्वग्ने सधिष्टव गर्भा अस्योषधीनामिति तिसृभिरनुच्छन्दसमथैनं ज्योतिष्मतीभ्यां प्रत्यवदधाति प्रसद्य भस्मना योनिं पुनरासद्य सदनमपस्येति द्वाभ्यामथ पुनरूर्जा सह रय्येति द्वाभ्यां पुनरूदैत्यथोख्यमुपसमिन्द्धे पुनस्त्वादित्या रुद्रा वसवः समिन्धतामित्यथैनं यथाहृतं प्रतिपद्याहृत्य यजमानायतने तिष्ठन्नुपतिष्ठते बोधा स बोधीत्यान्नादनुवाकस्य । स यावत्तावो भस्मातिवर्धत एवमेवैतत्सर्वं करोत्यथातः कालायैवोपग्नेते संभारेभ्यः । ॥ १८ ॥ पञ्चमः ॥

अथातः क्रयस्यैवोपवसथः पर्याप्नवते । स उपकल्पयते पञ्चशतमिष्टका अपरिमिता अपस्या नैर्ऋतीः कृष्णास्तिस्रस्तुषपक्वा भस्म पुरीषमूषान्त्सिकता इत्यथोपवसथीये ऽहन्देवयजनमथवस्त्येदमगन्मापेतेति द्वाभ्यामथ महावेदिं विमिमीत एतानेव ज्यायसः प्रक्रमान्प्रक्रम्याक्ष्णया मानेन प्रमाय समन्तꣳस्यन्द्यया परितनोति । पृष्ठ्यामातनोत्यथैतमग्निं प्रत्यञ्चं यूपावटीयाच्छङ्कोर्विमिमीते पुरुषमात्रेण वेणुना समपच्चपुच्छमरत्निना पञ्चौ द्राघीयाꣳसौ भवतः । षड्विधं वा सप्तविधं वा द्वादशविधं वा यावद्विधं वा चेष्यमाणो भवत्यथैनमक्ष्णया

---

१ उदैति only MH, cp. TS. v. 2.2.5 ; उदेति all the other MSS.

२ वेणुनासपच्च॰ and चरत्निना वा M.

मानेन प्रमाय समन्तꣳ स्यन्द्यया परितनोत्यनुस्यन्द्यं लेखां लिखत्यपोद्धृत्य स्यन्द्यां कर्षूः खानयन्त्युच्छ्रयन्त्यपस्या दक्षिणतश्च पश्चाच्च वर्षीयसीः कुर्वन्त्येतावदेवैतदहः कर्म क्रियते वसन्त्येताꣳ रात्रिमध्वर्युरपरराच आद्रुत्य सꣳग्राम्ये चिस्तनव्रतं दोहयतेत्यथैतमग्निꣳ मते समुप्य दक्षिणतो ज्वलयन्त आसते ऽथैतदग्न्यायतनꣳ ग्रक्षत्पिण्डेन परिलेपयति तस्मिꣳस्तस्तः प्राचीरिष्टका आयातयति द्वे पुरस्तात्समीची द्वे पश्चात्समीची अथैनं प्रदक्षिणं चयोदशभिरिष्टकाभिः परिचिनोत्यन्विष्टकं लेखां लिखत्यपोद्धृत्येष्टकाः कर्षूः खानयन्त्युच्छ्रयन्त्यपस्या दक्षिणतश्च पश्चाच्च वर्षीयसीः कुर्वन्ति ॥ १९ ॥ १०

अथ द्वाभ्यामात्मन्यग्निं[1] गृह्णीते मयि गृह्णाम्यग्ने अग्निं यो नो अग्निरिति स्वयंचितिं जपति यास्ते अग्ने समिधो यानिधामेति श्वेतमश्वमभिमृशान्तःपर्करमिमामुपदधाति प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यन्वेव संभारान्निवपत्यग्नेर्भस्मासीति भस्माग्नेः पुरीषमसीति पुरीषꣳ संज्ञानमसि कामधरणमित्यूषान्मयि ते कामधरणं भूयादिति सिकता अथैनान्संप्रयौति सं वा वः प्रियास्तनुवः सं प्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो मनेत्यथैनान्कल्पयति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः । कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता इत्यथोर्ध्वचित उप- १५ २०

---

१ Thus MB Be U Pr, Bhav.; आत्मन्नग्निं H.

दधाति चित ꣳ स परिचित ऊर्ध्वचितः 'अयध्वं तया देवतयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुव्यूहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य सं ते पयाꣳसीति त्रिष्टुभा राजन्यस्य ' यथासुष्ठु यथाग्नर्करमनुव्यूहति ' तस्मिꣳश्चतस्रः प्राचीर्याजुषीरुपदधाति ॥ २० ॥

५ अयꣳ सो अग्निरग्ने दिवो अर्णमच्छा जिगास्यग्ने यत्ते दिवि वर्चः पृथिव्यां पुरीष्यासो अग्नय इति ' द्वे पुरस्तात्समीची दृडामग्न इति दक्षिणामयं ते योनिर्ऋत्विय इत्युत्तरां ' द्वे पश्चात्समीची चिदसीति दक्षिणां परिचिदसीत्युत्तरामथैनं प्रदक्षिणं त्रयोदशभिर्लोकंपृणाभिः परिचिनोति लोकं पृण १० छिद्रं पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्निति ' तयादेवतं करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इत्यथावद्रुत्य क्षणमश्वमभिस्तृश्य तनुपुरीषमुपदधाति १५ पृष्टो दिवीति ' तयादेवतं कृत्वा सूददोहसं करोतीति त्रीणि वयं प्रथमा चितिर्निष्टीयत ' एवमेव द्वितीया निष्टीयत एवं तृतीयैवं चतुर्थ्येवं पञ्चमी ' तान्यदि[1] नेच्छत आदित्यो ऽभ्युदियादाचंयमो ऽध्वर्यु यजमानो ऽन्वारभत ' उख्यमेवाध्वर्युरादत्ते प्रतिसमेधनीयं प्रतिप्रस्थाता ' तौ पुरस्तात्प्रत्यञ्चौ समितमिति २० चतसृभिः संनिवपतो ' ऽथ शिक्याद्युखां निरूहति ॥ २१ ॥

---

१ Thus (तान्) M Tr. H Bhav. (तानध्वर्युब्रह्मयजमानान् according to Bhav.); ना यदि B Be Bu U Ms (त्रीः पञ्च चितीः according to Msc.).

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्च-
लिति। तां नावेचेतेत्याहुः शुग्वत्येव हि भवतीति। तस्या-
मन्यचावेचमाणो[१] दधिद्रप्साग्राप्सत्यसुं[२] ते शुचि दधामीति
वा तूष्णीं वाथैनाꣳ सिकताभिः पूरयित्वा दध्नोपरिष्टात्संप्र- ५
क्षाद्योत्तरे शालाखण्डे निदधात्येवमेव द्वितीयां पूरयत्येवं
तृतीयां। ता आ कालात्परिशेरे। ऽथ वैश्वानर्यां शिक्यमादत्ते
यदस्य पारे रजसः शुक्रं ज्योतिरजायत। तन्न पर्षदति द्विष
दित्यथ याचति नैर्ऋतीः कृष्णास्तिस्रस्तुषपक्वा आसन्दीꣳ[३]
रुक्मस्य प्रबन्धनमुदपात्रमित्येतत्समादाय दक्षिणया द्वारोप- १०
निष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणꣳ स्यष्टं भवति
प्रदरो वा। तदेतत्पराचीनपाग्रꣳ शिक्यं न्यस्यत्यग्ने[४] वैश्वानर
स्वाहेति। शिक्यपाग्रमनु परावीर्नैर्ऋतीरुपदधाति नमः सु ते
निर्ऋते विश्वरूपे यत्ते देवी निर्ऋतिराबबन्ध यस्यास्ते अस्राः
क्रूर आसञ्जुहोमीत्युपास्यत्यासन्दीꣳ रुक्मस्य प्रबन्धनमथोप- १५
तिष्ठते ऽसुन्वन्तमयजमानमिच्छ देवीमहं निर्ऋतिं वन्दमान
इति द्वाभ्यामथापो व्यतिषिच्य परास्य पात्रमनवेचमाणा

---

१ चन्यचैवावेच॰ Bhav.; चन्यचेवेच॰ Tr.

२ ॰द्रप्सान् U (sec. m.) Ms, Dvaidha and probably also M; द्रप्सं Be H Tr U (pr. m.). Bhav., Kes.

३ M ins., perhaps rightly: शिक्यं।

४ Thus Tr Bu U (sec. m.) Ms Bhav.; निरस्यति MHB Be U (pr. m.)

आयन्ति । हस्तपादान्प्रक्षाल्यैतेनैव यथेतमेत्य गार्हपत्यमुपतिष्ठन्ते निवेशनः संगमनो वसूनामित्याहवनीयमु हैक उपतिष्ठन्ते ऽयमितो ऽधि गार्हपत्यो भविष्यतीति । ॥ २२ ॥ षष्ठः ॥

अथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा राजानं क्रीलोद्धातिथ्यं निर्वपत्यातिथ्येन प्रचर्य प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथोपनिष्क्रम्य[1] संप्रेषमाह सुब्रह्मण्य सुब्रह्मण्यामाक्रय चिस्तनव्रतं प्रयच्छतेत्याक्रयति सुब्रह्मण्यः सुब्रह्मण्यां । चिस्तनव्रतं प्रयच्छति[1] । स पुच्छादेवाग्ने चतुरः प्रतीचः प्रक्रमान्प्रक्रामति दक्षिणा पञ्चमं । तत्पत्नी निदधाति । स उपरवाणां कालो । ऽथ महावेद्या उत्तरादंसीयाच्छङ्कोर्वर्त्मन्तेन द्वादश प्रतीचः प्रक्रमान्प्रक्रामत्युदञ्चं त्रयोदशं । तदाग्नीध्र उपसीदति । स उत्करस्य कालो । ऽथोपरवाणां कालात्स्रुवयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं चिर्यजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिग्रह्णाति । करणं जपत्युद्धन्त्युद्धतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथाग्नेण शालां तिष्ठन्संप्रेषमाह वेदिकारा वेदिं कल्पयतेति । यथासंप्रेषं ते कुर्वन्त्यथ कार्ष्णाजिनीरुपानह उपमुञ्चन्ते चिते स्रेत्यध्वर्युराचिते स्रेति प्रतिप्रस्थाता मनश्चिते स्रेति ब्रह्मा तपश्चिते स्रेति यजमानश्चिते स्रा चिते स्रेत्येव वा सर्वे । ऽपि वा तूष्णीमेवाथ याचति धनुर्बाणवच्चतुरो ऽश्मन ऐन्द्रीमिष्टकां विभक्तिमुदपात्रं दर्भस्तम्बं दूर्वामाज्यस्थालीꣳ सस्रुवामित्येत-

[1] The clause चथोपनिष्क्रम्य...प्रयच्छति is not found in M.Tr H.

त्समादायोत्तरे श्रोणिन्ते सꣳसादयन्त्यथ[1] द्वाभ्यामात्मन्यग्निं[2] गृहीते मथि गृह्याग्नये अग्निं यो नो अग्निरिति[3] स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति[3] श्वेतमश्वमभिमृशन्नाःग्कॅरमिमासुपदधाति प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथादत्ते धनुर्बाणवच्चतुरो ऽग्मन दृत्येतत्समादाय जघनेन दक्षिणेनाग्निं परीत्याग्नेय्या पूपावटीयꣳ ग्रङ्कुं तिष्ठन्धनुरधिज्यं कृत्वायत्यान्तःग्कॅरमिषुं निहन्ति ॥ २३ ॥

इन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पश्य दृत्यादृह्याग्मानमुपदधाति यो नः पुरस्तादघायुरभिदासत्येतꣳ सो ऽग्मान- १०
मृच्छत्वित्यथ दक्षिणस्य पक्षस्य दक्षिणे पक्षोपग्नव[4] आयत्यान्तःग्कॅरमिषुं निहन्त्यादृह्याग्मानमुपदधाति[4] यो नो दक्षिणत दृत्यथ पुच्छस्यापरे पुच्छोपग्नव[4] आयत्यान्तःग्कॅरमिषुं निहन्त्यादृह्याग्मानमुपदधाति यो नः पग्चादित्यथोत्तरस्य पक्षस्योत्तरे पक्षोपग्नव[4] आयत्यान्तःग्कॅरमिषुं निहन्त्यादृह्याग्मानमुप- १५

---

१ Thus (plural) Tr U Be B Ms (sc. परिक्रमिणः according to Msc); ०सादयत्यथ MH.

२ Thus M Tr Be Ms; आत्मग्न० H; आत्मन० B.

३ Instead of उपग्नव (cf. Śulba-sūtra 6, where, however, the var. r. उपग्नय and उपग्नय, cp. Lāty. I. 5.7, Drāhy. II. 1.10, are found) the MSS. have mostly उपयय or उपग्नय।

४ Here Bu breaks off; here and infra M Tr U (pr. m.) every time निहत्यादृह्य०।

दधाति यो न उत्तरत इति । दिचूंपदधातीति ब्राह्मणं । तयादेवतं कृत्वा सूददोहसः[१] करोत्यथैतामैन्द्रीमिष्टकामाक्रमणं प्रत्युपदधाति स इं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनाम् । यो गोत्रभिद्वज्रभृद्यो हरिष्टाः स, इन्द्र चित्राꣳ अभिदन्धि वाजानिति । तयादेवतं कृत्वा सूददोहसं करोत्यथ[२] दक्षिणतो विभक्तिमुपदधात्यग्न आयाहि वीतय इति । तयादेवतं कृत्वा सूददोहसं करोत्यथाधिद्रुत्य[२] स्वयमातृणीयꣳ शङ्कुमुदृह्योदपात्रमुपनिनीय दर्भस्तम्बमुपदधाति वाक्षा समुद्र उपदधात्विति वा तूष्णीं वाथैनꣳ स्रुवाऽऽहुतिभिरभिजुहोति सजूरब्दो ऽयावभिरिति पञ्चभिरथ दूर्वामुपदधात्यायने ते परायणे दूर्वा रोहन्तु पुष्पिणीः । उत्सो वा तत्र जायते ह्रदो वा पुण्डरीकवानिति[३] । तयादेवतं कृत्वा सूददोहसौ करोत्यथास्यैतत्पुरस्तादेवौदुम्बरं युगलाङ्गलं कारितं भवति ॥ २४ ॥

[४]षड्वं वा द्वादशगवं वा । तस्य वरत्राः संसृजति सं वरत्रा दधातन निष्कृताहावमवटमिति द्वाभ्यां । युनक्ति सीरा

---

१ ०दोहसं M Tr H.

२ Thus B Bhav. Ms.; the passage अथ दक्षिणतो···करोति (l. 7) is inserted by M Tr BHU infra l. 13 after ०दोहसौ करोति ; but cp. the order, in which supra p. 21, 20 the substances are enumerated.

३ cp. Ath. V. vi. 106. 1.

४ cp. Pitṛmedhasūtra p. 22, 5 sqq,

युञ्जन्ति कवयो युगा युनक्त सीरेति द्वाभ्यां । क्षपति लाङ्गलं पवीरवꣳ शुनं नः फाला दृति द्वाभ्याꣳ । सीतां प्रत्यवेक्षते कामं कामदुघे धुक्ष्व पृतेन सीतेति द्वाभ्याꣳ । स पुच्छादेवाग्ने तिस्रः प्राचीः सीताः क्षपत्युत्तरायै श्रोणेर्दक्षिणमꣳसमभि तिस्रो । दक्षिणायै श्रोणेरुत्तरमꣳसमभि[१] तिस्रो । दक्षिणात्यचादुत्तरं पचमभि तिस्रो । ऽथैतान्विमुच्य प्रदक्षिणमावर्त्याङ्गिरभ्युच्छोदीच उत्सृजति[२] । त एते ऽध्वर्योर्भवन्ति यदि दक्षिणावता यजते । यद्यु वै सत्रियो[३] ऽग्निर्यथागवं व्युदक्यन्ति[४] । यत्रैवानड्वाहस्तद्युगलाङ्गलमथास्यैतत्पुरस्तादेवौदुम्बरे द्रोणे सर्वौषधं दध्याज्येन समुदायुतं भवति । स पुच्छादेवाग्ने तिस्रः प्राचीः सीता वपति या जाता ओषधय इति तिसृभिरनुच्छन्दसमुत्तरायै श्रोणेर्दक्षिणमꣳसमभि तिसृभिर्दक्षिणायै श्रोणेरुत्तरमꣳसमभि[५] तिसृभिर्दक्षिणात्यचादुत्तरं[६] पचमभि पञ्चभिश्चतुर्दग्रभिर्वपतीति ब्राह्मणमथ दिग्भ्यो लोष्टान्समस्यति । सो ऽत एव प्राङ् द्रुत्वा बहिःशर्कराल्लोष्टमादत्ते । तमन्तःशर्करं न्यस्यति ॥ २५ ॥

---

१ Thus MT Ms ; श्रोणेरोत्तर० all the other MSS.

२ Thus M Tr UHB Be Keś. (the MS. of the India Office has twice उत्सृजंति, both times corrected into singular) ; उत्सृजंति Msc ; cp. TS. v. 2.5.3.

३ Thus (or सचियो ) all exc. MB Keś., which have सचिणो ।

४ Thus B ; व्यादचन्ति Ms ; व्युदंचंति M Tr Be U (pr. m.) ; व्युदंचति U (sec. m.).

५ Thus M (pr. m.) and Ms ; the other MSS श्रोणेरोत्तर० ।

६ Thus Ms only ; all the other MSS. पत्चादोत्तरं ।

मा नो हिंसीज्जनिता यः पृथिव्या द्यौर्यथ दक्षिणं पक्ष-
मनुद्रुत्य बहिःग्रर्कराल्लोष्टमादत्ते । तमन्तःग्रर्करं न्यस्यत्यभ्या-
वर्तस्व पृथिवीत्यथ पुच्छमनुद्रुत्य बहिःग्रर्कराल्लोष्टमादत्ते ।
तमन्तःग्रर्करं न्यस्यत्यग्ने यत्ते शुक्रं यच्चन्द्रमित्यथोत्तर पक्षमनु-
द्रुत्य बहिःग्रर्कराद्यौ लोष्टावादत्त दृषमूर्जमहमित आदद
इति । तयोरन्यतरमन्तःग्रर्करं न्यस्यत्या नो गोषु विग्रलौषधी-
ष्विति । तां दिग्रमितरं निरस्यति यस्मास्य दिग्रि द्वेष्यो
भवति जहामि वेदिमनिराममीवामित्यादत्त एवैतां दिग्र-
मभि संपादयेदित्येतदेकं । यजुषा[1] यजुर्विपरिहरेदित्येतदपर-
मथ महावेद्या उत्तरादंसीयाच्छङ्कोर्वेद्यन्तेन चोग्रतीचः प्रक्र-
मान्प्रक्रामत्युदञ्चं चतुर्थं । तच्चालाञ्जस्यादृता चालालं परिलिख-
त्युत्तरवेदेरादृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्साद्य सिकता
निवपत्यग्ने तव श्रवो वय इति षड्भिरनुच्छन्दसमथोर्ध्वचित
उपदधाति चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देव-
तयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुवूहत्याप्यायस्वेति गायत्र्या
ब्राह्मणस्य सं ते पयांसीति त्रिष्टुभा राजन्यस्य । यथासुप्त
यथाग्रकरमनुव्यूहति ॥ २६ ॥ सप्तमः ॥

अथैतां महाचितिं संसादयन्यथेष्ट[2] शालामुच्छ्रायां वा

---

१ MB Be Tr U Ms ins. वा ; H om. this word as also the Dvaidhasūtra.

२ संसादयत्य॰ H Tr Bhav.

चर्मणि वा द्वाविंशतिं[1] च[1] दर्भपुञ्जीलानि पयःप्रोक्षं चाज्य-
प्रोक्षं चाश्वं चौत्तरवेदिकांश्च संभारान्बार्हस्पत्यचयोदग्राञ्च[2]
कुम्भेष्टकास्तावत एव हिरण्मयाल्कान्मतं[3] चोदकुम्भं च पुष्करपर्णं
च रुक्मं च हिरण्मयं च पुरुषं स्रुचौ च सर्पशिरश्च सर्वं च
स्वयमातृण्णानिकोतं दश च स्कन्ध्या अवकाश्च या उ चान्या ५
उपधास्यन्भवति ता दधि च मधुमिश्रं कूर्मं चौदुम्बरं चोलू-
खलमुसलं सर्वौषधं चोखाश्च पशुशीर्षाणि चेति[4] द्वाविंश-
तिं[5] दर्भपुञ्जीलानि पयःप्रोक्षे ऽवधाय तैः प्रोक्षत्यग्नीन्वो
ऽग्निभ्यो जुष्टान्प्रोक्षामीति वा तूष्णीं वाग्निनाग्निः समिध्यत
इत्याज्यप्रोक्षेणाथ संप्रैषमाहाग्निभ्यः प्रणीयमानेभ्यो ऽनुब्रूहीति[6] १०
यदि होता न कामयते यजमान एव पुरीष्यासो ऽग्नय
इत्येतामेकां चिरन्वाहाथाग्निप्रथमाः[7] प्रतिपद्यन्ते[8] ऽथैतेनाश्वेन
प्राचाधिद्रवति ॥ २७ ॥

अभ्यस्यादित्याः पृतना अरातीरित्यथ दक्षिणमूरुमभ्यव-
क्रामन्तमनुमन्त्रयते यदक्रन्दः प्रथमं जायमान इत्युत्तरे १५

---

१ om. HM; च only found in U (sec. m.) and Ms.

२ Thus TB Be U (sec. m); बार्हस्पत्यं चदचयो० HU (pr. m.); बार्हस्पत्यचरं चयो० M.

३ Thus (०अल्का०) M Tr. Be U Ms; ०अकला० Be.; अक्षका० HU (pr. m.).

४ Most of the MSS. ins. च।

५ अथाग्नप्रथमाः MH.

६ प्रपद्यते H.

श्रोणन्ते सꣳसादयन्त्यथ[1] द्वाभ्यामात्मन्यग्निं[2] गृह्णीते मयि गृह्णाम्यग्ने अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो न्यानि धामेति । श्वेतमश्वमभिमृशत्यधिद्रवत्यपामिदं न्ययनं समस्त इति द्वाभ्यामथ पुच्छसन्धौ चात्मसन्धौ च
५ सतं निदधात्यथोदकुम्भं[3] पर्यस्यत्यादत्ते दक्षिणेन कुम्भꣳ सव्येन कुम्भीꣳ सतात्पूरयित्वा हिरण्यशल्कौ प्रत्यस्य या एता दक्षिणादꣳसात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति ॥ २८ ॥

हिरण्यवर्णाः शुचयः पावका यासाꣳ राजा वरुणो याति
१० मध्य इति द्वाभ्यामेवमेव पूरयित्वैवं प्रत्यस्य या एता उत्तरार्धे श्रोणेः स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति तृतीयया च चतुर्थ्या चैवमेव पूरयित्वैवं प्रत्यस्य या एता दक्षिणार्धे श्रोणेः स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति पञ्चम्या च षष्ठ्या चैवमेव पूरयित्वैवं प्रत्यस्य
१५ या एता उत्तरादꣳसात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति सप्तम्या चाष्टम्या चैवमेव पूरयित्वैवं प्रत्यस्य या एता दक्षिणात्पुच्छात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति नवम्या च दशम्या चैवमेव पूरयित्वैवं प्रत्यस्य या एता उत्तरात्पुच्छात्स्वयमातृण्णामभ्याद्रवन्ति तासु

---

१ ॰सादयंत्य॰ Tr Be BU Ms; सादयत्य MH.

२ Thus M Tr Be U Ms; त्मन BH.

३ निधाय instead of निदधाति M Tr HU, omitting the following सत्य।

विषुवत्यनुसीतमुपदधात्येकादश्या च द्वादश्या च. तासां बार्हस्पत्यं मध्य[1] उपदधाति दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या संभव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वेत्यनुसीतमुपदधातीति ब्राह्मणं। तयादेवतं कृत्वा सूददोहसः करोति। ॥ २९ ॥

अथोत्तरवेदेरावृतोत्तरवेदिमलङ्करोत्यथोत्तरवेद्यामपां पृष्ठमसीति पुष्करपर्णमुपदधाति। तयादेवतं कृत्वा सूददोहसं करोत्यथोत्तरवेद्यामेवोत्तरनिर्वाधꣳ स्रक्चमुपदधाति ब्रह्म जज्ञानमित्यथैनमङ्गुष्ठानामिकाभ्यां पञ्चगृहीतेन व्याघारयति कृणुष्व पाजः प्रसितिं न पृथ्वीमित्यथ दक्षिणतः प्राञ्चꣳ हिरण्मयं पुरुषमुपदधाति हिरण्यगर्भः समवर्तताग्र इत्यथैनमभिमृशति द्रप्सश्चस्कन्देति। तयादेवतं कृत्वा सूददोहसौ करोत्यथोत्तरतः प्रक्रमवेलायाꣳ स्रुचावुपदधात्याज्यस्य पूर्णां कार्ष्मर्यमयीं दध्नः पूर्णामौदुम्बरीं दक्षिणां कार्ष्मर्यमयीमुत्तरामौदुम्बरीमियमसीति कार्ष्मर्यमयीमसावसीत्यौदुम्बरीं मनसैव। तयादेवतं कृत्वा सूददोहसौ करोत्यथ दक्षिणे प्रललाटे सर्पगिर उपदधाति नमो अस्तु सर्पेभ्य इति तिसृभिरनुच्छन्दसमपि वा यतउच्चारं जनपदस्य जन्यं भयं मन्यते। तयादेवतं कृत्वा सूददोहसं करोति। ॥ ३० ॥ अष्टमः ॥

अथ स्रुवमाहवणीयं यजुषा करोति ध्रुवासि धरुणास्तृता विश्वकर्मणा सुकृता। मा त्वा समुद्र उदधौन्मा सुपर्णो ऽव्यथ-

---

[1] मध्यं M only.

माना पृथिवीं दृꣳहेत्यैनामश्वमवघ्राप्य विदुषा ब्राह्मणेन सह्याधिद्रुत्योपदधाति यथैतस्य पुरुषस्य प्राणैः प्राणाः संनिधीयेरन्नापिधीयेरन्भूः प्रजापतिस्त्वा सादयत्वित्यनुद्रुत्याग्निस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यनुप्राण्यात्प्रथमाꣳ स्वयमातृण्णामुपधायेत्यनुप्राणित्यैष ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमातृण्णावकाग्ने जुहोति चित्तिं जुहोमि मनसा घृतेनेत्यङ्गुष्ठाभ्यामन्वारभ्यान्वारोहं वाचयति पृथिवीमाक्रमिषं प्राणो मा मा हासीदित्यपरे विले हिरण्येष्टकामुपदधाति तेजो ऽसि तेजो मे यच्छ पृथिवीं यच्छ पृथिव्यै मा पाहीति तां जघनेन प्रक्रमंवेलायां मण्डलेष्टकामुपदधाति पृथिव्युदपुरमन्नेन विष्टेति दक्षिणतो रेतःसिचमुपदधाति पृथिवी रेतःसिक्ता मे रेतो दधातु सा मे रेतः प्रजनयत्विति तयादेवतं कृत्वा सूद्दोहसः करोति ॥ ३१ ॥

अथैता दश स्वयमूः प्राचीरायातयति द्वे रुक्मे द्वे द्वियजुषी विराजं च विश्वज्योतिषं च सयुजं चाषाढां च द्वे संयान्यावृतघ्ने उपदधाति मधुश्च माधवश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीत्यथ द्वियजुषी उपदधाति काण्डात्काण्डात्प्ररोहन्ती या शतेन प्रतनोषीति द्वाभ्यां दूर्वेष्टकामथ हिरण्यमूर्धीमुपदधाति यास्ते अग्ने सूर्ये रुचो या वो देवाः सूर्ये रुच इति विराजं च विश्वज्योतिषं च विराट् ज्योतिरधारयद्बृहस्पतिस्त्वा सादयत्वित्युत्तरामथ सयुजमुपदधातीन्द्राग्निभ्यां त्वा सयुजा

युजा युनज्मीत्यषाढां आलिखितामुत्तरलक्षाणमुपदधात्य-
षाढासि सहमानेत्यथ संवान्यावुपदधात्यग्नेर्वान्यसि देवानामग्ने-
वान्यसीति । तयादेवतं कृत्वा सूददोहसः करोति । ॥ ३२ ॥

अथोत्तरेण आलिखितामुपविश्य याचति दधि च मधु-
मिश्रं कूर्मं च । तं दध्ना मधुमिश्रेणाभ्यनक्ति मधु वाता ऋता- ५
यत इति तिसृभिरनुच्छन्दसमथैनमवकाभारेण परिवेष्य
पुरस्तात्पत्यञ्चमुपदधाति महो द्यौः पृथिवी च नस्तस्व आशाः
प्रचरन्त्वग्नय इति द्वाभ्यामथैनꣳ शङ्कुभिः परिणिहन्त्यभितो
ऽनवसर्पणाय । तयादेवतं कृत्वा सूददोहसं करोत्यथाचैव तिष्ठ-
न्याचत्यौदुम्बरं चोलूखलमुसलꣳ सर्वौषधं च । तदेतन्मादेग्न- १०
मात्रमुलूखलं भवत्यरत्निमात्रं मुसलं । तस्मिन्सर्वौषधमवहन्नूर्जो
भागो ऽसूर्जः पवित्रमूर्गसि मन्त्राद्यायेत्यथैनदुत्तरतः[१] प्रक्रमवेला-
यामुपदधाति तद्विष्णोः परमं पदमिति । लोकंपृणामुत्तरतो
मुसलं करोति । तयादेवतं कृत्वा सूददोहसौ करोत्यथ
मुख्यामुखां याचति । तस्यामन्तरवसावित्रौ द्वे स्रुवाङ्कृती १५
जुहोत्यग्ने युक्ष्वा हि ये तवेति दक्षिणे बिले जुहोति युक्ष्वा
हि देवहूतमानित्युत्तरे । ऽथैनामुत्तरतः प्रक्रमवेलायामुप-
दधाति ध्रुवासि पृथिवि सहस्व पृतन्यत इति । लोकंपृणे
उत्तरत इतरे करोति । तयादेवतं कृत्वा सूददोहसः करो-
त्यथैतत्पुरुषशिरो याचति । तस्य प्राणेषु हिरण्यशल्काग्र्यत्यस्यति २०

---

१ Thus U (sec. m.) and Ms ( अनत् सर्वौषधेन पूर्णमुलूखलम् Msc.); अथैनमु॰ all the other MSS. and U (pr. m).

द्रुपश्चस्कन्देत्याह्वे ऽभूदिदं विश्वस्य भुवनस्य वाजिनमिति दक्षिणस्यां नासिकायामग्नेर्वैश्वानरस्य चेत्युत्तरस्यामग्निर्ज्योतिषा ज्योतिष्मानिति दक्षिणे ऽक्ष्णि रुक्मो वर्चसा वर्चस्वानित्युत्तर स्रुचे लेति दक्षिणे कर्णे रुचे लेत्युत्तरे । ऽथ स्रुचि चतुर्गृहीतं ५ गृहीत्वा दक्षिणे ऽक्ष्णि जुहोति चित्रं देवानामुदगादनीकमित्यपरं चतुर्गृहीतं गृहीत्वोत्तरे ऽक्ष्णि जुहोति चित्रं देवानामिति । समान्या जुहोतीति ब्राह्मणमथैनद्दध्ना मधुमिश्रेण पूरयति समित्स्रवन्ति सरितो न धेना इत्यान्ताद्दनुवाकस्यैथैनत्प्राचीनमुत्तानमुखायामुपदधाति ॥ ३३ ॥

१० आदित्यं गर्भं पयसा समङ्ग्धीत्यनुद्रुत्येमं मा हिꣳसीर्द्विपादं पशूनामिति । मयुमारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधाति विश्वकर्मा दिशां पतिरित्यथ पुरस्तात्प्रत्यङ्मुख उपविश्यान्तरात्मन्नश्वस्य शिर उपदधाति वातस्य ध्राजिं वरुणस्य नाभिमित्यनुद्रुत्येमं मा हिꣳसीरेकशफं १५ पशूनामिति । गौरमारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधाति प्रजापतिर्दिशां पतिरित्यथ पश्चात्प्राङ्मुख उपविश्यान्तरात्मन्नृषभस्य शिर उपदधात्यजस्रमिन्दुमरुषं भुरण्युमित्यनुद्रुत्येमꣳ समुद्रꣳ शतधारमुत्समिति । गवयमारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे २० हिरण्येष्टकामुपदधाति रुद्रो दिशां पतिरित्यथ दक्षिणत उदङ्मुख उपविश्यान्तरात्मन्नृष्णेः शिर उपदधाति वरूत्रिं त्वष्टुर्वरुणस्य नाभिमित्यनुद्रुत्येमामूर्णायुं वरुणस्य मायामित्युष्ट्र-

मारण्यमनु ते दिशामीति शुचमनूत्सृजति ललाटे हिरण्ये-
ष्टकामुपदधाति वरुणो दिशां पतिरित्यथोत्तरतो दक्षिणा-
मुख उपविश्यान्तरात्मन्वस्तस्य शिर उपदधात्रि यो अग्नि-
रग्नेस्तपसो ऽधि जात इत्यनुद्रुत्याजा ह्यग्नेरजनिष्ट गर्भादिति
प्रारभमारण्यमनु ते दिशामीति शुचमनूत्सृजति ललाटे ५
हिरण्येष्टकामुपदधात्यग्निर्दिशां पतिरित्यन्तेषु तस्य व्युदू-
ह्योपदध्यादिति ब्राह्मणं तथादेवतं कृत्वा सूददोहसः
करोति ॥ ३४ ॥ नवमः ॥

अथापस्या उपदधात्यपां त्वेमन्त्सादयामीति पञ्च पुर-
स्तात्प्रतीचीरुपदधाति पञ्च दक्षिणतः पञ्च पश्चात्प्राचीः पञ्चो- १०
त्तरतश्छन्दस्यास्तथादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत
उपदधात्ययं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो
गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोः
स्विष्टस्विष्टतो रथंतरꣳ रथंतरादसिष्ठ ऋषिः प्रजापतिगृहीत-
या त्वया प्राणं गृह्णामि प्रजाभ्य इति दश प्राचीरायातयति १५
स्वयमातृण्णायै अयं दक्षिणा विश्वकर्मेति दश दक्षिणा
प्रायातयति स्वयमातृण्णायै अयं पश्चाद्विश्वव्यचा इति दश
प्रतीचीरायातयति स्वयमातृण्णायै इदमुत्तरात्सुवरिति दशो-
दीचीरायातयति स्वयमातृण्णायै इयमुपरि मतिरिति दश-
भिरुपरिष्टात्प्रदक्षिणं परिचिनोत्यक्षण्वयोपदधातीति ब्राह्मणं २०
तथादेवतं कृत्वा सूददोहसः करोत्यथ संयत उपदधात्यायुषः
प्राणꣳ संतन्वितीति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये तया-

देवतं कृत्वा सूददोहसः करोत्यथापानभृत उपदधाति प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं चिद्वस्तोमः स उ पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानस ऋषिरिति । वाचयति पितरः पितामहा इति । दक्षिणेन प्राणभृतो दश प्रतीचीरायातयति स्वयमाहृषामभि दक्षिणा दिशामिति । जघनेन प्राणभृतो दशोदीचीरायातयति स्वयमाहृषामभि प्रतीचीं दिशामित्युत्तरेण प्राणभृतो दश प्राचीरायातयति[1] स्वयमाहृषामभ्युदीचीं दिशामित्यंसेन प्राणभृतो दश दक्षिणा आयातयति स्वयमाहृषामभ्यूर्ध्वां दिशामिति । वाह्येन प्राणभृतो दशभिरुपरिष्टादपसलैः परिचिनोति । विष्वचीरुपदधातीति ब्राह्मणमपानभृद्भिश्चितिराप्यते । तथादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ सर्वतोमुखं चिनुते[2] । ॥ ३५ ॥

गायत्रीं पुरस्तादुपदधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्ये[3] । तथादेवतं कृत्वा सूददोहसः करोत्यथाग्नेरङ्गान्युपदधाति प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसाग्निना देवतयाग्नेः शीर्ष्णाग्नेः शिर उपदधामि दक्षिणया त्वा दिशा सादयामि प्रतीच्या त्वा दिशा सादयाम्युदीच्या त्वा दिशा सादयाम्यूर्ध्वया त्वा दिशा सादयामि पाङ्क्तेन छन्दसेति । तथादेवतं कृत्वा सूददोहसः करोत्यथोत्त-

---

१ Thus Tr HBU Ms; प्रतीचीर M Bc.

२ Thus Tr Be BU Ms; चिनोति MH.

३ मध्य इति M.

रतः प्राजापत्यामुपदधाति संवत्सरस्य प्रतिमास्मिति[1] तां जघनेन प्रक्रमवेलायां प्राञ्चमृषभमुपदधाति त्वामग्ने वृषभं चेकितानमिति[1] तयादेवतं कृत्वा सूददोहसौ करोत्यथ लोकंपृणा उपदधाति लोकं पृण छिद्रं पृणाथ सीद ध्रुवा त्वम्। बृहस्पतिरग्निन्योनावसीषदन्निति[1] तयादेवतं[2] करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इति[1] प्राच्याच लोकंपृणया प्रसौत्यग्निं प्राचीभिः संप्रच्छादयन्ति[1] संप्रच्छदं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिकृत्पृष्ठाभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या गायत्र्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्मा आसन्प्राणदा इत्यथापराह्णिकीभ्यां[3] प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते[1] वसन्येताꣳ राचिम्[1] ॥ ३६ ॥ दशमः ॥

अथ द्वितीये ऽह्नुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरत्यथ कार्ष्णाजिनी[2] उपानहावुपमुञ्चते[2] अध्वर्युश्च यजमानश्चाथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्ने अग्निं यो नो अग्निरिति[1] स्वयंचितिं जपति यास्ते अग्ने समिधो यानि

---

१ Thus M Tr. Ms; the other MSS. abbreviate the following passage.

२ अथापराह्ण (or ह्न) आपराह्णि॰ Be U. Ms.

३ Thus M Tr U Ms; ॰जिनीवृपा॰ B; ॰जिनिरुपा॰ H; Be defect.

धामेति । कृष्णमश्वमभिमृश्य तनुपुरीषमुपदधाति पृष्टो दिवीति । तथादेवतं कृत्वा सूददोहसं करोत्यथापराह्णिकीभ्यां[1] प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्येताꣳ रात्रिमथ तृतीये ऽह्नुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते । अथ याचत्याज्यस्थालीꣳ सक्तुवां विभक्तिमुदपात्रं पञ्च च स्कन्ध्या अवकाश्च या उ चान्या उपधास्यन्भवति ता । एतत्समादायोत्तरे श्रोण्यन्त सꣳसादयन्त्यथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्ने अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त दृति द्वाभ्यामथाधिद्रुत्य प्रथमे संचिताञ्जली जुहोत्यग्न उदधे तत्त्वा यामीति । दक्षिणतो विभक्तिमुपदधात्यग्निं दूतं वृणीमह दृति । तथादेवतं कृत्वा सूददोहसं करोति ॥ ३७ ॥

अथैताः पञ्च स्कन्ध्याः प्राचीरायातयति द्वे चतस्रो द्वे सयुजावेकाꣳ संयानीꣳ सतस्रो उपदधाति शुक्रश्च शुचिश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीत्यथ सयुजावुपदधात्याघाराभ्यां त्वा संयुजा युजा युनज्मि तेजसा त्वा सयुजा युजा युनज्मीत्यथ संयानीꣳरुपदधाति वायोर्योन्यसीति । तथादेवतं कृत्वा सूददोहसः करोत्यथाश्विनीरुपदधाति ध्रुवचितिर्ध्रुवयोनिरिति पञ्चैकैकां द्विरेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करो-

---

१ अथापराह्ण आप० Be. JH Ms.

त्यथर्तव्या उपदधाति सजूर्ऋतुभिः सजूर्विधाभिरिति पञ्चैकैकां दिक्षेकां मध्ये । समानप्रभृतयो भवन्ति समानोदर्का इति ब्राह्मणं । तयादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत उपदधाति प्राणं मे पाह्यपानं मे पाहीति पञ्चैकैकां दिक्षेकां मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथ वृष्टिसनीरुपदधात्यपस्निन्वौषधीर्जिन्वेति पञ्चैकैकां दिक्षेकां मध्ये । ऽनुपरिहारꣳ सादयतीति ब्राह्मणं । तयादेवतं कृत्वा सूददोहसः करोत्यथ मूर्धन्वतीरुपदधाति विष्टम्भो वय इति चतस्रः पुरस्ताद्धꣳसपातिनीरुत्तयादेवतं[1] कृत्वा सूददोहसः करोत्यथ वयस्या उपदधाति । अविर्वय इति पञ्च दक्षिणायाꣳ श्रोण्यामुपदधाति पष्ठवाड्वय इति पञ्चोत्तरस्यां । वस्तो वय इति दक्षिणे ऽꣳस उपदधाति । ऋष्णिर्वय इत्युत्तरे । व्याघ्रो वय इति दक्षिणे पक्ष उपदधाति । सिꣳहो वय इत्युत्तरे । पुरुषो वय इति मध्ये । पुरुषेण चितिराप्यते । तयादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ सर्वतोमुखं चितुते ऽग्नेरङ्गानि प्राजापत्यान्यृषभं लोकंपृणा । उदीच्याच लोकंपृणयेत्यग्निमुदीचीभिः संप्रच्छादयन्ति । संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिकृत्याभिमृशति चित्ति-

---

१ Thus (°पातिनीस्) MBU Bhav. (one MS.); पातीनीस् Be; °पादिनीस् Tr H Bhav. (another MS.), Kes. (twice), Ms. (but Msc.: हंसपतनवक् वक्रया गत्या यादेयाः, and यथा भवेयुर्हंसपातिन्य इति गोपालः)।

मचित्तिं चिनवद्वि विद्वानित्याग्नेय्या चिष्टुभैतां चितिमभि-मृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा इत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ राचिम् । ॥ २८ ॥ एकादशः ॥

अथ चतुर्थे ऽह्नुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । समानं पुरीषस्योपधानमथ पञ्चमे ऽह्नुदित आदित्ये प्रवर्ग्योप-सद्भ्यां प्रचरति । सर्व एव काष्णाजिनीरुपानह उपमुञ्चते । ऽथ याचत्याज्यस्थालीꣳ सस्रुवां विभक्तिमुदपात्रꣳ सर्वं च स्रुव-माहवनिकोतं दृग्घ च स्कन्ध्या अवकाꣳश्च या उ चान्या उप-धास्यन्भवति ता । एतत्समादायोत्तरे श्रोण्यन्ते सꣳसादयन्त्यथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्ने अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृशत्यधिद्रवत्यपामिदं न्ययनं समुद्र इति द्वाभ्यामथाधिद्रुत्य द्वितीये संचिताहुती जुहोत्यग्ने दुग्ध तत्त्वा यामीति । दक्षिणतो विभक्तिमुपदधात्यग्निनाग्निः समि-ध्यत इति । तथादेवतं हुत्वा सूददोहसं करोत्यथ स्वयमाहव-नीयमश्वमवघ्राप्याविदुषा ब्राह्मणेन सहाधिद्रुत्योपदधाति भुव इन्द्राग्नी अव्यथमानामित्यनुद्रुत्य वायुस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । व्यत्या-द्वितीयासूपधायेति । प्राणापानेति । स व्यानो ऽयेष ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमाहवनीयावकाग्ने जुहोति चित्तिं जुहोमि मनसा घृतेनेत्यङ्गुष्ठाभ्यामन्वारभ्या-

न्वारोहं वाचयत्यन्तरिक्षमाक्रमिषं प्रजा मा मा हासीदित्यपरे बिले हिरण्येष्टकामुपदधाति ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहीति तां जघनेन प्रक्रमवेलायां मण्डलेष्टकामुपदधात्यधिद्यौरन्तरिक्षं ब्रह्मणा विष्टेति दक्षिणतो रेतःसिचमुपदधात्यन्तरिक्षꣳ रेतःसिक्तन्मे रेतो दधातु तन्मे रेतः प्रजनयतिति मनसैव तयादेवतं कृत्वा सूददोहसः करोति ॥ ३९ ॥

अथैता दश स्कन्धाः प्राचीरायातयति चतस्र कृतव्याः समाजं च विश्वज्योतिषं च द्वे मयुजौ द्वे संयान्यावृतव्या उपदधाति नभश्च नभस्यश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीतौषश्चोर्जश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीति समाजं च विश्वज्योतिषं च समाट् ज्योतिरधारयद्विश्वकर्मा त्वा सादयत्वित्युत्तरामथ मयुजावुपदधाति वर्चसा त्वा मयुजा युजा युनज्मीत्यथ संयान्यावुपदधाति देवानां वायोयान्यस्यन्तरिक्षस्य यान्यसीति तयादेवतं कृत्वा सूददोहसः करोत्यथ दिशा उपदधाति राज्ञ्यसि प्राची दिगिति पञ्चैकैकां दिक्षेकां मध्ये तयादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत उपदधात्यायुर्मे पाहि प्राणं मे पाहीति दश पुरस्तात्प्राचीस्तासां ज्योतिष्मतीमुत्तमामुपदधाति तयादेवतं कृत्वा सूददोहसः करोत्यथ कृहतीरुपदधाति मा छन्द इति द्वादश दक्षिणतः पृथिवी छन्द इति द्वादश पश्चादग्निर्देवतेति द्वादशोत्तरतस्तयादेवतं कृत्वा सूददोहसः

करोत्यथ वालखिल्या उपदधाति मूर्धासि राडिति सप्त पुरस्तात्प्रतीचीरुपदधाति यन्त्री राडिति सप्त पश्चात्प्राचीर्वालखिल्याभिश्चितिराप्यते तयादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यान्यृषभं लोकंपृणाः प्राच्याच लोकंपृणया प्रसौत्यग्निं प्राचीभिः संप्रच्छादयन्ति संप्रच्छदं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिकृष्णाभिर्मृशति चित्तिमचित्तिं चिनवद्दि विद्वानित्याग्नेय्या जगत्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा इत्यथापरार्धिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतद्दः कर्म क्रियते वसन्त्येताꣳ राचिम् ॥ ४० ॥ द्वादशः ॥

अथ षष्ठे ऽह्नुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति समानं पुरीषस्योपधानमथ सप्तमे ऽह्नुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते ऽथ याचत्याज्यस्थालीꣳ सस्रुवां विभक्तिमुदपात्रं पञ्च च स्कन्द्या अवकाश्च या उ चान्या उपधास्यन्भवति ता एतत्समादायोत्तरे श्रोणन्ते सꣳसादयन्त्यथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्ने अग्निं यो नो अग्निरिति स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं समुद्र इति द्वाभ्यामथाधिद्रुत्य तृतीये संचितासुतौ जुहोत्यग्ने गच्छ तत्त्वा यामीति दक्षिणतो विभक्तिमुपदधात्यग्निर्वृचाणि जङ्गनदिति तयादेवतं कृत्वा सूददोहसं करोत्यथैताः पञ्च स्कन्द्याः प्राचीरायातयति द्वे ऋतव्ये द्वे

सयुजावेकाꣳ संयानीमृतव्ये उपदधाति सहꣳ सहस्यꣳसेत्येव-
कामनूपदधात्यग्नेर्योनिरसीत्यथ सयुजावुपदधाति स्तोमेभिस्त्वा
सयुजा युजा युनज्मि छन्दोभिस्त्वा सयुजा युजा युनज्मीत्यथ
संयानीमुपदधाति देवानामन्तरिक्षयान्यसीति तयादेवतं कृत्वा
सूददोहसः करोति ॥ ४१ ॥

अथाङ्गिरायास्तोमीया उपदधात्यायुस्त्वृदिति पुरस्तादुप-
दधाति द्यौम सप्तदꣳ इति दक्षिणतो धरुण एकविꣳꣳ इति
पश्चाद्वान्तः पञ्चदꣳ इत्युत्तरतः प्रतूर्तिरष्टादꣳ इति पुरस्ता-
दुपदधात्यभिवर्तः सविꣳꣳ इति दक्षिणतो वर्चो दाविꣳꣳ
इति पश्चात्तपो नवदꣳ इत्युत्तरतो योनिश्चतुर्विꣳꣳ इति १०
पुरस्तादुपदधाति गर्भाः पञ्चविꣳꣳ इति दक्षिणत ओजस्त्वि-
ण्व इति पश्चात्संभरणस्त्वयोविꣳꣳ इत्युत्तरतः क्रतुरेकत्रिꣳꣳ
इति पुरस्तादुपदधाति ब्रध्नस्य विष्टपं चतुस्त्रिꣳꣳ इति दक्षि-
णतः प्रतिष्ठा त्वयस्त्रिꣳꣳ इति पश्चान्नाकः षट्त्रिꣳꣳ इत्युत्त-
रतो अग्नेर्भागो ऽसीति पुरस्तादुपदधाति नृचक्षसां भागो १५
ऽसीति दक्षिणतो मित्रस्य भागो ऽसीति पश्चादिन्द्रस्य भागो
ऽसीत्युत्तरतो वसूनां भागो ऽसीति पुरस्तादुपदधात्या-
दित्यानां भागो ऽसीति दक्षिणतो ऽदित्यै भागो ऽसीति
पश्चाद्देवस्य सवितुर्भागो ऽसीत्युत्तरतो धर्मश्चतुष्टोम इति
पुरस्तादुपदधाति यावानां भागो ऽसीति दक्षिणत ऋभूणां २०
भागो ऽसीति पश्चाद्विवर्तो ऽष्टाचत्वारिꣳꣳ इत्युत्तरतो
ऽन्यथानूच्यान्यथोपदधातीति ब्राह्मणं तयादेवतं कृत्वा सूददो-

ह्सः करोत्यथ सृष्टीरुपदधात्येकयास्तुवत प्रजा अधीयन्तेति सप्तदश चतस्रो दक्षिणे ऽक्ष उपदधात्यथ तिस्रो ऽथ तिस्रो ऽथ तिस्रो ऽथ चतस्रो दक्षिणादक्षसादक्षिणाक्ष श्रोणिमभ्यायातयति[1] तथादेवतं कृत्वा सूददोहसः करोत्यथ व्युष्टीरुपदधातीयमेव सा या प्रथमा व्यौच्छदिति पञ्चदश तिस्रस्तिस्रो दिक्षु तिस्रो मध्ये व्युष्टीभिश्चितिराप्यते[2] तथादेवतं कृत्वा सूददोहसः करोति ॥ ४२ ॥

अथाग्निक्ष सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यान्हृषभं लोकंपृणा उदीच्याच लोकंपृणया प्रसौत्यग्निमुदीचीभिः संप्रच्छादयन्ति संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिङ्कृष्वाभिमृशति चित्तिमचित्तिं चिनवदिद विदानित्याग्नेय्यानुष्टुभैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा इत्यथापराङ्किकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते वसन्येताक्ष रात्रिम् ॥ ४३ ॥ त्रयोदशः ॥

अथाष्टमे ऽह्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति समानं पुरीषस्योपधानमथ नवमे ऽह्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते ऽथ याचत्याज्यस्थालीक्ष सक्तवां विभक्तिमुदपात्रक्ष सर्वे च स्वयमातृण्णानिकोतक्ष सप्त च स्रुन्ध्या अवकाश्च या उ चान्या

---

१ श्रोणीम० some of the MSS.

२ व्युष्टिभि० H. Ms.

उपधास्यन्नवति ता एतत्समादायोत्तरे श्रोणन्ते सꣳसादय-
न्नथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्ने अग्निं यो नो
अग्निरिति स्वयंचितिं जपति यास्ते अग्ने समिधो यानि
धामेति श्येतमश्वमभिमृशत्यधिद्रवत्यपामिदं न्ययनं नमस्त
इति द्वाभ्यामधिद्रुत्य चतुर्थं संचिताङ्गती जुहोत्यग्ने ५
किꣳशिल तत्त्वा यामीति दक्षिणतो विभक्तिमुपदधात्यग्ने
स्तोमं मनामह इति तयादेवतं कृत्वा सूददोहसं करोत्यथैताः
सप्त स्कन्द्याः प्राचीरायातयति द्वे ऋतव्ये स्वराजं च विश्व-
ज्योतिषं चैकाꣳ सयुजं द्वे संयान्यावृतव्ये उपदधाति तपश्च
तपस्यश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीति स्वराजं च विश्व- १०
ज्योतिषं च स्वराट् ज्योतिरधारयन्प्रजापतिस्त्वा सादयतीत्यु-
त्तरार्धस्य सयुजमुपदधाति रय्यै पोषाय सजातानां मध्यमस्ये-
त्याय मया त्वा सयुजा युजा युनज्मीत्यथ संयान्यावुपदधा-
त्यन्तरिक्षमस्यन्तरिक्षाय त्वेति तयादेवतं कृत्वा सूददोहसः
करोति ॥ ४४ ॥ १५

अथासपत्नावुपदधात्यग्ने जातान्प्रणुदा नः सपत्नानिति
पुरस्तादुपदधाति सहसा जातानिति पश्चाच्चतुश्चत्वारिꣳश
स्तोम इति दक्षिणतः षोडश स्तोम इत्युत्तरतस्तोमां पुरीष-
वतीं मध्य उपदधाति पृथिव्याः पुरीषमस्यप्सो नामेति तया-
देवत कृत्वा सूददोहसः करोत्यथ विराज उपदधात्येवस्कन्दो २०
वरिवस्कन्द इति चत्वारिꣳशतं दशंदश दिक्षु न मध्ये क्षत्रा-
योपदधातीति ब्राह्मणं तयादेवतं कृत्वा सूददोहसः करो-

त्यथ स्रोमभागा उपदधाति रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्येकचिꣳ्शतꣳ सप्तसप्त दिक्षु तिस्रो मध्ये ' तथादेवतं कृत्वा सूददोहसः करोत्यथ नाकसद उपदधाति राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतय इति पञ्चैकैकां दिक्षेकां मध्ये '
५ तथादेवतं कृत्वा सूददोहसः करोत्यथ पञ्चचोडा उपरिष्टान्नाकसदामुपदधात्यद्यं पुरो हरिकेशः सूर्यरश्मिरिति पञ्चैकैकां दिक्षेकां मध्ये ' तासां पञ्चात्प्राचीमुत्तमामुपदधात्येष वै यजमानो देष्टि तं मनसा ध्यायति ' तथादेवतं कृत्वा सूददोहसः करोत्यथ छन्दाꣳस्युपदधात्यग्निर्मूर्धा दिव इत्येतस्यानुवाकस्य
१० तिसस्तिस्रो यथाम्नातं ' गायत्रीः पुरस्तादुपदधाति त्रिष्टुभो दक्षिणतो जगतीः पश्चादनुष्टुभ उत्तरतो बृहतीर्मध्य ' ऽष्णिहः पुरस्तादुपदधाति पङ्क्तीर्दक्षिणतो ऽक्षरपङ्क्तीः पश्चादतिच्छन्दसमुत्तरतो द्विपदा मध्ये ' ऽपि वातिच्छन्दसं मध्ये द्विपदा उत्तरतस्तथादेवतं कृत्वा सूददोहसः करोत्यथ दक्षिणे
१५ ऽꣳसे कृत्तिका उपदधात्यम्बा नामासि दुला नामासीति सप्त गुह्यकृतास्तथादेवतं कृत्वा सूददोहसः करोत्यथ वृष्टिमतीरुपदधाति पुरोवातसनिरस्यभ्रसनिरसीति पञ्चैकैकां दिक्षेकां मध्ये ' ऽनुपरिहारꣳ सादयतीति ब्राह्मणं ' तथादेवतं कृत्वा सूददोहसः करोत्यथादित्येष्टका उपदधाति सलिलाय त्वा
२० सर्णीकाय त्वेत्यष्टौ दक्षे दिक्षु न मध्ये ' तथादेवतं कृत्वा सूददोहसः करोत्यथ घृतेष्टका उपदधात्यूर्चे त्वा रुचे त्वेति पञ्चैकैकां दिक्षेकां मध्ये ' ऽनुपरिहारꣳ सादयतीति ब्राह्मणं '

तयादेवतं कृत्वा सूददोहसः करोत्यथ यज्ञोदा उपदधाति यज्ञोदां त्वा यज्ञस्य सादयामीति पञ्चैकैकां दिक्षेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ भूयस्कृत उपदधाति भूयस्कृदसि वरिवस्कृदसीति पञ्चैकैकां दिक्षेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथापुषद उपदधात्यपुषदसि श्येनसदसीति पञ्चैकैकां दिक्षेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ द्रविणोदा उपदधाति पृथिव्यास्त्वा द्रविणे सादयामीति पञ्चैकैकां दिक्षेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथायुष्या उपदधाति प्राणं मे पाह्यपानं मे पाहीति सप्तैकैकां दिक्षु तिस्रो मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथर्तुनामान्युपदधाति यावा अथावा दृति सप्तैकैकां दिक्षु तिस्रो मध्ये। तयादेवतं कृत्वा सूददोहसः करोति। ॥ ४५ ॥ चतुर्दशः ॥

अथेन्द्रतनूरुपदधात्यग्निना विश्वाषाडिति द्वाविंशतिं पञ्चपञ्च दिक्षु द्वे मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ यज्ञतनूरुपदधाति प्रजापतिर्मनसान्धो ऽच्छेत इति चयस्त्रिंशतमष्टावष्टौ दिक्षेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ ज्योतिष्मतीरुपदधाति ज्योतिष्मतीं त्वा सादयामीति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ भूतेष्टका उपदधाति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथाज्यैनीरुपदधाति व्रतायुधाय व्रत-

वीर्यायेति पञ्चैकैकां दिक्षेकां मध्ये । तयादेवतं कृत्वा सूद-
दोहसः करोत्यथ राष्ट्रभृत उपदधात्यग्ने यज्ञस्यिन्यज्ञसेमम-
र्पयेति चतस्र एकैकां दिक्षु न मध्ये । तयादेवतं कृत्वा सूद-
दोहसः करोत्यथ दक्षिणे ऽꣳसे पौर्णमासीमुपदधाति पूर्णा
५ पश्चादिति । तयादेवतं कृत्वा सूददोहसं करोत्यथ दक्षिण
एवाꣳसे नक्षत्रेष्टका उपदधाति कृत्तिका नक्षत्रमग्निर्देवतेत्यथैना
रोचयत्यग्ने रुच स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते
त्वा भासे त्वा ज्योतिषे वेत्यथैतं नक्षत्रपथꣳ रोहिणीप्रभृत्या
विशाखाभ्यामायातयति[१] । दक्षिणादꣳसाद्दक्षिणाꣳ श्रोणिमभ्या-
१० यातयत्यथ[२] पुच्छसन्धौ चात्मसन्धौ चामावास्यामुपदधाति यत्ते
देवा अदधुर्भागधेयमित्यथैतं नक्षत्रपथमनूराधाप्रभृत्यापभर-
णीभ्य आयातयत्युत्तरायै श्रोणेरुत्तरमꣳसमभ्यायातयत्यथोत्तर[३]
एवाꣳसे पौर्णमासीमुपदधाति पूर्णा पश्चादित्यꣳस्पृष्ट्वा उप-
दधातीति ब्राह्मणं । नक्षत्रेष्टकाभिश्चितिराप्यते । तयादेवतं
१५ कृत्वा सूददोहसः करोत्यथावद्रुत्य कृष्णमश्वमभिमृश्य तनू-
पुरीषमुपदधाति पृष्टो दिवीति । तयादेवतं कृत्वा सूददोहसं
करोत्यथ[४] षष्ठीं चितिं चिनुते संयच्च प्रचेताश्चेति पञ्चैकैकां
दिक्षेकां मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ

---

१ Thus M Tr U ; •श्राखाभ्यां श्रायात० Be B ; श्राखाभ्यामभ्यायात० H.

२ श्रोणीम० some of the MSS.

३ Thus corrected ; all MSS. : श्रोणेरोत्तरम ।

४ अथ i s. of अच BH.

तयादेवतं कृत्वा सूददोहसः करोत्यथ यज्ञोदा उपदधाति यज्ञोदां त्वा यज्ञसि सादयामीति पञ्चैकैकां दिक्ष्वेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ भूयस्कृत उपदधाति भूयस्कृदसि वरिवस्कृदसीति पञ्चैकैकां दिक्ष्वेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथाषुषद उपदधात्यषुषदसि श्येनसदसीति पञ्चैकैकां दिक्ष्वेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ द्रविणोदा उपदधाति पृथिव्यास्त्वा द्रविणे सादयामीति पञ्चैकैकां दिक्ष्वेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथायुष्या उपदधाति प्राणं मे पाह्यपानं मे पाहीति सप्तैकैकां दिक्षु तिसृषु मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथर्तुनामान्युपदधाति यावा अयावा इति सप्तैकैकां दिक्षु तिसृषु मध्ये। तयादेवतं कृत्वा सूददोहसः करोति। ॥ ४५ ॥ चतुर्दशः ॥

अथेन्द्रतनूरुपदधात्यग्निना विश्वाषाडिति द्वाविंशतिं पञ्चपञ्च दिक्षु द्वे मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ यज्ञतनूरुपदधाति प्रजापतिर्मनसान्वो ऽच्छेत इति चयस्त्रिंशतमष्टावष्टौ दिक्ष्वेकां मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ ज्योतिष्मतीरुपदधाति ज्योतिष्मतीं त्वा सादयामीति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथ भूतेष्टका उपदधाति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये। तयादेवतं कृत्वा सूददोहसः करोत्यथाज्यानीरुपदधाति व्रतायुधाय व्रत-

वीर्यायेति पञ्चैकैकां दिक्षेकां मध्ये । तयादेवतं कृत्वा सूद-
दोहसः करोत्यथ राष्ट्रभृत उपदधात्यग्ने यज्ञस्यिन्यज्ञसेमम-
र्पयेति चतस्र एकैकां दिक्षु न मध्ये । तयादेवतं कृत्वा सूद-
दोहसः करोत्यथ दक्षिणे ऽꣳसे पौर्णमासीमुपदधाति पूर्णा
५ पश्चादिति । तयादेवतं कृत्वा सूददोहसं करोत्यथ दक्षिण
एवाꣳसे नचत्रेष्टका उपदधाति कृत्तिका नचत्रमग्निर्देवतेत्यथैना
रोचयत्यग्ने रुच स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते
त्वा भासे त्वा ज्योतिषे त्वेत्यथैतं नचत्रपथꣳ रोहिणीप्रभृत्या
विशाखाभ्यामायातयति[१] । दक्षिणादꣳसाद्दक्षिणाꣳ श्रोणिमभ्या-
१० यातयत्यथ[२] पुच्छसन्धौ चात्मसन्धौ चामावास्यामुपदधाति यत्ते
देवा अदधुर्भागधेयमित्यथैतं नचत्रपथमनूराधाप्रभृत्यापभर-
णीभ्य आयातयत्युत्तरायै श्रोणेरुत्तरमꣳसमभ्यायातयत्यथोत्तर[३]
एवाꣳसे पौर्णमासीमुपदधाति पूर्णा पश्चादित्यꣳस्पृष्टा उप-
दधातीति ब्राह्मणं । नचत्रेष्टकाभिश्चितिराप्यते । तयादेवतं
१५ कृत्वा सूददोहसः करोत्यथावद्रुत्य कृष्णमश्वमभिमृश्य तनू-
पुरीषमुपदधाति पृष्टो दिवीति । तयादेवतं कृत्वा सूददोहसं
करोत्यथ[४] षष्ठीं चितिं चिनुते संयच्च प्रचेताश्चेति पञ्चैकैकां
दिक्षेकां मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ

---

१ Thus M[e] Tr U ; •ग्राखाभ्यां ग्रायात• Be B ; ग्राखाभ्यामभ्यायात• H.

२ श्रोणीम• some of the MSS.

३ Thus corrected ; all MSS. : श्रोणेरोत्तरम• ।

४ ग्रथ i.s. of ग्रच BH.

सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यान्मृषभं लोकंपृणाः ।
प्राच्याच लोकंपृणया प्रसौत्यग्निं प्राचीभिः संप्रच्छादयन्त्यथो-
दीचीभिः । प्राचीभिरेव निस्तिष्ठन्ति । यावद्वै चेष्यमाणो
भवति तावद्वै चिनुते । ऽथानभिमृष्टं चितिर्भवति ।
तदेताश्चतस्रः स्वयमातृण्णा याचति । ता दिचूपदधाति प्राणाय ५
त्वा चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीद व्यानाय त्वा[२]
चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीदापानाय त्वा चक्षुषे
त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीद वाचे त्वा चक्षुषे त्वा तया
देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ स्वयमातृण्णामश्वमवघ्राप्याविदुषा
ब्राह्मणेन महाधिद्रुत्योपदधाति सुवरायोस्रा सदने सादया- १०
मीत्यनुद्रुत्य सूर्यस्याभिपातु महा स्वस्त्या छर्दिषा शंतमेन तया
देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यपान्यात्तृतीयासुपधायेत्यपानित्य-
थैष ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमा-
तृण्णावकाग्ने जुहोति चित्तिं जुहोमि मनसा घृतेनेत्यङ्गुष्ठाभ्या-
मन्वारभ्यान्वारोहं वाचयति दिवमाक्रमिषꣳ सुवरगन्मेत्यपरे १५
बिले हिरण्मिष्टकामुपदधाति सुवरसि सुवर्मे यच्छ दिवं यच्छ
दिवो मा पाहीति । तां जघनेन प्रक्रमवेलायां मण्डलेष्टका-
मुपदधाति द्यौरपराजितामृतेन विष्टेति । दक्षिणतो रेतः-
सिचमुपदधाति द्यौ रेतःसिक् सा मे रेतो दधातु सा मे

---

१ B Be Ms. ins. चितिं ।

२ The following words, पृण्णा to सीदेत्यथ, l. 9, are found thus in U only; all the other MSS. abbreviate.

रेतः प्रजनयत्विति । तयादेवतं कृत्वा सूददोहसः करोत्यथोत्तरतः प्रक्रमवेलायां विकर्णीसुपदधाति प्रोथदश्वो न यवसे अविष्यन्निति । तयादेवतं कृत्वा सूददोहसं करोत्यथ लोकंपृणा उपदधाति लोकं पृण छिद्रं पृणेत्यथ चितिकृत्याभिमृशति चित्तिमचित्तिं चिनवदि विद्वानित्याग्नेय्या पङ्क्त्या चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा दित्यथापराजिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताः राचीम । ॥ ४६ ॥ पञ्चदशः ॥

अथैतस्मिन्नेव नवमे ऽह्नि दशमायाश्च उपकल्पयते सहस्रं हिरण्यशल्कानूर्ध्वं चिभ्यो ऽपरिमितानित्येक आहुस्तं यदि सहस्रं भवन्ति दशे शते पक्वनाडीष्वोते भवतो । ऽथ दशमे ऽह्नुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । समानं पुरीषस्योपधानमथ पात्र्यामप आनीय हिरण्यशल्कान्त्संप्रकीर्य द्वाभ्यां-द्वाभ्याग्ं शताभ्यां प्रोचति सहस्रस्य प्रमा असीति यत्प्राक् स्वयमातृण्णायै भवति सहस्रस्य प्रतिमा असीति यद्दक्षिणा स्वयमातृण्णायै भवति सहस्रस्य विमा असीति यत्प्रत्यक् स्वयमातृण्णायै भवति सहस्रस्योन्मा असीति यदुदक् स्वयमातृण्णायै भवत्यथ मध्यं द्वाभ्यागं शताभ्यां प्रोचति साहस्रो ऽसि सहस्राय त्वेत्यथोत्तरे श्रोणन्ते तिष्ठन्निष्टका धेनूः कुरुत इमा मे अग्न

---

१ यच MTr; यत्र the other MSS.

२ पक्व° all; °नाडीष्वोते Tr UH Ms; °नाडीष्वेते BeM; °नाडीषोते B; Bhav.. पक्वनाडीष पक्विपक्वबुध्नसुषिरेषु निक्षिते[षु] भवतः ।

दृष्टका धेनवः सन्त्वित्यान्तादनुवाकस्यापरार्द्धिकीभ्यां प्रवर्ग्यो-
पसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताः रात्रि-
मेवैतस्मिन्नेव दशमे ऽह्येकादशायाश्च उपकल्पयते ऽर्कपर्ण-
मजचीरं गावीधुकं चरुं तिस्रुधन्वमस्थानमुदकुम्भं मण्डूक-
मवकां वेतसशाखां दर्भस्तम्बमाज्यस्थालीः मस्तुवां दीर्घवः शुं ५
द्वादशमित्यथैकादशे ऽह्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रच-
रति । स दीर्घवः शुं स्रुवं प्रगृह्योत्तमे संचिताङ्क्तौ जुहोत्यग्ने
वन्य तत्त्वा यामीति ॥ ४७ ॥

यावदेवाचाध्वर्युरिष्टेति तावदेष प्रतिप्रस्थातोत्तरस्य पक्षस्य
चरमयेष्टकया प्रत्यूढपुरीषयोपरमत्यथैतस्यार्कपर्णस्य पुटमन्तर- १०
वस्थाविणं कृत्वोदङ् तिष्ठन्मुखदघ्ने धारयन्नाहाहरानयेति । स
यच धारेष्टकां प्राप्नोति तत्प्रतिपद्यते नमस्ते रुद्र मन्यव
इत्यान्तमेतमनुवाकं निगद्य द्वितीयं तृतीयं । चतुर्थस्य यचाभि-
जानाति नमः क्षत्तृभ्य इति तत्साहाकरोति । सो ऽत एव
प्राङावृत्य नाभिदघ्ने धारयन्संग्रहीतृभ्य इति प्रतिपद्यातिशिष्ट- १५
मनुवाकस्य[1] निगद्य पञ्चमं षष्ठं । सप्तमस्य यचाभिजानाति
नमो वर्ष्याय चेति तत्साहाकरोति । सो ऽत एव दक्षिणा-
वृत्य जानुदघ्ने धारयन्नवर्ष्याय चेति प्रतिपद्यातिशिष्टमनुवाकस्य[1]
निगद्याष्टमं नवमं दशममेकादशस्य यचाभिजानाति य एता-
वन्तश्च भूयाꣳसश्चेति तत्साहाकरोति । सो ऽत एव प्रत्यङ्- २०

---

१ Thus M only ; अनुवाकं all the other MSS.

कृत्य गुल्फदघ्ने धारयन्नमो रुद्रेभ्यो ये पृथिव्यामित्येतद्यजमानं वाचयति । नाभिदघ्ने धारयन्नमो रुद्रेभ्यो ये ऽन्तरिक्ष इत्येतद्यजमानं वाचयति । ग्रीवदघ्ने[1] धारयन्नमो रुद्रेभ्यो ये दिवीत्येतद्यजमानं वाचयत्येतैवैतदर्कपर्णं यं द्वेष्टि तस्य संचरे पशूनां न्यस्यति । यद्यु वै न द्वेष्यात्खवटे न्यस्त्येवैतं गावीधुकं चरुं चरमायामिष्टकायां निदधाति यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्त्वित्येवैतत्तिस्रुध्वं याचति । तेनोत्तरे श्रोणन्ते तिष्ठन्नुपतिष्ठते । ऽपि वालुपरिक्रामं यक्ष रुद्र पुरो धनुस्तवातो अनुवातु ते तस्मै ते रुद्र संवत्सरेण नमस्करोमि यत्त रुद्र दक्षिणा धनुर्यत्ते रुद्र पश्चाद्धनुर्यत्ते रुद्रोत्तराद्धनुर्यत्ते रुद्रोपरि धनुरित्येवैतद्याचितं ब्राह्मणाय ददात्येषाऽस्य उदकुम्भ उत्तरे श्रोणन्ते ऽश्मना सꣳसृष्टः[2] शेते । स यो बलवाꣳस्तमाहानेनोदकुम्भेन संततया धारया चिः प्रदक्षिणं परिषिञ्चन्परीहीति । स तथा करोति । परिषिच्यमाने यजमानं वाचयत्यश्मन्वजं पर्वते गिरिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे । अश्म ओषधीभ्यो वनस्पतिभ्यो ऽधि संभृतां तां न दृषमूर्जं धत्त मरुतः सꣳरराणा इत्येवैतं कुम्भमश्मना सꣳसृष्टꣳ सादयत्यश्मꣳस्ते क्षुदमुं ते शुगृच्छतु यं द्विष्म इति । निधाय कुम्भं

---

१ Thus M Tr BU (sec. m.) Ms Keś.; ग्रीवा॰ Be U (pr. m.).

२ Thus Bhav. (one Ms.) and Ms.; श्मानं सꣳसृष्टꣳ M; संहतः Tr Be BU Bhav. (another Ms.) संसृतः H.

यथेतं चिः पुनः प्रतिपर्येत्यथैतस्मिन्नेव दीर्घवꣳग्रे प्रयुयुक्षति मण्डूकमवकां वेतसशाखां दर्भस्तम्बमिति। तेन यत्राक् स्वयमाहवनीये भवति तदिकर्षति समुद्रस्य त्वावकया हिमस्य त्वा जरायुणेति ॥ ४८ ॥

द्वाभ्यां पुरस्ताद्वाभ्यां दक्षिणतो द्वाभ्यां पश्चाद्वाभ्यामुत्तरतो ऽष्टाभिर्विकर्षतीति ब्राह्मणमथैताश्चैव कार्ष्णाजिनीरुपानह एतं[1] च[1] दीर्घवꣳग्रꣳ संछिद्य चात्वाले संप्रकिरन्त्यथ प्राञ्चो ऽग्निरित्याज्यस्थालीꣳ सस्रुवामादायाधिद्रुत्याज्यस्थाल्याः[2] स्रुवेणोपघातꣳ सर्पाञ्जुतीर्जुहोति। समीची नामासि प्राची दिगिति पश्चादासीनः पूर्वे बिले जुहोत्योजस्विनी नामासि दक्षिणा दिगित्युत्तरत आसीनो दक्षिणे बिले जुहोति। प्राची नामासि प्रतीची दिगिति पुरस्तादासीनो ऽपरे बिले जुहोत्यवस्थावा नामास्युदीची दिगिति दक्षिणत आसीन उत्तरे बिले जुहोत्यथैतेनैव यथेतमेत्य यचैव प्रथममहौषीत्तद्वे जुहोत्यधिपत्नी नामासि वह्निनी नामासीत्यधिद्रुत्याग्निꣳ सामभिरुपस्थापयति। गायत्रेण पुरस्तादुपतिष्ठते ऽग्नेर्हृदयेन दक्षिणमुपपक्षꣳ रथंतरेण दक्षिणं पक्षं वारवन्तीयेन दक्षिणाꣳ श्रोणिमुत्तुस्थायज्ञायज्ञियेन[3] पुच्छꣳ श्यैतेनोत्तराꣳ श्रोणिं

---

१ Thus Tr BU Ms; एतंच Bc; एतच MH.

२ Thus U (sec. m.) only; °स्थाल्या all the other MSS., also Ms; but Msc: स्थाल्यास्थाल्यासुक्रायाम्।

३ °यज्ञीयेन Tr H Ms

हतोत्तरं पचं प्रजापतेर्हृदयेनोत्तरमुपपचं वामदेव्येन मध्यम-
याह होतरग्नेरुक्थेनाग्निमनुशंसेति । यदि होता न कामयते
यजमान एव जघनेन पुच्छं तृणानि संस्तीर्य तेषूपविश्याग्ने-
रुक्थेनाग्निमनुशंसति पिता मातरिश्वाच्छिद्रा पदा धा
५ अच्छिद्रा उशिजः पदानुतचुः सोमो विश्वविन्नेता नेषद्बृहस्पति-
रुक्थामदानि शंसिषदोमिति सकृद्वा त्रिर्वार्थेनं स्तुतशस्त्रयो-
र्दीक्षं वाचयतीष्टो यज्ञो भृगुभिराशीर्दा वसुभिस्तस्य त
दृष्टस्य वीतस्य द्रविणेह भद्रायेत्यथापराह्णिकीभ्यां प्रवर्ग्योप-
सद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताः
१० रात्रिम् । ॥ ४९ ॥ षोडशः ॥

अथैतस्मिन्नेवैकादशे ऽह्नि द्वादशायाश्च उपकल्पयत औदु-
म्बरं स्रुवमौदुम्बरं द्रोणमौदुम्बरं प्रसेकमौदुम्बरीं वितष्टिं[1]
तस्यां पञ्चगृहीतमाज्यं भवति दध्नः पूर्णमौदुम्बरीं तिस्र
औदुम्बरीः समिधस्तिस्रो नानावृक्ष्या नानावृक्ष्यमिश्रं दधि
१५ मधुमिश्र यवमुष्टिमवकाभारं पृश्निमश्नानमाज्यप्रोक्षं द्वितीयं
होतारमप्रतिरथस्यानुवक्तारं विलीनोत्पूतस्याज्यस्य द्वौ वा
चीक्षा कुम्भान्ब्राह्मौदनिकान्व्रीहीन्सर्वौषधं[2] रोहितं चर्मानड्वहं
कृष्णायै श्वेतवत्साये पयो रथं चषालहोमीयं शाकलान्यरिधी-
नित्यथ द्वादशे ऽह्नुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरत्यथोप-
२० निष्क्रम्य संप्रेषमाह सुब्रह्मण्य सुब्रह्मण्यामाङ्गयार्धस्तनव्रतं प्रय-

---

१ Thus Tr U Be B Ms; वितष्टीं MH.

२ Thus MU Tr Ms; ब्रह्मौदनि० B Be H.

क्षतेत्याक्रयति सुब्रह्मण्यः सुब्रह्मण्यामर्धस्तनप्रतं प्रयच्छत्यथादत्ते पञ्चगृहीतमाज्यं दधि मधुमिश्रं गुसुष्टिमवकाभारमित्येतत्समादायाधिद्रुत्याच्छाया पञ्चगृहीतेन स्रुवमाहवां[1] व्याघारयति नृषदे वडमुषदे वज्रनखदे वड् बर्हिषदे वट् सुवर्विदे वडित्येतयैव स्रुचोपघातं दध्ना मधुमिश्रेण गन्धर्वाकृतीर्जुहोति[2] क्षेतयो नाम स्थ तेषां वः पुरो गृहा इति पश्चादासीनः पूर्वे बिले जुहोति[3] जिह्मिया नाम स्थ तेषां वो दक्षिणा गृहा इत्युत्तरत आसीनो दक्षिणे बिले जुहोति[4] वक्रिणो नाम स्थ तेषां वः पश्चाद्गृहा इति पुरस्तादासीनोऽपरे बिले जुहोत्यवस्थावानो नाम स्थ तेषां व उत्तरार्द्धा इति दक्षिणत आसीन उत्तरे बिले जुहोत्यथैतेनैव यथेतमेत्य यत्रैव प्रथममहौषीत्तद्धे जुहोत्यधिपतयो नाम स्थ क्रव्या नाम स्थेत्याह प्रतिप्रस्थातरिममग्निं कूर्मपृष्ठं कुर्विति[5] तꣳ स कूर्मपृष्ठं करोति[6] नाभोचितमधितिष्ठत्यथ गुसुष्टिमादाय दध्ना मधुमिश्रेणावोक्षति ये देवा देवानां ये देवा देवेष्वधि देवत्वमायन्निति ॥ ५० ॥

दाभ्यां पुरस्तात्ताभ्यां दक्षिणतस्ताभ्यां पश्चात्ताभ्यामुत्तरतोऽनुपरिचारमवोक्षतीति[7] ब्राह्मणमथैनमवकाभारेण प्रतिच्छाद्य गोप्तारꣳ समादिश्यावद्रुत्यापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथोपनिष्क्रम्य संप्रेषमाह सुब्रह्मण्य सुब्रह्मण्यामाक्रयाग्नीदेत्या-

---

१ Thus M Tr UH; °ह्वा the other MSS.

२ नुपरिहारम° M, but cp. TS. v. 4.5.3.

नरमारुतान्निर्वपं[1] प्रतिप्रस्थातः प्रवर्ग्यस्यावृता प्रवर्ग्यꣳ सꣳसादयोद्वासनायेति । वेधेतत्यदं कुर्वन्ति । गार्हपत्ये तृतीयमुपयमनीषु तृतीयं नि तृतीयं दधात्यथ प्रवर्ग्यस्यावृता प्रवर्ग्यमुद्वास्याधिश्रयति वैश्वानरं द्वादशकपालं मारुताꣳश्च सप्तकपालानथ
५ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये ऽनीकवल्लं जुहोत्यग्निस्त्विष्टेन ग्रोचिषेत्यनुद्रुत्य सेनानीकेन सुविदाचो अस्मे इति जुहोत्यपरं चतुर्गृहीतं गृहीत्वाहवनीय एव वैश्वकर्मणानि जुहोति । य इमा विश्वा भुवनानि जुह्वदित्यनुद्रुत्य विश्वकर्मा ह्यजनिष्ट देव इति जुहोत्यपरं चतुर्गृहीतं
१० गृहीत्वा चक्षुषः पितेत्यनुद्रुत्य विश्वकर्मन्हविषा वर्धनेनेति जुहोति । नाजैव स्रुग्भ्यां जुहोति नानैव स्रुक्योर्वीर्यं दधातीति ब्राह्मणमथ तिस्र औदुम्बरीः समिध आदधात्युदेनमुत्तरां नयेन्नेलं प्रतरां छधि यस्य कुर्मो हविर्गृह इत्यथाभ्यादधातीध्मं प्रणयनीयमुपोपयमनीः कल्पयन्ति चालाला-
१५ दंथ संप्रेषमाहाग्नये प्रणीयमानायानुब्रूह्यग्नीदेकस्फ्यायानुसंधेहि द्वितीयो होताप्रतिरथमनुब्रवीत्विति । प्रतिपद्यत एष द्वितीयो होताप्रतिरथमाहुः प्रियान इति । इयर्च भवतीति ब्राह्मणमथैतेनैव सहाग्निमादहते घृश्रिसमानमाज्यप्रोचं दध्नः पूर्णामौदुम्बरीं तिस्रो नानावृच्या नानावृच्समिधꣳ शाकलान्परि-
२० धीनित्यथैनमुद्यच्छत उदु त्वा विश्वे देवा इति । षड्भिर्हरतीति

---

१ Thus Tr H Ms; मारुतानि० Be; मारुतंनि० MUB.

ब्राह्मणं । तासां द्वे परिगृह्यवती भवतो । ऽथ विष्णुवत्याग्नीध्रस्य काले पृश्निमश्मानं निदधाति विमान एष दिव उच्चा समुद्र इति द्वाभ्यामथ चतसृभिरा पुच्छादेतीन्द्रं विश्वा अवीवृधन्निति । धारयन्त्येतमग्निमथैनꣳ संचितमाज्यप्रोक्षेण प्रोक्षति ॥ ५१ ॥ ५

वसवस्त्वा रुद्रैः पुरस्तात्पान्त्विति पुरस्तात्पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्विति दक्षिणत आदित्यास्त्वा विश्वैर्देवैः पश्चात्पान्त्विति पश्चाद्भुतानस्त्वा मारुतो मरुद्भिरुत्तरतः पान्त्वित्युत्तरतो देवास्त्वेन्द्रज्येष्ठा वरुणराजानो ऽधस्ताच्चोपरिष्टाच्च पान्त्वित्युपरिष्टादथैतेनैव महाग्निनाधिद्रवति १० प्राचीमनु प्रदिशं प्रेहि विद्वान्यज्ञमध्वमग्निना नाकमुखं पृथिव्या अहमुदन्तरिक्षमारुहꣳ सुवर्यन्तो नापेक्षन्ते ऽग्ने प्रेहि प्रथमो देवयतामिति पञ्चभिर्धारयन्त्येतमग्निमथ दध्नः पूर्णामौदुम्बरीꣳ स्रुचमाज्यस्याथां जुहोति । नक्षोषासेति पुरोऽनुवाक्यामनूच्याग्ने सहस्वाचेति जुहोत्यथ प्रदक्षिणमाहृत्येध्मं प्रतिष्ठापयति सुपर्णो १५ ऽसि गरुत्मानिति । तिसृभिः सादयतीति ब्राह्मणमथैनं विस्रस्याङ्गतिषाहं कृत्वाध्वराङ्गतिभिरभिजुहोत्यग्निर्यज्ञं नयतु प्रजानन्नैनं यज्ञहनो विदन्देवेभ्यः प्रब्रूताद्यज्ञं प्र यज्ञपतिं तिर स्वाहा वायुर्यज्ञं नयतु प्रजानन्सूर्यो यज्ञं नयतु प्रजानन्यज्ञो यज्ञं नयतु प्रजानन्नैनं यज्ञहनो विदन्देवेभ्यः प्रब्रूता- २० द्यज्ञं प्र यज्ञपतिं तिर स्वाहेत्यथावद्भुत्याग्नित्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ रक्षꣳ स्रुच्या संप्रेषमाह

प्रोक्षणीरासादयेध्मावर्हिरुपसादयेत्यधाधिद्रुत्य प्राकलाग्परिधीन्परिधाय नानातृत्स्यमिध्ममभ्यज्य स्रुवाहाकारेणाभ्याधाय तिस्रो नानातृत्स्याः समिध आदधाति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीं विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीं
५ ताꣳ सवितुर्वरेण्यस्य चित्रामिति शमीमयीमथ द्वे सुवाङ्कृती जुहोति चित्तिं जुहोम्यग्ने तमद्येत्यथ स्रुचि चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णाꣳ स्रुचं जुहोति सप्त ते अग्ने समिधः सप्त जिह्वा इत्यथ जुह्वन्मनसा दिशो ध्यायेद्दिग्भ्य एवैनमवरुन्द्धे दध्ना पुरस्ताज्जुहोत्याज्येनोपरिष्टात्तेजस्यैवास्मा इन्द्रियं च समीची
१० दधातीति ब्राह्मणमथाचैव तिष्ठन्याचति वैश्वानरं द्वादशकपालं मारुताꣳश्च सप्तकपालानथोपस्तीर्य सर्वत्र एव वैश्वानरमवदधादाहाग्नये वैश्वानरायानुब्रूहीति द्विरभिघारयत्यत्याक्रम्याग्न्याधाहाग्निं वैश्वानरं यजेति वषट्कृते मध्ये जुहोत्यथैनꣳ सुवाङ्कृतिभिरभिजुहोति सुवर्न[1] घर्मः स्वाहेति पञ्चभिरथ
१५ मारुतैः प्रचरति[2] ॥ ५२ ॥

पर्युपस्तारं दर्विहोमाकारमौदुङ्[3] चान्यादृङ् चत्यनुद्रुत्य शुक्रज्योतिश्च चित्रज्योतिश्चेति जुहोति शुक्रज्योतिश्च चित्रज्योतिश्चेत्यनुद्रुत्य सत्यजिच्च सत्यजिच्चेति जुहोत्यृतजिच्च सत्यजिच्चेत्यनुद्रुत्यर्तञ्च सत्यञ्चेति जुहोत्यृतञ्च सत्यञ्चेत्यनुद्रुत्य यो

---

१ Thus U Ms, cp. TS v.7.5. b; सुवर्ण the other MSS.

२ °तैः प्रचरति Tr U B Ms; °तैश्चरति MH Be Bhav.

३ दार्विहो° M.

ऽरण्ये ऽनुवाक्यो गणस्तमनुद्रुत्य जुहोति । यौ ऽरण्ये ऽनुवाक्यौ गणस्तमनुद्रुत्येदृचास एतादृचास इति जुहोतीदृचास एतादृचास इत्यनुद्रुत्य मितासश्च संमितासश्च न इति जुहोति । मितासश्च संमितासश्च न इत्यनुद्रुत्येदृङ् चान्यादृङ् चेति जुहोति । तानभितो वैश्वानरं परिचिनोति । गणेन गण- ५
मनुद्रुत्य जुहोत्युचैर्वैश्वानरस्याऽऽवयत्युपाꣳशु मारुताञ्जुहो-
तीति ब्राह्मणम् ॥ ५२ ॥

अथैतं प्रसेकमग्नावायातयति दक्षिणतो वोदञ्चं पश्चादा
प्राञ्चं । तस्य स्रुगिव पूर्वार्धो भवत्येवमेव मध्यं । चमस इव बुध्न-
स्तस्मिꣳश्चतुर उपस्तृणान आहाप्रमत्तः संततमानय वसोर्धारां १०
निगदिष्यामीति । स यत्र धारामिं प्राप्नोति तत्प्रतिपद्यते
ऽग्नाविष्णू सजोषसेति सर्वमान्तं[1] वसोर्धारामचैतं प्रसेकमग्ना-
वनुप्रहरत्यथैनꣳ सꣳस्रावेणाभिजुहोत्यथ यदाज्यमुच्छिष्यते
तस्मिन्ब्रह्मौदनं पचति । तं ब्राह्मणाश्चत्वारः प्राश्नन्ति । तेभ्य-
श्चतस्रो धेनूर्दद्यादिति[2] ब्राह्मणमथास्तैतत्पुरस्तादेवौदुम्बरे द्रोणे १५
सर्वौषधं दध्नाज्येन समुदायुतं भवति । तस्यौदुम्बरेण स्रुवेणोप-
घातं वाजप्रसवीयं जुहोति वाजस्येमं प्रसवः सुषुवे अग्ने वाजो
नः सप्त प्रदिश इति चतुर्दश स्रुवाहुतीरभिषेकाय प्रसेकं
परिशिनष्ट्यथैनमपिधाय प्रज्ञातं निदधात्यथ नक्तोषासेति

---

१ सर्वम॰ M Tr H Ms; सर्वाम॰ U-Be B Bhav.

२ Thus MU Be B Ms (cp. TS. v 7.3.4); ददाति i.s. of दद्यादिति H.

कृष्णायै श्वेतवत्सायै पयो जुहोत्यथ वड्राघ्रभतो जुहोत्यृतधामेति । भुवनस्य पत इति रथमुखे पञ्चाऽऽहुतीर्जुहोत्यथ तिस्रो ऋचो जुहोति यास्ते अग्ने सूर्ये ऋचो या वो देवाः सूर्ये ऋचो ऋच नो धेहि ब्राह्मणेष्वित्यथ पात्र्यामाज्यमानीयाञ्जलि-
५ नोपघातं वातनामानि जुहोति समुद्रो ऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा मारुतो ऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहावस्युरसि दुवस्वाञ्छंभूर्मयोभूरभि मा वाहि स्वाहेति । वातमु हैके जुह्वतो मन्यन्ते[1] । ऽथैताञ्छाकलान्परिधीनग्नावनुप्रहरति । तदेत-
१० च्छाकलान्तम् । ॥ ५४ ॥ सप्तदशः ॥

अथ सदोहविर्धाने संमिनोति । सदोहविर्धाने संमित्याध्वरधिष्ण्यान्निवपति । तेषूपर्यग्निधिष्ण्यानुपदधाति ममाग्ने वर्चो विहवेष्वस्त्वित्याग्नीध्रीय एकां च याजुषीꣳ सप्त च लोकंपृणा । अथ होतुर्धिष्ण्य एकां चैव याजुषीमेकादश च
१५ लोकंपृणा । अथेतरेष्वेकैकां चैव याजुषीꣳ सप्तसप्त च लोकंपृणा । अथ[2] मार्जालीय एकां च याजुषीं पञ्च च लोकंपृणा । अथाग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्यावृता यूपमुच्छ्रयति । खर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रशिङ्गं वपया चरित्वा वपाश्रपणी अनुप्रहृत्य[3] वसतीवरीर्गृह्यात्यथ[4]

---

१ Thus M Tr U H Bhav. Keś, , मन्वते Be; मन्वते B.

२ B ins. च, Be च लोकंपृणा।

३ Here Tr ins. · समुत्क्रम्य चात्वालेमार्जयन्ते थ

४ ०वरीः परिगृ० U Be B Ms.

पशुपुरोडाशं निर्वपति । तमनुवर्तन्ते ऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये गृहपतय इत्येतानि । तानि नानावघ्नन्ति[१] । नाना अपयन्ति । नानाधान्यानि भवन्ति । प्रैषवान्पशुपुरोडाशो ऽनुब्रूहि यजेतीतरेषाꣳ हविषाꣳ । स यत्र वारुणस्यावद्यन्नाह वरुणाय धर्मपतये ऽनुब्रूहीति तदुपभृति खिष्टकृते सर्वेषाꣳ सकृत्सकृदुत्तरार्धादवद्यति । द्विरभिघारयति । न प्रत्यनक्त्यात्क्रम्याश्राव्याह वरुणं धर्मपतिं यजेति । वषट्कृते जुहोत्यथ वै भवतीष्टो वरुणो भवत्यनिष्टः खिष्टकृदर्थास्य ब्रह्मा हस्तं गृह्णातीति । स[२] यत्रेष्टो वरुणो भवत्यनिष्टः खिष्टकृदर्थास्य ब्रह्मा हस्तं गृह्णाति[३] ॥ ५५ ॥

सविता त्वा प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनां बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां वरुणो धर्मपतीनामित्येतदेव सर्वं भवति ये देवा देवसुव स्थ त इममामुष्यायणममनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्यथैनं यजमानायतने तिष्ठन्तं प्राहैष वो ऽमी[२] राजेति येषाꣳ श्रेष्ठी भवति । सोमो ऽस्माकं ब्राह्मणानां राजेतीतरे प्रत्याहरथ भूर्भुवः सुवरिति वाचं विसृजते । द्राभ्यां मुखं विमृष्टे प्रति

---

१ Thus MU Be; नानावघ्नति H; नानावघ्नंति B; ननाविघ्नन्ति Ms; नानि नाना पृथक् व्यविघ्नन्ति (sic) Msc.

२ This clause is omitted in most of the MSS.

३ भरता (as TS. i. 8.10. d) Tr only, i. s. of मी ।

त्यन्नाम राज्यमधीयि सर्वे भ्राता वरुणस्याभूवन्निति । गायत्रा-
ण्विष्णुक्रमाक्रमते[१] विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि
विष्णोर्विक्रान्तमसीत्यथ स्विष्टकृता चरति । न रौद्रखेडाम-
वद्यत्यपामेनमभ्यवहरन्ति गम्भिष्ठमिडान्ताः[२] पुरोडाशाः संति-
ष्ठन्ते । पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके । ऽथ वसतीवरीः
परिहृत्य पयाꣳसि विग्निध्योपवसन्ति ॥ ५९ ॥ अष्टादशः ॥

अथातो महाराज एव बुध्यन्ते । समानं कर्मा स्रुचाꣳ
सादनात्सादयित्वा स्रुचो ऽग्निं योगेन युनक्त्यग्निं युनज्मीमौ ते
पक्षौ चिदसि समुद्रयोनिरिति तिसृभिरथ राजानमुपावहृत्य
प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्य-
ङ्गिरस्वैति[३] । यः क्रतुस्तमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं
ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वैका-
दश रज्ञना आदाय यूपमभ्येति । स्रुवन्तं यूपमुत्तृण्यैकादशि-
नान्पशूनुपाकरोत्याग्नेयं कृष्णग्रीवꣳ सारस्वतीं मेषीं बभ्रुꣳ सौम्यं
पौष्णꣳ श्यामꣳ शितिपृष्ठं बार्हस्पत्यꣳ शित्यं वैश्वदेवमैन्द्रमरुणं
मारुतं कल्माषमैन्द्राग्नꣳ सꣳहितमधोरामꣳ सावित्रं वारुणं पेत्व-
मिति । तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय ।

---

१ Thus Mu Tr B H; गायत्र्यान्वि० Be.

२ Thus U[c] (sec. m.) Ms; गंभीर० Tr HU (pr. m.) गंहिष्ठ० Be B; गम्भीरे ह्रदे M, which seems to be a periphrase of अपां गम्भिष्ठम्. Bhav.: रौद्रं चरुशेषमपु निनयति गम्भीरे ह्रदे।

३ Thus only M, all the other MSS. ह्रदेति।

तदृजुधा संतिष्ठते। प्रसर्पन्ति माध्यंदिनाय सवनाय। स[1] यत्र क्व च मध्यंदिनो[2] भवति तदेतद्धिरण्यपात्रं मधोः पूरयित्वा सौर्या चिच्चवत्यावेक्ष्याश्वमवघ्राप्य ब्रह्मणे ददाति। प्रसिद्धो ऽभिषवः। प्रसिद्धं ग्रहा गृह्यन्ते। समानं कर्मा दाक्षिणेभ्यो। दाक्षिणानि हुत्वा विभिर्मरुत्वतीयैश्चरति। सीदन्ति नाराशꣳसा आप्या- ५
यिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो माहेन्द्रायाथ पुरस्ताद्भिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेत्यथ यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोप-स्तृणाति। तच्चजमानं प्राङ्मुखमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य सर्वौषधेन पुरस्तात्प्रत्यङ्मभिषिञ्चति। ग्रौषतो ऽभि- १०
षिञ्चत्या मुखादन्वस्रावयति ॥ ५७ ॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामि बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चा-मीति[3]। समुन्मृष्टे समुत्क्रोशन्त्यभ्यषेच्ययमसावामुष्यायणो ऽमुष्य १५
पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्राग्निसवेनेत्यथ भूर्भुवः सुवरिति वाचं

---

१ om. Be H.

२ माध्यंदिनो Tr H.

३ Some of the MSS. (MU Tr) give the formula बृहस्पतेस्त्वा etc. before इन्द्रस्य त्वा etc.; B Be give a text exactly as found TS. i. 7.10.h;[a] H abbreviates thus: ॰ग्नेस्त्वा साम्राज्येनाभिषिंचाममिन्द्रस्य त्वा ॰मिति

मैत्रावरुणीं वशामुपाकरोति । तस्यै मैत्रावरुणामिक्षाध्वदानीया भवति । सर्वसूक्तां पशोः कुर्वन्त्यथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णां स्रुचमग्नेर्विमोकं जुहोतीमꣳ स्तनमूर्जस्वन्तं धयापामित्यथैनमुपतिष्ठते ये ऽग्नयः पुरीष्या इत्यथैनमाग्निभिरुपतिष्ठत आपं त्वाग्ने मनसेति नवभिरनुच्छन्दसमथोदवसानीयया यजते । ऽथ देविकाहविर्भिर्यजते । ऽथ वैधातवीयया यजते । ऽथ मौत्रामण्या यजते । संवत्सरं न कंचन प्रत्यवरोहति । न ग्रीष्मासं खादति न वयसां मासं । नाग्निं चित्वा रामामुपेयान्नाग्निचिद्दर्षति धावेद्यदि धावेदुपावर्तेतान्नाद्यमेवाभ्युपावर्तत इति ब्राह्मणम् ॥ ५९ ॥ एकोनत्रिंशः ॥

॥ इति दशमः प्रश्नः ॥

वाजपेयेन यक्ष्यमाणो भवति । स उपकल्पयते कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ वस्राजिनꣳ शतमानꣳ हिरण्यꣳ सप्तदश सुवर्णानि[१] कृष्णलानि हिरण्यपात्रं मधोः पूर्णमौदुम्बरꣳ रथचक्रꣳ सप्तदशारꣳ सप्तदशफलकां च श्रितिं[२] यूपं च तूपरं चतुरश्रिꣳ सप्तदशारत्निं गोधूमकलापीमुष्णीषं[३] नैवारꣳ सप्तदशशरावꣳ सप्तदशोषपुटान्सप्तदश[४] वायव्यानि सप्तदश पृथुबुध्नानुपथामान्सतं च वाजं च सप्तदश निष्कान्सप्तदश वसनानि सप्तदश वासोभारान्सप्तदश रथान्सप्तदश दुन्दुभीन्सप्तदश हस्तिनः सप्तदश दास्यः सप्तदशानाꣳसि युक्तानि सप्तदश गवाꣳ शतानि वयसोवयसो वा सप्तदश सहस्रं[५] वा । तस्मिन्हि सर्वाणि वयाꣳसि भवन्ति । चतुर्विꣳशतिं पशूनेकपञ्चाशतमश्वाञ्खादिरीं विट्पतीं[६] वध्र्यूतां[७] । प्रज्ञाता आग्निष्टोमिकाः संभाराः । स यौज्ञस्य जघन्याहःसु पुरस्तादाषाढ्यै पौर्णमास्यै

---

१ सौवर्णानि U Be 11.

२ Thus M Tr Be (sec. m.) Bhav. (one copy); श्रुतिं U (sec. m.); the other MSS. श्रीतिं, सीतिं, शृतिं (Bhav. another copy).

३ Thus MU Be 11; ॰कलापि॰ T Be B; ॰कलापा॰ F.

४ ॰पुटिकान् M (Bhav.).

५ साहस्रं M.

६ Thus M Tr Bhav.; विट्पतीं U Be 11; विट्पतीं Be B; विट्पता F; विट् H.

७ Thus FH; वध्रैयू॰ Be 11 Bhav. (one copy); वध्र्यैयू॰ Be and M (without, however, the r); वध्रैयू॰ U; वेधैयू॰ B; वध्रीयू॰ Tr.

दीक्षते । तस्य चयोदश दीक्षास्तिस्र उपसदः सप्तदश्यां[1] प्रसुतो । ऽपि वा सप्तदश दीक्षास्तिस्र उपसद एकविंश्यत्यां प्रसुतो । ऽपि वा तिस्र एव दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः । ॥ १ ॥

अथ वै भवति साविचं जुहोति कर्मणःकर्मणः पुरस्ता-दिति । दीक्षणीयां[2] निर्वप्स्यन्साविचं[3] जुहोति देव सवितः ५ प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः स्वाहेति । दीक्षा-ऽऽतीर्हिष्यन्साविचं जुहोति । प्रायणीयां[2] निर्वप्स्यन्साविचं[3] जुहोत्यन्तर्हिरण्यं[4] होष्यन्साविचं जुहोति । पदेन चरति । पदेन चरित्वा राजानं क्रीलोह्यातिथ्यं निर्वप्स्यन्साविचं जुहोति । १० प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरिष्यन्साविचं जुहोत्येतस्मिन्काले प्रतिप्रस्थाता दक्षिणे शालाखण्डे ऽवटं खानयित्वा वाजपेय-सुरां संधापयति । महावेद्यै पूर्वं परिग्राहं परिग्रहीष्यन्साविचं जुहोत्याहवनीयं प्रणेष्यन्साविचं जुहोति । रथवाहने सदोहवि-र्धाने समेष्यन्साविचं जुहोत्यग्नीषोमौ प्रणेष्यन्साविचं जुहोतीति १५

---

१ Thus M Tr U Be 11 Be (sec. m.); सप्तदशी (as Āp. xviii. 1.6) B Be (pr. m.); सप्तदशा F.

२ Thus M Be (sec. m.) Be 11 F; •णीयाग्नि• Tr BH Be (pr. m.); दीक्षणीयायां U.

३ Thus Be UF; प्रायणीयाग्नि• Tr BH Be; प्रायणीयं M.

४ Thus U Tr HF Be 11 Bhav., हिरण्यं M Be.

दग्नान्तःशालमहौषीद्यात[१] आग्नीध्र[२] एव होष्यति । यूप-
मुच्छ्रयिष्यन्त्सावित्रं जुहोति । यदाध्वर्युश्च[३] यजमानश्च पुरस्ता-
त्प्रत्यञ्चावञ्चल्लावभिसर्पतो[४] ऽथ प्रतिप्रस्थाता पश्चात्प्राङ् वासो-
भिर्वेष्टयन्नभिसर्पत्युदीचीनदग्रैर्वा विग्रथ्नाति धनुर्वेष्टीर्वा[५] प्रवे-
ष्टयत्येतस्मिन्काले[६] प्रतिप्रस्थाता गोधूमकलापीमुभयतः समां
क्लोष्णीषेण विग्रथ्नाति । तस्यां तच्चेष्टन्ति यच्चषाले । खर्वन्तं
यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरिष्यन्त्सावित्रं जुहोति । तस्य
प्रसिद्धं वपया चरित्वा वसतीवरीर्गृहीष्यन्त्सावित्रं जुहोति ।
पशुपुरोडाशं निर्वप्स्यन्त्सावित्रं जुहोत्यनुसवनं चीणि । तानि
सन्नदग्रापि[७] वा[८] सवनेसवन एव जुहुयादित्येतदपरमथ पशु-
पुरोडाशं निर्वपति । तमनुवर्तन्ते ऽष्टौ देवसुवाः हवीः[९]ष्यग्नये
गृहपतय इत्येतानि । तेषामुक्तं चरणं यथाग्नेर्विधायाग्निडान्ताः

---

१ After अहौषीद् B Be U ins. इति ; Keś. cites the clause without इति ; it could, however, be right, cp. Vol. I. p. 193, 15.

२ आग्नीध्रीय Tr.

३ यचा० Be B ; the passage referred to is Vol. I., p. 113, 5 sqq.

४ Thus Be (sec. m) Bhav. ; प्रत्यञ्चावाङ्क्लावभि० Tr ; ०वंजंलावञ्चिस० Be (pr. m.) B ; ०वंजसाववसर्पतो UH ; ०वांजसाववसर्पतो Bell ; ०वंजसो-ववस M ; ०वाजसववस० F ; read perhaps ०प्रत्यञ्चावञ्चसोपसर्पतो ।

५ धनुर्वेष्टीर्वा प्रवे० Tr Be B ; धनुर्वेष्टिं वा प्रवे० Be 11 HF ; धनुर्वेष्टितं प्रवे० U ; धनुर्वेष्ट इवं प्रतिवे० M. The Dvaidhasūtra citing this passage reads धनुर्वेष्टीर्वा प्रवे० ; I am not certain about the correct reading and the meaning of these words. Bhav. comments : धनुर्वेष्टनवद्वेष्टयति वा ।

६ अपि वा om. B Be.

पुरोडाशाः संतिष्ठन्ते । पत्नीसंन्नाजान्तः पशुर्हृदयशूलान्त इत्येके ।
ऽथैतान्दुन्दुभीननुदिग्गमासञ्जयति पञ्च दक्षिणायाꣳ श्रोण्यां
पञ्चोत्तरस्यां चतुरो दक्षिणे ऽꣳसे चानुत्तरे ऽꣳसे । तथा हास्मै
दिग्भ्यो वाचमवरुन्धत इति ह स्माह बौधायनो । ऽग्नेर्
णाग्नीध्रं गुल्मक्षता आसक्ताः स्थेत्याञ्जीगविरभितः सद इति ५
कात्यो । ऽथ वसतीवरीः परिहृत्य पयाꣳसि विश्रिण्योप-
वसन्ति । ॥ २ ॥ प्रथमः ॥

अथातो महाराज्ञ एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा
राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रात-
रनुवाके ऽपो ऽच्छैत्यपो हाध्वर्युरभिद्रवत्येतस्मिन्काले[1] प्रति- १०
प्रस्थाता वाजपेयसुराꣳ संपवय्य[2] सग्रस्थामादाय दक्षिणया
द्वारोपनिर्हृत्य दक्षिणेन सदः परीत्य दक्षिणेन मार्जालीयं
धिष्ण्यं पर्याहृत्यापरया द्वारा हविर्धानं प्रपद्य दक्षिणस्य
हविर्धानस्य पश्चादच्चमुपसादयत्यथाध्वर्युरङ्गिरुदैति[3] । सर्वान्कृढ्-
नुपेति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा[4] गृह्यन्ते । समानं १५
कर्माग्रयणाद्ग्रहादाग्रयणं[5] गृहीत्वा पञ्चेन्द्रानतिग्राह्याग्गृह्यात्युप-
यामगृहीतो ऽसि नृषदं त्वा द्रुषदमित्येताभिः पञ्चभिरथैना-

---

१ ह before ऋध्वर्यु० only in Tr Be B ; वाध्वर्यु० M and ऋधिद्रवति Be 11 Tr; सन्निद्रवति H.

२ Thus Tr U Be Be 11 (pr. m.); सपवय्य F; संपवयति M; संप-वर्यंति Be 11 (sec. m.); संपवयत्य H.

३ Thus M, उदेति all the other MSS.

४ Some of the MSS. insert ग्रहं ।

न्दक्षिणार्धपूर्वार्धे खरस्य गुल्मक्षतान्त्सादयति । यावदेवाच्चाध्वर्यु-
श्चेष्टति तावदेष प्रतिप्रस्थाता सत उदीचीनदग्नेन वालेन सुरां
पुनाति पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता।
वारेण शश्वता तनेति । वायव्यमेवाध्वर्युरादत्त उपयामं प्रति-
५ प्रस्थाताध्वर्युः पूर्वो वायव्येन द्रोणकलशात्सोमग्रहान्गृह्णात्यया
विष्ठा जनयन्कर्वराणीत्यनुद्रुत्योपयामगृहीतो ऽसि प्रजापतये
त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः प्रजा-
पतये त्वेत्यथ प्रतिप्रस्थातोपयामेन सतात्सुराग्रहान्गृह्णाति
कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतो ऽसि प्रजापतये[१]
१० त्वेति गृह्णाति । प्रजापतये त्वेति सादयति । नैव[१] जुष्टं करोति
न[२] योनिं । तावेवमेव व्यतिषङ्गं ग्रहान्गृह्णीतः सप्तदशेतरः
सप्तदशेतरः । पुरो ऽचमेवाध्वर्युः सोमग्रहान्द्विश्रेणि[३] वा
त्रिश्रेणि[३] वोदीच आयातयति । पश्चादन्तं प्रतिप्रस्थाता सुरा-
ग्रहान्द्विश्रेणि[३] वा त्रिश्रेणि[३] वोदीच आयातयत्यथ षोडशिनं
१५ गृह्णात्यातिष्ठ वृत्रहन्त्वयमित्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा
षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनि-
रिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । समानं कर्मा-

---

१...१ Thus according to B Be Tr; MFH only: प्रजापतये त्वेति सादयति नैव; Be 11 U प्रजापतये त्वा गृह्णामीति दर्भैः परिमृज्य प्रजापतये त्वेति सादयति नैव।

२ नैव Be 11 U.

३ द्विः० and त्रिः० HU.

श्विनाङ्ग्रहादाश्विनं ग्रहं[1] गृहीत्वा षड्गृहा आदाय यूपमभ्येति[2] ।
स्रुवेऽन्तं यूपमुत्सृज्याथैताभ्यशूनुपाकरोत्याग्नेयमैन्द्राग्नमैन्द्रं मारुतीं
गोवशाꣳ सप्तदश प्राजापत्यान्छ्यामानेकरूपान्सारस्वतीमन्ततो ।
ऽथ निर्मन्थ्यस्यावृता निर्मन्थ्येन चरति । प्रहृत्याभिहृत्याथैता-
नानादेवत्यान्पशून्पृथग्द्विगुणाभिरभिधाय पृथक् त्रिगुणासु ५
नियुनक्त्यथैतान्समानदेवत्यान्पशून्पृथग्द्विगुणाभिरभिधायैकस्यां
यूप्यायां नियुनक्त्यपि वा पशौ पशुं प्रसजति[3] । सारस्वती-
मन्ततो नियुज्यायैनाग्प्रोक्ष्य निपाय्योपोक्ष्योदूह्य प्रोक्षणी-
धानम् ॥ ३ ॥

अथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूही- १०
त्यभ्यादधातीध्मं । परि समिधꣳ ग्रिनष्टि । वेदेनोपवाजय-
त्यनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति । संस्पृष्टे
स्रुग्भ्यासुत्तरमाघासꣳस्रग्भ्यन्स्रुचावुदङ्कृत्याक्रम्य जुक्षा पशून्समज्य
सादयित्वा स्रुचौ प्रवरं प्रवृणीते । प्रसिद्धमृत्विजो वृणीते ।
सीदति होता । प्रसवमाकाङ्क्षति । प्रसूतः स्रुचावादायात्या- १५
क्रम्याज्याव्याह समिद्धः प्रेष्येति । वषट्कृते जुहोति प्रेष्य प्रेष्येति
चतुर्थाष्टमयोः समानयमानो ऽष्टमे सर्वꣳ समानयते । परि
स्तृणाक्रतीभ्यः सꣳस्तावꣳ ग्रिनष्टि । दग्ध प्रयाजानिष्ट्वोदङ्कृत्या-

---

१ Om. M Tr Be U.

२ Thus M Tr B Be Keś.; अभ्येति Bell UFH.

३ Thus Bell F; प्रसंजति Tr; प्रतिसजति U; प्रसजति H; प्रसंजयति M; नियुनक्ति Be.

क्रम्य खरुग्राभैः पँशून्समनक्ति । त[1] एते[1] नानादेवत्याः पशवो नानास्वरवो नानाग्राभा अथैते समानदेवत्याः पशवः समानस्वरवो नानाग्राभाः[2] । समानं कर्मा पर्यग्निकरणादथ पर्यग्निकृतैः पशुभिरुदञ्चः प्रतिपद्यन्ते । तेषाꣳ सारस्वत्युत्तरार्धा भवत्याग्नेय उपचारत[3] । आग्नेयमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभते । पृथगितरान्परिकर्मिण उदञ्चो नयन्त्यनुपूर्वमव्यतिषजन्त[4] । आग्नेयायैवाध्वर्युः पशवे निहन्यमानाय बर्हिरुपास्यति पृथगितरेभ्यस्तंत इतराम्प्राचो वोदीचो वा निघ्नन्त्यक्षणतो मायून्संज्ञपयतेत्युक्तेनैव यथेतमेत्य पृषदाज्यावकाश आसत इह प्रजा[5] विश्वरूपा रमन्तामस्मिन्यज्ञे विश्वविदो घृताचीः । अग्निं कुलायमभिसंवसाना अस्माꣳ अवन्तु पयसा घृतेनेति । संज्ञप्ताम्प्राङ्जुहोति संज्ञप्ताङ्क्तिं यत्यग्नयो मायूनक्षतेत्यथैति[6] । ग्रमितार उपेतनेति । पाग्नेभ्यः पशून्प्रमुच्यमाननुमन्त्रयते ऽदितिः पाग्नान्प्रमुमोक्तेतानिति । पृथगविग्राखाभिरुपसज्येमां दिशं निरस्यत्यरातीयन्तमधरं क्षणोमि यं द्विष्मस्तस्मिन्प्रतिमुञ्चामि पाग्नानिति ॥ ४ ॥

---

१ Thus M Tr Be 11 HF; अथैते B Be U (sec. m )

२ समानाग्राभाः M

३ उपचरत M Tr U.

४ Thus M Be 11 UHF; °ानुपूर्व्यम॰ Be B Tr.

५ Thus (cp. Vol. I., p 118, 1) Be 11 F; पशवो M Tr Be UH Keś.; Āp. (vii. 17. 1) has also पशवो but the fem. घृताचीः (घृताच्य Tr F) points to प्रजाः, cp. also Maitr. S. iv 2. 10.

६ Thus all exc. B ( : अभ्येति ).

अथ प्रतिप्रस्थाता पत्नीमुदानयत्युर्दकमण्डलुमुत्याप्य[1] सानुपूर्वं[1] पशूनां प्राणानाप्याययत्यन्वगध्वर्युर्वपया उत्खिदन्नेत्या-ग्नेयस्यैवाध्वर्युर्वपया[2] प्रथमया प्रतिपद्यते ऽनूचीरितरा आहर-न्त्याग्नेयस्यैव वपायै प्रतितप्यमानायै बर्हिषो ऽग्रमुपास्यत्युपेतरा यच्छन्त्याग्नेयस्यैव वपाꣳ स्रुवाऊत्याभिजुहोत्युपेतरा यच्छन्त्यथ ५ स्वाहाकृतिप्रेषेण चरित्वा सꣳस्रावेण पृषदाज्यमभिघार्याग्नेयस्यैव वपामभिघारयत्युपेतरा यच्छन्त्यथ पुरस्तात्स्वाहाकृतिꣳ स्रुवा-ऊतिꣳ ऊत्वार्थैतेषां नानादेवत्यानां पशूनामनुब्रूहि प्रेष्येति वपाभिश्चरत्यथैतेषाꣳ[3] समानदेवत्यानां पशूनां मुख्यस्य वपाꣳ समवद्यन्नाह प्रजापतय इत्युपाꣳशु छागानां वपानां मेदसो[4] १० ऽवदीयमानस्यानुब्रूहीत्युच्चैर्यावतीः[5] सुक्ष्मंभवत्यथेतराः[6] पात्र्या वेडसूनेन वोपोद्यच्छन्ते[1] द्विरभिधारयत्यत्याक्रम्याश्राव्याह प्रजा-

---

१ Thus Tr B Be F, सानुपूर्वं U Be 11 H; उत्याप्यानुपूर्व्यं M.

२ Thus (उत्खिदन्नेति) Tr; उत्खिदंनेति M Be; उत्खिदंतेति B; उत्खि-दति or उदरति the other MSS.; Bhav.. उदरन्गच्छति।

३ चरित्वाथै॰ Tr Be B.

४ मेदसोवदीयमानस्य Tr Be (pr. m.) BF; ॰वदीयमानानाम॰ Be 11 U; H is partly corr. but reads ऋवदीयमानस्य; M pr. m. gen. sing., sec. m. (not wholly certain) gen. plur. of the part.; मेदसोवदीयमानानाम॰ Be 11 U Keś; वपानां मेदसामवदीयमानानाम॰ Be (sec. m.).

५ यावतीः (sc. वपाः?) M Be 11 U; यावत् Be B; यावति Tr.

६ Thus only Tr, cp. xv. 31. सुक्ष्यांभवति U H; सुक्ष्यंभवति F; सुवसंस्थभवति B; सुक्तंभवन्ति M; सुक्स्थंभवति Be 11 Be.

पतय दत्युपाꣳशु छागानां वपा[१] मेदः प्रस्थितं प्रेष्येत्युच्चैर्वषट्कृते वपा[२] जुहोत्युपाꣳशु सारस्वत्यै वपया [३]चरत्यधोपरिष्टात्स्वाहाकृतिꣳ स्रुवाऊतिꣳ कृत्वा वपाश्रपणीरनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते [४] ऽथ पशून्विशास्ति[५] शमितरित्याह यन्मानुत्या अनवदानीयं तदभ्यर्धाच्छृपयतादित्यथ[६] सावित्रꣳ कृत्वा प्रसर्पन्ति प्रातःसवनाय [४] तदृजुधा संतिष्ठते [४] ॥ ५ ॥ द्वितीयः ॥

अथ सावित्रꣳ कृत्वा प्रसर्पन्ति माध्यंदिनाय सवनाय देवी द्वारावित्यत एवोर्ध्वेन [४] संप्रस्कन्नान्विदित्वाध्वर्युः प्राङायत्याह चात्वाले रथचक्रं निमिनुत रथवाहने रथमाधत्ताश्वान्यल्गूलयत यद्दास्यन्नसि[७] तद्दक्षिणत उपस्थापयाभिषोतार[८] एत कृयत गावस्तुतमेहि यजमानेति [४] प्रसिद्धो ऽभिषवः [४] प्रसिद्धं ग्रहा गृह्यन्ते [४] समानं कर्माग्रयणाद्ग्रहादाग्रयणं गृहीत्वा षोडशिन-

---

१ वपा Be 11 HF; वपानां M Tr Be B.

२ वपा om. all exc. Be B.

३ प्रचरत्य० B Be H.

४ विशाधीति Be U (sec. m.); विशाधिति B, विशास्ति the other MSS. (also U pr m).

५ Thus Be 11 (sec. m.); तदर्धाक्० M, तदभ्यर्धाग्र० Tr, तदग्रद्धाक्० Be 11 (pr. m); तपघ्रा(?)ग्र० H; the other MSS. corr.; Bhav. seems to have read अग्र्यर्धात्; the meaning is इषक्।

६ Thus U°Be 11 H; ददास्यन्नसि F, येददास्यो B, यद्दास्यो Be, यद्दास्य (broken off) भितोदक्षिण० M; यद्दास्यो Tr, after असि H ins. वेदेर्, Be B: मार्जालीये, Tr: मार्जालीयं; these MSS. om. तद्।

७ Thus Be 11 UHF, ०स्थापयताभि० M Tr B Be.

अभिगृह्णातीन्द्रमिद्धरी वहत इत्यनुद्रुत्योपस्थमगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति समानं कर्मा दाक्षिणेभ्यो दाक्षिणानि क्रीष्यन्याचत्याज्यस्थालीꣳ सस्रुवाꣳ स्रुचं वासस्तस्यैतस्य वसनस्यान्तमायां दशायां निष्करज्जुः प्रग्रथिता[1] भवत्येतत्समादायाहैहि[2] यजमानेत्युत्तरेणाग्नीध्रीयं परीत्योत्तरेण[3] सदः परीत्याग्नेय शालां तिष्ठते[4] प्रतिप्रस्थाश्च एतानि ग्रहाणि प्रयच्छत्यथाहैहि यजमानेति रथ एष दक्षिणे श्रोणक्ले रथवाहन आहितो भवति तमुपावहरतीन्द्रस्य[5] वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वधादित्यथैनं धूर्गृहीतमन्तर्वेद्यभ्यवर्तयन्ति[6] वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषदित्यथाश्वस्याग्न्यल्लूलयत्यश्वन्तरमृतमपु[7] भेषजमपामुत प्रशस्तिष्वश्वा भवथ वाजिन इत्यथ दक्षिणं योग्यं युनक्ति वायुर्वा त्वा मनुर्वा त्वा

---

१ Thus Be 11 UF, Bhav., Keś.; °थितो the other MSS.

२ भवतीत्येत° M Tr.

३ पर्याहृत्य i. s. o. परीत्य Be B.

४ तिष्ठन् M; तिष्ठति F; तिष्ठते the other MSS.

५ Thus Tr Be 11 Be BU (sec. m.); pluralis verbi the other MSS.; अवतारयति Bhav. Keś.

६ Thus M Tr U (pr. m.); अभ्यावर्तयंति Be BTU (sec. m.). अवर्तयति H; प्रवेशयंति Keś.; cf. infra xii 7 (p. 95, l. 10).

७ The first अपु om. MH.

गन्धर्वाः सप्तविꣳशतिः । ते अग्रे अश्वमयुञ्जन्ते अस्मिञ्छ्रवसा-
दधुरित्यथास्य पृष्ठं मर्म्मज्यते ऽपां नपादाशुहेमन्य ऊर्मिः
कक्षुद्माꣳप्रतूर्तिर्वाजसातमस्तेनायं वाजꣳ सेदित्येवमेवोत्तरं योग्यं
युनक्ति । तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति । तयोरेवमेव
५ पृष्ठे[1] मर्म्मज्यत । एतस्य योगमनु सर्वमाणिवद्युज्यते । ऽधि-
कक्ष्यान्हस्तिनः कुर्वन्ति । प्रवेष्टयन्ति वासोभारान्त्सनानां
दꣳसासु निष्करञ्जूः प्रग्रथ्नन्ति । पूगग्रो दक्षिणा आयातयत्यथ
सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति । नयवत्यर्चाग्नीध्रे जुहोति[2] ।
हूयन्ते[2] दक्षिणा दक्षिणापथेन । स यत्किंचिद्ददाति[3]
१० हिरण्यमुखमेव ददात्यथ वासाꣳस्यथ[4] युक्तानि गोअश्वꣳ
हस्तिपुरुषमन्ततो[5] । ऽदत्ता एवैते रथा अतिवर्तन्ते । नैते
ऽन्यस्य सन्त आजिं धावन्ति । मनसैव स्वरथमध्वर्यवे ददाति
मनसा समनुदिश्य[6] दक्षिणास्तिभिर्मरुत्वतीयैश्चरति । सीदन्ति
नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधो-
१५ ऽधो[7] माहेन्द्राय ॥ ६ ॥

---

१ पृष्ठे M Tr Be U; पृष्ठं BFH.

२ Thus M Tr Be 11 HF, जुहोत्युह्यंते Be B, जुहोति हूयंति U

३ यत्किंचद० Tr

४ Thus Tr HF, Be B अनाꣳसि i s. of अथ; M (injured): अथवा ...सि ददाति अथ युक्ता अनो ।

५ Before पुरुष० Tr F ins. दास०, H दासी; Bhav.. हस्तिपुरुषम्; cf. infra xii. 7.

६ समनुदिश्य UH Be 11; समुद्दिश्य M Tr Be B, सनुदिश्यं F

७ Thus, with पा, all, also Kes. but Be sec. m. ०वाल्लंबस० ।

अथ याचति नैवारꣳ सप्तदशग्राम्यावꣳ[1] स एष क्षीरे श्रृतो भवति[1] तेन चरति[1] बृहस्पतये ऽनुब्रूहि बृहस्पतिं यजेति[1] तमनिष्टखिष्टकृतमपिधाय प्रज्ञातं निदधात्यथास्यैतत्पुरस्ता-देवौदुम्बरे द्रोणे सर्वौषधं दक्षाज्येन समुदायुतं भवति[1] तस्यौ-दुम्बरेण स्रुवेणोपघातꣳ सप्तान्नहोमाञ्जुहोति वाजस्येमं प्रसवः सुषुवे अग्न इत्यभिषेकाय प्रेरकं परिग्निनद्ध्यैनमपिधाय प्रज्ञातं निदधात्यथ पुरस्ताद्भिषेकस्य षट् पार्यानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेत्यथ यजमानायतने कृष्णाजिनं प्राचीनग्रीव-मुत्तरलोमोपस्तृणाति[1] तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरज-ताभ्याꣳ रुक्माभ्यां पर्युप्यास्य सर्वौषधेन पुरस्तात्प्रत्यञ्चमभिषि-ञ्चति[1] ग्रीष्मतो ऽभिषिञ्चत्या सुखादन्ववस्रावयति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा[2] साम्राज्येनाभिषिञ्चामि[2] बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चा-मीति[1] समुन्मृष्टे समुल्लोप्यभ्यषेच्ययमसीवामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता वाजपेयेनेत्यथ भूर्भुवः सुव-रिति वाचं विसृजते[1] द्वाभ्यां मुखं विमृष्टे[1] गायत्रीत्रिष्णु-क्रमाक्रमते[3][1] ऽथोपरिष्टाद्भिषेकस्य षट् पार्यानि जुहोती-

---

१ प्रचरति Be B.

२ Tr Be B U (sec. m.) om.; M places बृहस्पतेस्त्वा etc. before इन्द्रस्य त्वा।

३ Thus Tr U Be H-H F, गायत्र्यावि॰ M Be B.

न्द्राय स्वाहा घोषाय स्वाहेति । द्वादश भूतानामवेष्टीर्जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेत्यथैतस्य वार्हस्पत्यस्य खिष्टकृता चरत्यथैनमादायान्तरेण चात्वालोत्करावुदङ्मुपनिष्क्रामत्युत्तरत[१] एते[२] रथा युक्तास्तिष्ठन्ति[३] । तदेतान्यजुर्युजो ऽश्वानवघ्रापयति ५ वाजिनो वाजजितो वाजꣳ सरिष्यन्तो वाजं जेष्यन्तो बृहस्पते-र्भागमवजिघ्रतेत्यथैनमपिधाय प्रज्ञातं निदधात्यथ रथमभिप्रैति विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीत्यथ रथस्य पक्षसी संमृशत्यङ्कौ न्यङ्कावभितो रथं चाविति[४] । रथ-मातिष्ठति देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता १० वाजं जेषमित्येतस्मिन्काले चात्वाले रथचक्रं निमितं ब्रह्मा-रोहति । तमत[५] एवानुमन्त्रयते देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकꣳ रुहेयमित्यथ यजमान-मन्वास्थायोज्जितीर्वाचयत्यग्निरेकाक्षरेण वाचमुदजयदिति मन्त्र-दृग्गाथास्मा अश्वाजनीं[६] प्रयच्छत्यश्वाजनि वाजिनि वाजेषु १५ वाजिनीवत्यश्वान्मम त्वं वाजयेति । तया यथायुक्तमश्वान्क्षिप-

---

१ ०क्रामंत्यु० M U Be 11 Bo Be (pr. m.); ०क्रामत्यु० Tr Be (sec. m) Bhav., Keś.

२ एवैते Tr Be 11 U.

३ युक्तास् om. Be B.

४ Tr Be B ins. अथ ।

५ अचस्य i.s.o. अत M.

६ Thus Be 11 U F, Keś., Bhav. (one copy); अश्वाजनिं Tr; अश्वाजनी M; अश्वाजिनिं Be; अश्वाजिनं B; अश्वघाजिनीं H.

त्यर्वासीति दक्षिणꣳ सन्निरसीति मध्यमं वाज्यसीत्युत्तरमथैतानाजिसृतो[१] ऽवघ्रापयति[२] वाजिनो वाजं धावत मरुतां प्रसवे जयत वि योजना मिमीध्वमध्वन स्कभ्नीत काष्ठां गच्छतेत्यौदुम्बर्येषा स्रुणा सप्तदशसु शम्याप्रघ्राधेषु निमिता[३] तां काष्ठेत्याचक्षते[३] तामाजिसृतो ऽतीत्य[४] मा[४] गच्छत[४] मो[४] एनामप्राप्य[४] निवृततान्नःपक्वसमेनां[५] कृत्वा सव्यानवगूह्य दक्षिणैरनुपरिवर्तयाध्वै[६] मो[६] अप्रसूताः[६] सर्पतेति[६] ॥ ७ ॥ तृतीयः ॥

अथाहाभिसर्पं यजमान माहेन्द्रं ग्रहं ग्रहीष्यामीत्यन्वारब्धे यजमाने माहेन्द्रं ग्रहं गृह्णाति महाꣳ इन्द्रो य ओजसेत्यनुष्टुत्योपयामगृहीतो ऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति[१] परिमृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेति[१] तदेतान्पञ्चैन्द्रानतिग्राह्यान्सह सꣳसादयत्यथाप[७] उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्रोचमुपाकरोति[१] स्रुवते

---

१ ०मथैतान० Be B Keś.; ०मथैनान० the other MSS.

२ Thus M Tr Be B F H Keś.; विघ्राप० Be 11 U and Comm. on Taitt. S. Vol. I, p. 1024.

३ These three words only in Be B and Bhav.; the other MSS. and Keś. omit them.

४ Thus Tr Be B Keś.; मैनाम० the other MSS

५ Thus Be B; निवृत्ततांतः० Tr; निवृत्तांतः० M Be 11 U; निवृत्तांततः० H; निवृत्यांत्यंतात० F.

६ Thus Be B; ०याध्वैमो FH; ०यूध्वंप्रसूतासर्पतेति Tr.; ०यध्वंमाप्रसूताः सर्पतेति M; ०याध्वैमाः प्रसूताः सर्पतेति Keś.

७ ०सादयत्य० MH Keś.

माहेन्द्राय[१] । प्रसुते माग्नि संप्रेषमाह ब्रह्मन्वाजिनाꣳ साम गायाजिसृत आजिं धावत दुन्दुभीन्समाघ्नताभिषोतारो[२] ऽभिष्णुताग्नीदाग्निरं विनयोलूखलमुद्दादय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सौम्यस्य विद्धीति । यथासंप्रेषं ते कुर्वन्ति । गायति ब्रह्मा वाजिनाꣳ साम । तं य एव कश्च[३] परिकर्म्मावेष्टयति । धावन्त्याजिसृत । आघ्नन्ति दुन्दुभीन्संप्रवदन्ति वाचः । संप्रोदिता[४] वाचो ऽनुमन्त्रयत इन्द्राय वाचं वदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयिदित्यथ रथान्धावतो ऽनुमन्त्रयते वाजेवाजे ऽवत वाजिनो न इति चतसृभिरनुच्छन्दसꣳ । ग्राम्यन्ति घोषाः प्रस्थाय । होत्र एषोत्तमेति प्राङ्होतुः कालात्यराङावर्तते ऽध्वर्युरभ्येनमाक्रयते होता । प्रत्याक्रयते ऽध्वर्युः । ग्रꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङित्योद्यच्छत एतं माहेन्द्रं ग्रहमनूद्यच्छन्त इतरानुपोद्यच्छन्ते नाराग्रꣳसानथाश्रावयत्यो श्रावयासु श्रौषडुक्थशा[५] यज सोम-

---

१ माहे॰ M Tr U Be B Be 11; महे॰ HF.

२ Thus (समाघ्नत, cp. Pitṛmedhasūtra, p. 37. 14) Tr U Be B Be 11; समाहत MHF.

३ Thus M Tr U Be B; कश्चन Bell H; कश्चत F.

४ संप्रवदिता, संखदिता, संप्रवदंता or संप्रवदतो the MSS.; this last reading, presented by M, could also be defended, if we take the part. as an acc. pl. masc., but cp. Bhav. ता अनुमन्त्रयते and infra xii. 13, where the correct reading is given by M.

५ Be B ins. इति after श्रौषड्।

स्येति । वषट्कृते जुहोति । तदेतान्पञ्चैकानतिग्राह्यान्सह[1] जुक्कति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराग्रꣳसाननुप्रकम्पयन्ति । द्विर्द्वतो माहेन्द्रः परिशेते । आयन्ति रथा । आगतान्यथान्दृष्ट्वा याचत्याज्यस्थालीꣳ सस्रुवाꣳ । स यद्यस्मै रथभेषमाचक्षत आग्नीध्र[2] एतां जुहोत्युत स्मास्य द्रवत- ५
स्तुरण्यत इत्युभयेनैव रथविमोचनीयं जुहोत्या मा वाजस्य प्रसवो जगम्यादिति । ॥ ८ ॥

अथ याचति नैवारꣳ सप्तदग्गरावꣳ सप्तदग्ग सुवर्णानि[3] कृष्णलानि हिरण्यपाचं मधोः पूर्णमित्येतत्समादायान्तरेण चालालोत्करावुदङ्मुपनिष्क्रामत्युत्तरत[4] एते रथा युक्ता- १०
स्तिष्ठन्ति । तदेतान्यजुर्युजो ऽश्वानवघ्रापयति वाजिनो वाजजितो वाजꣳ सस्रुवाꣳसो वाजं जिगिवाꣳसो बृहस्पतेर्भागे निमृड्ढ्वमित्यथैनमपिधाय प्रज्ञातं निदधात्यथ रथान्विमुच्यमाननुमन्त्रयत इयं वः सा सत्या संधाभूद्यमिन्द्रेण समधद्ध्वमिति । दुन्दुभीनवस्थतो ऽनुमन्त्रयते ऽजीजिपत वनस्पतय १५
इन्द्रं वाजं विमुच्यध्वमिति । तदेतं यजुर्युजꣳ रथं विमुञ्चति यथादत्तमितरान्व्यावर्तयन्त्युपसंगच्छन्त एनमेत आजिसृतस्तेभ्य एकैकं कृष्णलं व्युदयच्छति । तानि सार्धꣳ समादाय हिरण्यपाचं मधोः पूर्णमित्येकधा ब्राह्मण उपहरति । ॥ ९ ॥

---

१ तदेतान् om. Be B ; तदेतत् M.

२ चाग्नीध्रीय Be B.

३ सौवर्णानि U.

४ °क्रामत्यु° Tr HF ; °क्रामंत्यु° MU Be B Be 11.

तद्ब्रह्मा प्रतिगृह्योपावरोहत्यथाहाजिसृतो दक्षिणापथेनोपातीत्य दक्षिणꣳ श्रोणिमभिनिश्रयध्वं[1] मारुता अग्नेणाहवनीयं परीत्य दक्षिणमꣳसमुपसꣳश्रयध्वमिति[2] । तदेनान्विमिताभ्यामभिविघ्नन्त्यथाहैहि[3] यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य यजमानꣳ सोमग्रहानुपस्थापयति ॥ १० ॥

संपृच स्थ सं मा भद्रेण पृङ्क्तेति । विपृच स्थ वि मा पाप्मना पृङ्क्तेति सुराग्रहानथैताꣳ सुराꣳ सप्ररेकामादायैताꣳश्च सुराग्रहानाजिघ्रञ्च उपहरन्ति । तां ते पिबन्तो रममाणा महीयमाना आसते । ऽत्र यन्मात्या अनवदानीयं तदुभयानन्तरेण[4] पर्णशाखासु न्यस्यति । तत्समुत्कृष्य[5] विमायीकुर्वते[6] । ऽथ याचत्याज्यस्थालीꣳ सस्रुवां तार्ष्यं दर्भमयमित्येतत्समादायाहैहि यजमानेत्यन्वग्यजमानो ऽनूची पत्न्याहवनीये जुहोत्यन्वारब्धे यजमाने वाजश्च प्रसवश्चेति द्वादश स्रुवाहुतीरथ यजमानं तार्ष्यं परिधापयति क्षत्रस्योल्बमसीति । क्षत्रस्य

---

१ ०भिनिःश्र० Be (sec. m ) only.

२ Thus M Tr HF Keś. ; उपश्रय० Bell U , अभिनिश्रय० B Be.

३ तदेनान् i.s.o. तदेनान् M Tr U Bell H F , अथैनान् Be B , अभिविघ्नत्य० Be (sec. m.) Tr Bhav., अभिनिघ्नंत्य० MU Bell F, निघ्नत्य० H; अभिविखस्य० B Be (pr m.).

४ तदुभयोरंतरेण M.

५ Thus Be B ; समुत्कृश्य M U Bell H , समुत्कश्य F , ससत्कृश्योच्चैः क्रोशन्तः Keś.

६ cp. Âp. xviii. 7 8 , विमायं कुर्वते (as TBr. I. 3, 8. 4.) M.

योनिरसीति दर्भमयं पत्नीमयैतां श्रितिं[1] यजमानायतनात्प्राचीं वोदीचीं वा यूपमभ्यायातयत्यथ जायामामन्त्रयते जाय एहि सुवो रोहावेति। रोहाव हि सुवरितीतरा प्रत्याहाहं नावुभयोः सुवो रोक्ष्यामीति यजमानस्त्वं नावुभयोः सुवो रोहेति पत्नी। तां दशभिः कल्पै[2] रोहत्यायुर्यज्ञेन[3] कल्पतामित्यान्तं गत्वा बाहू उद्गृह्णाति सुवर्देवाः अगन्मामृता अभूम प्रजापतेः प्रजा अभूमेत्यथेमं लोकं प्रत्यवेक्षते समहं प्रजया सं मया प्रजा समहं रायस्पोषेण सं मया रायस्पोष इत्यथैनामुपावरोहति। स यावति मन्यत एतावति मोदाप्स्यन्तीति[3] तदेनमासपुटैर्[4]भिन्ति॥ ११॥

अन्नाय त्वेति पुरस्ताद्ध्वर्युरन्नाद्याय त्वेति दक्षिणतो ब्रह्मा वाजाय त्वेति पश्चाद्धोता वाजजित्यायै त्वेत्युद्गातोत्तरतो। यद्यु वा एते न कामयन्ते ऽध्वर्युरेव पुरस्ताद्भिन्ति दक्षिणतः प्रति-

---

१ Thus M Tr Be B; श्रीतिं U Bell H F; श्रीतिं Bhav. (one copy), श्रितिरं (the other copies); Keś has thrice श्रीतिं corrected from original श्रितिं or श्रीतिं।

२ Thus (as TBr. I. 3. 7. 4.) M Tr UBF Dvaidhasūtra and Bhav. on this passage of the Dvaidha; कल्पैरारोह० Be H; thus also Bhav. on the passage of the Vājap.

३ Thus, conjecturally, corrected; मोदास्यंतीति M Tr; मेदास्यंतीति UHF; मांप्राप्स्यंतीति Be B.

४ ऊषपुटै० FH Be (pr. m.); although at the beginning of this praśna the ऊषपुटाः have been mentioned, आसपुटैः is here the correct reading, cp. Bhav. a. h. l.

प्रस्थाता पश्चादाग्नीध्र उन्नेतोत्तरतस्तेषां[1] तथा विभागो यथा दुन्दुभीनामंचास्यै[2] प्रत्यवरोहणतं[3] आसन्दीं निदधाति । तस्यां वस्राजिनमास्तृणाति वस्राजिने शतमानꣳ हिरण्यमंथ दक्षिणं पादꣳ हिरण्यं[4] उपावरोहत्यमृतमसीति[5] पुष्टिरसि प्रजनन-
५ मसीति सव्यं वस्राजिने । ऽथैनमेतयासन्ध्या सद आवहन्त्या[6] वा[6] व्रजत्यन्वायन्त्येनमेते[6] चमसा । अचैतस्य वार्हस्पत्यस्येडामुप-क्रयत । दडोपहूतं माहेन्द्रꣳ होता चैवाध्वर्युश्च संभक्षयतो नराशꣳसपीतेन नाराशꣳसानचैतेषामतिग्राह्याणां मुख्ये पात्रे सꣳस्रावान्समवनीय यजमान एव प्रत्यक्षं भक्षयत्यपि वैना-
१० न्सर्वत्र एव चमसेषु व्यवनीय भक्षयेयुरित्येतदपरꣳ । होत्र-चमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिंक्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा

---

१ Thus M Tr; उत्तरत उन्नेता all the other MSS.

२ Thus Tr Be B Be 11 (sec. m.); यथास्यै UFH Be 11 (pr. m.); यत्र om. M.

३ Thus corrected on account of the collateral passage xviii. 17 s. f. and the Vivaraṇa: प्रत्यवरोह(ण)तः यत्र प्रत्यवरोहति तत्र; MSS. प्रत्यवरोहत ।

४ हिरण्यमुपा॰ M U Be 11 H F; हिरण्यउपा॰ Be; हिरण्ंउपा॰ B, हिरण्य om. Tr.

५ Thus Be 11; ॰वर्हत्यानाव्रजत्य॰ U; ॰वर्हत्यथवाव्रजंत्य॰ M; ॰व्रजंत्य॰ Tr Be B H F, but cp. Bhav.: तयैवासन्ध्योद्यम्य सदः प्रापयन्ति स्वयमेव वा गच्छति ।

मार्जयन्ते ऽग्नेन्द्राय त्वेन्द्राय त्वेत्येवं चिभिरृक्थ्यपर्यायैश्चरति[१] संतिष्ठते माध्यंदिनꣳ सवनम् ॥ १२ ॥ चतुर्थः ॥

अथ सावित्रꣳ हुत्वा प्रसर्पन्ति तृतीयसवनाय प्रसिद्ध्यादित्यग्रहेण चरित्वाग्रयणं गृह्णात्यथ षोडशिनमभिगृह्णात्यसावि सोम इन्द्र ते शविष्ठधृष्णवोपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति समानं कर्मा पवमानात्पवमानेन चरित्वा खे धाम्नयशुभिश्चरति[२] तेषां नाना मनौता नाना देवता नाना प्रत्यभिमर्शना नाना वसाहोमाः समानो वनस्पतिः समानः खिष्टकृत्प्रैषवान्त्समानीडा समान्यो दिशो नाना दिश इत्येके समानं कर्मा ध्रुववद्ध्रुवसेभ्यो ध्रुववद्ध्रुवसेश्चरित्वा चिभिरृक्थ्यपर्यायैश्चरतीन्द्रावरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामित्यथ[३] षोडशिना चरत्यथ प्राङायन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वत्र एव राजानमुन्नय मातिरोरिच इति होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्त्सर्वत्र एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति तदेतान्प्राजापत्यान्सन्त सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् हुत्वा स्तोत्रमुपा-

---

१ Thus M Tr; चरंति UB Be H Be 11 F.

२ Thus M Tr BHF; चरंति Be 11 U.

३ °चरतीन्द्रा° M Tr, the other MSS. read plural.

करोति । स्तुवते । ०तदेतद्बृहत्सामैकविꣳशं वैष्णवीषु गिरिविष्ट-
वतीषु कुर्वन्ति । होत्र एषोत्तमेति प्राङ्होतुः कालात्पराङ्ग-
वर्तते ऽध्वर्युरभ्येनमाक्रथते होता । प्रत्याक्रथते ऽध्वर्युः ।
शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत
५ एतꣳ होत्रचमसमनूद्यच्छन्त इतरानुपोद्यच्छन्ते चमसानथा-
आवयव्यो आवयास्तु औषलुक्थ्या यज सोमानामिति ।
वषट्कृते जुहोति । तदेतान्प्राजापत्यान्सह जुह्वति । वषट्कृतानु-
वषट्कृते द्विर्जुहोति । तथैव द्विर्हिः सर्वाꣳश्चमसाञ्जुक्रत्यथ भक्षैः
प्रत्यञ्च आद्रवन्त्यनुसवनभक्षः प्रजापतिना पीतस्येत्येतेषां[1]
१० प्राजापत्यानां मुख्ये पात्रे सꣳस्रावान्त्सम्प्रवनीथ[2] यजमान एव
प्रत्यक्षं भक्षयत्यपि वैनान्त्सर्वꣳ एव चमसेषु प्रवनीय भक्षयेयु-
रित्येतदपरमत्र यत्प्रारुत्या अनवदानीयं तदृत्विग्भ्य उप-
हरति[3] । तदेतत्समावद्यो[4] विभज्य प्राश्नन्ति । होत्रचमसमेवैते
त्रयः समुपहृत्य भक्षयन्ति । यथाचमसं चमसान्हिङ्ग म दृत्या-
१५ त्मानं प्रत्यभिहृत्य भक्षयन्ते । नाप्राश्नयन्ति चमसान्त्सर्वभक्षा मार्ज-
यन्ते । ऽथ संप्रेषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद
ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीद्ग्नीन्त्सꣳस्रावꣳस्रावꣳस्रावꣳहोत्याहर-

---

१ Thus M Tr U Be 11; चचैषां Be BFH.

२ Thus M Tr; संस्रावमवनीय Be11 UH Keś.; संस्रावानवनीय F; सꣳस्रावान्प्रत्यवनीय B Be; cp. supra p. 81, 9.

३ ०हरति Be BH Bhav.; हरंति M Tr F.

४ Thus MUHF; तत्तेसमा० Tr Be B; तदेतेसमा० Be (sec. m.).

न्येतान्नाग्नीध्रादीपयजानङ्गारान्स्तानग्नेण[1] होतारं निवपत्युपवीद्त्युपयष्टा गुदहतीयैरेतानि गुदहतीयान्येकादशधा हुत्वोपयष्टोपयजति । समानमत ऊर्ध्वं । संतिष्ठते वाजपेयो । वाजपेयेनेष्ट्वा प्रत्यवरोहणीयेनाग्निष्टोमेन[2] यजेत । संतिष्ठते वाजपेयः संतिष्ठते वाजपेयः । ॥ १३ ॥ पञ्चमः ॥ ५

## ॥ इत्येकादशः प्रश्नः ॥

---

१ Thus (•हरत्ये•) all exc. B, which has the sing. and M, which omits this passage altogether.

२ चतुष्टोमेन ins. Tr.

राजसूयेन[१] यक्ष्यमाणो भवति । स पुरस्तात्फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्या आमावास्येन[२] हविषेष्ट्वा दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः । संतिष्ठत एष प्रायणीयो ऽग्निष्टोमस्त्रयस्त्रिष्टोमः सहस्रदक्षिण उदवसानीयान्तो । ऽथाष्टमे ऽह्यानुमतं निर्वपति । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनाद्ध्रुव्य दक्षिणार्धे गार्हपत्यस्याष्टौ कपालान्युपदधात्येकं प्रतिप्रस्थातोत्तरतो नैर्ऋताय । हविःपेष्यै प्रयच्छन्नाह प्राचश्च प्रतीचश्च व्यवघातयन्ती पिण्ड्रीति[३] । स ये प्राञ्चः ग्राम्याया अवगीयन्ते तानध्वर्युः समुप्य संयुत्यानुमतय् अपयत्यथ ये प्रत्यञ्चः ग्राम्याया अवगीयन्ते ताम्प्रतिप्रस्थाता समुप्य संयुत्य नैर्ऋतय् अपयत्यादत्त[४] एतं[५] नैर्ऋतमुपस्तीर्णाभिधारितं कृष्णं वासः कृष्णतूषमन्तमागारादेकोल्मुकमुदपात्रमित्येतत्समादाय गार्हपत्ये स्रुवाज्यं जुहोति वीहि स्वाहाज्यं जुषाण इत्यथ दक्षिणया द्वारोपनिष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणय् स्यष्टं भवति प्रदरो वा

---

१ ... १ Thus MT Be 11 (the last two om. however स); the other MSS.: राजा राजसूयेन यजेत फल्गुन्यै वा चैत्र्यै वा पुरस्तादामावास्येन। The Vivaraṇa begins also. राजा राजसूयेन यजेतेति, but infra it cites the words यक्ष्यमाणो भवति and cp. comm. on T.S. i. 1.8 and on Tānḍ. br. xviii. 8:1.

२ पिंड्रीति M; the other MSS still more corrupted.

३ Thus M; अपयित्वादत्त T Be 11; Be BU om. त्वादत्त।

४ Thus M; एतन्नै० all the other MSS.

तदेतदेकोल्मुकमुपसमाधाय संपरिस्तीर्याङ्गुष्ठाभ्यां[1] परिगृह्य नैर्ऋतं जुहोत्येष ते निर्ऋते भागो भूते हविश्चत्यसि सुश्चेमम्ँहसः खाहेत्यंच कृष्णं वासः कृष्णतूषं ददात्यथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति हस्तपादाग्रचाक्षैतेनैव यथेतमेत्य गार्हपत्ये स्रुवाहुतिं जुहोति खाहा ५ नमो य दृदं चकारेत्यथानुमतेन[2] सम्ँस्थां करोति। धेनुं ददाति[3]॥ १॥

अथ नवमे ऽह्न्यादित्यं चरुं निर्वपति। वरं ददात्यथ दशमे ऽह्न्याग्नावैष्णवमेकादशकपालं। वामनं वहिनं ददात्यथैकादशे ऽह्न्यग्नीषोमीयमेकादशकपालम्ँ। हिरण्यं ददात्यथ १० द्वादशे ऽह्नैन्द्रमेकादशकपालमृषभं वहिनं ददात्यथ त्रयोदशे ऽह्न्याग्नेयमष्टाकपालमैन्द्रं दध्यृषभं वहिनं ददात्यथोपातीत्याग्रयणहवीम्ँषि चतुर्दशे ऽह्नि सरस्वत्यै चरुं। वत्सतरीं ददात्यथ पञ्चदशे ऽह्नि सरस्वते चरुं। वत्सतरं ददाति। यद्यु वै चतुर्दश्यामेवोपवसथः संपद्यत एवमेवैतदहरेताभ्यामिष्टिभ्यां[4] १५ नानाबर्हिर्भ्यां[5] यजेतायास्तैतदहर्विश्वेभ्यो देवेभ्यो वत्सा अपाकृता भवन्ति। वैश्वदेवं पयो दोहयित्वोपवसति सांनाय्यस्य

---

१ षष्ठीभ्यां i.s.o. चङ्गुष्ठाभ्यां B Be U.

२ ०चकारेत्यनुमतेः Be BU.

३ धेनुर्दक्षिणा Be BU.

४ एकमे० i.s.o. एवमे० M Be BU.

५ Thus M; ०बर्हिभ्यां Be BU: ०ग्नीध्रिभ्यां Be 11 T.

वाहता तूष्णीं वाँथ श्वो भूते वैश्वदेवहविर्भिरिष्ट्वा पौर्णमास-
वैष्णवाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । ऽथ श्वो भूत इन्द्राय
सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपत्यभिहितो रथ उभा-
काꣳस्यकवचो[१] गर्भिणीभिर्वा वडवाभिर्युक्तः साण्डैर्वाश्वैरावेष्ट्यो
५ निष्क्रस्तद्दादात्यथ श्वो भूत इन्द्रायाꣳहोमुचे पुरोडाशमेका-
दशकपालं निर्वपत्यनभिहितो रथो[२] ऽकाꣳस्यकवचो[२] ऽगर्भा-
भिर्वा वडवाभिर्युक्तो निरष्टैर्वाश्वैः[३] स्रुक्षणको[३] निष्क्रस्त-
द्दाति । ॥ २ ॥

एते संतनी इत्याचक्षते । ऽथ श्वो भूते संतनीभ्यामेव
१० प्रतिपद्यते । स एवमेव संतनीभ्यामहरहर्विपर्यासं[४] यजमान-
स्चतुरो मास[५] एति[५] काममिष्ट्वा कामं पशुबन्धेन कामं

---

१ Thus hesitatingly emended. उभे कंस्यकवचौ M; दर्भैकस्यकवचो T Be 11; उभौकांस्यकवचौ Be BU; Bhav. उभे कांस्यकवचौ शिरस्त्राणम्, but this may be a periphrase of our compositum. So much, at any rate, is certain, that an adj. is required with the sense उभयतः कांस्य-कवच (cp. Kāty. xxii. 10. 30-31, Lāty. ix. 4. 14).

२ Again emended; रथो न उकंस्यो उकवचो उग० M; could उ in Nandināgarī represent the avagraha? Then the reading of M would be; रथो [न] ऽकंस्यो ऽकवचो ऽग०; रथः कांस्यकवचो Be BU; दर्भै-कस्यकवचो Be 11 T (omitting रथो).

३ ०वाश्वै स्रुक्षणको M; ०वाश्वैस्रुक्षणका T Be 11; ०वाश्वैस्रुक्षणस्रद्० Be; ०वाश्वैस्रुक्षणस्रद्० B, the last two om. निष्क्रस्।

४ Here and infra B Be U have sometimes विपर्यासाभ्यां; Be 11 T om. the word every time.

५ Thus here and infra M; मास इति B Bo U; मासानेति Be 11 T.

यवाग्यणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वेष्ट्वा[1] वरुणप्रघासहविर्भिरिष्ट्वा पौर्णमासवैष्णवधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते। अथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानो ऽपराऽऽचतुरो मास एति कामामिष्ट्वा कामं पशुबन्धेन कामऽ श्यामाकाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वेष्ट्वा साकमेधहविर्भिरिष्ट्वा पौर्णमासवैष्णवधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते। अथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानो ऽपराऽऽचतुरो मास एति कामामिष्ट्वा कामं पशुबन्धेन कामं श्रौद्धाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वेष्ट्वा शुनासीरीयहविर्भिरिष्ट्वा पौर्णमासवैष्णवधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते। अथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानः सप्ताहान्येति कामामिष्ट्वा कामं पशुबन्धेनाथाष्टमे ऽह्नीन्द्रतुरीयमाग्नेयमष्टाकपालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुमन्वाहार्यमासाद्य वह्निर्नीं धेनुं ददाति। ॥ ३ ॥

अथ तदानीमेव पञ्चेष्टीयेन प्रतिपद्यते। पञ्चधाङ्गारानिरूह्य पञ्चेध्मानभ्यादधाति पर्णमयं पुरस्ताच्चैत्यग्रोधं दक्षिणत आश्वत्थं पश्चादौदुम्बरमुत्तरतः प्लाक्षं मध्ये। अथैनानाज्येन व्याघारयति ये देवाः पुरःसदो ऽग्निनेत्रा रक्षोहणस्ते नः पान्तु

---

[1] Thus here and infra MT Be 11, संतन्येष्ट्वा B Be.

ते नो ऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा ये देवा दक्षिणसदो ये देवाः पश्चात्सदो ये देवा उत्तरसदो ये देवा उपरिषद् इत्यथोपवेषेणाङ्गारान्समूहति[1] समूढꣳ रक्षः संदग्धꣳ रक्ष इद्-महꣳ रक्षो ऽभिसंदहामीत्यथैनान्स्रुवाङ्कृतिभिरभिजुहोत्यग्नये[2] रक्षोघ्ने स्वाहेति पञ्चभिरर्चं[3] प्रष्टिवाहिनꣳ रथं ददात्यथ याचति पर्णमयꣳ स्रुवमपामार्गस्रक्कूम्प्रतिवसनीयं वासो ऽन्त-मागारादेकोल्मुकमुदपात्रमित्येतत्समादायोदञ्चो निष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणꣳ स्रष्टं भवति प्रदरो वा[4] तदेतदेकोल्मुकमुपसमाधाय संपरिस्तीर्य पर्णमयेन स्रुवेणापा-मार्गस्रक्कूञ्जुहोति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि स्वाहेति[5] हतꣳ रक्ष इति स्रुवमनुप्रहरत्यवधिꣳ[6] रक्ष इत्युपतिष्ठते[7] ऽत्र[8] यदस्ते तद्दात्यथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति हस्तपादान्प्रक्षाल्यैतेन यथेतमेत्येन्द्रतुरीयेण सꣳस्थां करोत्यथ नवमे ऽह्नि पूर्वाणि देविकाहवीꣳषि निर्वपत्यनुमत्यै चरुꣳ राकायै चरुं धात्रे पुरोडाशं द्वादशकपालमित्येन्द्राहार्य-

---

१ निरूहति Be T.

२ स्रुवाङ्कृतीभि० M Be U; स्रुवाङ्कृतीर० BT Be 11.

३ पंचभिर om Be BU.

४ इति om. Be BU.

५ °नुप्रहृत्याव० Be BU.

६ उपोतिष्ठते MT Be 11, but cp. Āp. xviii. 9. 18.

७ om. B Be U.

मासाद्य[1] वत्सतरी[2] दद्यात्यथ दशमे ऽह्युत्तराणि देविका-
हवीꣳषि निर्वपति सिनीवाल्यै चरुं कुहूै चरुं धात्र एव[3]
पुरोडाशं द्वादशकपालमित्यन्वाहार्यमासाद्य[4] वत्सतर[5] दद्दा-
त्यथैकादशे ऽह्नि त्रिषंयुक्तैः प्रतिपद्यत आग्नावैष्णवं निर्वप-
त्यैन्द्रावैष्णवमेकादशकपालं वैष्णवं त्रिकपाल[6] वामनमृषभं ५
वहिनं दद्दात्यथ द्वादशे ऽह्यग्नीषोमीयमेकादशकपालं निर्वप-
तीन्द्रासोमीयमेकादशकपालꣳ सौम्यं चरुं[7] बभ्रुं दद्दात्यथ
त्रयोदशे ऽह्नि सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं
चरुꣳ[8] श्यामं दद्दात्यथ चतर्दशे ऽह्नि वैश्वानरं द्वादशकपालं
निर्वपति[9] हिरण्यं दद्दात्यथ पञ्चदशे ऽह्नि वारुणं यवमयं १०
चरुमश्वं ददाति[10] ॥ ४ ॥ प्रथमः ॥

अथैनमामावास्येन हविषेजानꣳ रत्निनः पर्यवस्यन्ति[11]
दक्षिणतो वोदञ्चो पञ्चाद्वा प्राञ्चस्तेषामवसितानां ब्रह्मैव दक्षि-
णार्धो वापरार्धो वा भवति[12] स[13] यत्किंच यज्ञपरिभोजनं[14]
ब्रह्मण एव[15] तद्गृहे[16] भवत्यथारण्योरग्नीन्समारोह्य ब्रह्मणो १५

---

१ इति om. T Be 11 U.

२ °तरं Be 11 T.

३ om. B Be U; the word should be supplied, also Vol. i. p. 264, 4.

४ इति om. all the MSS.

५ °तरी Be 11 T.

६ पर्युपविशंति B Be U.

७ om. Be 11 T.

८ °भाजनं B Be U.

९ Thus M Be 11 T; एवैत° B Bc.

गृहानध्यवसाय मथित्वाग्नीन्विहृत्य बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे। ग्नितिष्ठं ददात्यथारण्योरग्नीन्समारोह्य[१] स्वान्यग्न्यायतनान्यभिप्रव्रजति[२]। तं यन्तमनुमन्त्रयते ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्यथ स्वान्यग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्येन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रतिनिर्वपत्यथास्यैतद्दृः[३] श्वेताये श्वेतवत्साये पयो दोहयित्वा समातच्य निदधात्यथ श्वो भूते ऽरण्योरग्नीन्समारोह्य राजन्यस्य गृहानध्यवसाय मथित्वाग्नीन्विहृत्येन्द्रमेकादशकपालं[४] राजन्यस्य गृहे। ऋषभं ददाति। तथारण्योरग्नीन्समारोह्य स्वान्येवाग्न्यायतनान्यभिप्रव्रजति[५]। तं तथैव[६] यन्तमनुमन्त्रयते। यस्यस्य गृहे यजते सस्यो ऽनुमन्त्रयते ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्यथ स्वान्येवाग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्येन्द्रायाग्नेहोमुचे पुरोडाशमेकादशकपालं प्रतिनिर्वपति। प्रज्ञातमेवास्यैतद्दृः श्वेताये श्वेतवत्साये पयो दोहयित्वा समातच्यैवं[७] निदधात्यथ तृतीये ऽह्नादित्यं चरुं मध्ये गृहे। धेनुं ददात्यथ चतुर्थे ऽह्नि भगाय चरुं वावाताये गृहे। विचित्तगर्भां षष्ठौहीं ददात्यथ पञ्चमे ऽह्नि

---

१ ०रोह्य here and infra sometimes B Be U.

२ ०व्रजंति MT Be Be 11; ०व्रजति B.

३ प्रति om. MT Be 11 but cp Āp. xviii. 10. 28.

४ एव after स्वानि om. MT Be 11; ०व्रजति T Be 11. B; व्रजंति M Be.

५ Thus MUB Be; एव om. Be 11 T.

६ सम् om. Be BU.

वैर्कृतं चरुं परिवृक्ष्ये गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं
कृष्णां कूटां ददात्यथ षष्ठे ऽह्नाग्नेयमष्टाकपालꣳ सेनान्यो
गृहे हिरण्यं ददात्यथ सप्तमे ऽह्नि वारुणं दशकपालꣳ
सूतस्य गृहे महानिरष्टं ददात्यथाष्टमे ऽह्नि मारुतꣳ सप्त-
कपालं ग्रामण्यो गृहे वृष्निं ददात्यथ नवमे ऽह्नि सावित्रं ५
द्वादशकपालं चतुर्गृहं उपध्वस्तं ददात्यथ दशमे ऽह्नाश्विनं
द्विकपालꣳ संगृहीतुर्गृहे सवात्यौ ददात्यथैकादशे ऽह्नि पौष्णं
चरुं भागदुघस्य गृहे श्यामं ददात्यथ द्वादशे ऽह्नि रौद्रं
गावीधुकं चरुमक्षावापस्य गृहे प्रवलमुदारं ददाति प्रसिद्ध-
मेवास्यैतद्दः[1] श्वेताये श्वेतवत्साये पयो दोहयित्वा[2] समातच्चैव[3] १०
निदधात्यथ चयोदशे ऽह्नि मैत्रावार्हस्त्यं भवति ॥ ५ ॥

अथ वै भवति श्वेताये श्वेतवत्साये दुग्धे स्वयंमूर्ते स्वयं-
मथित आज्य आश्वत्थे पात्रे चतुःस्रक्तौ स्वयमवपन्नाये प्राखाये
कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्विचिनुयादित्यथ वै भवति स्वयं-
कृता वेदिर्भवति स्वयंदिनं बर्हिः स्वयंकृत इध्म इति राजै- १५
वायꣳ[4] स्वयं कर्मभिः पूजितो भवति स[5] स्वयमेव वेदिं
करोति स्वयमिध्मावर्हिः संनह्यति स्वयमाश्वत्थं पात्रं चतुःस्रक्तिं[6]

---

१ Thus B Be U; प्रसिद्धमेवास्यैतं द्वादशाहं M; अथ प्रसिद्धमेवास्यैद्वादशाहं T Be 11.

२ दोहयित्वादोहयित्वा M.

३ समातच्चसमातच्चैव M; तानर्धमासादच्चैव Be 11 T.

४ corrected; राजैवायमु M Be BU; राजैवेयं Be 11 T.

५ om. T Be 11.

६ स्रक्ति T Be 11, but cp. Ap. xviii. 11. 2.

करोति[1] स्वयमवपन्नाये प्राखाये कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्विचिनोत्यथ वै भवति ये कर्णाः स पयसि बार्हस्पत्यो ये ऽकर्णाः स आज्ये मैत्र इत्यथोत्तरतो भस्मभिश्रानङ्गारान्निरूह्य तेषु नवं पात्रमधिश्रित्य तिरः पवित्रमाज्यमानीय[2] तिरः[2] पवित्रमकर्णानोप्य[2] तेन[3] बार्हस्पत्यमपिदधाति[4] । तं तथापिहितमन्तर्वेद्यासादयति[5] । समानं कर्म प्रयाजेभ्यः । पञ्च प्रयाजानिष्ट्वोदङ्त्याक्रम्य सꣳस्रावेण बार्हस्पत्यमभिघार्य मैत्रमभिघारयति । बार्हस्पत्येन पूर्वेण प्रचरत्यथ मैत्रेण । बार्हस्पत्यस्य पूर्वस्य स्विष्टकृते ऽवद्यत्यथ मैत्रस्य । बार्हस्पत्यस्य पूर्वस्येडामवद्यत्यथ मैत्रस्यान्वाहार्यमासाद्यैतामेव श्वेताꣳ श्वेतवत्सां ददाति । संतिष्ठते मैत्रोबार्हस्पत्यꣳ हविः । ॥ ६ ॥ द्वितीयः ॥

अथैतस्मिन्नेव पूर्वपक्ष उक्थ्यायाभिषेचनीयाय दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायै मे यज्ञिये[6] ऽहन्सुत्या संपत्स्यत इति ।

---

१ यांचति B Be U.

२ Thus M; Be BT om. आज्यमानीय तिरः पवित्रं and Be BU have कर्णान् i.s.o. अकर्णान्।

३ अभिद० Be 11 T.

४ तेनमपिहित० T Be 11.

५ Thus MB Be; यज्ञीये U; यजनीये T Be 11; this latter might be the right reading, but as the expression यज्ञिये ऽहन occurs several times infra, xvii. 55-61, without any various reading, I did not venture to write यजनीये in the text.

तस्य तथा संपद्यते ऽथ प्रायणीयेन चरति प्रायणीयेन चरित्वा पदेन चरति पदेन चरित्वा रोहिते[१] चर्मणि[१] राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्याधान्वहमुपसङ्गिश्वरत्यथाहवनीयं प्रणयत्याहवनीयं प्रणीय रथवाहने सदोहविर्धाने संमिनोति रथवाहने सदोहविर्धाने संमित्याग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्याहृता यूपमुच्छ्रयति खर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति तस्य प्रमिद्धं वपया चरित्वा वसतीवरीर्गृह्णात्यथ पशुपुरोडाशं निर्वपति तमनुवर्तन्ते ऽष्टौ देवसुवाः हवीःष्यग्नये गृहपतय इत्येतानि तेषामुक्तं चरणं यथाग्नेर्विधायामिडान्ताः पुरोडाशाः संतिष्ठन्ते पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके ऽथैतान्दुन्दुभीननुदिग्गमासञ्जयत्यथ वसतीवरीः परिहृत्य पयाःसि विग्रिय्योपवसन्त्यथातो महाराच एव बुध्यन्ते प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यद्भिरुदेतु[२] कंस्यं[२] क्रतुमुपैति प्रमिद्धो ऽभिषवः प्रमिद्धं ग्रहा गृह्यन्ते समानं कर्माश्विनाद्वादाश्विनं ग्रहं[३] गृहीत्वा द्वे रशने आदाय यूपमभ्यैति खर्वन्तं यूपमुत्सृज्याग्नेयं पशुमुपाकरोति तस्यैन्द्राग्न उपालम्भो भवति तयोः प्रमिद्धं वपाभ्यां चरित्वा प्रसर्पन्ति

---

१ Missing in M Be T, but cp. the Dvaidhasūtra.

२ ०रुदेत्यु० Be U; ०रुदेत्य० the other MSS.

३ om. M Be.

प्रातःसवनाय । तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि होष्यन्याचष्ट्याज्यस्थालीꣳ सस्रुवाꣳ स्रुचं वासस्तैतस्य वसनस्यान्तमायां दशायां निष्करञ्जुः प्रग्थिता[1] भवत्येतत्समादायाहैहि[2] यजमानेत्युत्तरेणाग्नीध्रीयं परीत्योत्तरेण सदः परीत्याग्नेण शालां तिष्ठते प्रतिप्रस्थाय एतानि प्रस्थाणि प्रयच्छत्यधाहैहि यजमानेति । रथ एष दक्षिणे श्रोणन्ते रथवाहन आहितो भवति । तमुपावहरतीन्द्रस्य[3] वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वधादित्यथैनं धूर्तहीतमन्तर्वेद्यभ्यवर्तयन्ति[4] तूष्णीमथास्यश्वान्युक्त्वा मुञ्चति तूष्णीमथ दक्षिणं योग्यं युनक्ति[5] मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेनेत्यथास्य पृष्ठं मर्ज्यते तूष्णीमेवमेवोत्तरं योग्यं युनक्ति । तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति । तयोरेवमेव पृष्ठे[6] मर्ज्यते[7] । एतस्य योगमनु सर्वमाणिवद्युज्यते ऽधिकृत्याह्वस्तिनः कुर्वन्ति । प्रवेष्टयन्ति वासोभारान्वसनानां दशासु निष्करञ्जूः प्रयच्छन्ति । पूगशो दक्षिणा आयातयत्यथ सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति ।

---

१ ०थितो MSS.

२ भवतीत्येत० M.

३ ०इरतो० Be BU, ०इर्ति० MT Be 11.

४ Thus M only; ०भ्यवर्तयंति T Be 11 U Be, ०भ्यावर्तयंति B.

५ Here Be BU ins. तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति ।

६ Thus MB Be U, पृष्ठमुन्मृज्य T Be 11.

नथवत्यर्चाग्नीध्रे जुहोति[1] सृज्यन्ते[2] दक्षिणा दक्षिणापथेन[1] स यत्किंचिद्ददाति[2] हिरण्मुखमेव ददात्यथ वासाꣳस्यथ[3] युक्तानि[3] गोअश्वꣳ हस्तिपुरुषमन्ततो[4] ऽदत्ता एवैते रथा अतिवर्तन्ते[5] नैते ऽन्यस्य सन्त आजिं धावन्ति[1] मनसैव स्वरथमध्वर्यवे ददाति[1] मनसा चतुष्पात्त्वेचं[6] ब्रह्मण आदिशति[1] मनसा समनुदिश्य[7] दक्षिणास्त्रिभिर्मरुत्वतीयैश्चरति[8][1] सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो[9] माहेन्द्राय[1] ॥ ७ ॥

अथ याचति वैतसं[10] द्रोणकलशꣳ षोडश[11] वायव्यान्यायास्तैतत्पुरस्तादेव[12] षोडशतयं आपो दिग्भ्यः संभृता[13] १०

---

१ संहृज्यते T Be 11.

२ यत्किंचद॰ M.

३ Thus M; उत i.s. of अथ T Be 11; B Be again (cp. supra p. 73, 10) अनांसि i.s.o. अथ।

४ Thus MUB Be; हस्तिदासपुरुष॰ T Be 11.

५ Thus M only; अतिनिर्वर्तते Be BU; अतिपतंते Be 11 T.

६ चतुष्पात्त्वेचं all MSS. exc. M which has चतुष्पत्त्वेचं; one copy of Bhav. has the word with ā, another with a, cp. Ait. Br. viii. 20, 2.

७ Thus MB; समनुदिश्य Be U; समुदिश्य Be 11 T.

८ चरति M; चरंति the other MSS.

९ °स्याबालंब॰ Be (sec. m.).

१० च ins. MT Be 11.

११ षोदशंच M.

१२ एतः i.s.o. एव Be BU.

१३ Thus M Be; संभृता BU; समाहृता Be 11 T.

दक्षिणस्य[१] हविर्धानस्य प्राच्यो ऽक्षात्प्रतीच्य उपस्तम्भनान्निहिताः प्रेरते[1] तासां वहन्त्यः पूर्वार्ध्या भवन्ति सारस्त्यो ऽपरार्ध्याः[1] स वहन्तीरभिजुहोत्यूर्जं त आपो देवीर्मधुमतीरग्रह्मन्नूर्जस्वती राजसूयाय चिताना: । याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ राष्ट्रदा स्य राष्ट्रं दत्त स्वाहेति[1] ग्रह्णाति पर्णमयेन राष्ट्रदा स्य राष्ट्रमसुष्मा आमुष्यायणायामुष्य पुत्रायामुष्य पौत्राय दत्तेत्यपां पतिरसीत्यपांपतीयाः पुंनाम्नो[२] वोत्सस्य[२] सधृद्रिया वा[1] वृषाग्नूर्भिरित्यौर्म्या[1] वृषसेनो ऽसीति पल्वल्या[1] व्रजच्छित स्थेति कूप्या[1] मरुतामोज स्थेति निवेश्याः[३][1] सूर्यवर्चस स्थेत्यतिदृश्याः[४][1] सूर्यत्वचस स्थेत्यातपति वर्ष्या[1] मान्दा स्थेति ह्रादुन्यो[५][1] वाग्ना स्थेति पृश्याः[६][1] प्रक्करी स्थेति गोरुत्क्या[1] विश्वभृत स्थेति पयो[1] जनभृत स्थेति दध्यग्नेस्तेजस्या स्थेत्याज्यमपामोषधीनाꣳ रस स्थेति मध्वथ

---

१ Thus Be BU Bhav.; उत्तरस्य MT Be 11.

२ Thus M Bhav.; पुत्रान्नोवासस्य Be U; पुत्रान्ना वासस्य B; पुत्रानेनास्य Be 11 T.

३ Thus M Bell T and the best MSS of the Karmāntasūtra; परिवेश्याः B Be and Bhav; निवेश्य the Vājasaneyins.

४ Thus only M and Bhav.; सूर्यवर्चसस्थेतिदृश्यं Be 11 T.; ०स्थेतिदिश्याः Be; in BU the passage is missing; the Karmānta MSS. read अभिदृश्याः।

५ Thus M Be; the other MSS. defective.

६ Thus M Be Bhav.; वर्ष्याः Be 11 T; but cp. TS. VII. 4. 13.

सारस्वतीरभिजुहोत्यपो[1] देवीर्मधुमतीरगन्नूर्जस्वती राजसूयाय चिताना:। याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः॥ राष्ट्रदा स्व राष्ट्रं दत्त स्वाहेति[1] गच्छति पर्णमयेन राष्ट्रदा स्व राष्ट्रममुष्मा आमुष्यायणायामुष्य पुत्रायामुष्य पौत्राय दत्तेत्यथैना वैतसे द्रोणकलशे समवनयति देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः क्षत्रियाय वन्वाना दत्त्यथैना अन्तरेण होतुश्च धिष्ण्यं ब्राह्मणाच्छंसिनश्च सादयत्यनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीरित्यथ ये ऽर्थाः[2] प्ररेका अध्वर्योस्तानावसयꣳ हरन्त्यथ ये[3] ऽनर्थाः[3] अपस्तानभ्यवहरन्त्यनभिक्रुतानाꣳ सारस्वतीनां वसतीवरीर्दग्धपेयाय परिश्रायय[4]न्ति[1]॥ ८॥ तृतीयः॥

अथाचैव तिष्ठन्याचति दर्भनाडीꣳ शतमानꣳ[5] हिरण्यं चत्वारि नानावृक्षाणि पात्राणि[6] तार्ष्यं चोष्णीषं चैकशतं च दर्भपुञ्जीलानि दक्षुदुम्बरꣳ शफ्याणि धनुश्शेषूꣳश्शेति[7][1] स दर्भनाड्याꣳ शतमानꣳ हिरण्यं प्रयच्छात्यनिभृष्टमसि वाचो बन्धुस्तपोजा दत्त्यथैनद्वैतसे[8] द्रोणकलशे ऽवदधाति सोमस्य

---

१ Thus M Be U; the other MSS. more or less corrupted.

२ नीर्थाः M Be 11 T.

३ येनतीर्थाः M Be 11 T.

४ च ins. T Be 11.

५ यानि ins. Be BU.

६ इति om. Be BU.

७ Thus M only; अथैतद्वै॰ Be BU; अथैतद्वै॰ Be11 T.

प्रयच्छतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादिति प्रत्नु-
बाधना स्थेतीषूञ्छूनम्मे[1] बाधध्वमितीतरः[2] प्रतिगृह्णाति पात
मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात
विश्वाभ्यो मा नाष्ट्राभ्यः पातेत्यथ हिरण्यवर्णावुषसाꣳ विरोक
इति चिष्टुभा[3] बाहू उद्गृह्णात्यथैनꣳ सꣳशास्ति मनसैव दिशो ५
ऽनुप्रक्राम मनसोर्ध्वामनूज्झिहीत्यथैनं[4] वाचयति ॥ ९ ॥

समिधमातिष्ठोग्रामातिष्ठ विराजमातिष्ठोदीचीमातिष्ठो-
र्ध्वामातिष्ठेत्यथाचैव[5] तिष्ठन्याचति मारुतं चैकविꣳशतिकपालं
वैश्वदेवीं चामिक्षां[6] । तस्य यो ऽरण्ये ऽनुवाक्यो गणस्तेन
मथ्यमानि कपालान्युपहितानि भवन्ति राजसूयगणाभ्यामित- १०
राणि । ताभ्यां चरति[7] मरुद्भ्यो ऽनुब्रूहि मरुतो यजेति
विश्वेभ्यो देवेभ्यो ऽनुब्रूहि विश्वान्देवान्यजेत्यनिष्टस्विष्टकृते[8]
एवैते हविषी[9] अपिधाय[9] प्रज्ञाते निदधात्यथ याचति ग्रार्दू-

---

१ Before मे T Be 11 ins : एवास्य बाधंत इति ब्राह्मणं, cp. TBr. I. 7. 6. 8.

२ Thus M Be 11 T ; बाधयध्वमि० Be BU.

३ Be BU चिर् or चि, but cp. T Br. l. c.

४ Emended ; ०र्ध्वामनुजिही० M ; ०र्ध्वामनूजजीषुही० T Be 11 ; ०र्ध्वाजिहीर्षेत्य० Be BU ; cp. TBr. I. 7.7.2 and Hir. XIII. 15 : मनसो-र्ध्वामनूज्झिहीते ।

५ अथ om. Be BU.

६ All the MSS. exc. M om. च ।

७ चरंति M T Be 11.

८ Before अनिष्टस्वि० M T Be 11 ins. अमिक्षया चरति ।

९ Thus M Be BU ; हवींषि भवतोपिधाय T Be 11.

लचर्म सुवर्णरजतौ च[1] रुक्मौ वाराही उपानहौ सौमं च लोहितायसं च । दक्षिणतः क्लीब आस्ते । अथ पुरस्तादभिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेत्यथ यजमानायतने शार्दूलचर्म प्राचीनग्रीवमुत्तरलोमोपस्तृणाति ५ सोमस्य लिषिरसि तवेव मे लिषिर्भूयादिति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्यां रुक्माभ्यां पर्युप्यास्यत्यमृतमसि मृत्योर्मा पाहीत्यधस्ताद्रजतमुपास्यति दिवो मा पाहीत्युपरिष्टात्सुवर्णं शतादक्षमयावेष्टा दन्दशूका इति दक्षिणत आसीनं क्लीबं सौमेन विध्यति । सव्येन पादेन लोहिता- १० यसं निरस्यति निरस्तं नमुचेः शिर इत्यथास्मा अभिषेकान्संप्रगृह्णन्ति[2] । तान्सो ऽवेचते ॥ १० ॥

सोमो राजा वरुणो देवा धर्मसुवश्च ये । ते ते वाचं सुवन्तां ते ते प्राणं सुवन्तां ते ते चक्षुः सुवन्तां ते ते श्रोत्रं सुवन्तामित्यथ ब्रह्मणः[3] पात्रमादाय तेनाभिषिञ्चत्यध्व- १५ र्युरेव[4] यजुर्जपत्यभिषिञ्चन्नुत्तरे सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा चक्षाणां चक्षपतिरस्यति दिवस्पाह्यसावित्यथोर्ध्वा

---

१ om. MB.

२ Thus M; संप्रतिगृह्णाति T Be 11; हरंति i.s. of संप्रगृह्णंति Be BU; Bhav. periphrases: सहोद्यच्छन्ते ।

३ Thus M Be U; ब्रह्मण B; ब्राह्मणाः Be 11 T.

४ तेनाभिषंचंत्य० T Be 11.

धाराः समुन्मृष्टे समावदृचन्नधरागुदीचीरहिं॰ बुध्नियमनुसंचरन्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयाना इत्यैतेषामभिषेकाणां मुख्ये पात्रे सꣳस्रावान्समवनीय[1] प्रतिहितस्य गृहानेत्यथान्वारब्धयोः प्रतिहिते च महिष्यां च जुहोति प्रजापते न त्वदेतान्यन्य इत्यैचास्मा एष प्रतिहितो वरं ददात्यथ प्रतिहिताय पात्रं प्रयच्छन्नाहेदं ते पात्रं दायाद्यमसद्यदा[2] त्वाभिषिञ्चामीदं ते ऽसदित्यथैतेनैव यथेतमेत्याग्नीध्रे[3] प्रेरकं जुहोति रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि यमेष्टमसि स्वाहेत्यैचास्मै धनुः प्रयच्छति यदि पुरस्तादप्रत्तं भवति । समुन्मृष्टे समुत्क्रोशन्त्यभ्यषेच्ययमसावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता राजसूयेनेत्यथ भूर्भुवः सुवरिति वाचं विसृजते । द्राभ्यां मुखं विमृष्टे । गायत्रान्विष्णुक्रमान्क्रमते[4] । ऽथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोतीन्द्राय स्वाहा घोषाय स्वाहेति । द्वादश भूतानामवेष्टीर्जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेत्यैतयोर्हविषोः स्विष्टकृता चरत्यथैने अपिधाय प्रज्ञाते निदधाति ॥ ११ ॥

अथ वाराहौ उपानहावुपमुञ्चते पशूनां मन्युरसीति

---

१ ०स्रावसवनीय M.

२ Thus M which omits only यदा, but cp. infra XII. 13 s. f.; दायादंसद्यदा Be U; the other three MSS. are wholly corrupted; my copies of Bhav. read सद् i.s.o. असद् ।

३ आग्नीध्रे om. Be BU.

४ Thus Be 11 T; गायत्राद्वि० MU Be B.

दक्षिणे पादे तवैव मे मन्युर्भूयादिति सव्ये ऽथैनामभिमृशति नमो मात्रे पृथिव्या इति तस्यां दक्षिणं पादमुपावहरति[1] माहं मातरं पृथिवीꣳ हिꣳसिषमिति मा मां माता पृथिवी हिꣳसीदिति सव्यमंयान्तरेण चात्वालोत्करावुदङ्मुपनिष्क्रामति[2] विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीत्युत्तरत एते रथा युक्तास्तिष्ठन्ति तान्दृष्ट्वैव प्रतिहितो ऽवतिष्ठत्यथ प्रतिहितस्य धनुरादायाधिज्यं कृत्वा रथमातिष्ठति मरुतां प्रसवे जेषमित्याग्नं मन इति कूबरमभिनिश्रयते[3] तं तदानीमेव प्रतिहितो ऽन्वातिष्ठति प्रसर्हिषे पुरुहूत श्रूनिति त्रिष्टुभान्वारभत इति ब्राह्मणमथ[4] प्रतिहिताय[4] धनुः प्रयच्छन्नाह राजन्य एष षट्त्रिꣳशत्सु ग्राम्याप्रव्याधेषु निर्जयेन[5] सहस्रेणावसितस्तस्मा[6] इषुमस्यतादपैनꣳ[7] राधुताज्जिलैनं[8] दक्षिणापथेनात्याकुरुतादिति राजन्य

---

१ Thus MT Be 11; उपवहति Be BU.

२ ०क्रामति Be 11, T Be BU; ०क्रामंति M; Bhav. reads the plural, cf. p. 75, 3.

३ Thus corrected (cp. p. 79, 2; 105, 16); ०धिनिश्रयते M Be U; ०धिश्रियते B; ०धिश्रायते Be 11 T.

४ Thus M only; ब्राह्मणंसतिप्रतिहिताय Be 11 T; ब्राह्मणमथनिहिताय Be BU.

५ Thus MU Be B; निर्जयेण Be 11 T.

६ Thus Be BU; ०वसितस्तास्मा M; ०वसीततस्मा Be 11 T.

७ Thus corrected; ०मस्यतादावैनं Be 11 T; ०मस्यतादथैनं M; ०मास्यताउपैनां Be BU.

८ Thus corrected; ०धुताजिलैनं Be BU; धुताजलैनं T, Be 11; ०धुतांजिलैनं M.

एव सꣳश्लिष्टो[1] भवति राजपुत्रस्य इषुमसिष्यति[2] स त्वापरास्यति[3] तस्मा उत्तरवर्ग्येण[4] संसृज्येषुं[5] प्रयच्छतादिति । स तथा करोति । ॥ १२ ॥ चतुर्थः ॥

अथाहाभिसर्पं यजमान माहेन्द्रं ग्रहं ग्रहीष्यामीत्यन्वारब्ध यजमाने माहेन्द्रं ग्रहं गृह्णाति महाꣳ इन्द्रो य ओजसेत्यनुद्रुत्योपयामगृहीतो ऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति । परिमृज्य मादयत्येष ते योनिर्महेन्द्राय त्वेत्यथैतान्मणीन्याचति राजतमौदुम्बरꣳ सौवर्णमिति । त एते[6] नानासूत्रेष्वोता भवन्ति । तानुत्तरस्य हविर्धानस्य मध्यमे वꣳग्रे प्रग्रथ्याप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते माहेन्द्राय । प्रस्तुते सान्नि संप्रैषमाहाजिसृत

---

१ Thus corrected; संश्लष्टो M; श्लिष्टो T Be 11; संश्लिक्ष्टो Be BU.

२ Thus corrected; इषुमासिष्यति Be BU; इषुमवसिष्यति M; इषुमस्यति T Be 11.

३ Thus corrected; °परास्यति MSS.

४ Thus M Be BU; °वर्गेण T Be 11.

५ Thus M; समज्येषुं T Be 11; सस्रज्येषुं Be BU. I subjoin the vivaraṇa of this difficult passage as found in my two copies: राजन्यः चचियः एष षट्त्रिंशत्तु शम्याक्षेपेषु जेतव्यो न (read °व्येन) गोसहस्रेणावसितः स्थितः तस्मै राजन्याय इषुमस्यतादित्याशिष एनमपराधुनुं (sic) मोपरि प्रहार्षीत् (sic) पार्श्वे विध्यतो जिला तं दक्षिणापथेन दक्षिणायनमार्गेण नयेति चचियः पूर्वमेव श्लिष्टो (read संश्लिष्टो) भवति राजपुत्रस्येषुमस्यति स त्वा नोपरि क्षिपति तस्मै उत्तरासङ्गेण तमप्रक्षिप्तं (read °पक्षि° ?) संसृज्य ददादिति तथैव संसृज्य प्रयच्छति ।

६ om. MT Be 11.

आजिं धावत दुन्दुभीन्त्समाहतताभिषोतारो[1] ऽभिषुणुताग्नीदा-
शिरं विनयोलूखलमुद्दाय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप
सौम्यस्य विद्धीति । यथासंप्रेषं ते कुर्वन्ति । धावन्त्याजिमृत ।
आहन्ति दुन्दुभीन्त्संप्रवदन्ति वाचः । संप्रोदिता[2] वाचो ऽनुम-
न्त्रयते । शाम्यन्ति घोषाः शस्त्राय । होच एषोत्तमेति प्राङ्-
होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाक्रयते होता । प्रत्या-
क्रयते ऽध्वर्युः । शृंसति । प्रतिगृणाति । प्रसिद्धमुक्थ्यं प्रति-
गीर्य प्राङेत्योद्यच्छत एतं माहेन्द्रं ग्रहमनूद्यच्छन्त इतरानुपो-
द्यच्छन्ते नाराशंसानथाश्रावयत्यो श्रावयासु औषडुक्थशा
यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्वि-
र्नाराशंसाननुप्रकम्पयन्ति । द्विर्द्रुतो माहेन्द्रः परियेत ।
आयन्ति रथा । आगतान्यथान्दृष्ट्वा जपति[3] समहमिन्द्रियेण
वीर्येण सं मयेन्द्रियं वीर्यमित्यथान्तरेण चात्वालोत्करावुदङ्प-
निष्क्रामत्युत्तरत[4] एते रथा युक्तास्तिष्ठन्ति । तान्दृष्ट्वैव प्रति-
हितो ऽवतिष्ठत्यथ प्रतिहितस्य धनुरादायाधिज्यं[5] कृत्वा रथ-
मातिष्ठति मरुतां प्रसवे जेषमित्याग्नं मन इति कूबरमभिनिश्र-

---

१ ०समाहतताभि० MB.

२ Thus only M; संप्रवदिता T Be 11; in the other MSS. this whole passage is missing.

३ Thus MU Be B; यजति Be 11 T.

४ ०ष्क्रामत्यु० Be BU; ०ष्क्रामंत्यु० M.Be 11 T.

५ ०दायाप्रज्यं M only.

यते[1] । तं तदानीमेव प्रतिहितो ऽन्वातिष्ठति प्रसमाहिषे पुरुहूत शचूनिति । त्रिष्टुभान्वारभत इति ब्राह्मणमथ प्रतिहिताय धनुः प्रयच्छन्नाहेदं ते धनुर्दायाद्यमसद्यदा[2] लाभिषमामीदं ते ऽसदित्यथैतेनैव यथेतमेत्यान्तरेण चात्वालोत्कराबुपातीत्य पूर्वया द्वारा हविर्धानं प्रपाद्य प्राञ्चं रथमावर्त्य[3] तिष्ठति । ॥ १३ ॥

तदेतान्मणीन्याचति राजतमौदुम्बरं सौवर्णमिति । सव्ये हस्ते राजतं प्रतिमुञ्चत इयदस्यायुरस्यायुर्मे धेहीति दक्षिण औदुम्बरमूर्गस्यूर्जं मे धेहीति दक्षिण एव सौवर्ण युङ्क्ष्व वर्चो ऽसि वर्चो मयि धेहीत्यथात्मा आमिक्षामुपोद्यच्छते[4] । तस्यां दक्षिणं हस्तमुपावहरति मित्रो ऽसीति वरुणो ऽसीति सव्यमथैनामभिमृशति[5] समहं विश्वैर्देवैरित्यथैनामपिधाय प्रज्ञातां[6] निदधाति । तदेतान्मणीनेकस्मिन्सूत्र आवयति[7] मध्यत औदुम्बरं करोति । तान्धीवासु प्रतिषज्यैतेनैव यथेत-

---

१ Thus M and cp. supra p. 79, 2; infra 103, 9; ०मधिनिश्र० Be BU; ०मयिश्र० Be 11, ०मपिश्र० T.

२ All the MSS. are more or less corrupted exc. M, which has however ०द्यमसदा; cp. supra p. 102, 7.

३ ०त्य all.

४ Plural M Be BU; singular Be 11 T.

५ सव्यमथैमामभि० Be 11 T.

६ प्रज्ञातान्नि० Be; प्रज्ञातं the other MSS., exc. M the reading of which is uncertain (प्रज्ञातं or प्रज्ञातां)।

७ Thus M; आवपति Be 11 T; आनयति Be BU.

मेत्याग्नेणाग्नीध्रं[1] प्राञ्चꣳ रथमावर्त्यावतिष्ठत्यथाग्नीध्रे[2] रथविमोचनीया[3] जुहोत्यग्नये[4] गृहपतये स्वाहेति चतसः स्रुवाञ्जतीरथास्यैतत्पुरस्तादेवाग्नेणाग्नीध्रꣳ रथवाहनं प्रागीषं योग्यक्षतमुपस्थितं भवति । तस्मिन्नह संग्रहीत्रा रथवाहने रथमादधाति । सुवर्गादेवैनं लोकादन्तर्दधाति । हꣳसः शुचिषदित्यादधाति[5] । ब्रह्मणैवैनमुपावहरति[6] ब्रह्मणादधात्यतिच्छन्दसादधातीति ब्राह्मणमथास्यैतत्पुरस्तादेव जघनेनाग्नीध्रं चतुरपस्रावं[7] वाष्टापस्रावं[7] वा विमितं कारितं भवति । तस्य मध्यत औदुम्बरीमासन्दीं निमिनोति क्षत्रस्य नाभिरसीति । तस्यामुत्तरमष्टनमधीवासमास्तृणाति[8] क्षत्रस्य योनिरसीत्यथैनामासीदत्यासीदन्तमनुमन्त्रयते स्योनासीद सुषदासीद मा त्वा हिꣳसीदिति । मा मा हिꣳसीदितीतरः प्रत्याहासन्नमभिमन्त्रयते[9] निषसाद धृतव्रतो वरुणः पस्त्यास्वा सम्राज्याय सुक्रतु-

---

१ Here and infra Be 11 T every time आग्नीध्रीयं and ०ध्रीये ।

२ रथमादत्य० MSS.

३ Thus ( cp TBr. I. 7. 9. 5 ) M Be U ; ०विमोचनीयाञ्जु० Be 11 T ; B corrupted.

४ ०दधातीति ब्राह्मणमथैनमुपा० M ; the Brāhmaṇa (TBr I. 7 9. 6) is quoted in abbreviated form by all the MSS. exc. M.

५ Thus M, cp. infra XV. 2 and Āp XVIII. 18. 5 ; ०क्षपस्रावं U Be ; all the other MSS and Bhav. both times ०वस्रावं ।

६ Thus M ; उत्तरमष्टनं अधिवास० Be ; उत्तरसष्टन अधिवास० BU ; उत्तरमनवधीवास० Be 11 T ; Bhav.: उत्तरमष्टनमुपरिरोमाधिवासं ।

७ Thus MT Be 11, अनु i.s o. अभि B Be U.

रित्यर्धैनमृत्विजः पर्युपविशन्ति । पुरस्ताद्ध्वर्युरुपविशति दक्षिणतो ब्रह्मा पश्चाद्धोतोद्गातोत्तरतस्तंतः[१] प्राञ्चो वोदञ्चो वा रत्निनः । सो ऽध्वर्युमभिवदति[२] ॥ १४ ॥

[३]ब्रह्मन्निति । त्वꣳ राजन्ब्रह्मासीत्याहाध्वर्युः सवितासि सत्यसव इति । ब्रह्मन्निति ब्रह्माणं । त्वꣳ राजन्ब्रह्मासीत्याह ब्रह्मेन्द्रो ऽसि सत्यौजा इति । ब्रह्मन्निति होतारं । त्वꣳ राजन्ब्रह्मासीत्याह होता मित्रो ऽसि सुप्रेव इति । ब्रह्मन्नित्युद्गातारं । त्वꣳ राजन्ब्रह्मासीत्याहोद्गाता वरुणो ऽसि सत्यधर्मेति । सुश्लोकꣳ इति क्षत्तारं । त्वꣳ राजन्सुश्लोको ऽसीत्याह क्षत्ता । सुमङ्गलꣳ इति संग्रहीतारं । त्वꣳ राजन्सुमङ्गलो ऽसीत्याह संग्रहीता । सत्यराजन्निति भागदुघं । त्वꣳ राजन्सत्यराजासीत्याह भागधुक् । सप्त पुण्यनाम्नो ऽभ्युद्यायास्मै[४] रूपं प्रयच्छतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तेन मे रध्येति । तेन[५]ते[५]रध्यासमितीतरः[५] प्रतिगृह्णाति । तꣳ संप्रयच्छति सूताय सूतग्रामण्ये सजाताय सजातग्रामण्ये संग्रहीत्रे क्षत्रावापगोव्यच्छाभ्यामन्ततस्तेन[६] तौ[६] मध्यतो ऽधिदेव-

---

१ ततः om. Be 11 T.

२ Thus M only ; all the other MSS. ध्वर्युरभिवदति ।

३ Here and in the following lines sometimes T Be 11, sometimes Be BU are defective ; M only is in good order

४ Thus M only ; भूत्य ( i.s.o. अभ्युद्य ) T Be 11 ; भूत्याय B Be U.

५ तेनमेरध्या० M ; तेनमेराध्या० Be 11 T ; तेनतेनराध्या० Be BU.

६ तेनतेनतौ Be BU ; तनतौ M ; T Be 11 def.

नमुद्धृत्य[1] तिस्रः पञ्चाग्नतः सौवर्णानक्षान्निवपतो ऽथास्मै पञ्चाचानपच्छिद्य प्रयच्छति दिग्नो ऽभयग् राजाभूदिति ताग्स्तदानीमेवाचेष्वपिसृजत्यथैतमोदनमुद्धृवते नानाग्ग्निनौ ब्रह्मा च यजमानश्च समानाग्ग्निनौ सूतग्रामणिनौ समानाग्ग्निनौ चत्तसंग्रहीतारौ स यो नु मतात्त दव स राज्ञ आसन[2] उपविश्य[2] चतुःशतमचानपच्छिद्याहोद्भिन्नग् राज्ञ इति तानेव[3] मनाक्समन्तानिव[3] कृत्वाह कृतं ब्राह्मणस्येत्यथैतमोदनमुद्धृवते समानाग्ग्निनौ ब्रह्मा च यजमानश्च नानाग्ग्निनौ सूतग्रामणिनौ नानाग्ग्निनौ चत्तसंग्रहीतारौ स यः पराजयते तस्मैनं कुले चत्ता पाचयति यावदेष ओदनः पच्यते तावदेष होता शौनःशेपमाख्यापयते हिरण्मये कग्रिपावासीनस्तस्मा अध्वर्युः प्रतिगृणाति हिरण्मये कूर्च आसीनः[4] ॥ १५ ॥

ओग् होतस्तथा होतः सत्यग्[5] होतररात्स्म होतरिति यद्यु वै होता ब्राध्येत्यन्य[6] उ[6] होचाग्ग्सी ग्ग्सति तस्मा

---

१ ऋधीता i.s.o. उद्धत्य M.

२ आसनमुपविश्य M.

३ तानेवमन्वक्समo M.

४ As the MSS. with the exception of M are hopelessly spoiled, the text of the last 13 lines has been reconstructed as best possible. Only the various reading of M is given, as the var. of the other MSS. is nearly worthless.

५ MSS. exc. M ins. ह, cp. XVI. 8.

६ नाध्येत्यन्यो T Be 11; वधीत्यन्यउ (०न्युउ) Be BU; तदाध्येत्यन्यग् M

उ प्रतिप्रस्थाता प्रतिगृणाति । परःशतं भवतीति ब्राह्मणं । यदेष ओदनः पक्वो भवत्यथैनमेकधोद्धृत्य ब्रह्मण उपहरति । तस्मा एताꣳस्त्रैव मणीन्ददाति[१] शतं विषयं चतुष्पात्त्रेचमथ[२] होत्रे ददाति शतं विषयꣳ हिरण्मयं कृष्णग्रीवोष्ट्राश्वे ददाति शतं विषयमथाध्वर्यवे[३] ददाति शतं विषयꣳ स्वरथं तिस्रः पञ्चाशतः सौवर्णानत्राहिरण्मयं कूर्चमित्यैभ्य एतन्निर्जयꣳ[४] सहस्रं चतुर्धा कृत्वा ददात्यथैनमेतयासन्त्या सद आवहन्त्या[५] वा[५] व्रजत्यन्वायन्त्येनमेते[५] चमसा । अत्रैतयोर्हविषोरिडामुपक्रामत । इडोपह्वतं माहेन्द्रꣳ होता चैवाध्वर्युꣳश्च[६] संभक्षयतो । नराशꣳसपीतेन नाराशꣳसान् । होष्टचमसमेवैते चयः समुपह्वय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्यायन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथेन्द्राय त्वेन्द्राय त्वेत्येवं[७] त्रिभिरुक्त्यपर्यावर्तꣳश्चरति[८] । संतिष्ठते माध्यंदिनꣳ सवनं । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्य-

---

१ सर्वान् before मणीन् ins. Be B; सर्वमणीन् U.

२ चतुष्पात्त्रेचं all (also Āp. XVIII. 19. 7), but cp. supra p. 96, 5.

३ Thus M, अथ om. Be BU, विविधमर्धानध्वर्यवे T Be 11.

४ एतंनिर्जयं all.

५ आवहंत्यावाव्रजंत्य॰ Be BUT Be 11; आवहंत्याव्रजंत्य॰ M, but cp. supra p. 81, 5.

६ एतत्पात्रं ins. T Be 11.

७ Thus MT Be 11; त्वेत्येव Be; त्वेत्येवं एवं BU.

८ ॰श्चरति M Be BU, ॰श्चरंति T Be 11.

ग्रहेण चरित्वाग्रयणं ग्रहात्यधोक्ष्यं ग्रहाति । समानं कर्मा पवमानात्यवमानेन चरित्वा स्वे धामन्यङ्गुभ्यां चरति । तयोर्नाना मनोते[१] नाना देवते[२] नाना प्रत्यभिमर्शनौ[३] नाना वषाहोमौ समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशो । नाना दिश इत्येके । समानं कर्मावभृथाद्-यैतस्मिन्नवभृथ उपाददते चार्मपत्न्यावुपानहौ[४] । प्रज्ञाय वाराही चार्मपत्नीभ्यामुदेति[५] । सो ऽपामन्ते जुहोत्यपां नप्त्रे स्वाहेति । विष्णुवति दर्भस्तम्बे जुहोत्यूर्जो नप्त्रे स्वाहेति । पुनरेत्य[६] गार्हपत्ये जुहोत्यग्नये गृहपतये स्वाहेति । प्रसिद्धो ऽवभृथ । उदयनीयेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा नैव श्मश्रूणि वपते न केशान्त्संतिष्ठत एष उक्थ्यो ऽभिषेचनीयस्तुस्त्रिरग्निष्टोमवमानः[७] सहस्रदक्षिण उदवसानीयान्तः । ॥ १६ ॥ पञ्चमः ॥

अथास्यैषा पुरस्तादेव जुष्टे देवयजने सप्तसु ग्राम्याग्रण्येषु शाला कारिता भवति । सो ऽग्नेयमष्टाकपालं निर्वपति ।

---

१ मनीते M Be 11 T; मनोता Be BU.

२ Thus M; देवता Be BU; T Be 11 om. this passage.

३ ०मर्शनौ M; ०मर्शने T Be 11; ०मर्शे B; मर्शना Be.

४ Thus M; चर्मपत्न्या ऽपानहौ T Be 11; चापेत्न्या उपानहौ BU; चापेत्न्या उ० Be; cp. infra XVIII. 19 init.

५ Thus T Be 11; चार्मपत्निभ्या० M; चर्मपत्नीभ्या० B; चर्मपत्निभ्या० Be U.

६ Thus M; प्रातरेत्य Be BU; Be 11 T defective.

७ ०तुस्त्रिरत्यव० U Bhav.

हिरण्यं ददाति । ग्रम्यान्यास उदवसाय वसति । सारस्वतं चरुं । वत्सतरीं ददाति । द्वितीये ग्रम्यान्यास उदवसाय वसति । सावित्रं द्वादशकपालमुपध्वस्तं ददाति । तृतीये ग्रम्यान्यास उदवसाय वसति । पौष्णं चरुꣳ श्यामं ददाति । चतुर्थे ग्रम्यान्यास उदवसाय वसति । बार्हस्पत्यं चरुꣳ । ५
श्रितिपृष्ठं ददाति । पञ्चमे ग्रम्यान्यास उदवसाय वसत्यैन्द्रमेकादशकपालमृषभं ददाति । षष्ठे ग्रम्यान्यास उदवसाय वसति । वारुणं दशकपालं । महानिरष्टं ददात्यथ सप्तमे ऽहञ्कालामध्वस्यत्येतदेवाहर्दीक्षते[1] । ऽथ वै भवति सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरिस्रजां प्रयच्छतीत्यथैनं १०
तीर्थादानीय पवयित्वा पुण्डरिस्रजिनमुदानीय दीक्षणीयामिष्टिं निर्वपति । तस्याꣳ मꣳस्थितायां सुष्टी चैव न करोति वाचं च न यच्छति । निदधात्यस्या एतद्वविरुच्छिष्टं व्रतभाजनमथ प्रायणीयामिष्टिं निर्वपति । हविष्कृता वाचं विसृजते । ऽत्रास्या एतद्वविरुच्छिष्टं प्रयच्छन्ति[2] व्रतभाजनमथ प्राय- १५
णीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा दशभिः साण्डैर्वत्सतरैः राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्य पुरस्तादुपसदाꣳ सौम्यं चरुं । बभ्रुं ददात्यथ मध्यमे उपसदावन्तरेण त्वाष्ट्रमष्टाकपालꣳ । धूम्रं ददात्यथोपरिष्टादुपसदां वैष्णवं चिकपालं । वामनं ददात्य- २०

---

१ दीक्षते Be BU ; दीक्षयते M दीक्षयते T Be 11.

२ यच्छंति M Be 11 T ; ऽयच्छति Be BU.

थाहवनीयं प्रणयत्याहवनीयं प्रणीय सदोहविर्धाने संमिनोति । सदोहविर्धाने संमित्याग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्याहृता यूपमुच्छ्रयति । स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा सारस्वतीर्वस-
५ तीवरीर्गृह्णात्यथ पशुपुरोडाशं निर्वपतीडान्तः पशुपुरोडाशः संतिष्ठते । पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके । अथ वसतीवरीः परिहृत्य पयाꣳसि विश्रिष्योपवसत्यथातो महाराज एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रात-
रनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यद्भि-
१० रुदैति[१] ॥ १७ ॥

अग्निष्टोमं क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं[२] गृहीत्वा द्वे रशने आदाय यूपमभ्यैति[३] । स्वर्वन्तं यूपमुत्सृज्याग्नेयं पशुमुपा-
करोति । तस्य प्राजापत्यस्रुपर उपाक्रम्भ्यो भवति । तयोः
१५ प्रसिद्धं वपाभ्यां चरित्वा प्रसर्पन्ति प्रातःसवनाय । पूर्वस्यां द्वारि[४] सूतग्रामण्यावुपतिष्ठतो[५] ऽपरस्यां चक्तसंग्रहीतारौ । प्रसर्पतः पृच्छतः का ते माता का ते[६] मातामहीति । स य

---

१ ०दैति MT Be 11, ०देति Be BU.

२ om. MT Be 11.

३ ०भ्यैति M Be BU; ०भ्येति T Be 11.

४ दिशि M.

५ ०वुपतिष्ठतो B Be U, ०वुपविशतो M, ०वुपविश्य T Be 11.

६ om. Be BU.

आ दग्नय्यै[1] संपादयत्यति तꣳ सृजन्त्यथ यो न संपादयति दीर्घवꣳग्नेन तमुपानुदन्ति[2] । स य आह वैश्या मे माता साविचीति[3] वाति तꣳ सृजन्ति विग्नो विवाहान् गोप्तार दृति वदन्तो । दग्नदग्नाय चमसमभिसंजानत । ऋजुधा प्रातःसवनꣳ संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । ५
प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि हुत्वा प्राकाग्रावध्वर्यवे ददाति स्रजमुद्गाचे रुक्मꣳ होचे ऽश्वं प्रस्तोदप्रतिहर्तृभ्यां द्वादग पष्टौहीर्ब्रह्मणे वग्नां मैत्रावरुणायर्षभं ब्राह्मणाच्छꣳसिने वाससी नेष्टापोदभ्याꣳ स्थूरि यवाचितमच्छावाकायानड्वाहमग्नीधे । १०
भार्गवो होता भवति । आयन्तीयं ब्रह्मसामं भवति वारवन्तीयमग्निष्टोमसामर्ज्जुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । समानं कर्मा पवमानात्पवमानेन चरित्वा स्वे धामन्यग्नभ्यां चरति । तयोर्नाना मनोते[4] नाना देवते[5] । १५
नाना प्रत्यभिमर्ग्नौ[6] नाना वसाहोमौ समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिग्नो । नाना

---

१ Thus Be BU; दग्नत्यै M; T Be 11 om. this passage altogether.

२ Thus M Be U; तमुपावदंति B; तंवनुदंति T Be 11.

३ Thus MT; साविचीनि Be 11; साविचीवि Be BU.

४ मनीवे MT Be 11; मनोता Be BU.

५ देवते M; देवता Be BU; om. T Be 11.

६ Thus T Be 11; °भिमर्ग्नौ M; भिमर्ग्नना Be BU.

दिग्न इत्येके । समानं कर्मावभृथात्प्रभृति ऽवभृथ । उदयनीययेष्ट्वेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते ग्रस्रूष्णेव वपते न केशान्त्संतिष्ठत एषो ऽग्निष्टोमः सन्नदग्नो दग्नेयः सहस्रदक्षिण उदवसानीयान्तः ॥ १८ ॥ षष्ठः ॥

अथ पञ्चहविषा दिग्नामवेष्ट्या यजत[1] । आग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालं वैश्वदेवं चरुं मैत्रावरुणीमामिक्षां बार्हस्पत्यं चरुमित्यथ वै भवति हविषोहविष दृष्ट्वा बार्हस्पत्यमभिघारयतीति । स हविषोहविष दृष्ट्वा बार्हस्पत्यमभिघारयत्यन्वाहार्यमासाद्येता[2] आदिष्टदक्षिणा ददात्यथ द्विपशुना पशुबन्धेन यजत । आदित्यां मल्हां गर्भिणीमालभते मारुतीं धृश्निं पष्ठौहीं । गर्भिण्यादित्या भवत्यगर्भा[3] मारुत्यादित्यया पूर्वया प्रचरति मारुत्योत्तरयाचैरादित्याया आश्रावयत्युपाग्शु मारुत्यै । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ सात्यदूताग्शु[4] हविर्भिर्यजते । ऽश्विभ्यां पूष्णे पुरोडाग्रं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरुग्ं सवित्रे सत्यप्रसवाय पुरोडाग्रं द्वादशकपालमन्वाहार्यमासाद्य तिस्रो धन्वग्ं शुष्कदृतिं ददाति । तं प्रतिराजभ्यः प्रहिणोति । स

---

१ यच्छत Be BU.

२ Thus M only; °मासाद्यता Be BU; °मासाद्येता T Be 11

३ Thus M only; भवतिगर्भा Be BU; T Be 11 om. these words.

४ Thus M; the other MSS. are partly corrupted, partly incomplete.

यः प्रतिगृह्णाति मित्रो म इति तं वेदाथ यो न प्रतिगृह्णात्यमित्रो म इति तं वेदाथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजत। आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालं बार्हस्पत्यं चरुं त्वाष्ट्रमष्टाकपालं वैश्वानरं द्वादशकपालमन्वाहार्यमासाद्य दक्षिणꣳ रथवाहनवाहं[1] ददात्यथ पौर्णमासवैष्णवाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते। सारस्वतं चरुं निर्वपति पौष्णं चरुं भैत्रं चरुं वारुणं चरुं त्वाष्ट्रपत्यं चरुमादित्यं चरुमन्वाहार्यमासाद्योत्तरꣳ रथवाहनवाहं[2] ददाति। ॥ १९ ॥

अत्रैतद्वादशाहं व्रतं चरत्याङ्क्ते[3]। न ददतो धावते। ऽभ्यङ्क्ते। न प्रमन्द्यते। युध्यते युद्ध आगते। ऽग्निहोत्रोच्छेषणव्रतो वा[4] यजमानो भवति। भक्तमु[5] पत्न्या आहरन्त्यथास्यैतत्पुरस्तादेव जुष्टे देवयजने तिस्रः शालाः कारिता भवन्ति। स दक्षिणार्धाꣳ[6] शालामध्यवसाय मथित्वाग्नीन्वि-

---

१ Thus Be BU; रथवाहनं MT Be 11, but cp. Ap. XVIII. 22. 6, 8.

२ Thus again, Be BU; रथवाहं M, T Be 11 om.

३ These and the following words thus in M; चरत्याङ्क्ते नदतेधावतेभ्यंक्तेनप्रमंदयते Be BU; चरतिनात्यक्तेनदतोधावतेभ्यंक्तेनप्रमनयते Be 11 T; Bhav. reads प्रस्कन्दयते explaining this word, as it seems, by न खट्वायां शेते न केशान्विलिखते।

४ वा Be 11 T; च Be BU; M om.

५ M om उ, but cp. vol. I. 67. 4.

६ दक्षिणां T Be 11.

हृत्य प्रतीचीनस्तोमाय केशवपनीयायातिरात्राय दीक्षते। तस्यापरिमिता दीक्षा द्वादशोपसदः। स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यजनीये[1] ऽहन्सुत्या संपत्स्यत इति। तस्य तथा संपद्यते। प्रसिद्धेन कर्मणोपवस-
५ थादेत्यथ[2] वसतीवरीः परिहृत्य पयाꣳसि विश्रिण्योपवसन्त्यथातो महाराच एव बुध्यन्ते। प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति। परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यद्भिरुदेत्यतिरात्रं[3] क्रतुमुपैति। प्रसिद्धो ऽभिषवः। प्रसिद्धं ग्रहा गृह्यन्ते। समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ।
१० उदयनीयवेष्ट्वेष्ट्वा मैत्रावरुणीं वशामुपाकरोति। तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते यानि कानि च लोमानि[4] वापयते। संतिष्ठत एष प्रतीचीनस्तोमः केशवपनीयो ऽतिरात्रः सहस्रदक्षिण उदवसानीयान्तो। ऽथ मध्यमाꣳ शालामध्यवसाय मथित्वाग्नीन्विहृत्य व्युष्टयै द्विरात्राय दीक्षते। तस्या-
१५ परिमिता दीक्षा द्वादशोपसदः। स तथा राजानं क्रीणाति यथा मन्यते द्विरात्रस्य मे[5] सतो[5] ऽमावास्याया[5] उपवसथीये[5]

---

१ Thus U Be (sec. m.); यज्ञीये Be (pr. m.) B, यज्ञिये M, Be 11 T om. the passage.

२ °णोपवस° M Be.

३ Thus M Be 11 T; °द्भिरुदेत्यातिरात्रं Be BU.

४ तानि ins. M.

५ Thus T Be 11 (only °वास्यायै); मे before सतो om. M, but this MS.: मावास्यायै म उप°; Be BU give मे before सतो and मा before उप°, reading वास्यायै।

ऽहन्पूर्वमहः संपत्स्यत उत्तरस्मिन्नुत्तरमिति । संतिष्ठते द्युष्टि-
द्विराचो[१] । ऽथोत्तरार्धा[२] ग्राम्यामध्यवसाय मथित्वाग्नीन्चिह-
त्योदयनीयायाग्निष्टोमाय दीक्षते । तस्य तिस्रो दीक्षास्तिस्र
उपसदः सप्तम्यां प्रसुतः । संतिष्ठत एष उदयनीयो ऽग्निष्टोम-
श्चतुष्टोमः सहस्रदक्षिण उदवसानीयान्तो[३] । ऽथ दैविकाहवि- ५
र्भिर्यजते । ऽथ चैधातवीयया यजते । ऽथ सौचामण्या
यजते । संतिष्ठते राजसूयो ऽर्धसप्तदशैर्मासैः । संतिष्ठते
राजसूयः संतिष्ठते राजसूयः ॥ २० ॥ सप्तमः ॥

॥ इति द्वादशः प्रश्नः ॥

---

१ Thus all; are we to correct द्युष्टिर्द्विराचो ?, cp. 117, 14.

२ Thus BeBUM (sec. m.); थोत्तराऽ M (pr. m.) T Be 11 Karmāntasūtra.

३ उदयनीयांतो, Be 11 Ś.

[1]अथात दृष्टीर्व्याख्यास्यामस्तासां सकृत्प्रदिष्टमेव दार्शपौर्णमासिकं तन्त्रं । दार्शपौर्णमासिकः[2] संस्कारः[2] । सर्वाः प्रथमाः सर्वा मध्यमाः सर्वा उत्तमा[3] । यथाकालं पर्वतिथा निर्वपेद्या आदिष्टस्थाना । अथ या अनादिष्टस्थाना यानि पूर्वपक्षस्य पुण्याहान्येतत्तीर्थानि[4] भवन्ति या अनार्तेष्टयो । अथ या आर्तेष्टय उपाधिगमकालास्ता भवन्ति । यथैतद्भ्युद्भृताभ्युदिताभिनिष्क्रान्तविजातेति । व्युदितमग्न्याधानं । नित्यं व्रतोपायनं । यावत्सिद्धि याजमानमनुसंहरेदन्यत्रापदेवताभ्यस्तासां याः सोपनामास्ता उपांशुर्यथेतरा उच्चैरादेग्रादेव । सन्नद्ध सामिधेन्यो जानीयाद्यथैतन्मानवी ऋचौ धाय्ये कुर्यादुष्णिहककुभौ[5] धाय्ये त्रिष्टुभौ[6] संयाज्ये[6] । वार्चघ्नावाज्यभागौ पूर्वपक्षे । वृधन्वन्तावपरपक्ष इत्यौपमन्यवो । यानि ह्वीꣳषि कामेन वा दक्षिणया वा व्यपेतानि[7] स्युर्नानावर्हीꣳष्येव

---

१ The text of this first adhyāya is given principally according to M, in comparison with the vivarana. All the other MSS. except D, contain a highly corrupted tradition. I do not give all their various readings, which are nearly ever so much corruptions.

२ Thus M and Bhav.; °मासिकाः संस्काराः all the other MSS.

३ चंतमा M.

४ °तीर्थानि M.

५ कुर्याद् om. M.

६ Thus only D; M om.; त्रिष्टुभौ धाय्ये UB; त्रिष्टुभो धाय्ये Be; त्रिष्टुभ एवाग्नेर् Be 8.

७ व्यवेतानि M.

तानि जानीयादादेशादेव दक्षिणाव्यपेतꣳ[१] समानबर्हिर्भवति यथा दिशामवेष्टिर्नेष्टीरूपाꣳशुयाजो[२] ऽनुसमेति। यद्देवत्यꣳ हविस्तद्देवत्ये याज्यापुरोऽनुवाक्ये। पुरस्तात्त्विष्टकृत उपहोमा यामासुक्ता उपहोमा। वासोदक्षिणाः काम्या दृष्टयो या अनादिष्टदक्षिणा। गोदक्षिणः पशुबन्धो। नित्यो ऽन्वाहार्य। ५ इति[३] त्वा[३] इमा[३] दृष्टयो[३] व्याख्याताः। ॥ १ ॥ प्रथमः ॥

अथ वै भवत्यैन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इति। तस्या एते भवत उभा वामिन्द्राग्नी अश्ववꣳ हौत्यैन्द्राग्नमेकादशकपालं निर्वपेत्स्पर्धमानः क्षेत्रे वा सजातेषु वेति। तस्या एते भवत इन्द्राग्नी रोचना दिवः अथर्चमित्यैन्द्राग्नमेकादशकपालं निर्वपेत्संग्राममुपप्रयास्यन्निति। तस्या एते भवत इन्द्राग्नी नवतिं पुरः शुचिं नु स्तोममित्यैन्द्राग्नमेकादशकपालं निर्वपेत्संग्रामं जित्वेति। तस्या एते भवत उभा वामिन्द्राग्नी अश्ववꣳ हौत्यैन्द्राग्नमेकादशकपालं निर्वपेज्जनतामेष्यन्निति। तस्या एते भवत इन्द्राग्नी रोचना दिवः अथर्चमिति। पौष्णं चरुमनुनिर्वपेदिति। तस्या एते भवतो वयसु त्वा पथस्यते पथस्थ इति। क्षैत्रपत्यं चरुं निर्वपेज्जनतामागत्येति। तस्या एते भवतः क्षेत्रस्य पतिना वयं क्षेत्रस्य पत इत्यैन्द्राग्न-

---

१ ०व्येतं M.

२ दिशामवेष्टीर्ने० M.

३ इतीन्विमा दृष्टीर्व्याख्याता M, all the other MSS. have also दृष्टिर् or दृष्टीर्।

मेकादशकपालमुपरिष्टान्निर्वपेदिति । तस्या एते भवतो ये संग्रामं जिग्युषः । ॥ २ ॥

अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते पथो ऽन्तिकाद्दूरिरनड्वाहं । तस्या एते भवतो ऽग्ने नया देवानामित्यन्वाहार्यमासाद्यानड्वाहं ददात्यग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदिति । तस्या एते भवतस्त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीत्यग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यꣳ रक्षाꣳसि सचेरन्नित्यथ वै भवति निग्रितायां निर्वपेत्परिश्रिते याजयेदिति । स निग्रायां महाराज उत्थायाग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपति । परिश्रिते याजयति । क्षणुष्व पाजः प्रसितिं न पृथ्वीमित्येतस्यानुवाकस्य पञ्चदश सामिधेनीः पराचीरन्वाह । तस्या एते भवतो रक्षोहणं वि ज्योतिषेत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतिमुपजुहोत्युत स्वानासो दिवि षन्त्वग्नेरिति । ॥ ३ ॥

अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेद्भिचरन्निति । तस्या एते भवतस्त्वमग्न रुद्र आ वो राजानमित्यग्नये सुरभिमते पुरोडाशमष्टाकपालं निर्वपेद्यस्य गावो वा पुरुषा वा प्रमीयेरन्यो वा बिभीयादिति । तस्या एते भवतो ऽग्निर्होता साध्वीमकरित्यग्नये चामवते पुरोडाशमष्टाकपालं निर्वपेत्संग्रामे संयत्त इति । तस्या एते भवतो ऽक्रन्ददग्निस्त्वे वसूनीत्यथ वै

भवत्यभि वा एष एतानुच्यति येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते ' पुरुषाङ्गतिर्ह्यस्य प्रियतमाग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदिति ' तस्या एते भवतो ' ऽथ वै भवत्यभि वा एष एतस्य गृहानुच्यति यस्य गृहान्दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदिति ' तस्या एते भवतः ' ॥ ४ ॥ ५

द्वितीयः ॥

अथ वै भवत्यग्नये कामाय पुरोडाशमष्टाकपालं निर्वपेद्यं कामो नोपनमेदिति ' तस्या एते भवतस्तुभ्यं ता अङ्गिरस्तमाश्याम तं काममग्न इत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेत्स्पर्धमानः क्षेत्रे वा सजातेषु वेति ' तस्या एते भवतः श्रेष्ठं यविष्ठ भारत स श्वितान इत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेदभिचर्यमाण इति ' तस्या एते भवतो ' ऽग्नय आयुष्मते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत सर्वमायुरियामिति ' तस्या एते भवत आयुष्ट आयुर्दा अग्न इत्यग्नये जातवेदसे पुरोडाशमष्टाकपालं निर्वपेद्भूतिकाम इति ' तस्या एते भवतस्तस्मै ते दिवस्परीत्यग्नये रुक्मते पुरोडाशमष्टाकपालं निर्वपेद्रुक्काम इति ' तस्या एते भवतः शुचिः पावक दृशानो रुक्म इत्यग्नये तेजस्वते पुरोडाशमष्टाकपालं निर्वपेत्तेजस्काम इति ' तस्या एते भवत आ यदिषे नृपतिꣳ स तेजीयसेत्यग्नये साहन्त्याय पुरोडाशमष्टाकपालं निर्वपेत्क्षीयमाण इति ' तस्या एते भवतो ऽग्ने सहन्तमाभर तमग्ने पृतनाषहꣳ रयिमिति ' ॥ ५ ॥

अग्नये ऽन्नवते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नवान्स्यामिति । तस्या एते भवत उच्चान्नाय वशान्नाय वद्या हि सूनो दृत्यग्नये ऽन्नादाय पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नादः स्यामिति । तस्या एते भवतो । ऽग्नये ऽन्नपतये पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नपतिः स्यामिति । तस्या एते भवतो । ऽग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये ज्योगामयावीत्येतयेष्ट्या यज्यमाण उपकल्प्यते हिरण्यं । तस्या एता भवन्त्यग्न आयूंषि पवसे ऽग्ने पवस्वाग्ने पावक स नः पावकाग्निः शुचिव्रततम उदग्ने शुचयस्तवेत्यन्वाहार्यमासाद्य हिरण्यं ददात्येतामेव निर्वपेच्चक्षुष्काम इति । तस्या एता भवन्ति ॥ ६ ॥

अग्नये पुचवते पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय पुचिणे पुरोडाशमेकादशकपालं प्रजाकाम इति । तस्या एता भवन्ति यस्या हृदा कीरिणा मन्यमानो यस्मै त्वꣳ सुकृते जातवेदस्त्वे सुपुच शवस उक्थ्यंउक्थ्ये सोम इन्द्रं ममादेत्यग्नये रसवते ऽजचीरे चरुं निर्वपेद्यः कामयेत रसवान्स्यामिति । तस्या एते भवतो ऽग्ने रसेनापो अन्वचारिषमित्यग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत वसुमान्स्यामिति । तस्या एते भवतो वसुर्वसुपतिस्त्वामग्ने वसुपतिं वसूनामित्यग्नये वाजसृते पुरोडाशमष्टाकपालं निर्वपेत्संग्रामे संयत्त इति । तस्या एते भवतस्त्वामग्ने वाजसातमꣳमयं नो अग्निरित्यग्नये ऽग्निवते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्नावग्निमभ्युद्धरेयुरिति । तस्या

एते भवतो ऽग्निनाग्निः समिध्यते त्वꣳ ह्यग्ने अग्निनेत्याग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतो ऽऊते ऽग्निहोत्र उदायेदपर आदीप्यानूद्धृत्य दृत्याऊस्तत्तथा न कार्यं। यद्वागधेयमभि पूर्वं उद्धियते किमपरो ऽभ्युद्धियेतेति। तान्येवावद्यानानि संनिधाय मन्येदिति। स तान्येवावद्यानानि ५ संनिधाय मन्यतीतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः। स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति। छन्दोभिरेवैनꣳ स्वाद्योनेः प्रजनयतीति ब्राह्मणमग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेदिति। तस्या एते भवत उदग्ने शुचयस्तव वि ज्योतिषेति॥ ७॥ १०

## तृतीयः॥

अथ वै भवति वैश्वानरं द्वादशकपालं निर्वपेद्दारुणं चरुं दधिक्राव्णे चरुमभिघ्नन्यमान दृत्येतयेष्ट्या यज्यमाण उपकल्प्यते हिरण्यं। तस्या एता भवन्ति वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचानो अ व ते हेड उदुत्तमं दधिक्राव्णो अकारिषमा दधिक्रा दृत्यन्वाहार्यमासाद्य हिरण्यं ददात्येतामेव निर्वपेत्प्रजाकाम इति। तस्या एते भवन्ति। वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इति। तस्या एते भवतो वैश्वानरस्य दꣳसनाभ्यो बृहज्जातो यदग्र इति। वैश्वानरं द्वादशकपालं निर्वपेदमावास्यां वा पौर्णमासीं वातिपाद्येति। १० तस्या. एते भवतो वैश्वानरो न ऊत्या पृष्टो दिवीत्याग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुदासचिष्यन्निति।

तस्या एता भवन्त्यग्निर्मूर्धा भुवो वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचान इति। वैश्वानरं द्वादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम इत्यथ वै भवत्याहवनीये वैश्वानरमधिश्रयति गार्हपत्ये मारुतमनूच्यमान आसादयतीति। काले प्रत्यञ्चं वैश्वानरमासादयत्यनूच्यमानासु सामिधेनीषु मारुतं। तस्य एता भवन्ति वैश्वानरो न ऊत्या पृष्टो दिवि मरुतो यद्ध वो दिवो या वः शर्मेति॥ ८॥

आदित्यं चरुं निर्वपेत्संग्राममुपप्रयास्यन्निति। तस्या एते भवतो ऽदितिर्न उरुष्यतु महीमू षु मातरमिति। वैश्वानरं द्वादशकपालं निर्वपेदायतनं गत्वेति। तस्या एते भवतो वैश्वानरो न ऊत्यास्माकमग्ने मघवत्सु धारयेति। वैश्वानरं द्वादशकपालं निर्वपेद्विद्विषाणयोरन्नं जग्ध्वेति। तस्या एते भवतो वैश्वानरो न ऊत्यर्तावानमिति। वैश्वानरं द्वादशकपालं निर्वपेत्समसमानयोः पूर्वो ऽभिद्रुह्येति। तस्या एते एव भवतो। वैश्वानरं द्वादशकपालं निर्वपेदविं प्रतिगृह्येति। तस्या एते भवतो वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचान इति। वैश्वानरं द्वादशकपालं निर्वपेदुभयादत्प्रतिगृह्याश्वं वा पुरुषं वेति। तस्या एते एव भवतो। वैश्वानरं द्वादशकपालं निर्वपेत्सनिमेष्यन्निति। तस्या एते भवतो वैश्वानरो न ऊत्या वैश्वानरस्य सुमतौ स्यामेति॥ ९॥

अथ वै भवति यो वै संवत्सरं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवत्येतमेव वैश्वानरं पुनरागत्य निर्वपेदिति।

स एतमेव वैश्वानरं पुनरागत्य निर्वपति। यमेव प्रयुङ्क्ते तं भागधेन विमुञ्चति प्रतिष्ठित्या इति ब्राह्मणमथ वै भवति यया रज्ज्वोत्तमां गामाजेत्तां भ्रातृव्याय प्रहिणुयादिति। स यया रज्ज्वोत्तमां गामाजति तां भ्रातृव्याय प्रहित्य भ्रातृव्यस्य गोष्ठे न्यस्यति। निर्ऋतिमेवास्मै प्रहिणोतीति ब्राह्मणं। तस्या एते भवतः॥ १०॥ चतुर्थः॥

अथ वै भवत्यैन्द्रं चरुं निर्वपेत्पशुकाम इति। तस्या एते भवत इन्द्रं वो विश्वतस्परीन्द्रं नर इतीन्द्रायेन्द्रियावते पुरोडाशमेकादशकपालं निर्वपेत्पशुकाम इति। तस्या एते भवत इन्द्रियाणि शतक्रतो ऽनु ते दायीतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकाम इति। तस्या एते भवत आ यस्मिन्सप्त वासवा आमासु पक्वमैरय इतीन्द्रायार्कवते पुरोडाशमेकादशकपालं निर्वपेदन्नकाम इति। तस्या एते भवत इन्द्रमिद्गाथिनो बृहद्गायन्ति त्वा गायत्रिण इतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेदिन्द्रायेन्द्रियावत इन्द्रायार्कवते भूतिकाम इति। तस्य एता भवन्त्या यस्मिन्सप्त वासवा आमासु पक्वमैरय इन्द्रियाणि शतक्रतो ऽनु ते दायीन्द्रमिद्गाथिनो बृहद्गायन्ति त्वा गायत्रिण इति॥ ११॥

इन्द्रायाग्नीषोमुचे पुरोडाशमेकादशकपालं निर्वपेद्यः पाप्मना गृहीतः स्यादिति। तस्या एते भवतो ऽग्नीषोमुचे विवेष यन्मेतीन्द्राय वैमृधाय पुरोडाशमेकादशकपालं निर्व-

पेद्यं मृधो ऽभि प्रवेपेरन्नाङ्गाणि वाभि समियुरिति । तस्या एते भवतो वि न इन्द्र मृधो जहि मृगो न भीम दृतीन्द्राय चाचे पुरोडाशमेकादशकपालं निर्वपेद्वृद्धो वा परियत्तो वेति । तस्या एते भवतस्तातारमिन्द्रं मा ते अस्याꣳ सहसावन्निति । इन्द्रायार्काश्वमेधवते पुरोडाशमेकादशकपालं निर्वपेद्यं महायज्ञो नोपनमेदिति । तस्या एते भवतो ऽनवस्ते रथं वृषणे यत्त इति ॥ १२ ॥

इन्द्रायाज्यवे पुरोडाशमेकादशकपालं निर्वपेद्ग्रामकाम इति । तस्या एते भवतो ऽन्वह मासा अनु ते दायीतीन्द्राणे चरुं निर्वपेद्यस्य सेनामग्निमेव स्यादित्यथ वै भवति बल्बजानपीथे संनह्येत्तान्सहेमेनाभ्यादध्यादिति । तान्सहैवेमेनाभ्यादधाति । तस्या एते भवत इन्द्राणीमासु नारिषु नाहमिन्द्राणि रारणेतीन्द्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेत्संग्रामे संयत्त इति । तया एते भवतो यो जात एवा ते मह इन्द्रो ऽत्युग्र इत्येतामेव निर्वपेद्यो हतमना इव स्यादिति । तस्या एते भवत एतामेव निर्वपेद्यः स्वयंपाप इव स्यादिति । तस्या एते एव भवतः ॥ १३ ॥

इन्द्राय दाचे पुरोडाशमेकादशकपालं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरिति । तस्या एते भवतो मा नो मर्धीरा तू भरेतीन्द्राय प्रदाचे पुरोडाशमेकादशकपालं निर्वपेद्यस्मै प्रत्तमिव सन्न प्रदीयेतेति । तस्या एते भवतः प्रदातारꣳ हवामहे प्रदाता वज्रीतीन्द्राय सुचाम्णे पुरोडाश-

मेकादशकपालं निर्वपेद्परुद्धो वापरुध्यमानो वेति। तस्या एते भवत द्रन्द्रः सुत्रामा तस्य वयꣳ सुमतौ यज्ञियस्येति। यो ऽस्मꣳ श्रियै सन्त्सदृङ् समानैः स्यात्तस्या एतमैन्द्रमेकादशकपालं निर्वपेदित्यथ वै भवति रेवती पुरोऽनुवाक्या भवति प्रान्त्या अप्रदाहाय प्रकरी याज्येति। तस्या एते भवतो रेवतीर्नः प्रो ष्वस्मै पुरोरथमिति॥ १४॥ पञ्चमः॥

अथ वै भवत्याग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्त्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरित्यथ वै भवति प्रति वै परस्ताद्भिचरन्तमभिचरन्ति। देवे पुरोऽनुवाक्ये कुर्यादतिप्रयुक्त्या इति। स द्विर्दिः पुरोऽनुवाक्यामन्वाह। चित्खिर्हविषामवद्यति। तस्या एता भवन्त्यग्नाविष्णू अग्नाविष्णू प्र णो देव्या नो दिवो बृहस्पत एवा पित्र इत्येतयैव यजेताभिचर्यमाण इति। तस्या एता एव भवन्त्याग्नावैष्णवमेकादशकपालं निर्वपेद्यं यज्ञो नोपनमेदिति। तस्या एते भवतो ऽग्नाविष्णू अग्नाविष्णू इत्याग्नावैष्णवं घृते चरुं निर्वपेच्चुच्यवाम इति। तस्या एते एव भवतः॥ १५॥

अथ वै भवतीन्द्रियं वै वीर्यं वृङ्क्ते भ्रातव्यो यजमानो ऽयजमानस्याध्वरकल्पां प्रतिनिर्वपेद्भ्रातव्ये यजमाने। नास्येन्द्रियं वीर्यं वृङ्क्ते। पुरा वाचः प्रवदितोर्निर्वपेदिति। स पुरा वाचः प्रवदितोर्महाराच इत्याग्नावैष्णवमष्टाकपालं निर्वपेत्प्रातःसवनस्याकाले। सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति। तस्या एता भवन्त्यग्नाविष्णू अग्नाविष्णू प्र णो देव्या नो दिवो बृह-

स्यत एवा पिच इत्याग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यंदिनस्य सवनस्याकाले । सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति । तस्या एता एव भवन्त्याग्नावैष्णवं द्वादशकपालं निर्वपेत्तृतीयसवनस्याकाले । सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति । तस्या एता एव भवन्ति । मैत्रावरुणमेककपालं निर्वपेद्वशायै काल इति । तस्या एते भवत आ नो मित्रावरुणा प्र बाहवेति ॥ १६ ॥

यो ब्रह्मवर्चसकामः स्यात्तस्या एतꣳ सोमारौद्रं चरुं तिष्यापूर्णमासे निर्वपेदिति । स यो ब्रह्मवर्चसकामः स्यात्स तैष्यां पौर्णमास्याꣳ सोमारौद्रं चरुं निर्वपति । परिश्रिते याजयत्ययै वै भवति श्वेतायै श्वेतवत्सायै दुग्धं मथितमाज्यं भवत्याज्यं प्रोक्षणमाज्येन मार्जयन्ते । यावदेव ब्रह्मवर्चसं तत्सर्वं करोत्यंति ब्रह्मवर्चसं क्रिथत इत्याऽऽरीश्वरो दुश्चर्मा भवितोरिति । मानवी ऋचौ धाय्ये कुर्यादिति । मचू देववतो रथ इत्येतासां द्वे धाय्यालोके दधाति । तस्या एते भवतः सोमारुद्रा विवृहतं विषूचीꣳ सोमारुद्रा युवमेतानीति ॥ १७ ॥

यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णं चरुं निर्वपेदिति । तस्य एते भवतः सोमपूषणेमौ देवाविति । सोमारौद्रं चरुं निर्वपेत्प्रजाकाम इति । तस्या एते भवतः सोमारुद्रा विवृहतं विषूचीꣳ सोमारुद्रा युवमेतानीति ।

---

१ Thus M Be 8; यदि UD Be; B defect.

२ Thus M Be 8 UD; यजत्यथ Be B.

३ Thus MU Be; धाय्ये Be 8 B; धाय्यें लोके D.

सोमारौद्रं चरुं निर्वपेदभिचरन्निति तस्या एते एव भवतः सोमारौद्रं चरुं निर्वपेज्ज्योगामयावीत्येतयेष्या यज्यमाण उपकल्पयते होतानड्वाहं[1] तस्या एते एव भवतो ऽन्वाहार्यमासाद्य होतानड्वाहं ददाति सोमारौद्रं चरुं निर्वपेद्यः कामयेत स्त्रे ऽस्मा आयतने भ्रातृव्यं जनयेयमिति सो ऽपरेद्युरमर्यादायामध्यवसाय मथित्वाग्नीन्विहृत्य सोमारौद्रं चरुं निर्वपत्यथ वै भवति वेदिं परिगृह्यार्धमुद्धन्यादर्धं नार्धं बर्हिष स्तृणीयादर्धं नार्धमिध्मस्याभ्यादध्यादर्धं न स्त्र एवास्मा आयतने भ्रातृव्यं जनयतीति ब्राह्मणं तस्या एते भवतः ॥ १८ ॥ षष्ठः ॥

अथ वै भवत्यैन्द्रमेकादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम इत्यथ वै भवत्याहवनीय ऐन्द्रमधिश्रयति गार्हपत्ये मारुतमनूच्यमान आसादयतीति काले प्रत्यञ्चमैन्द्रमासादयत्यनूच्यमानासु सामिधेनीषु मारुतं तस्या एता भवन्तीन्द्रं वो विश्वतस्परीन्द्रं नरो मरुतो यद्ध वो दिवो या वः शर्मेत्येतामेव निर्वपेद्यः कामयेत क्षत्राय च विशे च समदं दधामित्यैन्द्रस्यावद्यन्ब्रूयादिन्द्रायानुब्रूहीतीन्द्रं वो विश्वतस्परीत्यन्वाहात्याक्रम्याश्राव्याह मरुतो यजेति या वः शर्मेति यजति मारुतस्यावद्यन्ब्रूयान्मरुद्भ्यो ऽनुब्रूहीति मरुतो यद्ध वो दिव इत्यन्वाहात्याक्रम्याश्राव्याहेन्द्रं यजेतीन्द्रं नर इति यजति स्त्र एवैभ्यो भागधेये समदं दधाति विदꣳहाणास्त्रिष्ठन्तीति ब्राह्मण-

---

१ Thus MDB; होतारमनड्वाहं Be U; Be 8 om., perhaps rightly, होता।

मेतामेव निर्वपेद्यः कामयेत कल्पेरन्निति । यथादेवतमवदाय यथादेवतं यजेङ्गागधेयेनैवैनान्यथायथं कल्पयति । कल्पन्त एवेति ब्राह्मणं । तस्या एता भवन्ति याः पूर्वस्याः । ॥ १९ ॥

ऐन्द्रमेकादशकपालं निर्वपेद्वैश्वदेवं द्वादशकपालं ग्रामकाम इत्येतयेष्या यज्यमाण उपकल्पयत उपाधाय्यपूर्वयं वासो ऽथ वै भवत्यैन्द्रस्यावदाय वैश्वदेवस्यावद्येदथैन्द्रस्योपरिष्टादिति । स ऐन्द्रस्यावदाय द्विर्वैश्वदेवस्यावद्यत्यथैन्द्रस्योपरिष्टादिन्द्रियेणैवास्या उभयतः सजातान्परिगृह्णातीति ब्राह्मणं । तस्या एते भवतो भरेष्विन्द्रं ममत्तु न इत्यन्वाहार्यमासाद्योपाधाय्यपूर्वयं वासो ददाति । पृश्नियै दुग्धे प्रेयङ्गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकाम इत्यथ वै भवति प्रियवती याज्यानुवाक्ये भवत इति । तस्या एते भवतः प्रिया वो नाम ऊतये तुराणाꣳ श्रियसे कं भानुभिरिति । यः समानैर्मिथो विप्रियः स्यात्तमेतया संज्ञान्या याजयेदिति । स यैः संजिज्ञासीत तेषूपसमेतेभ्यग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपति सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायादित्यवते चरुमिति । तस्या एते भवतो ऽग्निः प्रथमो वसुभिर्नो अव्यात्सं नो देवो वसुभिरिति । ॥ २० ॥

आदित्येभ्यो भुवद्वाजस्यं निर्वपेद्भूतिकाम इति । तस्या एते

---

१ Thus M only; all the other MSS. are badly corrupted: तस्यैवसंजिज्ञासीनतेषुयमतेभ्य० U; तस्यैवसंजिज्ञासीतेषुयमतेभ्य० B, तस्यैवसंज्ञासित्त तेषूपसमेतेभ्य० Be 8, तस्यैव संजज्ञासीनतेषुपसतेभ्य० Be; तस्यैव संज्ञातेषुप्रमतेभ्य० D.

भवतो यज्ञो देवानाꣳ शुचिरप इत्यादित्येभ्यो धारयदद्ध्वꣳरं निर्वपेदपरुद्धो वापरुध्यमानो वेत्यादिते ऽनुमन्यस्वेत्यपरुध्यमानो ऽपरोद्धुः[1] पदपाꣳसूनादत्ते[1] ' ऽधैनानादायाहरत्युपप्रेत[2] मरुतः सुदानव एना विश्पतिनाभ्यसुꣳ राजानमित्यधैनान्यजमानस्याञ्जलावावपति सत्याग्नीरितीह मन इत्युपनिगृह्णीते[3] ' ५ ऽधैतान्पदपाꣳसूनसंचरे परावपत्यं च यं यजमानो द्वेष्टि तं मनसा ध्यायति ' तस्या एते भवतो धारयन्त आदित्यासस्त्रिसो भूमीर्धारयन्निति ' यः परस्ताद्ग्राम्यवादी स्यात्तस्य गृहाद्व्रीहीनाहरेच्छुक्लाꣳश्च कृष्णाꣳश्च विचिनुयादित्यथ वै भवति ये शुक्लाः सुरभ्यादित्यं चरुं निर्वपेदिति ' तस्या एते भवतस्यान्नु १० चत्रियान्न दक्षिणेत्यादित्या वै देवतया विड्विशमेवावगच्छतीति ब्राह्मणमथ वै भवत्यवगतास्य विडनवगतꣳ राष्ट्रमित्याऽऽर्ध्ये कृष्णाः सुरभ्यं वारुणं चरुं निर्वपेदिति ' तस्या एते भवत दमं मे वरुण तत्त्वा यामीति ' वारुणं वै राष्ट्रमुभे एव विशं च राष्ट्रं चावगच्छतीति ब्राह्मणम् ' ॥ २१ ॥ १५

अथ वै भवति यदि नावगच्छेदिममहमादित्येभ्यो[4] भागं निर्वपाम्यासुमादसुमुष्मै विशो ऽवगन्तोरिति निर्वपेदिति '

---

Thus M and Bhav.; परुदपद० Be BDU; ०परुदः पद० Be 8.

१ Thus M; धैनानादायहरंत्यु० Be 8; D om. त्यादाय; धेनानायांतरत्यु० Be BU.

२ Thus M; नि om. all the other MSS.

४ Corrected ( cp. TS. II. 3. 1. 4 ); all the MSS. have इदम् i. s. o. इमम् only U इदममहमा० ।

निरुप्योपरमत्यथावगच्छते सꣳसादयति । तस्या एते भवतो यज्ञो देवानामादित्यानामवसा नूतनेनेत्यादित्या एवैनं भागधेयं प्रेप्सन्तो विग्रमवगमयन्तीति ब्राह्मणमथ वै भवति यदि नावगच्छेदाश्वत्थान्मयूखान्सन्न मध्यमेषायामुपहन्यादिति ।
५ प्रागीषमनो[1] ऽवस्थापयित्वाश्वत्थान्मयूखान्सन्न[1] मध्यमेषायामुपहन्ति[1] । मध्यममुपहत्य[2] चोन्मृतीचस्तीन्प्राच आयातयतीदमहमादित्यान्बध्नाम्यामुष्मादमुष्यै विग्रो ऽवगन्तोरित्यादित्या एवैनं बद्धवीरा विग्रमवगमयन्तीति ब्राह्मणमथ वै भवति यदि नावगच्छेदेतमेवादित्यं चरुं निर्वपेदिधेमे ऽपि मयूखान्सं-
१० नह्येत्तान्सन्नेधेनाभ्यादध्यादिति । तान्सन्नैवेधेनाभ्यादधात्यनपरुध्यमेवावगच्छतीति ब्राह्मणमथ वै भवत्याश्वत्था भवन्ति । मरुतां वा एतदोजो यदश्वत्थ । ओजसैव विग्रमवगच्छति । सन्न भवन्ति । सन्नगणा वै मरुतो । गणश एव विग्रमवगच्छतीति ब्राह्मणं । तस्या एते एव भवतः । ॥ २२ ॥ सप्तमः ॥
१५ अथ वै भवति यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्याꣳ घृतकृष्णलां निर्वपेदित्येतयेष्ट्या यज्ञमाण उपकल्पयते घृतꣳ सुवर्णानि कृष्णलानि नवं पात्रं प्रभूतमाज्यमित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वा प्रजापतये जुष्टं निर्वपामीति चतुरो मुष्टीन्कृष्णलानां[2] निर्वपति । हविष्कृता वाचं विसृज्य

---

१ This passage is found in M only.

२ Thus Be 8 ; मध्यत उपहत्य Be BD ; मध्यम उप० M ; मध्य उप० U ; मध्यमुपहत्य Bhav.

३ Thus M , कृष्णलान् or कृष्णलां the other MSS.

गार्हपत्ये नवं पात्रमधिश्रित्य तिरः पवित्रमाज्यमानीय तिरः पवित्रं कृष्णलान्यावपत्यधाज्यं निर्वपत्यधाज्यमधिश्रित्योभयं[1] पर्यग्नि कृत्वान्तर्वेद्यासादयत्यथ वै भवति चत्वारिचत्वारि कृष्णलान्यवद्यति चतुरवत्तस्थाष्ट्रा इत्यष्टौ देवताया अवद्यति चत्वारि खिष्टकृते ऽष्टाविडायै[2] चत्वार्यवान्तरेडाया एकं प्राग्नि- ५
चायैकं यजमानायाज्यमेव जुक्रतो जुक्रत्याज्यं प्राश्नन्तः[3] प्राश्नन्त्यथैनान्येकधोद्धृत्य[3] ब्रह्मण उपहरति। तस्या एते भवतो हिरण्यगर्भः प्रजापत इति। ॥ २३ ॥

यो ब्रह्मवर्चसकामः स्यात्तस्या एतꣳ सौर्यं चरुं निर्वपेद्- त्येतयेष्ट्या यज्यमाण उपकल्पयते पञ्च सुवर्णानि कृष्णलानि १०
सुवर्णरजतौ च रुक्मावथैतं चरुꣳ श्रपयित्वाभिघार्योद्द्रुमुदास्य सुवर्णरजताभ्याꣳ रुक्माभ्यां परिगृह्यान्तर्वेद्यासादयति। समानं कर्मा प्रयाजेभ्यो। ऽथ वै भवति प्रयाजेप्रयाजे कृष्णलं जुहोतीति। स प्रयाजेप्रयाज एव कृष्णलमन्ववधाय जुहोति। तस्या एते भवत उद्वु त्यं चित्रमित्यन्वाहार्यमासाद्य सुवर्ण- १५
रजतौ रुक्मौ ददात्याग्नेयमष्टाकपालं निर्वपेत्सावित्रं द्वादशकपालं भूम्यै चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोपनमेदित्येतयेष्ट्या यज्यमाण उपकल्पयते हिरण्यं। तस्या एता

---

१ ०मधिश्रयत्युभयं M.

२ अष्टौ is found in M only.

३ Thus M; प्राश्नंतमेव प्राश्नंत्य० D; the other MSS. (i. s. o. प्राश्नन्ति) प्राश्नाते Be; प्राश्नंते U; प्राश्नते B; प्राश्नाति Be 8.— उद्धृत्य M Be 8, उपहृत्य the other MSS., but cp. supra XII. 16 (p. 68, 18).

भवन्ति स प्रलवन्नि काव्या हिरण्यपाणिमूतये वाममद्य सवितर्वडित्या पर्वतानाꣳ स्तोमासस्त्वा विचारिणीत्यन्वाहार्यमासाद्य हिरण्यं ददात्येतामेव निर्वपेद्धिरण्यं वित्तेति । तस्या एता एव भवन्त्येतामेव निर्वपेद्यस्य हिरण्यं नश्येदिति । तस्या एता एव भवन्ति । ॥ २४ ॥

यः सोमवामी स्यात्तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निर्वपेदिति । तस्या एते भवत ऋदूदरेणापान्तमन्वुरिति । सोमवामी वा अन्यो भवत्यन्यः सोमातिपवितो भवति । यः सोमातिपवितः स्यात्तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निर्वपेदिति । तस्या एते भवतः प्र सुवानः सवाधस्त इत्याग्नये दाचे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदाचे पुरोडाशमेकादशकपालं पशुकाम इत्येतयेष्या यक्ष्यमाण उपकल्पयते दधि मधु घृतमपो यवानित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वाग्नये दाचे जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्येतामेव प्रतिपदं कृत्वेन्द्राय प्रदाचे जुष्टं निर्वपामीति चतुर एव व्रीहीणामेतामेव प्रतिपदं कृत्वा प्रजापतये जुष्टं निर्वपामीति चतुरो यवानां । तेषां व्रीहिष्वेव हविष्कृतमुदादत्यूपोद्यच्छन्ते यवान्हविष्कृता वाचं विसृजते । समानं

---

१ The passage marked between १ ... १ is not found in M Be BU. In the words as handed down by Be 8, I inserted अन्यो (l. 8, first time) and तस्मा (l. 9) and changed अन्यं (l. 8, second time) into अन्यः । D : सोमवामी चोन्यो भवत्यन्यं ब्रिदुः सोमातिपवितः (sic).

कर्माधिवपनादध्युप्य दक्षिणार्धे गार्हपत्यस्याष्टौ कपालान्यु-
पदधात्येकादशोत्तरतो ऽथैतान्यवानुलूखले परिचुप्य गार्हपत्य
एककपालमधिश्रित्य धाना भर्जन्ति[1] यदैते[2] हविषी
अधिपृणक्ति तदैता धानाश्चतुष्टयेनोपसृजति[3] दध्ना मधुना[4]
घृतेनाङ्गिरिति तस्या एता भवन्त्यग्ने दा दाशुषे रयिं दा ५
नो अग्ने अतिनः प्रदातारꣳ हवामहे प्रदाता वज्री घृतं न
पूतमुभे सुश्चन्द्र सर्पिष इति ॥ २५ ॥

यो यज्ञविभ्रष्टः स्यात्तस्या एतामिष्टिं निर्वपेदाग्नेयमष्टा-
कपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुमित्यथ वै भवत्याग्नेयस्य
च सौम्यस्य चैन्द्रे समाश्लेषयेदिति स आग्नेयस्य च सौम्यस्य १०
चैन्द्रे समाश्लेषयति तेजश्चैवास्मिन्ब्रह्मवर्चसं[5] च[5] समीची[5]
दधातीति ब्राह्मणं तस्या एता भवन्ति स प्रत्नवन्नि काव्येन्द्रं
वो विश्वतस्परीन्द्रं नरस्त्रं नः सोम या ते धामानीत्यग्नीषोमी-
यमेकादशकपालं निर्वपेद्यं कामो नोपनमेदिति तस्या एते
भवतो ऽग्नीषोमा सवेदसा युवमेतानीत्यग्नीषोमीयमष्टाकपालं १५
निर्वपेद्ब्रह्मवर्चसकाम इति यो ब्रह्मवर्चसकामः स्यात्तो ऽग्नी-
षोमीयमष्टाकपालꣳ श्यामाकानां निर्वपति तस्या एते

---

१ Thus M (the same reading xvii. 31); भर्जयंति the other MSS.

२ Only found in M Be 8; BDU om.; Be has a lacuna of three akṣaras.

३ Thus M and Bhav.; the other MSS. have the plural.

४ मधुना M.

५ Thus corrected acc. to TS. II. 3. 3. 2; तेजश्चैवास्मा इन्द्रियं च समीची MUDB Be; तेजश्चैवास्मा इन्द्रियं च ब्रह्मवर्चसं च समीची Be 8.

भवति जायमानो यमादित्या अꣳशुमाप्याययन्तीति । यं कामयेतान्नादः स्यादिति तस्मा एतं चिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञ इत्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्राय राज्ञे जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्येतामेव प्रतिपदं कृत्वेन्द्रायाधिराजायेन्द्राय स्वराज्ञ इति चतुरश्चतुरो मुष्टीनेकैकस्मै देवतायै । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादध्युप्य गार्हपत्य एकादशोत्तानानि कपालान्युपदधात्यथ वै भवत्युत्तानेषु कपालेष्वधिश्रयत्ययातयामत्वाय । त्रयः पुरोडाशा भवन्ति । त्रय इमे लोका । एषां लोकानामाप्त्या । उत्तरउत्तरो ज्यायान्भवतीति । स उत्तरमुत्तरमेव ज्यायाꣳसं करोति । सर्वेषामभिगमयन्नवद्यतीति । सो ऽवद्यन्नाहेन्द्राय राज्ञे ऽनुब्रूहीति । प्राच्यां दिशि त्वमिन्द्रासि राजेत्यनूच्येन्द्रो जयाति न पराजयाता इति यजति । सो ऽवद्यन्नाहेन्द्रायाधिराजायानुब्रूहीतीन्द्रो जयाति न पराजयाता इत्यनूच्यास्येदेव प्ररिरिचे महित्वमिति यजति । सो ऽवद्यन्नाहेन्द्राय स्वराज्ञे ऽनुब्रूहीत्यास्येदेव प्ररिरिचे महित्वमित्यनूच्य प्राच्यां दिशि त्वमिन्द्रासि राजेति यजति । व्यत्यासमन्वाहानिर्दाहायेति ब्राह्मणम् ॥ २८ ॥

य इन्द्रियकामो वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजयेदित्येतयेष्ट्या यज्यमाण उपकल्पयते ऽश्वमृषभं वृष्णिं वस्तमित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्राय राथंतराय

जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्येतामेव प्रतिपदं कृत्वेन्द्राय वार्हतायेन्द्राय वैरूपायेन्द्राय वैराजायेन्द्राय शाक्करायेन्द्राय रैवतायेति चतुरश्चतुरो मुष्टीनेकैकस्मै देवतायै। हविष्कृता वाचं विसृजते। समानं कर्माधिवपनाद्ध्यग्नि गार्हपत्ये द्वादशोत्तानानि कपालान्युपदधात्येष वै भवत्युत्तानेषु कपालेष्वधिश्रयत्ययातयामत्वाय। द्वादशकपालः पुरोडशो भवति वैश्वदेवत्वाय। समन्तं पर्यवद्यतीति। सो ऽवद्यन्नाहेन्द्राय रायंतरायानुब्रूहीत्यभि त्वा शूर नोनुम इत्यनूच्य त्वामिद्धि हवामह इति यजति। सो ऽवद्यन्नाहेन्द्राय वार्हतायानुब्रूहीति। त्वामिद्धि हवामह इत्यनूच्य यद्ग्राव इन्द्र त इति यजति। सो ऽवद्यन्नाहेन्द्राय वैरूपायानुब्रूहीति। यद्ग्राव इन्द्र त इत्यनूच्य पिबा सोममिन्द्र मन्दतु त्वेति यजति। सो ऽवद्यन्नाहेन्द्राय वैराजायानुब्रूहीति। पिबा सोममिन्द्र मन्दतु त्वेत्यनूच्य कदा चन स्तरीरसीति यजति। सो ऽवद्यन्नाहेन्द्राय शाक्करायानुब्रूहीति। कदा चन स्तरीरसीत्यनूच्य रेवतीर्नः सधमाद इति यजति। सो ऽवद्यन्नाहेन्द्राय रैवतायानुब्रूहीति। रेवतीर्नः सधमाद इत्यनूच्याभि त्वा शूर नोनुम इति यजति। व्यत्यासमन्वाहानिर्दाहायेति ब्राह्मणम्। ॥ २९ ॥

अन्वाहार्यमासाद्याश्वमृषभं वृष्णिं वस्तमिति ददात्येतयैव यजेतार्भिग्रस्यमान इति। यैव[1] पूर्वा[1] सेयं[1]। यश्चुष्कामः

---

१ Thus M; यैव पूर्वा सेति Be, यैव पूर्वसे Be 8; यैव पूर्वास्येति U; तस्या एते भवंति या पूर्वस्या BD.

स्यात्तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टा-
कपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमिति
तस्या एते भवन्त्युदग्ने शुचयस्तव वि ज्योतिषोदु त्यं चित्रमुदग्ने
शुचयस्तव वि ज्योतिषेत्युपक्रुतायामिडायामनाहितमग्नीधे
भवत्यथ यजमानाय चौष्णिष्डान्प्रयच्छत्युदु त्यं जातवेदसꣳ सप्त ५
त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिण्डान्प्रय-
च्छति चक्षुरेवास्मै प्रयच्छति यदेव तस्य तदिति ब्राह्मणं
वैश्वदेवीꣳ सांग्रहणीं निर्वपेद्ग्रामकाम इति वैश्वदेवं चरुꣳ
संग्रहन्त इव अपयन्त्यथ ध्रुवो ऽसि ध्रुवो ऽहꣳ सजातेषु भूया-
समिति परिधीन्परिदधाति तस्या एते भवतो विश्वे देवा १०
विश्वे देवा इत्यथ पुरस्तात्सिष्टकृतः स्रुवाऋतीरुपजुहोत्यामन-
न्त्यामनस्यन्त देवा इति तिस्रः ॥ ३० ॥ नवमः ॥

अथ वै भवत्यग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो
वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा
यस्य ज्योगामयति यो ज्योगामयावी स्त्रीयो वा कामयेत १५
सर्वमायुरियामिति तस्या एतामिष्टिं निर्वपेदित्येतयेष्ट्या यज्य-
माण उपकल्पयते खादिरं नवं पात्रं नवनीतमाज्यं यावतीः
समा एष्यन्मन्येत तावन्मानं च प्रवर्तमथ देवस्य त्वा सवितुः
प्रसव इति प्रतिपदं कृत्वाग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं
वारुणं दशकपालꣳ सारस्वतं चरुमाग्नावैष्णवमेकादशकपाल- २०

---

१ स्रुवाऋतीरुपजुहोत्य० MBD; स्रुवाऋतीर्जुहोत्य० U Be; स्रुवाऋतिं जुहोत्य० Be 8.

मिति[१] । समानं कर्माज्यावेक्षणात्[२] आज्यावेक्षणे[३] ऽनुवर्तयति यन्नवमैक्षन्नवनीतमभवदिति । समानं कर्मा स्रुचाꣳ सादनात्सादयित्वा स्रुचो ऽथैतं प्रवर्तं खादिरे नवे पात्र उपस्तीर्णाभिघारितꣳ सह हविर्भिरन्तर्वेद्यासादयति । समानं[३] कर्मा[४] प्रयाजेभ्यः[३] । प्रयाजैश्चरित्वा[३] हविर्भिश्चरति[३] । तस्या एता भवन्त्यायुष्ट आयुर्दा अग्न आयायस्व सं ते ऽव ते हेड उदुत्तमं प्र णो देव्या नो दिवो ऽग्नाविष्णू अग्नाविष्णू इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाञ्जतीरुपजुहोति ॥ ३१ ॥

अश्विनोः प्राणो ऽसि तस्य ते दत्तां यशोः प्राणो ऽसि स्वाहेन्द्रस्य प्राणो ऽसि तस्य ते ददातु यस्य प्राणो ऽसि स्वाहा मित्रावरुणयोः प्राणो ऽसि तस्य ते दत्तां यस्य प्राणो ऽसि स्वाहा विश्वेषां देवानां प्राणो ऽसि तस्य ते ददतु येषां प्राणो ऽसि स्वाहेति । ऋजाञ्जवैव सꣳस्रावैः[५] प्रवर्तमभिघारयति राडसि विराडसि सम्राडसि स्वराडसीत्यथैतं प्रवर्तमग्नेणाहवनीयं पर्याहृत्य दक्षिणतो निदधात्यथ यजमानमाज्यमवेक्षयति घृतस्य धारामृतस्य पन्थामिन्द्रेण दत्तां प्रयतां मरुद्भिः । तत्त्वा विष्णुः पर्यपश्यत्तत्त्वेडा गव्यैरयदित्यथ ब्रह्मणो हस्तमन्वारभ्यर्त्विजः[५] पर्याञ्जः पावमानेन त्वा स्तोमेन गायत्रस्य

---

१ Here BD ins. हविष्कृता वाचं विसृजते ।

२ Thus M Bhav.; स आज्यमवेक्षमाणो the other MSS.

३ om. M Be.

४ संस्रावेण Be 8.

५ ऋत्विजः only in M Be 8 D.

वर्तन्योपाꣳशोर्वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्यायै बृहद्रथंतरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्याया अग्नेस्त्वा माचया जगत्यै वर्तन्याग्रयणस्य वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्याया दृत्यै हिरण्याहृतं निष्प्लवति[1] ५
निष्प्लवन्तमनुमन्त्रयत दममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन्। मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासदित्यथैतं[1] प्रवर्तमङ्गिः प्रचाल्य दक्षिणे कर्ण आबध्नीत[2] आयुष्टे[2] विश्वतो दधदित्यथैनमनुपरिवर्तयत[3] आयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसीत्यथास्य[4] ब्रह्मा १०
हस्तं गृह्णात्यग्निरायुष्मानित्यान्तादनुवाकस्य[1] ॥ ३२ ॥

यावतो ऽस्यान्प्रतिगृह्णीयात्तावतो वारुणाञ्चतुष्कपालान्निर्वपेदेकातिरिक्तानिति[1] तस्या एते भवत दमं मे वरुण तत्त्वा यामीति[1] यद्यपरं प्रतिग्राही स्यात्सौर्यमेककपालमनुनिर्वपेदिति[1] तस्या एते भवत उदु त्यं चित्रमित्यथापो[5] ऽवभृथम- १५
वैत्यथ[5] वै[5] भवत्यपोनप्त्रीयं[5] चरुं पुनरेत्य निर्वपेदिति[1]

---

१ Thus M; ॰थैनं all the other MSS.

२ Thus corrected, cp. infra XVII. 41 and XVIII. 9; आबध्नीताय॰ M; आबध्नात्यायु॰ the other MSS.

३ All exc. M ins. प्रवर्तम् after एनं।

४ After सर्वमायुरसि M has some words more · सर्वं म आयुर्भूयात्सर्वमायुर्गोपम्, cp. Āp. XIX. 24. 10.

५ Thus MUD Be, the last three omitting the words अथ वै भवति। चित्रमित्यवभृथमेवैत्यपोन॰ Be 8; चित्रमित्यपोन॰ B.

तस्या एते भवतो ऽपां नपात्समन्या यन्तीति । यः पाप्मना[1] गृहीतः स्यात्तस्या एतामैन्द्रावरुणीं पयस्यां निवपेदित्येतयेष्या यज्यमाण उपकल्पयते दधि पय आमिक्षाया इत्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्रावरुणाभ्यां जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपति । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादधुष्य दक्षिणार्धं गार्हपत्यस्यैकादश कपालान्युपदधाति । यदैतं पुरोडाशमधिपृणक्ति तदैतामामिक्षां गार्हपत्ये अपयत्यथैतं पुरोडाशमुपस्तीर्णाभिघारितमुदास्यामिक्षया संप्रच्छाद्यान्तर्वेद्यासादयति[2] ॥ ३३ ॥

अथ वै भवति पयस्यायां पुरोडाशमवदधात्यात्मन्नन्तमेवैनं करोत्यथो आयतनवन्तमेव । चतुर्धा व्यूहति । दिक्ष्वेव प्रतितिष्ठति । पुनः समूहतीति । स आमिक्षां पुरोडाशाच्चतुर्धा[3] कृत्वा व्यूहति या वामिन्द्रावरुणा यतव्या तनूस्तयेममंहसो मुञ्चतं या वामिन्द्रावरुणा सहस्या रक्षस्या तेजस्या तनूस्तयेममंहसो मुञ्चतमिति । पुनः समूहति समूह्यावद्यतीति । तस्या एते भवत इन्द्रावरुणयोरहमिन्द्रावरुणा युवमध्वराय न इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति यो वामिन्द्रावरुणावग्नौ स्थामस्तं वामेतेनावयज इत्यष्टौ । ॥ ३४ ॥ दशमः ॥

अथ वै भवति यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्या

---

१ Thus M ; पापयक्ष्म° the other MSS.

२ Thus M ; संहाय° all the other MSS.

३ Thus M and Bhav. ; पुरोडाशं चतुर्धा all the other MSS.

यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवते ऽग्नये प्रतीकवत दूति' तस्या एता भवन्ति प्रप्रायमग्निः प्र ते यच्छि प्र त दूयर्मि मन्म भुवो वि पाजसा वि ज्योतिषा स त्वमग्ने प्रतीकेन तꣳ सुप्रतीकꣳ सुदृशꣳ खच्चमिति' यो भ्रातव्यवन्स्यात्स स्पर्धमान एतयेष्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावत दूत्यथ वै भवति चयस्त्रिꣳशत्कपालं पुरोडाशं निर्वपतीति' य एवैते चय एकादशकपालास्त[1] एवैत[1] उक्ता[1] भवन्ति' तस्या एता भवन्त्यꣳहोमुचे विवेष यन्मा वि न दस्रेन्द्र त्वचमिन्द्रियाणि शतक्रतो ऽनु ते दायीति' यो भ्रातव्यवान्स्यात्स स्पर्धमान एतयेष्या यजेताग्नये संवर्गाय पुरोडाशमष्टाकपालं निर्वपेत्तꣳ घृतमासञ्चमेतेन यजुषाभिमृशेदिति' तꣳ घृतमासञ्चमेतेन यजुषाभिमृशत्योजो ऽसि सहो ऽसि बलमसि भ्राजो ऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायु-रभिभूरहमनेन हविषामुं भ्रातव्यमभिभूयासमिति' युञ्जा हि देवहूतमानित्येतस्यानुवाकस्य सप्तदश सामिधेनीः पराचीर-न्वाह' तस्या एते भवतः सखायः सं वः सम्यञ्चꣳ सꣳसमिद्युवसे वृषन्निति' ॥ ३५ ॥

यः प्रजाकामः स्यात्तस्मा एतं प्रजापत्यं गार्हपतं चरुं निर्व-पेदिति' तस्या एते भवतः प्रजापते स वेदेति' यः पशुकामः

---

१ Thus Be 8; ना एवैत उक्ता M, न एवोक्ता Be BU, नवोक्ता D.

स्यात्तस्या एतꣳ सोमापौष्णं गार्मुतं चरुं निर्वपेदिति । तस्या एते भवतः सोमापूषणेमौ देवाविति । चित्रया यजेत पशुकाम इति । स्वश्चित्रयेत्युपवसत्यथ[1] प्रातराग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं त्वाष्ट्रमष्टाकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुꣳ सिनीवाल्यै चरुमैन्द्रमेकादशकपालमिति । तस्या एते भवन्त्यग्निना रायिमश्नवद्गोमाꣳ अग्न आयाहि सं त इन्द्र त्वष्टारमग्रियं तन्नस्तुरीपं प्र णो देव्या नो दिवः पीपिवाꣳसꣳ सरस्वतो ये ते सरस्व ऊर्मयः सिनीवालि या सुपाणिरिन्द्रं वो विश्वतस्परीन्द्रं नर इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाञ्जतीरुपजुहोत्यग्ने गोभिर्न आगहीति पञ्चर्चौ द्वे यजुषी । ॥ ३६ ॥ एकादशः ॥

कारीर्या यक्ष्यमाणो भवति । स उपकल्पयते कृष्णं वासः कृष्णतूषं कृष्णमश्वं कृष्णꣳ संदानं कृष्णाजिनं कृष्णमधु[2] करीरसक्तून्कृष्णां कुम्भीमामपक्वां[3] कृष्णमनस्त्रिगधं कृष्णामविं कृष्णं वर्षाह्रस्तम्बं[4] वैतसमिध्माबर्हिरित्यथ यजमानायतने कृष्णं वासः कृष्णतूषं निदधात्यथाग्नेणाहवनीयं कृष्णमश्वं कृष्णेन संदानेन

---

१ स्वश्चित्रयेत्यु॰ Be 8 Be ; स्वश्चित्रेत्यु॰ BDU , स्वश्चित्रयेत्यु॰ M.

२ कृष्णंमधु DU.

३ Thus corrected acc. to a Prayoga , कृसुंभीमामपक्वां D ; instead of आमपक्वां Be 8 (pr. m) · आमवाकार्यै, (sec. m.) : आमपाचंकरीया , आमपाचकरीया॰ U ; आमपाचकरी B ; आमपाचंकरीयत् Be , आमभाचं—करीर्यां M

४ वर्षाड॰ M here and later on consequently ; thus also some of the other MSS.

मंदित्यान्तर्वेदि[1] कृष्णाजिने कृष्णमधु करीरसक्तूनिवपत्युत्करे कुम्भीं निमिनोत्यथाग्नेणोत्करं प्रागीषमन स्थापयित्वा तस्याग्नेणोपस्तभ्नं कृष्णामविं नियच्छात्युत्तरेणाहवनीयं कृष्णं वर्षाह्नस्तंबं वैतसमिध्मावर्हिरिति निदधात्यथ यजमानः कृष्णं वासः कृष्णदृषं परिधत्ते ॥ ३७ ॥

मारुतमसि मरुतामोजोऽपां धारां भिन्द्धीति[1] रमयत मरुतः श्येनमाशिनमिति पश्चाद्वातं प्रतिमीवति[1] पुरोवातमेव जनयति वर्षस्यावरुद्ध्या इति ब्राह्मणमथैतमश्वं संदानात्प्रमुच्योत्तरवर्ग्येणाभिविच्छिपत्यभिक्रन्द[2] स्तनय गर्भमाधा इति[1] स यदि विधूनुते[3] यदि मेहति यदि शकृत्करोति वर्षिष्यतीत्येव वेदाथ वातनामानि जुहोति पुरोवातो वर्षञ्छिन्धरावृत्त्याहेत्यष्टावथान्तर्वेदि कृष्णाजिने मधुषा करीरसक्तून्संयौति मान्दा वाग्राः शुन्ध्यूरजिराः। ज्योतिष्मतीस्तमखरीरुन्दतीः सुफेनाः। मित्रभृतः चचभृतः सुराष्ट्रा इह मावतेति[1] तिस्रः पिण्डीः कृत्वा समुच्चित्य कृष्णाजिनस्यान्तःसंदानेनोपनह्यति कृष्णो अश्वस्य संदानमसि कृष्यै त्वोपनह्यामीत्यथैना अनसः प्रथमायां गधायामाबध्नाति ॥ ३८ ॥

देवा वसव्या अग्ने सोम सूर्येत्यहोरात्रे उपरमति[1] द्वितो-

---

१ Thus M only; संनह्यत्यान्तर्वेदि all the other MSS.

२ °वर्ग्येण° M; °वर्गेण the other MSS.; cp. supra p. 104. 2.—भिच्छिपत्य° M.

३ विधुनुते BD

यस्यामावध्नाति देवाः ग्रर्मण्या मित्रावरुणार्यमन्नित्यहोराचे एवोपरमति । द्वतीयस्यामावध्नाति देवाः सपीतयो ऽपां नपादाशुहेमन्नित्यहोराचे एवोपरमत्यथ वै भवति यदि वर्षेत्तावत्येव होतव्यमिति । यदि चैव वर्षति यदि नोभयेनैव पिण्डीर्जुहोति स्रुचोपस्तीर्णामिघारिता दिवा चित्तमः कृण्वन्त्या यं नर उदीरयथा मरुतः समुद्रत इत्यथासां धूममन्वीचते ऽसितवर्णा हरयः सुपर्णा इति । यदि न वर्षेच्छो भूते हविर्निर्वपेदग्नये धामच्छदे पुरोडाशमष्टाकपालं निर्वपेन्मारुतꣳ सप्तकपालꣳ सौर्यमेककपालमिति । तस्या एता भवन्ति त्वं त्या चिदच्युताग्ने भूरीणि तव जातवेदो दिवो नो वृष्टिं मरुतो ररीध्वं पिन्वन्त्यपो मरुतः सुदानव उदु त्यं चित्रमित्यथ पुरस्तात्स्विष्टकृतः स्रुवाज्ञतीरुपजुहोत्यौर्वभृगुवच्चुचिमप्नवानवदाज्ञव इति तिस्रो ऽथैतां कुम्भीमद्भिः पूरयति सृजा वृष्टिं दिव आद्भिः समुद्रं पृणेति । सा यदि दीर्यते यदि भिद्यते वर्षिष्यतीत्येव वेदाथाविमभिजुहोत्यजा[1] अग्नि प्रथमजा बलमग्नि समुद्रियमिति । सा यदि विधूनुते यदि मेहति यदि प्रकृत्करोति वर्षिष्यतीत्येव वेदाथ वर्षाङ्कस्तम्बमभिजुहोति ॥ ३९ ॥

---

१ Thus M Be 8 Be; वेदाथ मेषा उपरि जुहोत्य० BUD; then follows in B the beginning of kh. 40; the passage यथाविमभिजुहोत्य० ... वर्षिष्यतीत्येव was given in this MS. already after the horse oracle.

उन्नम्य पृथिवीं भिन्द्धीदं दिव्यं नभः। उद्रो दिव्यस्य नो देहीशानो विसृजा दृतिमित्यथैनमाहवनीये ऽनुप्रहरति हिरण्यकेशो रजसो विसार इत्यथास्य धूममन्वीक्षत आ ते सुपर्णा अमिनन्त एवैरित्यथान्तर्वेदि तिष्ठन्कृष्णाजिनमवधूनोति ये देवा दिविभागा इत्यान्नादनुवाकस्य संतिष्ठते कारीर्यै- ५
यातो ऽङ्गःसवकारीर्यैाग्नेयमष्टाकपालं निर्वपति अपयित्वा-सादयति तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्च्नावा-ज्यभागावथ हविषो ऽग्निर्मूर्धा भुव इति चिष्टुभौ संयाज्ये याभिश्चैव पिण्डीरावधाति याभिश्च जुहोति याभ्यां च धूम-मन्वीक्षते ताः सꣳसिध्यन्ति संतिष्ठते ऽङ्गःसवकारीरी १०

॥ ४० ॥ द्वादशः ॥

अथ वै भवति वैधातवीयेन यजेताभिचरन्नाभिचर्यमाणो वा सहस्रेण वा यक्ष्यमाणः सहस्रेण वेजानो यो वा यक्ष्य इत्युक्त्वा न यजत इत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते सहस्रꣳ हिरण्यं तार्ष्यं धेनुमित्यथ देवस्य त्वा सवितुः प्रसव इति १५
प्रतिपदं कृत्वेन्द्राविष्णुभ्यां जुष्टं निर्वपामीति चतुरो मुष्टीन्व्री-हीणां निर्वपत्येतामेव प्रतिपदं कृत्वेन्द्राविष्णुभ्यां जुष्टं निर्वपा-मीति चतुरो यवानामेतामेव प्रतिपदं कृत्वेन्द्राविष्णुभ्यां जुष्टं निर्वपामीति चतुर एव व्रीहीणां तेषां व्रीहिष्वेव हवि-

---

१ Thus M; सं om all the other MSS.

२ The following thus only in M; the other MSS. are partly corrupted partly incomplete.

ष्कृतमुद्वादयत्युपोद्यच्छन्ते यवान्हविष्कृता वाचं विसृजते समानं कर्माधिवपनादध्युप्य गार्हपत्ये द्वादश कपालान्युपदधात्यथ वै भवति द्वादशकपालः पुरोडाशो भवति ते चयश्चतुष्कपालास्त्रिष्पञ्चकृत्वाय चयः पुरोडाशा भवन्ति चय इमे लोका एषां लोकानामाप्त्या उत्तरउत्तरो ज्यायान्भवतीति स उत्तरमुत्तरमेव ज्यायाꣳसं करोति यवमयं[1] मध्ये[1] ऽथ वै भवति ॥ ४१ ॥

सर्वाणि छन्दाꣳस्येतस्मात्सिष्यासमनूच्यानीत्याऽऽहुस्त्रिष्टुभो वा एतद्वीर्यं यत्ककुदुष्णिहा जगत्यै यदुष्णिहककुभावन्वाह तेनैव सर्वाणि छन्दाꣳस्यवरुन्द्धे इति प्र सो अग्ने तवोतिभिरित्येतासां द्वे धाय्यालोके दधात्यथाग्ने चौ ते वाजिना चौ षधस्थेति चित्वा परिदधाति सरूपत्वायेति ब्राह्मणꣳ सर्वेषामभिगमयन्नवद्यतीति तस्मा एते भवतः सं वां कर्मणोभा जिग्यथुरित्यन्वाहार्यमासाद्य सहस्रꣳ हिरण्यं तार्ष्यं धेनुमिति ददाति यं कामयेत राजन्यमनपोब्यो जायेत वृत्रान्घ्नꣳस्वरेदिति तस्मा एतमैन्द्रावार्हस्पत्यं चरुं निर्वपेदित्येतयेष्ट्या यज्यमाणे उपकल्प्यते हिरण्मयं दाम तस्मा एते भवतो ऽग्ने दन्द्राबृहस्पती बृहस्पतिर्नः परिपातु पश्चादित्यन्वाहार्यमासाद्य हिरण्मयं दाम ददाति ॥ ४२ ॥

---

[1] Thus M only; यवमयमध्ये Be 8 Be, यवमयोमध्ये BU, यवमयंरमध्ये D.

वैश्वानरं द्वादशकपालं निर्वपेदनिष्ट्वाग्रयणेन नवान्नं जग्ध्वा यो वान्यस्याग्निषु यजेत यस्य वान्यो ऽग्निषु यजेत[1] सो ऽरण्योरग्नीन्समारोह्योदवसाय मथित्वाग्नीन्विहृत्य वैश्वानरं द्वादशकपालं निर्वपति[1] तस्या एते भवतो वैश्वानरो न ऊत्या पृष्टो दिवीत्यग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपेद्विच्छिन्नाग्निहोत्रो यो वा कामयेत प्रजायै मे तन्तुर्न विच्छिद्येतेति[1] सो ऽरण्योरग्नीन्समारोह्योदवसाय[1] मथित्वाग्नीन्विहृत्याग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपेदिति[1] तस्या एते भवतस्त्वं नस्तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानः। त्वयाग्ने पृष्ठं वयमारुहेम अथा देवैः सधमादं मदेम॥ स्वयं १०
क्रतुवानः सुगमप्रवायं तिग्मशृङ्गो वृषभः शोशुचानः। प्रत्नꣳ सधस्थमनुपश्यमान आ तन्तुमग्निर्दिव्यं ततानेति[1] स्विष्टवत्यौ संयाज्ये हव्यवाहमभिमातिषाहꣳ रथोहणं पृतनासु जिष्णुम्। ज्योतिष्मन्तं दीद्यन्तं पुरन्धिमग्निꣳ स्विष्टकृतमाजुहोम॥ स्विष्टमग्ने अभितत्पृणाहि विश्वा देव पृतना अभिष्य। १५
उरुं नः पन्थां प्रदिशन्विभाहि ज्योतिष्मद्धेह्यजरं न आयुरित्यग्नये व्रतभृते पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निरशु क्युर्यादिति[1] तस्या एते भवतस्त्वमग्ने व्रतभृच्छुचिर्देवाꣳ आसादया दह। अग्ने हव्याय वोढवे॥ व्रता नु विभ्रद्व्रतपा अदाभ्यो यजानो देवाꣳ अजरः सुवीरः। दधद्रत्नानि सुवि- २०

---

१ Thus MDU; ०रोयोद्व० Be 8 Be; in B the last kh. is wanting.

दानो अग्ने गोपाय नो जीवसे जातवेद दूत्यं यस्याग्नयो वृथाग्निभिः मयूस्रुज्येरन्मिथो वान्यस्य वाग्निभिः सो ऽरण्योरग्नीन्समारोह्योदवसाय[1] मथित्वाग्नीन्चिच्चित्याग्नये विविचये पुरोडाशमष्टाकपालं निर्वपत्यग्नये[2] व्रतपतय इति । तस्या एता भवन्ति वि ते विष्वग्वातजूतासो अग्ने त्वामग्ने मानुषीरीडते विशस्त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीति । संतिष्ठन्त इष्टयः संतिष्ठन्त इष्टयः । ॥ ४३ ॥ चयोदशः ॥

॥ इति चयोदशः प्रश्नः ॥

---

१ ०रोयोदव० Be 8 Be.
२ च ins. M.

अथ वै भवति प्रजापतिरकामयत प्रजाः सृजेयेति । स तपोऽतप्यत । स सर्पानसृजत । सोऽकामयत प्रजाः सृजेयेति । स द्वितीयमतप्यत । स वयाꣳस्यसृजत । सोऽकामयत प्रजाः सृजेयेति । स तृतीयमतप्यत । स एतं दीक्षितवादमपश्यत्तमवदत्ततो वै स प्रजा असृजतेति । तत्यृच्छन्ति[1] ५
कतमत्तत्तपो यत्तपस्वा दीक्षितवादं वदतीत्यथ वै भवत्यङ्गिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रावेशयन्नप्सु स्नाति । साक्षादेव दीक्षातपसी अवरुन्द्ध इत्येतदिति ब्रूयादित्यथ वै भवति यद्वै दीक्षितोऽमेध्यं पश्यत्यपास्माद्दीक्षाक्रामति । नीलमस्य हरो व्येतीति । सोऽमेध्यं दृष्ट्वा जपत्य- १०
बद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाꣳ श्रेष्ठो दीक्षे मा मा हासीरित्याह । नास्माद्दीक्षापक्रामति । नास्य नीलं न हरो व्येतीति ब्राह्मणमथ वै भवति यद्वै दीक्षितमभिवर्षति दिव्या आपोऽग्नान्ता ओजो बलं दीक्षां तपोऽस्य निर्घ्नन्तीति । सोऽभिहृष्यमाणो जपत्युन्दतीर्बलं धत्तौजो धत्त १५
बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्याह[2] तदेव सर्वमात्मन्धत्ते । नास्यौजो बलं न दीक्षां न तपो निर्घ्नन्तीति ब्राह्मणमथ वै भवत्यग्निर्वै दीक्षितस्य देवता । सोऽस्मादेतर्हि तिर इव यर्हि यातीति । सोऽस्मात्समारूढस्तिर इव[3]

---

१ हृक्षंति MG (pr. m.) U; हृक्षति Be BG (sec. m.); the plural is correct, the subject being, according to Bhav., ब्रह्मवादिनः।

२ यर्हि ins. M.

भवति । सो ऽरण्योरग्नीन्त्समारोह्य बृहस्पतिवत्यर्चा प्रयाति । भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्वित्याह । ब्रह्म वै देवानां बृहस्पतिस्त्रह्मैवान्वारभते । स एनꣳ संपारयतीति ब्राह्मणं । प्रज्ञातमपाꣳ संयानस्रोकमध्वसानस्रोथ[1] वै भवति यो वै सोमꣳ राजानꣳ साम्राज्यं लोकं गमयित्वा क्रीणाति गच्छति खानाꣳ साम्राज्यं । छन्दाꣳसि खलु वै सोमस्य राज्ञः साम्राज्यो लोकः । पुरस्तात्सोमस्य क्रयादेवमभिमन्त्रयेतेति । स पुरस्तात्सोमस्य क्रयादेवमभिमन्त्रयते ॥ १ ॥

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतादिति । साम्राज्यमेवैनं लोकं गमयित्वा क्रीणाति । गच्छति खानाꣳ साम्राज्यमिति ब्राह्मणमथ वै भवति यो वै तानूनप्त्रस्य प्रतिष्ठां वेद प्रत्येव तिष्ठति । ब्रह्मवादिनो वदन्ति न प्राश्नन्ति न जुह्वत्यथ क्व तानूनप्त्रं प्रतितिष्ठतीति । प्रजापतौ मनसीति ब्रूयात्तिरवजिघ्रेदिति । स तिरवजिघ्रति प्रजापतौ त्वा मनसि जुहोमीत्येषा वै तानूनप्त्रस्य प्रतिष्ठा । य एवं वेद प्रत्येव तिष्ठतीति ब्राह्मणमथ वै भवति यो वा अध्वर्योः प्रतिष्ठां वेद प्रत्येव तिष्ठति । यतो मन्येतानभिक्रम्य होष्यामीति तत्तिष्ठ-

---

[1] Thus M Be G . ०ध्वसन्नस्य० B

न्नाश्रावयेदिति स यतो मन्यतानभिक्रम्य होष्यामीति तत्तिष्ठ-
न्नाश्रावयत्येषा वा अध्वर्योः प्रतिष्ठा य एवं वेद प्रत्येव
तिष्ठतीति ब्राह्मणमथ वै भवति यदभिक्रम्य जुहुयात्प्रतिष्ठाया
दूयात्तस्मात्समानञ्च तिष्ठता होतव्यं प्रतिष्ठित्या इति तदेत-
दन्यत्र हविर्यज्ञेभ्यो ऽभिक्रामं जुहोतीति हविर्यज्ञेषु भवत्यथ ५
वै भवति यो वा अध्वर्योः स्वं वेद स्ववानेव भवति सुग्वा
अस्य स्वं वायव्यमस्य स्वं चमसो ऽस्य स्वं यद्वायव्यं वा चमसं
वानन्वारभ्याश्रावयेत्स्वादियादिति स वायव्यं चैव चमसं
चान्वारभ्याश्रावयति स्वादेव नैतीति ब्राह्मणमथ वै
भवति यो वै सोममप्रतिष्ठाप्य स्रोचमुपाकरोत्यप्रतिष्ठितः १०
सोमो भवत्यप्रतिष्ठित स्रोमो ऽप्रतिष्ठितान्युक्थान्यप्रतिष्ठितो
यजमानो ऽप्रतिष्ठितो ऽध्वर्युर्वा यद्वै सोमस्य प्रतिष्ठा चमसो
ऽस्य प्रतिष्ठा सोम स्रोमस्य स्रोम उक्थानां ग्रहं वा गृहीत्वा
चमसं वोन्नीय स्रोचमुपाकुर्यादित्युन्नयनꣳ ह्येव[1] चमसस्य
ग्रहणꣳ स ग्रहं वैव गृहीत्वा चमसं वोन्नीय स्रोचमुपा- १५
करोति प्रत्येव सोमꣳ स्रापयति प्रति स्रोमं प्रत्युक्थानि
प्रति यजमानस्तिष्ठति प्रत्यध्वर्युरिति ब्राह्मणम् ॥ २ ॥

अथ वै भवति यज्ञं वा एतत्संभरन्ति यत्सोमक्रयणे
पदं यज्ञमुखꣳ हविर्धाने यर्हि हविर्धाने प्राची प्रवर्त्येरन्
युस्तर्हि तेनाचमुपाङ्ग्यादिति स यर्हि हविर्धाने प्राची २०

---

१ MGB ins. न; Bhav. cites the passage without the negative particle.

प्रवर्तयति[१] तर्हि[१] तेन पदद्वतीयेन पत्न्यक्षधुरमुपानक्ति । यज्ञमुख एव यज्ञमनुसंतनोतीति ब्राह्मणमथ वै भवति प्राञ्चमग्निं प्रहरन्त्युत्पत्नीमानयन्त्यन्वनाभ्यृषि प्रवर्तयन्त्यथ वा अस्येष धिष्णियो हीयते सो ऽनुध्यायति स ईश्वरो रुद्रो भूत्वा प्रजां पशून्यजमानस्य शमयितोर्यर्हि पशुमाप्रीतमुदञ्चं नयन्ति तर्हि तस्य पशुश्रपणꣳ हरेदिति । स यर्हि पशुमाप्रीतमुदञ्चं नयन्ति तर्हि तस्य पशुश्रपणꣳ हरति । तेनैवैनं भागिनं करोतीति ब्राह्मणमथ वै भवति यजमानो वा आहवनीयो । यजमानं वा एतद्विकर्षन्ते यदाहवनीयात्पशुश्रपणꣳ हरन्ति । स वैव स्यान्निर्मन्थ्यं वा कुर्यादिति । स यद्यहैनं[२] करिष्यन्भवति नैनमन्वानयते । अज एवाग्नेष दीप्यमानः शेते । यद्यु वा एनमन्वानयते तस्य पशुवेलायामुल्मुकमादायारणी उपसंगच्छ पूर्वः पशोः प्रतिपद्यते । निर्मन्थ्येनात्र[३] पशुꣳ श्रपयन्ति । वपया[४] तत्सहोल्मुकमाहरन्ति यजमानस्य सात्मत्वायेति ब्राह्मणमथ वै भवति यदि पशोरवदानं नश्येदाज्यस्य प्रत्याख्यायमवद्येदिति । स यावन्ति पशोरवदानानि नश्यन्ति तावत्कृत्व आज्यस्य प्रत्याख्यायमवद्यति । सैव ततः प्रायश्चित्तिरिति ब्राह्मणमथ वै भवति ये पशुं विमथ्नीरन्यस्याङ्कामयेता-

---

१ Thus M; प्रवर्तयेयुस्तर्हि the other MSS.

२ यद्यहैनं B Be, cp. infra p 163, 5.

३ Thus M only; निर्मन्थ्येनाह the other MSS.

४ Thus MBG (sec. m.), पथा Be G (pr. m.).

र्तिमार्च्छेयुरिति कुविदङ्गेति नमोवृक्तिवत्यर्चाग्नीध्रे जुहुयादिति[1] स कुविदङ्गेति नमोवृक्तिवत्यर्चाग्नीध्रे जुहोति[1] नमोवृक्तिमेवैषां दृङ्क्ते[1] ताजगार्तिमार्च्छन्नीति ब्राह्मणं[1] यद्यु वा एकचरं विमथ्नीते ग्रामिव एतां जुहोति[1] प्रज्ञातमुपाकरणश्लोकमपाव्यानां[2] चरणं[1] ब्राह्मणमुत्तरम्[1] ॥ ३ ॥ प्रथमः ॥ ५

अथ वै भवति यो वा अयथादेवतं यज्ञमुपचरत्या देवताभ्यो वृश्च्यते पापीयान्भवति[1] यो यथादेवतं न देवताभ्य आवृश्च्यते वसीयान्भवत्याग्नेय्यर्चाग्नीध्रमभिमृशेद्वैष्णव्या हविर्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्येन्द्रिया सद इति[1] स आग्नेय्यर्चाग्नीध्रमभिमृशति वैष्णव्या हविर्धानमाग्नेय्या स्रुचो १० वायव्यया वायव्यान्येन्द्रिया सदो[1] यथादेवतमेव यज्ञमुपचरति[1] न देवताभ्य आवृश्च्यते वसीयान्भवतीति ब्राह्मणमुक्तमौदुम्बराणां महापरिधीनां [3]परिधानमुक्तं स्रुचां सादनमुक्तं पाषाणमभिमर्शनमथ वै भवतीष्टगौ वा अध्वर्युर्यजमानस्येष्टगः खलु वै पूर्वो ऽष्टुः क्षीयत[1] आसन्यान्मा मन्त्रात्याहि १५ कस्याश्चिदभिशस्त्या इति पुरा प्रातरनुवाकाज्जुहुयादिति[1] पुरा प्रातरनुवाकान्महाराच उत्थायाग्नीध्र आसन्यां जुहोत्यासन्यान्मा मन्त्रात्याहि कस्याश्चिदभिशस्त्याः[4] स्वाहेत्यात्मन एव

---

१ BG ins. प्रज्ञात एतां जुहोति।

२ Thus M; उपाकरणीयस्य the other MSS.

३ From here unto निर्हन्ति° (p 158, 12) is left out in B.

४ °भिशस्त्या M Be U and Padapāṭha at TS. III. 1. 7. 1; अभिशस्त्याः G.

तदध्वर्युः पुरस्ताच्छर्म नह्यते ऽनार्त्या इति ब्राह्मणमथ वै भवति यो वै छन्दोभिरभिभवति स सꣳसुन्वतोरभिभवतीति स सꣳसुन्वतोर्महाराच उत्थायाग्नीध्रे तिस्रो ऽभिभूतीर्जुहोति संवेशाय लोपवेशाय त्वा गायत्रिया अभिभूत्यै स्वाहा संवेशाय लोपवेशाय त्वा त्रिष्टुभो ऽभिभूत्यै स्वाहा संवेशाय लोपवेशाय त्वा जगत्या अभिभूत्यै स्वाहेत्यथ द्वे प्राणाञ्जती जुहोति प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टमित्यथ वै भवति देवतासु वा एते प्राणापानयोर्व्यथच्छन्ते येषाꣳ सोमः समृच्छते संवेशाय लोपवेशाय त्वेत्याह छन्दाꣳसि वै संवेशः उपवेशश्छन्दोभिरेवास्य छन्दाꣳसि वृङ्क्त इति ब्राह्मणमथ वै भवति यस्य भूयाꣳसो यज्ञक्रतव इत्याहुः स देवता वृङ्क्त इति यद्यग्निष्टोमः सोमः परस्तात्स्यादुक्थ्यं कुर्वीतेत्युक्थ्यं क्रतुमुपैति यद्युक्थ्यः स्यादतिरात्रं कुर्वीतेत्यतिरात्रं क्रतुमुपैति यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते वसीयाꣳसमवतीति ब्राह्मणमिति[1] चा[1] ऽध्वर्युतो[1] ऽथ छन्दोगतः प्रेनिवन्ति[2] चैतिवन्ति[2] चाज्यानि[2] भवन्त्यभिजित्यै मरुत्वतीः प्रतिपदो जिजित्या उभे बृहद्रथंतरे भवत

---

१ इतीत्या चाध्व० BGU; इतीत्यध्व० M

२ Thus only Bhavasvāmin; प्रेतिवंत च इतिवंति चा० M; प्रेतिवंति प्रइतिवेति चाज्य० G; प्रेतिवंति प्रइतिवोति चाज्य० U; प्रेतिप्रइतिवेचाज्य० Be; cp. also TS. III. 1. 7. 2 with the comm. Vol. III, p. 41 and T Br I. 4. 6 1

इति[१] न्वै[१] छन्दोगतो[१] ऽथ होद्गतः[२] सजनीयꣳ ग्रस्थं विहव्यꣳ ग्रस्थमगस्त्यस्य कयाशुभीयꣳ ग्रस्थमिति[३] न्वा[३] एकयाजिनो[३] ऽथ सन्निणां महाराज उत्थानं चैव समानं पञ्चाभिभूतीर्द्वे प्राणाहुती । ते यथाक्रत्वेव यन्त्यादिष्टान्येवाहान्युपयन्त्युक्तं[४] निग्राभ्यासु वाचनमथ वै भवत्योषधयो वै सोमस्य विशो । विशः ५ खलु वै राज्ञः प्रदातोरीश्वरा । ऐन्द्रः सोम इति । सो ऽभिषोत्यन्नोषधीभ्यो ऽधि राजानं निर्याचते । ऽवीवृधं वो मनसा सुजाता ऋतप्रजाता भाग दृढः स्याम। इन्द्रेण देवीर्वीरुधः संविदाना अनुमन्यन्ताꣳ सवनाय सोममित्याहौषधीभ्य एवैनꣳ स्वायै विशः स्वायै देवतायै निर्याच्याभिषुणोतीति ब्राह्मणमथ १० वै भवति यो वै सोमस्याभिषूयमाणस्य प्रथमो ऽꣳशु स्कन्दति स ईश्वर इन्द्रियं वीर्यं प्रजां पशून्यजमानस्य निर्हन्तोस्तमभिमन्त्रयेतेति । स यः सोमस्याभिषूयमाणस्य प्रथमो ऽꣳशु स्कन्दति तमभिमन्त्रयेता मास्कान्सह प्रजया सह रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीरित्याग्निषमेवैतामाशास्त इन्द्रि- १५ यस्य वीर्यस्य प्रजायै पशूनामनिर्घातायेति ब्राह्मणमथैषा द्रप्सानुमन्त्रणीया[५] । तामितराभिः सह वक्ष्यामो । ऽथ वै भवति ॥ ४ ॥

---

१ Corrected ; इति छंदोग० M ; इत्यु-छंदोग० Be UG.

२ होचतः M.

३ इतिन्वेकया० M , इतीन्वा एकया० Be UG.

४ Thus M ; यंत्यादिष्टानि ह्यहान्युप० GU , यत्यादिष्टाविह्यहान्युप० Be

५ Thus MBG-, ०मत्वर्वा इष्ट्यानुमंत्रणीया Be , ०मत्वैषा इष्ट्यानुमंत्रणीया U.

यो वै देवान्देवयज्ञसेनार्पयति मनुष्यान्मनुष्ययज्ञसेन देवयज्ञस्येव देवेषु भवति मनुष्ययज्ञसी मनुष्येषु । याम्प्राचीनमाग्रयणाद्ग्रहाम्ग्रह्णीयात्तानुपाꣳशु ग्रह्णीयाद्यानूर्ध्वाꣳस्तानुपब्दिमत इति । स याम्प्राचीनमाग्रयणाद्ग्रहाम्ग्रह्णाति तानुपाꣳशु ग्रह्णाति । यानूर्ध्वाꣳस्तानुपब्दिमतो । देवानेव तद्देवयज्ञसेनार्पयति मनुष्यान्मनुष्ययज्ञसेन । देवयज्ञस्येव देवेषु भवति मनुष्ययज्ञसी मनुष्येष्विति ब्राह्मणं । ते यच्च वह्निष्यमानꣳ स्रष्यन्तो भवन्ति तेषु समन्वारब्धेष्वाहवनीये स्रुवाज्ञतिं जुहोत्यग्निः प्रातःसवने पात्वस्मान्वैश्वानरो महिना विश्वशम्भूः । स नः पावको द्रविणं दधात्वायुष्मन्तः सहभचाः स्याम स्वाहेति । माध्यंदिने पवमाने तथैव समन्वारब्धेष्वाहवनीये स्रुवाज्ञतिं जुहोति विश्वे देवा मरुतो दस्रो अस्मानस्मिन्द्वितीये सवने न जह्रुः । आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानाꣳ सुमतौ स्याम स्वाहेत्यार्भवे पवमाने तथैव समन्वारब्धेष्वाहवनीये स्रुवाज्ञतिं जुहोतीदं तृतीयꣳ सवनं कवीनामृतेन ये चमसमैरयन्त । ते सौधन्वनाः सुवरानशानाः स्विष्टिं नो अभि वसीयो नयन्तु स्वाहेत्यथ वै भवत्यायतनवतीर्वा अन्या आज्ञतयो ह्रयन्ते ऽनायतना अन्या । या आघारवतीस्ता आयतनवतीर्याः सौम्यास्ता अनायतना । ऐन्द्रवायवमादायाघारमाघारयेदिति । स ऐन्द्रवायवमादायाघारमाघारयत्यध्वरो यज्ञो ऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय । विश्वस्मै भूतायाध्वरो ऽसि स पिन्वस्व घृतवद्देव सोम स्वाहेति । सौम्या एव तदाज्ञतीरायतनवतीः

करोत्यायतनवान्भवति य एवं वेदाघो द्यावापृथिवी एव घृतेन
द्युनक्ति ते द्युक्ते उपजीवनीये भवत उपजीवनीयो भवति
य एवं वेदेति ब्राह्मणमथ प्रतिप्रस्थातोत्तरार्धं आहवनीयस्य
मन्थिनः सꣳस्रावं जुहोत्येष ते रुद्र भागो यं निरयाचयास्यं
जुषस्व विदेगौपत्यꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ ५
स्वाहेत्यथ वै भवति मनुः पुत्रेभ्यो दायं व्यभजत्स नाभानेदिष्ठं
ब्रह्मचर्यं वसन्तं निरभजत्स आगच्छत्सोऽब्रवीत्कथा मा
निरभागिति न ला निरभाचमित्यब्रवीदङ्गिरस इमे सत्र-
मासते ते सुवर्गं लोकं न प्रजानन्ति तेभ्य इदं ब्राह्मणं ब्रूहि
ते सुवर्गं लोकं यन्तो य एषां पशवस्ताꣳस्ते दास्यन्तीति १०
तदेभ्योऽब्रवीदिति तत्पृच्छन्ति[1] किमेभ्यस्तदुवाचेत्यपाव्यानि
मन्तनीर्द्रप्सानुमन्त्रणीया अच्छावाकीया[2] स्रोचीयाः[2] प्रस्तीयाः
सत्यं वदत श्रद्धा वो मा विगादित्येतदेभ्यस्तदुवाचेति[3] तं
पशुभिश्चरन्तं यज्ञवास्तौ रुद्र आगच्छदित्युक्त्वैष कर्मणो
ऽनुवादो ऽथ द्वे प्रवृताज्जुती जुहोति जुष्टी वाचो भूयास- १५
मृचा स्तोमꣳ समर्धयेत्युपरिष्टात्तृतीया[4] तासु[4] तत्रैव वक्ष्यामो
ऽथ द्रप्सानुमन्त्रयते द्रप्सश्चस्कन्द यस्ते द्रप्सो यो दप्सो यस्ते
द्रप्स इत्यथ वै भवत्यध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन

---

१ Thus MU ; all the other MSS. read the singular

२ Thus M only ; all the other MSS. ०वाकीयास्रौचीयाः ।

३ Thus M , विगाद् i s. of विगाद् all the other MSS.

४ Thus M ; द्वितीयासु the other MSS

स्तोमो योक्तव्य इति । ते यच्च बर्हिष्यवमानꣳ सर्पन्ति तत्प्रक्ष एवाध्वर्युः प्रथमो बर्हिषो धुवानः[१] सर्पति । वागग्नेगा अग्न एत्वृजुगा देवेभ्यो यज्ञो मयि दधती प्राणान्यज्ञेषु प्रजां मयि च यजमाने चेत्याह । वाचमेव तद्यज्ञमुखे युनक्तीति ब्राह्मण-
५ मथ वै भवति वास्तु वा एतद्यज्ञस्य क्रियते यद्बर्हान्गृह्णीत्वा बर्हिष्यवमानꣳ सर्पन्ति । पराञ्चो हि यन्ति । पराचीभिः स्तुवते । वैष्णव्यर्चा पुनरेत्योपतिष्ठत इति । स वैष्णव्यर्चा पुनरेत्योपतिष्ठते । यज्ञो वै विष्णुर्यज्ञमेवाकर्विष्णो त्वं नो ऽन्तमः शर्म यच्छ सहन्त्य । प्र ते धारा मधुश्चुत उत्सं दुहते
१० अक्षितमित्याह । यदेवास्य शयानस्योपशुष्यति तदेवास्यैतेनाप्याययतीति ब्राह्मणम् ॥ ५ ॥ द्वितीयः ॥

अथ वै भवति यो वै पवमानानामन्वारोहान्विद्वान्यजते ऽनु पवमानानारोहति । न पवमानेभ्यो ऽवच्छिद्यत इति । बर्हिष्यवमाने पञ्चम्यां प्रस्तुतायां वाचयति श्येनो ऽसि
१५ गायत्रच्छन्दा अनु त्वारभे स्वस्ति मा संपारयेति । माध्यंदिने पवमाने ऽष्टम्यां प्रस्तुतायां वाचयति सुपर्णो ऽसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा संपारयेत्यार्भवे पवमाने नवम्यां प्रस्तुतायां वाचयति सघासि जगतीच्छन्दा अनु त्वारभे स्वस्ति मा संपारयेत्याहैते वै पवमानानामन्वारोहास्तान्य एवं विद्वा-
२० न्यजते ऽनु पवमानानारोहति । न पवमानेभ्यो ऽवच्छिद्यत

---

१ धुवानः ( cp. infra XV. 29 ) BG, ध्रुवानः U, धुवानः M, but with a न written above the व; धूनुवानः Be.

इति ब्राह्मणमथ वै भवति यो वै पवमानस्य संततिं वेद सर्वमायुरेति । न पुरायुषः प्रमीयते । पशुमान्भवति । विन्दते प्रजां । पवमानस्य यद्वा गृह्यन्ते ऽथ वा अश्नैते ऽगृहीता । द्रोणकलश आधवनीयः पूतभृत्तान्यदगृहीत्वोपाकुर्यात्पवमानं विच्छिन्द्यात्तं विच्छिद्यमानमध्वर्योः प्राणो ऽनु विच्छिद्येतापयामगृहीतो ऽसि प्रजापतये त्वेति द्रोणकलशमभिमृशेदिति । स प्रजापतये त्वेति द्रोणकलशमभिमृशतीन्द्राय त्वेत्याधवनीयं । विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं । पवमानमेव तत्संतनोति । सर्वमायुरेति । न पुरायुषः प्रमीयते । पशुमान्भवति । विन्दते प्रजामिति ब्राह्मणमथ वै भवति चीणि वाव सवनान्यथ तृतीयꣳ सवनमवलुम्पन्त्यनꣳशु कुर्वन्त । उपाꣳशुꣳ ह्येवोपाꣳशुपात्रे ऽꣳशुमवास्य तं तृतीयसवने ऽपिसृज्याभिषुणुयादिति । सꣳ यꣳ एवैषꣳ उपाꣳशुपात्रेꣳ ऽꣳशुः प्रास्तो भवति तं माध्यंदिनीय सृजीषे ऽपिसृज्याभिषुणोति । यदाप्याययति तेनाꣳशुमद्यदभिषुणोति तेनजीषि । सर्वाण्येव तत्सवनान्यꣳशुमन्ति शुक्रवन्ति समावद्वीर्याणि करोतीति ब्राह्मणम् ॥ ६ ॥

अथातो दीर्णप्रवृत्तानामेव मीमाꣳसा । द्रोणकलशे दीर्णे वा प्रवृत्ते वा पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने विधुं दद्राणꣳ समने बहूनां युवानꣳ सन्तं पलितो

---

१ Thus M; स एवैष etc. G, सं वैष उपाꣳशुपात्रेꣳशुः BU, स एवैष उपाꣳशुपात्रेपशुः Be.

जगार । देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान स्वाहेत्यथ होदृचमसे वसतीवरीभ्यो ऽध्वपो निःषिच्य तस्य स्वधाꣳ संभरति भूतिः सोमेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमागम्यादिति । स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति । स यद्यह[1] दीर्णो भवति प्रतिलिम्पत्येनं[2] । यद्यु वै प्रवृत्त उच्छ्रित्येनं बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी आग्रयणाद्गुं प्रस्कन्दयत्याधवनीये दीर्णे वा प्रवृत्ते वा तयैव पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने द्वौ समुद्रौ वितताववूर्यौ पर्यावर्तेते जठरेव पादाः । तयोः पश्यन्तो अतियन्त्यन्यमपश्यन्तः सेतुनातियन्त्यन्यꣳ स्वाहेत्यथ होदृचमसे वसतीवरीभ्यो ऽध्वपो निःषिच्य तस्य तयैव स्वधाꣳ संभरति भूतिः सोमेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमागम्यादिति । स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति । स यद्यह[1] दीर्णो भवति प्रतिलिम्पत्येनं । यद्यु वै प्रवृत्त उच्छ्रित्येनं बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी आग्रयणादेवाद्गुं प्रस्कन्दयति । पूतभृति दीर्णे वा प्रवृत्ते वा तयैव पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने द्वे द्रुधसी

---

१ Thus here and infra ( 163. 15, 164. 6 ) M ; also Be at these last mentioned passages ; यदि the other MSS. and Be, here, but infra यद्यह ।

२ Thus here and infra M, the other MSS. every time the plural.

मतती वस्त एकः केशी विश्वा भुवनानि विद्वान्। तिरोधा-
येत्यषितं वसानः शुक्रमादत्ते अनुहाय जार्यै स्वाहेत्यथ
होढ्चमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तस्य तयैव स्वधाꣳ
संभरति भूतिः सोमेन वर्धतां तस्य मेदृस्य वीतस्य द्रविणमा-
गम्यादिति स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये
स्वाहा भूतानां पतये स्वाहेति स यद्यह दीर्णो भवति
प्रतिलिम्पत्येनं यद्यु वै प्रवृत्त उच्छ्रित्यैनं बर्हिषी अन्तर्धाय
स्वधामानयत्यपोद्धृत्य बर्हिषी आग्रयणादेवानुं [१]प्रस्कन्दयत्या-
ग्रयणे दीर्णे वा प्रवृत्ते वा तस्य पुरोरुचा ध्रुवोच्छ्रित्यैनं
बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी द्रोणकल-
शादेवानु[१] प्रस्कन्दयत्यथान्यस्मिन्ग्रहे दीर्णे वा प्रवृत्ते वा
तस्यैव पुरोरुचा ध्रुवोच्छ्रित्यैनं बर्हिषी अन्तर्धाय स्वधा-
मानयत्यपोद्धृत्य बर्हिषी आग्रयणादेवानुं प्रस्कन्दयति ॥ ७ ॥

अथ वै भवति देवा वै यज्ञे ऽकुर्वत तदसुरा अकुर्वत
ते देवा एतं महायज्ञमपश्यन्तमतन्वतामिहोचं व्रतमकुर्वत
तस्माद्व्रतः स्याद्व्रह्मग्रिहोचं जुहुति पौर्णमासं यज्ञमग्नीषो-
मीयं पशुमकुर्वत दार्श्यं यज्ञमाग्नेयं पशुमकुर्वत वैश्वदेवं
प्रातःसवनमकुर्वत वरुणप्रघासान्माध्यंदिनꣳ सवनꣳ साकमे-
धान्पित्र्यꣳ शम्बकाꣳस्तृतीयसवनमकुर्वतेति तत्पृच्छन्ति[२]
कतमः स महायज्ञ इत्येतमेव चातुर्मास्यः सोम उक्तो भवत्यथो

१ This passage is left out by all the MSS exc. M.

२ °पृच्छति all the MSS. exc. M.

खलु य एव कश्च सौम्यो ऽध्वरः स महायज्ञस्तमेषामसुरा यज्ञमन्ववाजिगाꣳसन्तं नान्ववायन्ते ऽब्रुवन्नध्वर्तव्या वा इमे देवा अभूवन्निति । तदध्वरस्याध्वरत्वं । ततो देवा अभवन्परासुरा । य एवं विद्वान्सोमेन यजते भवत्यात्मना परास्य
५ भ्रातृव्यो भवतीति ब्राह्मणमथ समस्तꣳ राजानमुपतिष्ठते परिभूरग्निं परिभूरिन्द्रं परिभूर्विश्वान्देवान्परिभूर्माꣳ सह ब्रह्मवर्चसेन स नः पवस्व शं गवे शं जनाय शमर्वते शꣳ राजन्नोषधीभ्यो ऽच्छिन्नस्य ते रथिपते सुवीर्यस्य रायस्पोषस्य दातारः स्याम । तस्य मे रास्व तस्य ते भक्षीय तस्य त
१० इदमुन्मृज इति । चत्वारो ब्राह्मणसंपन्नाः कामास्तेषां यं[1] कामं[2] कामयते[1] तमादिश्योन्मृष्टे । ऽथावकाग्नैश्वरति । प्राणाय मे वर्चोदा वर्चसे पवस्वेत्युपाꣳशुपात्रमवेक्षते । ऽपानायेत्यन्तर्यामपात्रं[2] । व्यानायेत्युपाꣳशुसवनं । वाच इत्यैन्द्रवायवं । दक्षक्रतुभ्यामिति मैत्रावरुणꣳ । श्रोत्रायेत्याश्विनं ।
१५ चक्षुर्भ्यामिति शुक्रामन्थिनावात्मन इत्यात्मयजनमङ्गेभ्य इत्युक्थ्यमायुष इति ध्रुवं । प्रतिष्ठाया इत्युत्तुपात्रे माध्यंदिने सवने । न प्रातःसवने । वीर्यायेत्यतिग्राह्यं वा षोडशिनं वावेक्षते । विष्णोर्जठरमसीति द्रोणकलशमवेक्षत । इन्द्रस्य जठरमसीत्याधवनीयं । विश्वेषां देवानां जठरमसीति पूतभृतमथ समस्तमेव
२० राजानमुपतिष्ठते को ऽसि को नाम कस्मै त्वा काय त्वा यं

---

१ Thus M; यंयं कामं कामयते Be; यं कामं कामयेत UG, यं कामयेत B.

२ अंतर्यामं i.s o. अन्तर्यामपात्रं M.

त्वा सोमेनातीव्रपं यं त्वा सोमेनामीमद꣡ सुप्रजाः प्रजया भूयास꣡ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैर्विश्वेभ्यो मे रूपेभ्यो वर्चोदा वर्चसे पवस्व तस्य मे राध्यस तस्य ते भक्षीय तस्य त दृदमुन्मृज दृति । चत्वारो ब्राह्मणसंपन्नाः कामास्तेषां यं[1] कामं[1] कामयते[1] तमादिश्योन्मृष्ट आयुरुन्मृजे भूतिमुन्मृजे ब्रह्मवर्चसमुन्मृजे ऽमुष्य प्राणमुन्मृज दृदमुन्मृज[2] दृति । यमेव तर्पयति स एनं व्रह्मः प्राणापानाभ्यां वाचो दक्षक्रतुभ्यां चक्षुर्भ्यां꣡ श्रोत्राभ्यामात्मनो ऽङ्गेभ्य आयुषो ऽन्तरेति । ताजक् प्रधन्वतीति ब्राह्मणमुक्तꣳ स्यविधनानामुपस्थानमुक्तꣳ संप्रसर्पणस्तोक्तो भक्षानुवाकः । ॥ ८ ॥ तृतीयः ॥

उक्तं पृषदाज्यस्याविकृतस्य ग्रहणमुक्तो दधिघर्मो । ऽथ वै भवति यत्कृष्णग्रकुनः पृषदाज्यमवमृग्नेच्छूद्रा अस्य प्रमायुकाः स्युर्यच्छ्वावमृग्नेच्चतुष्पादो ऽस्य पशवः प्रमायुकाः स्युर्यत्स्कन्देद्यजमानः प्रमायुकः स्यादित्यथ वै भवति पशवो वै पृषदाज्यं । पशवो वा एतस्य स्कन्दन्ति यस्य पृषदाज्यꣳ स्कन्दति । यत्पृषदाज्यं पुनर्गृह्णाति पशूनेवास्मै पुनर्गृह्णातीति ब्राह्मणमथ वै भवति प्राणो वै पृषदाज्यं । प्राणो वा एतस्य स्कन्दति यस्य पृषदाज्यꣳ स्कन्दति । यत्पृषदाज्यं पुनर्गृह्णाति प्राणमेवास्मै पुनर्गृह्णाति[2] ।

---

१ Thus M again; यं कामं कामयेत UBG, यंयं क० कामयेत Be.

२ om. U Be.

३ इति ins. BG.

हिरण्मवधाय[1] गृह्णातीति । स्कन्ने पृषदाज्ये कꣳसं वा चमसं वा याचति । तमन्तर्वेदि निधाय तस्य खधाꣳ संभरति भूतिर्दध्ना घृतेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमागम्यादिति । स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्यथैतस्याꣳ[2] स्रुच्यवद्धाति घृतमानꣳ हिरण्यं । नित्ये ग्रहणे वैष्णवीमृचमनुवर्तयति विष्णो त्वं नो अन्तम इत्यपोद्धृत्य हिरण्मस्यमवघ्राप्य सादयत्यथातो ऽमेध्यभूतस्यैव स्रावघ्रातस्य ध्याङ्क्षावमृष्टस्य कीटावपन्नस्येति यदु[3] चान्यदमेध्यं[3] मन्यते । सर्वत्र एवैताꣳ स्रुचमप्सु प्रवेश्यायान्यस्याꣳ स्रुच्यवद्धाति घृतमानꣳ हिरण्यं । नित्ये ग्रहणे वैष्णवीमृचमनुवर्तयति विष्णो त्वं नो अन्तम इत्यपोद्धृत्य हिरण्मस्यमवघ्राप्यैव सादयत्यथ वै भवति वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्यꣳ स्कन्दति । वैष्णव्यर्चा पुनर्गृह्णातीति । स वैष्णव्यर्चा पुनर्गृह्णाति । यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ संतनोतीति ब्राह्मणं । ते यद्यन्तःप्राग्नं प्रचरिष्यन्तो भवन्ति तदाह ब्रह्मन्प्रचरिष्यामो होतर्धर्ममभिष्टुहीति । तद्ब्रह्मा प्रसौति देव सवितरेतत्ते प्राह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाह्यो प्रचरतेति

---

१ गृह्णाति हिरण्मवधाय om. U.

२ ०थैनं M.

३ यच्चान्यद० M.

प्रतिष्ठेतीह[१] हविर्यज्ञेषु भवति। यदाह ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा प्रसौति देव सवितरेतत्ते प्राह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मायुग्भ्यां ऋचो मा गात तनूपात्साम्नः सत्या व आशिषः सन्तु सत्या आकूतय ऋतं च सत्यं च वदत स्तुत देवस्य सवितुः प्रसवे भूरिन्द्रवन्त स्तुतेति प्रातःसवने। ५
भुव इन्द्रवन्त स्तुतेति माध्यंदिने। सुवरिन्द्रवन्त स्तुतेति तृतीयसवने। स्तुते स्तुतस्य दोहं वाचयति स्तुतस्य स्तुतमस्यूर्ज मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्यादिति। शस्ते शस्तस्य दोहं वाचयति शस्तस्य शस्तमस्यूर्ज मह्यꣳ शस्तं दुहामा मा शस्तस्य शस्तं गम्यादिति। तयोरुभयोरभ्यासं[२] वाचयतीन्द्रियावन्तो वनामहे धुचौमहि प्रजामिषꣳ सा मे सत्याशीर्देवेषु भूयाद्ब्रह्मवर्चसं मागम्यादित्यथ यज्ञस्य पुनरालम्भं जपति यज्ञो बभूव स आ बभूव स प्रजज्ञे स वावृधे। स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन्करोतु वयꣳ स्याम पतयो रयीणामित्यथ वै भवति यज्ञो वा वै यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुहे। स य स्तुतशस्तयोर्दोहमविद्वान्यजते तं यज्ञो दुहे। स द्वेष्टा पापीयान्भवति। य एनयोर्दोहं विद्वान्यजते स यज्ञं दुहे। स द्वेष्टा वसीयान्भवति। स्तुतस्य स्तुतमस्यूर्ज मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्तस्य शस्तमस्यूर्ज मह्यꣳ शस्तं दुहामा मा शस्तस्य शस्तं गम्यादित्याहैष वै स्तुतशस्त- १५

---

१ B om. इह; Bhav. comments upon it.

२ Thus M; ०भ्यासं BG, ०भ्याभ्यासं Be U.

योदेहस्तं य एवं विद्वान्यजते दुह एव यज्ञमिंद्वा वसीया-
न्भवतीति ब्राह्मणमुक्तꣳ होचकाणाꣳ संतर्पणमुक्तानि[१] वैश्वकर्म-
णान्युक्तमाग्निरो ऽवनयनमुक्ता ध्रुवस्य चर्याय वै भवति ॥ ९ ॥

यदै होताध्वर्युमभ्याक्रयते वज्रमेनमभि प्रवर्तयत्युक्थ्या
१ दित्याह प्रातःसवनं प्रतिगीर्यैति । स उक्थमुक्थं वै प्रतिगी-
र्योक्थ्या दित्याह सवनꣳसवनं[२] वोक्थं[२] वाचीत्याह माध्यंदिनꣳ
सवनं प्रतिगीर्योक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य ।
सप्तैतान्यक्षराणि । सप्तपदा शक्करी । शाक्करो वज्रो । वज्रेणैव
तृतीयसवने वज्रमन्तर्धत्त इति ब्राह्मणमथ वै भवति ब्रह्म-
१० वादिनो वदन्ति स त्वा अध्वर्युः स्याद्यो यथासवनं प्रतिगरे
छन्दाꣳसि संपादयेत्तेजः प्रातःसवन आत्मन्दधीतेन्द्रियं
माध्यंदिने सवने पशूꣳस्तृतीयसवन इत्युक्थ्या इत्याह प्रातः-
सवनं प्रतिगीर्योक्थं वाचीत्याह माध्यंदिनꣳ सवनं प्रतिगीर्योक्थं
वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य । सप्तैतान्यक्षराणि ।
१५ सप्तपदा शक्करी । शाक्कराः पशवो । जागतं तृतीयसवनं ।
तृतीयसवन एव प्रतिगरे छन्दाꣳसि संपादयत्यथो पशवो वै
जगती । पशवस्तृतीयसवनं । पशूनेव तृतीयसवन आत्मन्धत्त इति

---

१ Thus M Be G (pr. m.), सर्पण० the other MSS.

२ Thus, without any various reading all the Dvaidha MSS.; प्रातःसवनं सवनं चोक्थं M pr. m., but प्रातः is expunged and the second सवनं is changed into प्रतिगीर्य; प्रतिसवनं वोक्थं B Be; प्रातःसवनं वो० UG.

ब्राह्मणमथ वै भवति यद्वै होताध्वर्युमभ्याक्रयत आज्यमस्मिन्द्धाति तद्यन्नापहनीत पुरास्य संवत्सरादृह आवेवीरञ्छोऽस्या मोद् द्वेति प्रत्याक्रयत इति सो ऽभ्याक्रतः शोऽस्या मोद् द्वेति प्रत्याक्रयते तेनैव तदपहत इति ब्राह्मणमथ वै भवति यथा वा आयतां प्रतीक्षत एवमध्वर्युः प्रतिगरं प्रतीक्षते यदभिप्रतिगृणीयाद्यथायतया समृच्छते तादृगेव तद्यदर्धर्चाल्लुप्येत यथा धावञ्छो हीयते तादृगेव तत्तदाकूर्नाग्नाप्रतिगरी स्यादाग्नाप्रतिगरी ह वा अभि[1] वा प्रतिगृणात्यर्धर्चाद्वा लुप्यते प्रणौतीत्येव[2] प्रणौयादपानितीत्येवापान्याद्य[3] एवं विद्वान्प्रतिगृणात्यन्नाद एव भवत्यास्य प्रजायां वाजी जायत इति ब्राह्मणमथ वै भवतीयं वै होतासावध्वर्युर्यदासीनः शंसत्यस्या एव तद्धोता नैत्यास्त एव हीयमथो इमामेव तेन यजमानो दुहे यत्तिष्ठन्प्रतिगृणात्यमुष्या एव तदध्वर्युर्नैति तिष्ठतीव ह्यसावथो[4] असुमेव[5] तेन यजमानो दुहे यदासीनः शंसति तस्मादितःप्रदानं देवा उपजीवन्ति यत्तिष्ठन्प्रतिगृणाति तस्मादमुतःप्रदानं मनुष्या उपजीवन्ति यत्राऽऽसीनः शंसति

---

१ **अपि** all, but cp. TS. III. 2. 9. 5.

२ Thus M only; **प्रणौतामेव** the other MSS.

३ **एव** after **अपानितीति** only found in M. The sense of these words is "only if he perceives that the hotar makes the praṇava, he should make the praṇava; only if he perceives that the hotar draws breath, he should draw breath," cp. S'at. Br. IV. 3. 2. 6.

४ **०थोसुमेव** M.

प्रत्यङ् तिष्ठन्प्रतिगृणाति तस्मात्प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्त इति ब्राह्मणमथ वै भवति यद्वै होताध्वर्युमभ्याक्रयते वज्रमेनमभि प्रवर्तयति । पराङावर्तत इति । सो ऽभ्याक्रतः पराङावर्तते । वज्रमेव तन्निकरोतीति ब्राह्मणमुक्तं प्रतिनिग्राह्याणां ग्रहणमुक्तꣳ[१] सꣳस्रावस्यापिधानमुक्तमुपाꣳशुन्तर्यामयोरनुमन्त्रणमुक्ता द्विदेवत्यानां चर्या[२] ॥ १० ॥

## चतुर्थः ॥

अथातो ऽतिग्राह्याणामेव ग्रहणꣳ । स यद्येको यदि वा बहव आग्रयणमेवैनान्गृहीत्वा गृह्णाति । माहेन्द्रस्यैव होममनुह्वयन्ते[३] । स आग्नेयं गृह्णात्यग्न आयूꣳषि पवस इत्यनुद्रुत्योपयामगृहीतो ऽस्यग्नये त्वा तेजस्वते जुष्टं गृह्णामीति । परिस्रुज्य सादयत्येष ते योनिरग्नये त्वा तेजस्वत इत्यथैनꣳ होष्यन्नवेक्षते ऽग्ने तेजस्विन्तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति । जुहोति दीक्षायै च त्वा तपसश्च तेजसे जुहोमीति । स्रुवेण वाचयति तेजोविदसि तेजो मा मा हासीन्माहं तेजो हासिषं मा मां तेजो हासीदिति । भक्षयति मयि मेधां मयि प्रजां मय्यग्नितेजो दधात्वित्यथेन्द्रं गृह्णात्युत्तिष्ठन्नोजसा सहेत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वौजस्वते जुष्टं गृह्णामीति । परिस्रुज्य सादयत्येष ते योनिरिन्द्राय

---

१ These two words are left out in all the MSS exc M.

२ चर्याः Be.

३ Thus ( and cp. Áp. XIII. 8. 7 ) MU , ह्वयते Be , ह्वयंते BG.

त्वौजस्वत इत्यैनꣳ होष्यन्नवेक्षत इन्द्रौजस्विन्नोजस्वी त्वं देवेषु
भूया ओजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति ।
जुहोति ब्रह्मणस्त्वा क्षत्रस्य क्षौजसे जुहोमीति । ऊत्वा
वाचयत्योजोविदस्योजो मा मा हासीन्माहमोजो हासिषं मा
मामोजो हासीदिति । भक्षयति मयि मेधां मयि प्रजां ९
मयीन्द्र इन्द्रियं दधात्वित्यथ सौर्यचा[1] सौर्यं गृह्णाति तरणि-
र्विश्वदर्शत इत्यनुद्रुत्योपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वते
जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः सूर्याय त्वा
भ्राजस्वत इत्यैनꣳ होष्यन्नवेक्षते सूर्य भ्राजस्विन्भ्राजस्वी
त्वं देवेषु भूया भ्राजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु १०
कुर्विति । जुहोति वायोश्च त्वापां च भ्राजसे जुहोमीति ।
ऊत्वा वाचयति सुवर्विदसि सुवर्मा मा हासीन्माहꣳ सुवर्हासिषं
मा माꣳ सुवर्हासीदिति । भक्षयति मयि मेधां मयि प्रजां
मयि सूर्यो भ्राजो दधात्विति । ते वा एते पृष्ठ्यस्य षडह-
स्योत्तरेष्वहःसु गृह्यन्त एकविꣳशे त्रिणवे त्रयस्त्रिꣳशे । १५
विश्वजिति सर्वपृष्ठे ग्रहीतव्या यज्ञस्य सुवीर्यत्वायाग्निष्टोमे
ग्रहीतव्या यज्ञस्य सततत्वायेति ब्राह्मणमयोपाकरणं[2] जपति
वायुर्हिंकृतेत्यार्त्विज्यं वा[3] करिष्यञ्छꣳसं वा प्रतिगरिष्यन्नेतद्य-

---

१ Found in M only.

२ The brāhmaṇa cited here is found T.S. VI. 6. 8. 2.

३ om. M Be.

ऊर्जपतीडा देवङ्करिति । प्रियो हैवार्त्विज्यस्य भवति । प्रश्नꣳ संख्याय्यस्यैतद्यजुर्जपन्त्समां प्रपद्यते । ऽभि हैव[१] तं[१] प्रश्नं जयति ॥ ११ ॥

अथातो ऽꣳश्वदाभ्ययोरेव ग्रहणमꣳश्वदाभ्यौ गृहीत्वानुपक- ५ ल्पयते द्वे औदुम्बरे नवे पात्रे तयोश्चतुःस्रक्त्यꣳशुपात्रं भवति श्लक्ष्णमदाभ्यपात्रं ते सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्यस्ते भवतः शतमानं च हिरण्यमधोपनद्धस्य राज्ञस्त्रीनꣳशून्प्रहरति वसवस्त्वा प्रहरन्तु गायत्रेण छन्दसाग्नेः प्रियं पाथ उपेहि रुद्रास्त्वा प्रहरन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथ उपेह्यादि- १० त्यास्त्वा प्रहरन्तु जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहीत्यथ होट्टचमसे वसतीवरीभ्यो ऽधपो निःषिच्य द्वादशभिराधावैराधूनोति मान्दासु ते शुक्र शुक्रमाधूनो- मीति प्रतिपद्य शुक्रासु ते शुक्र शुक्रमाधूनोमीत्यातो । ऽथैतस्मिन्नदाभ्यपात्रे ऽꣳशूनुपसंगृह्य गृह्णाति शुक्रं ते शुक्रेण १५ गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः । आस्मिन्नुग्रा अचुच्यवु- र्दिवो धारा असश्चतेत्यथैनमादायोपोत्तिष्ठति ककुहꣳ रूपं वृषभस्य रोचते बृहदित्यैति सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगा इत्येत्याहवनीये जुहोत्यन्वारब्धे यजमाने यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय २० स्वाहेत्यग्न्य प्रदक्षिणमावृत्य राजन्येवाꣳशूनपिसृजत्युग्निक् त्वं

---

१ Thus MUG, हैवत Be; हैवैतं B.

देव सोम गायत्रेण छन्दसाग्नेः प्रियं पाथो अपीहि वह्नी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथो अपीह्यस्मत्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीहीत्यथाह प्रतिप्रस्थातरुदकꣳसेन वा[१] मोदुम्बरसेन[१] वा जघनेनाहवनीयं प्रत्युपलम्भयतीति[2] स तथा करोत्यथैत- ५
द्धिरण्यमङ्गिः प्रक्षाल्य मध्यमायामङ्गुलौ बध्नीते नासिकायां वा प्रघ्राप्यात्यथ सकृदभिषुतस्य राज्ञो ऽꣳशुं गृह्णाति वामदेव्यमिति साम मनसा गायमानो ऽनवानं प्रजापतये[२] त्वेति[२] गृह्णाति[२] प्रजापतये त्वेति जुहोत्यथ हिरण्यमभिव्यनित्या[३] नः प्राण एतु परावत आन्तरिक्षाद्दिवस्परि । आयुः पृथिव्या १०
अध्यमृतमसि प्राणाय त्वेत्यथान्तर्वेद्यङ्गिर्मार्जयत इन्द्राग्नी मे वर्चः क्षणुतां वर्चः सोमो बृहस्पतिः । वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना ॥ दधन्वे वा यदीमनु वोचद्ब्रह्मणि वेरु तत् । परि विश्वानि काव्या नेमिश्चक्रमिवाभवदित्यध्वर्योरेतद्धिरण्यं भवति[४] । ब्राह्मणमुत्तरम् । ॥ १२ ॥ पञ्चमः ॥ १५

अथातः पृश्नीनामेव ग्रहणꣳ । संवत्सरꣳ राजानं दशधा व्यूह्याभिस्तृणति वायुरसि प्राणो नामेति दशभिर्दर्भैः । ते वा

---

१ Thus M; मोदुम्बर॰ all the other MSS., omitting वा।

२ om. Be.

३ Thus MUG; ॰व्यानित्या B Be; cp. T.S. III. 3. 4. 3.

४ All the MSS. exc. M ins. इति।

विश्वदावस्य त्वासच्छुहोमि स्वाहेति । हस्तौ प्रध्वꣳसयते ऽग्नादेको ऽङ्गतादेकः समसनादेकः । ते नः क्षपन्तु भेषजꣳ सदः सहो वरेण्यमित्यथैनं त्रिभिर्दर्भपुञ्जीलैः पवयति पवमानः सुवर्जन इत्येतेनाष्टर्चेन । शुद्धो हैव शुचिः पूतो मेध्यो भवत्यथ वै भवत्यङ्गां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा प्रातरेतेन कक्षमुपोषेदिति[१] । समां[२] विजिज्ञास्यमानो महाराज उत्थायाङ्गां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा प्रातरुदित आदित्ये विप्रुषित[३] आददत एतमपूपमुपस्तीर्णाभिघारितं पर्णसेवाभ्यां परिगृह्य । तत्सह पूतिढणानि [४]भवन्त्यन्तमागारादेकोल्मुकमुदपात्रमित्येतत्समादाय तां दिशं यन्ति यत्रास्य कक्ष स्रष्टो भवति । तदेतदेकोल्मुकमुपसमाधायापूपमादीपयति पर्णसेवाभ्यां परिगृह्य । तत्सह पूतिढणानि[४] भवन्ति । तेन कक्षमुपोषत्यथैनमुद्गृह्णात्यथ[५] विज्ञानमुपैति । यदि दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुपयन्तीति ब्राह्मणमचैतमपूपं प्राश्नाप[६] उपस्पृश्य गच्छानेत्यृषभो गोषु जीर्यति

---

१ ०सुपोषेदिति MU.

२ Thus only M; समां all the other MSS.

३ Thus M; विप्रयुषित BG; विप्रदूषित Be U; Bhav. comments: उदिते ऽवश्याये ।

४—४ This passage is left out in all etc. M.

५ ०सुपोषत्य० M.

६ प्राश्नाप M, perhaps rightly.

तेन यज्यमाणो भवति । तस्य तदुपकॢप्तं भवति यत्पशुना यज्यमाणस्याथ[१] यद्युत्सृज्यन्भवति[१] तस्य निहत्य[२] दक्षिणं कर्णमाजपति शिवस्त्वष्टः पिशङ्गरूप इति द्वाभ्यामथैनं गोष्वपिसृजते ॥ १३ ॥

५ एतं युवानं परि वो ददामीत्यपियन्तमनुमन्त्रयते त्वां गावो ऽवृणत राज्याय त्वाꣳ हवन्त मरुतः स्वर्काः । वर्धन्त्वस्य ककुभि श्रिश्रियाणस्ततो न उग्रो विभज वसूनीत्यथैतरं त्वाष्ट्रं वैन्द्रं वा प्राजापत्यं वा पशुमालभत[३] । एता हि षाण्डस्य देवतास्तस्योपाकरणीययोरनुवर्तयति नमो महिम्न उत चक्षुषे १० त इत्यथास्य वपां जुहोति देवानामेष उपनाह आसीदित्यथास्य हविर्जुहोति पिता वत्सानां पतिरघ्नियानामिति । समानमुत्तरं पशुकर्म । वशया यज्यमाण आह गर्भमीक्षध्वमिति । ते चेद्गर्भं पश्यन्ति संप्रच्छ्याद्य वशां वपयाद्रुवन्त्यथास्यै वपां जुहोति सूर्यो देवो दिविषद्भ्यो धाता चक्षाय वायुः १५ प्रजाभ्यः । बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मतीं जुहोतु स्वाहेति । वशामनुमन्त्रयते यस्यास्ते हरितो गर्भो ऽधो योनिर्हिरण्ययी । अङ्गान्यहुता यस्यै तां देवैः समजीगममित्यथ याचत्यष्टापूड्डिरण्यं कोशं चान्तरकोशं च वासस्योष्णीषं

---

१ माणस्याथैनमुत्सृज्य॰ M.

२ Thus MGB ; नित्य U ; नित्यं Be.

३ पशुम॰ M ; पशून॰ all the other MSS.

चाथैतद्धिरण्मद्भिः[१] प्रक्षाल्य वाससोपनह्योष्णीषेण विग्रथ्य दक्षे कोष्ठे ऽवधाय महति कोष्ठे ऽवदधाति। स आह प्रत्यङ्ङं गर्भमन्तरेण सक्थिनी प्रतिनिवर्तयतेति। तं निवर्त्यमानमनुमन्त्रयत आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद। भूम्याश्चतस्रः प्रदिशस्ताभिरावर्तया पुनरित्युखाङ्गर्भं विस्रस्- ५
मानमनुमन्त्रयते वि ते भिनद्मि तकरीं वि योनिं वि गवीन्यौ। वि मातरं च पुत्रं च वि गर्भं च जरायु च। बर्हिस्ते अस्तु बालितीत्यथैतं[२] गर्भꣳ संदꣳशेन परिगृह्याङ्गिरभ्युक्ष्य शामित्रे प्रतितपति। तस्माभ्यर्धादसाहोमं[३] प्रश्नोतयत्यथैतं गर्भमन्तरेण चात्वालोत्करावन्तरेण यूपं चाहवनीयं १०
चोपातिहृत्य[४] तं दक्षिणतः प्राञ्चमायातयन्यज्ञहोचा[५] सादयत्यथ वशायै हविषा चरत्यथ पुरस्तात्सिष्टकृतो गर्भस्रावद्यज्ञाह विष्णवे गिरिविष्टायानुब्रूहीत्यथ वै भवति पुरस्तान्नाभ्या अन्यदवद्येदुपरिष्टादन्यदिति। स पुरस्तान्नाभ्या अन्यदवद्यत्युपरिष्टादन्यद्धिरभिघारयत्याश्राव्याह विष्णुꣳ गिरिविष्टं यजेति। १५
वषट्कृते जुहोत्युरुद्रप्सो विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भम्। एकपदी द्विपदी त्रिपदी चतुष्पदी पञ्चपदी षट्पदी

---

१ Thus M; चाथैन॰ all the other MSS.

२ Thus M; ॰थैनं the other MSS.

३ Thus M; तस्माभ्यर्धं BG; तस्माभ्यर्धदसा॰ Be U.

४ Thus M; चोपातीत्य the other MSS.

५ प्रांचमासादयत्यथ (sec. m. मायातयत्यथ), omitting the partic. and यज्ञहोचा M.

षन्नपद्यष्टापदी भुवनानु प्रथताꣳ स्वाहेत्यथ स्विष्टकृता चरत्यथैत गर्भं यथाहृतं प्रतिपर्याहृत्योत्तरार्धे[1] आहवनीयस्य प्रत्यञ्चमायात्य भस्मनाभिसमूहति मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिरित्यध्वर्यौरेतत्कोग्निमिश्रं भवति[4] ब्राह्मणमुत्तरम्[4] ॥ १४ ॥ षष्ठः ॥

अजवग्रया यक्ष्यमाणो भवति[4] स यान्यहान्यमेघसंपन्नानि मन्यते तेष्वाग्नेयमष्टाकपालं निर्वपति[4] या[2] एता[2] ब्राह्मणाभिविहिता देवतास्तासामेनामेकस्यै देवतायै आलभते[4] [3]तस्या [3]उपाकरणीययोरनुवर्तयत्या वायो भूष शुचिपा इति[4] नियोजने ऽनुवर्तयत्याकूत्यै त्वा कामाय त्वा[5] समृधे[5] त्वेति[4] पर्यग्नौ क्रियमाणे पञ्च[5] किक्किटाकारं जुहोति किक्किटा ते मनः प्रजापतये स्वाहा किक्किटा ते प्राणं वायवे स्वाहा किक्किटा ते चक्षुः सूर्याय स्वाहा किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याꣳ स्वाहा किक्किटा ते वाचꣳ सरस्वत्यै स्वाहेत्यथैनामन्तरेण चात्वालोत्करावुद्धीचीं नीयमानामनुमन्त्रयते त्वं तुरीया वह्निनी वशासि सहस्रदात्रा मनसा गर्भं आशयत्। वशा त्वं वह्निनी गच्छ देवान्सत्याः सन्तु यजमानस्य कामा इत्युपासने ऽनुवर्तयत्यजासि रयिष्ठा पृथिव्याꣳ सीदोर्ध्वान्त-

---

१ प्रतिपरिहृत्य० M.

२ Thus M; तायो एत्य GU; तापा एत्य Be; तायोग्ना B.

३ तस्योपा० M.

४ om. M.

रिक्षमुपतिष्ठस्व दिवि ते बृहद्भा दृत्यंयास्यै वपां जुहोति तन्तुं तन्वन्नजसो भानुमन्विहीत्यंयास्यै हविर्जुहोति मनसो हविरसि प्रजापतेर्वर्ण दृत्यंयास्या अवदानानां[1] प्राश्नाति गात्राणां ते गात्रभाजो भूयास्मेत्यंथ वै भवति तस्यै वा एतस्या एकमेवादेवयजनं यदालब्धायामभ्रो भवति । यदालब्धायामभ्रः स्यादप्सु वा प्रवेशयेत्सर्वं वा प्राश्नीयादित्यंत्सन्नमेतस्या अप्सु प्रवेशनमेतेनैवास्यै मन्त्रेणावदानानां प्राश्नाथेतरदग्नावनुप्रहरेदिति बौधायनो[2] । ऽनुनिधायमेनामद्यादित्याज्जीगविरित्यंथ[3] वै भवति सा वा एषा त्रयाणामेवावरुद्धा संवत्सरसदः सहस्रयाजिनो गृहमेधिनस्त एवैतया यजेरन्नेषामेवैषाप्तेति । तेषामु हैवैनयैका[4] यजते । ॥ १५ ॥

अथातो जयानामेव होमो । जयान्होष्यनुपकल्पयते बाधकाꣳ स्रुवं च स्रुचं च बाधकान्परिधीञ्छरमयं बर्हिर्वैभीदकमिध्ममित्यंथ[5] दृथाग्निमुपसमाधाय शरमयं बर्हि स्तीर्त्वा बाधकान्परिधीन्परिधाय वैभीदकमिध्ममभ्यज्य[5] स्वाहाकारेणाभ्याधाय बाधकेन स्रुवेणोपघातं जुहोति चित्तं च स्वाहा चित्तिश्च स्वाहेति त्रयोदश स्रुवाहुतीरपि वा बाधकेन स्रुवेण बाधक्याꣳ

---

१ अवदानानि M but cp. infra l. 7.

२ Thus MU; बौधायनो Be BG.

३ अवद्येद् i.s.o. अद्याद् M.

४ Thus MBG; तेषामुहैवनयैको Be U.

५ Thus M; •वैभीतक• the other MSS.

स्रुचि चतुर्गृहीतं गृहीत्वा सर्वान्मन्त्रान्समनुद्रुत्य जुहोति चित्तं च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञानं च मनश्च शक्वरीश्च दर्शश्च पूर्णमासश्च बृहच्च रथंतरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव स्वाहेत्यथ वै भवति देवासुराः संयत्ता आसन्त्स इन्द्रः प्रजापतिमुपाधावत्तस्मा एताञ्जयान्प्रायच्छत्तानजुहोत्ततो वै देवा असुरानजयन्यदजयन्तज्जयानां जयत्वं स्पर्धमानेनैते होतव्या जयत्येव तं पृतनामिति ब्राह्मणमथ वै भवति येन कर्मणेर्त्सन्तच्च होतव्या इति स यत्कर्मर्त्सदिदं मे समृध्येतेति तस्मिन्नभ्यातानाञ्जुहुयादित्यभ्यातानान्होष्यन्नुपकल्पयते पर्णमयꣳ स्रुवं च स्रुचं च पर्णमयान्परिधीन्कुशमयं बर्हिः पर्णमयमिध्ममित्यथ वृथाग्निमुपसमाधाय कुशमयं बर्हिः स्तीर्त्वा पर्णमयान्परिधीन्परिधाय पर्णमयमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय पर्णमयेन स्रुवेणोपघातं जुहोत्यग्निर्भूतानामधिपतिः स मावत्विति सप्तदश स्रुवाहुतीर्हुत्वा वाचयति पितरः पितामहा इत्यपि वा पर्णमयेन स्रुवेण पर्णमय्याꣳ स्रुचि चतुर्गृहीतं गृहीत्वा सर्वान्मन्त्रान्समनुद्रुत्य हुत्वान्ततो वाचयति पितरः पितामहा इत्यथ समस्तानामेव होमो ऽभ्यातानानेवाग्ने जुहुयादथ जयानथ राष्ट्रभृतो ब्राह्मणमुत्तरम् ॥ १६ ॥ सप्तमः ॥

---

१ Thus M; यत्कर्मर्त्सं॰ the other MSS.

अथ वै भवति राष्ट्रकामाय होतव्या इति। राष्ट्रकामाय होष्यन्नुपकल्पयते ग्रम्यापरिधीनित्यथ[1] वृथाग्निमुपसमाधाय ग्रम्यापरिधीन्परिधाय निग्रायाꣳ ग्रम्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोत्यृतायाडृतधामेति। राष्ट्रं वै राष्ट्रभृतो। राष्ट्रेणैवास्मै राष्ट्रमवरुन्द्धे। राष्ट्रमेव भवतीति ब्राह्मणमथ वै भवत्यात्मने होतव्या इत्यात्मने होष्यन्वृथाग्निमुपसमाधाय निग्रायाꣳ ग्रम्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोति। राष्ट्रं वै राष्ट्रभृतो। राष्ट्रं प्रजा। राष्ट्रं पग्रवो। राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमवरुन्द्धे। वसिष्ठः समानानां भवतीति ब्राह्मणमथ वै भवति ग्रामकामाय होतव्या इति। ग्रामकामाय होष्यन्नधिदेवने वृथाग्निमुपसमाधाय निग्रायाꣳ ग्रम्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोति। राष्ट्रं वै राष्ट्रभृतो। राष्ट्रꣳ सजाता। राष्ट्रेणैवास्मै राष्ट्रꣳ सजातानवरुन्द्धे। ग्राम्येव भवतीति ब्राह्मणमथ वै भवत्यधिदेवने जुहोत्यधिदेवन एवास्मै सजातानवरुन्द्धे। त एनमवरुद्धा उपतिष्ठन्त इति ब्राह्मणमथ वै भवति रथमुख ग्रोजस्कामस्य होतव्या इत्योजस्कामस्य[2] होष्यन्नुपर्यग्नौ रथमुखं प्रग्रह्य[3] निग्रायाꣳ ग्रम्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोत्योजो वै राष्ट्रभृत। ग्रोजो रथ। ग्रोजसैवास्मा ग्रोजो ऽवरुन्द्धे। ग्रोजस्येव भवतीति ब्राह्मणमथ

---

१ Thus MGB; ग्रम्यापरि॰ U Be.

२ कामाय MSS. exc. M.

३ परिग्रह्य MSS. exc. M.

वै भवति यो राष्ट्रादपभूतः स्यात्तस्मै होतव्या[1] यावन्तो ऽस्य रथाः स्युस्तान्ब्रूयाद्युङ्ध्वमिति[1] राष्ट्रमेवास्मै युनक्तीति ब्राह्मणमथ वै भवत्याङ्गतयो वा एतस्याकृप्ता यस्य राष्ट्रं न कल्पते[1] स्वरथस्य दक्षिणं चक्रं प्रवृह्य नाडीमभिजुहुयादिति[1] स[1] स्वरथस्यैव दक्षिणं चक्रं प्रवृह्योपर्यग्नौ रथनाडीं प्रगृह्य[2] निशायाꣳ ग्राम्यापरिधौ दिः स्वाहाकारꣳ राष्ट्रभृतो जुहोत्याङ्गतीरेवास्य कल्पयति[1] ता अस्य कल्पमाना राष्ट्रमनुकल्पत इति ब्राह्मणम्[1] ॥ १७ ॥

अथ वै भवति संग्रामे संयत्ते होतव्या इति[1] संग्रामे संयत्ते होष्यन्नुपकल्पयते मान्धुकमिध्ममित्यथ प्रत्यभिचरमग्निमुपसमाधाय मान्धुकमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय निशायाꣳ ग्राम्यापरिधौ दिः स्वाहाकारꣳ राष्ट्रभृतो जुहोत्यङ्गारा एव प्रतिवेष्टमाना अभिचाणामस्य सेनां प्रतिवेष्टयन्तीति ब्राह्मणमथ वै भवति य उन्मादयेत्तस्मै होतव्या इत्युन्मत्ताय होष्यन्नुपकल्पयते नैयग्रोधमौदुम्बरमाश्वत्थं स्नाचमिध्ममित्यथ वृषाग्निमुपसमाधायैतमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय निशायाꣳ ग्राम्यापरिधौ दिः स्वाहाकारꣳ राष्ट्रभृतो [2]जुहोत्येते वै गन्धर्वाप्सरसां गृहाः[1] स्व एवैनानायतने ग्रमयतीति ब्राह्मणमथ वै भवत्यभिचरता प्रतिलोमꣳ होतव्या इत्यभिचरन्होष्यन्स्वकृत[3]

---

१ only given by M.

२ प्रगृह्य M Be ; प्रवृह्य the other MSS.

३ ... २ (p. 184, 2) left out in M.

४ probably read : इति सोऽभिचरन्हो॰ ।

दूरिणे प्रदरे वासुतो ऽर्वाञ्चो दृषाग्निमुपसमाधाय निग्रायाꣳ ग्रम्यापरिधौ द्विः स्वाहाकारꣳ[१] राष्ट्रभृतो[२] जुहोति । यद्वाचः क्रूरं तेन वषट्करोति । वाच एवैनं क्रूरेण प्रदश्यति । ताजगार्ति-मार्च्छतीति ब्राह्मणमथ वै भवति यस्य कामयेतान्नाद्यमाददी-येति तस्य सभायामुत्तानो निपद्य भुवनस्य पत दृति तृणानि संगृह्णीयादिति । स यस्य कामयेतान्नाद्यमाददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत दृति तृणानि संगृह्यात्थैने-नान्यादाय हरतीदमहममुष्यामुष्यायणस्यान्नाद्यꣳ हरामीत्याहा-न्नाद्यमेवास्य हरति । षड्भिर्हरतीति ब्राह्मणमथैनानि स्वस्यां वा सभायाꣳ स्वेषु वामात्येष्वपिसृजति । प्रजापतिनैवास्यान्नाद्य-मादायर्तवो ऽस्मा ऋतुप्रयच्छन्तीति ब्राह्मणमथ वै भवति यो ज्येष्ठबन्धुरपभूतः स्यात्तꣳ स्वले ऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा तस्मै होतव्या दृति । स यो ज्येष्ठबन्धुरपभूतः स्यात्तꣳ स्वले ऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा निग्रायाꣳ ग्रम्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोति । वर्ष्म वै राष्ट्रभृतो । वर्ष्म स्वम् । वर्ष्मणैवैनं वर्ष्म समानानां गमयतीति ब्राह्मणमथ वै भवति चतुःशरावो भवति । दिक्ष्वेव प्रतितिष्ठति । क्षीरे भवति । रूपमेवास्मिन्दधात्युद्धरति पूतत्वाय । सर्पिष्वान्भवति मेध्यत्वाय । चत्वार आर्षेयाः प्राश्नन्ति । दिग्भ्यमेव ज्योतिषि जुहोतीति ब्राह्मणम् । ॥ १८ ॥

---

१ कारेण the MSS.

२ (p. 183,17) २...२ left out in M.

अथ वै भवति दैविका निर्वपेत्प्रजाकाम इति प्रथमं धातारं प्रजाकामस्य करोति प्रथमं पशुकामस्य मध्यतो ग्रामकामस्य मध्यतो ज्योगामयाविनः प्रथमं यच्यमाणस्यो-त्तममीजानस्य प्रथमं मेधाकामस्य मध्यतो रुक्षकामस्य ता वा एताः क्षीरे घृता भवन्ति ता यत्सह सर्वा निर्वपेदीश्वरा एनं प्रदहो द्वे प्रथमे निरुप्य धातुस्तृतीयं निर्वपेत्तथो एवोत्तरे निर्वपेत्तथैनं न प्रदहन्त्यथो यस्मै कामाय निरुप्यते तमेवाभिरू-पाप्नोतीति ब्राह्मणमथ वै भवति यत्सायंप्रातरग्निहोत्रं जुहो-त्याज्यतीष्टका एव ता उपधत्ते यजमानो ऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्यत्सायंप्रातर्जुहोत्यहोरात्राण्येवाग्नेष्टकाः कृत्वोपधत्ते दश समानत्र जुहोति दशाक्षरा विराड्विराज-मेवाग्नेष्टकां कृत्वोपधत्ते ऽथो विराज्येव यज्ञमाप्नोति चित्य-श्चित्यो ऽस्य भवति तस्माद्यत्र दशोषित्वा प्रयाति तद्यज्ञ-वास्त्वेवास्त्वेव तद्यत्ततो ऽर्वाचीनमिति स यत्र दशोषित्वा प्रयास्यन्भवति तदग्निष्टे ऽनसि समवग्रमयन्ते[1] यदस्य[1] समवग्र-मयितव्यं[1] भवत्येवास्त्वेव तद्यत्ततो ऽर्वाचीनꣳ रुद्रः खलु वै वास्तोष्पतिर्यदुक्त्वा वास्तोष्पतीयं प्रयायाद्रुद्र एनं भूत्वाग्नि-रनूत्थाय हन्याद्वास्तोष्पतीयं जुहोति भागधेयेनैवैनꣳ शमयति नार्तिमार्च्छति यजमान इति ब्राह्मणमथ वै भवति यद्युक्ते जुह्वद्यद्यथा प्रयाते वास्तावाज्यं जुहोति तादृगेव तद्यदयुक्ते

---

१ Thus M only, all the other MSS. are here wholly corrupted.

जुह्वयाद्यथा चेम आहुतिं जुहोति तादृगेव तदृतमस्य वास्तोष्पतीयꣳ स्यादृत्विणो युक्तो भवति सव्यो ऽयुक्तो ऽथ वास्तोष्पतीयं जुहोतीति स यत्र दक्षिणो युक्तो भवति सव्यो ऽयुक्तस्तत्प्रत्याच्छेद्यां[1] पर्णमय्याꣳ स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये वास्तोष्पतीयं जुहोति वास्तोष्पते प्रतिजानीह्यस्मानित्यनुद्रुत्य वास्तोष्पते ध्रुवया सꣳसदा त इति जुहोत्येतासꣳस्रुचमुपनिधाय सव्यं युक्त्वा प्रयात्युभयमेवाकरं परिवर्गमेवैनꣳ शमयतीति ब्राह्मणमथ वै भवति यदेकया जुह्वयाद्विहोमं कुर्यात्पुरोनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वायेति ब्राह्मणमथ वै भवति यद्भुत आदध्याद्रुद्रं गृहानन्वारोहयेद्वचाणान्यसंप्रच्याप्य प्रयायाद्यथा यज्ञवेशसं वादृहनं वा तादृगेव तदथं ते योनिर्ऋत्विय इत्यरण्योः समारोहयत्येष वा अग्नेर्योनिः स एवैनं योनौ समारोहयत्यथो खल्वाहुर्यदरण्योः समारूढो नश्येदुदस्याग्निः सीदेत्पुनराधेयः स्यादिति या ते अग्ने यज्ञिया तनूस्तयेह्यारोहेत्यात्मन्नसमारोहयत इति स आत्मन्नसमारोहयते या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा वसूनि क्षणवन्नस्ते नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद स्वं योनिं जातवेदो भुव आजायमानः सचय एहीत्येनमुपावरोहयत उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्। आयुः प्रजाꣳ रयिमस्मासु धेह्यजस्रो

---

[1] Thus MGUB Bhav.; प्रत्यादेयां Be. This word occurs also in the Baudh. pitṛmedhasūtra (p. 13, 1).

दीदिहि नो दुरोण इति । यजमानो वा अग्नेर्योनिः । स्वायामेवैनं योन्याꣳ समारोहयत इति ब्राह्मणम् । ॥ १९ ॥ अष्टमः ॥

उक्तो ऽत्रारम्भो । अथ वै भवत्यृषयो वा इन्द्रं प्रत्यक्षं नाप-श्यन्तं वसिष्ठः प्रत्यक्षमपश्यत्सो ऽब्रवीद्ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्ते ऽथ मेतरेभ्य ऋषिभ्यो मा प्रवोच इति । तस्मा एतान्स्तोमभागानब्रवीत्ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्तेति । तस्मादाङ्वर्षिष्ठं ब्रह्मत्वमिति । स यदाह ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा[1] प्रसौति देव सवितरित्येतां प्रतिपदं कृत्वा रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्येतस्यानुवाक-स्यैकैकमुपादाय प्रसौति । स एवमेव प्रसुवन्नादग्निरग्निष्टोमं प्रसौति क्षयोदग्निरत्यग्निष्टोमं पञ्चदग्निरुक्थ्यꣳ षोडग्निः षोडशिनꣳ सप्तदग्निर्वाजपेयमेकान्नत्रिꣳशतातिरात्रꣳ सर्वै-रग्नेर्यामꣳ । स यत्र राथंतराय सन्धये प्रसर्पन्ति तदाह वसुको ऽसि वेषश्रिरसि वसुष्टिरसीति । स एवमेव प्रसौत्यग्नेर्यामा-दथातो[2] ऽतिक्रमाणामेवाभिचरन्भ्रातृव्यवान्त्सर्धमानो ऽभिचर-णीयग्निष्ट्वान्यायात्य संवत्सरमेतैः क्रमैः क्रमेताग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन रथंतरेण साम्ना वषट्कारेण वज्रेण पूर्वजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनानुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येनान्क्रामामीन्द्रेण देवेन पृतना जयामि

---

१ तद् is left out in all MSS. exc. M.

२ प्रसौत्यत्योर्था॰ M.

त्रैष्टुभेन छन्दसा [1]पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण सहजान्भ्रातव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनानुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येनाक्रामामि[1] विश्वेभिर्देवेभिः पृतना जयामि जागतेन [2]छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणा- ५
परजान्भ्रातव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनानुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येना[2]क्रामामीत्यपि वाभिचरणीयास्विष्टिष्वनुवर्तेतापि वापोद्धृत्येतरान्क्रमान्संवत्सरमेतैः क्रमैः क्रमेतोक्षꣳ शुक्रामन्थिनो- रधिद्रवणमथातो ऽतीमोचाणामेव[3] वैश्वकर्मणानि हुत्वा गार्ह- १०
पत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा गार्हपत्ये जुहोत्यन्वारब्धे यजमाने ॥ २० ॥

ये देवा यज्ञहनो पृथिव्यामध्यासते। अग्निर्मा तेभ्यो रचतु गच्छेम सुकृतो वयꣳ स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा गार्हपत्य एव जुहोति ये देवा यज्ञमुषः पृथिव्यामध्यासते। अग्निर्मा १५
तेभ्यो रचतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथाग्नीध्रमभिप्रैत्यागन्म मित्रावरुणा वरेण्या राचीणां भागो युवयोर्यो अस्ति। नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिव इत्यथाग्नीध्रं हुत्वा स्रुचि चतुर्गृहीतं गृहीत्वाग्नीध्रे जुहोत्यन्वारब्धे

---

१,२ The two passages marked at the beginning and the close by १ and २ are left out by all the MSS exc. M.

३ °नीमो° MBG (sec. m.)*; °तिमो° Be UG (pr. m.).

यजमाने ये देवा यज्ञहनो ऽन्तरिक्षे ऽध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाग्नीध्र एव जुहोति ये देवा यज्ञमुषो ऽन्तरिक्षे ऽध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथाहवनीयमभिप्रैति यास्ते राचीः सवितर्दैव्यानीरन्तरा द्यावापृथिवी वियन्ति। गृहैश्च सर्वैः प्रजया च्ये सुवो रुहाणास्तरता रजाꣳसीत्यथाहवनीयं द्रुत्वा स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने ये देवा यज्ञहनो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाहवनीय एव जुहोति ये देवा यज्ञमुषो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथाहवनीयमुपतिष्ठते येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवेदः। तेनाग्ने त्वमुत वर्धयेमꣳ सजातानꣳ श्रैष्ठ्य आधेह्येनमिति यज्ञहनो वै देवा यज्ञमुषः सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य ये देवा यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाꣳस्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेतीति ब्राह्मणमपि वा तिस्र एव गार्हपत्ये जुहोति तिस्र आग्नीध्रे तिस्र आहवनीये ऽपि वा गार्हपत्याज्जपन्नुद्वेदाहवनीयादुक्तोदवसानीयेष्टिरैतां[1] तृतीयां प्रवृताऋतिं जुहोति सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानो ऽग्निर्मा पातु चक्षुषः

१ ०जपन्नुद्वेद० M Be; ०जपन्नुद्वेद० BUG.

स्वाहेत्याभिचरन्बभ्रुवे बभ्रुवत्साय कार्ष्मर्यमयेन पात्रेण पयो जुहोति सच सूष सवितर्विश्वचर्षण एतेभिः सोम नामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते स्वाहेति[1] साचादस्य हृदयं भित्त्वान्त्राणि परिक्रामयति[1] स्तृणुते हैव[2] तं[2] भ्रातव्यमेव येनास्यर्त्विजाꣳ स्पर्धा स्यात्तमाह मास्य चमसमनुप्रस्रपताद्भिमर्शनं[3] करिष्यामीति[1] तस्यैतेनैव मन्त्रेण चमसं जुहुयात्तमूर्ध्वो ऽवाङ्वा[4] राजातिपवत[1] उक्तं पात्नीवतस्य [5]अयण-मुक्तमादित्यग्रहस्योद्धननमुक्तं[6] प्रायणीयस्य स्रुवाऊतिरुक्तोदयनीयस्योक्तं यूपस्योपस्थानम्[1] ॥ २१ ॥ नवमः ॥

उक्तानि पत्नीयजूꣳष्येवमेवैताः स्रुचो यथैतद्ब्राह्मणमुक्तो दधिग्रहो[1] ऽथ वै भवत्याज्यग्रहं ग्रहीयात्तेजस्कामस्येति[1] बर्हिषी अन्तर्धायाज्यग्रहं ग्रहाति[1] सोमग्रहं ग्रहीयाद्ब्रह्मवर्चसकामस्येत्यꣳशूनुपसंगृह्य सोमग्रहं ग्रहात्यथैतं महाव्रतीये ऽह्नि प्राजापत्यमतियाह्यं ग्रहाति ते क्रतुमपिवृञ्जन्ति विश्व इत्यनु-

---

१ Thus M; ०कामयातैच Be; ०क्रासयातौद्ध B; ०कासयान्तैच U; ०कासयातैद्ध G (pr. m.), ०क्रासयातैद्ध G (sec. m.). परिक्रासयातैर्निष्क्रामति (var. निष्क्रामयति) Bhav.

२ Thus M Bhav.; ह्वैतं The other MSS.

३ Thus M; ०नुप्रस्रप्राद्० BUG; ०नुप्रस्रत्याद्० Be.

४ Thus M; i.s.o. ऽवाङ्वा राजाति० Be U: वारादाष्टाति०; G: वारांद्राष्टाति; B: वारीद्राष्टाति०।

५ Thus (अयण०) M Be (cp. viii. 14 श्रीणाति); अपण० BU; अमण० G.

६ Corrected (उद्धनन०) according to viii. 9 s.f. (उद्धन्ति); उदाहनन० MUGB; Be wholly corr.

द्रुत्योपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णामीति । परिमृज्य षादयत्येष ते योनिः प्रजापतये त्वेत्यथातः प्राणग्रहणानामेव ग्रहणꣳ । संवत्सꣳ राजानं पुञ्जीकृत्वा[१] नवाꣳशून्याच आयातयत्ययं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्रियै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्य इत्ययं दक्षिणा विश्वकर्मेति नव दक्षिणायातयत्ययं[२] पञ्चादित्यवत्या इति नव प्रतीच आयातयतीदमुत्तरात्सुवरिति नवोदीच आयातयतीयमुपरि मतिरिति नवोपरिष्टात्प्रदक्षिणं प्रयायातयति । तानपानभृद्भिः प्रत्यूहति प्राची दिग्वां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्स्तोमः स उ पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिरिति । वाचयति पितरः पितामहाः परे ऽवर इति ये पुरस्ताद्भवन्ति । दक्षिणा दिग्भामिति ये दक्षिणतो भवन्ति । प्रतीची दिग्भामिति ये पश्चाद्भवन्त्युदीची दिग्भामिति य उत्तरतो भवन्त्यूर्ध्वा दिग्भामिति य उपरिष्टात्प्रदक्षिणं पर्यायातिता[३] भवन्ति । ते वा एते प्रायणीयोदयनीययोरेव

---

१ Thus ( पुञ्जी॰ ) M; पुंजं BG; पुंजं Be U.

२ Thus M; दक्षिणायातयत्य॰ Be GU; B defect.

३ Conjecturally; पर्यायातिता BG; पर्यासातिता M, पर्यातिग्रातिता U; पर्येतिग्रांतिता Be.

नियुक्ता दग्धसे ऽहꣳस्तदु[१] रात्रिसत्रेष्वग्निष्टोम[१] आमयाविन उपसृतो वा गृह्णीयादंगदो हैव भवति ॥ २२ ॥ दशमः ॥

अथ वै भवत्युभये वा एते प्रजापतेरध्यसृज्यन्तेति ब्राह्मणमेव युवꣳ सुराममश्विनेति सौत्रामण्यामेव[२] भवत्यथ वै भवतीयं वा अग्निहोत्री यं वा एतस्य निषीदति यस्याग्निहोत्री निषीदति तामुत्यापयेदिति स यस्याग्निहोत्री निषीदति तामुत्यापयत्युद्यन्नादित्यदितिर्विश्वरूप्यायुर्यज्ञपतावधात्। इन्द्राय क्षत्रतो भागं मित्राय वरुणाय चेत्यथ वै भवत्यवर्तिं वा एषैतस्य पाप्मानं प्रतिख्याय निषीदति यस्याग्निहोत्र्युपसृष्टा निषीदति तां दुग्ध्वा ब्राह्मणाय दद्याद्यस्यान्नं नाद्यादिति स यस्याग्निहोत्र्युपसृष्टा निषीदति तामेतदेव दुग्ध्वा ब्राह्मणाय ददाति न चास्यात ऊर्ध्वमन्नमत्त्यथ वै भवति पृथिवीं वा एतस्य पयः प्रविशति यस्याग्निहोत्रं दुह्यमानꣳ स्कन्दति तदभिमन्त्रयेतेति स यस्याग्निहोत्रं दुह्यमानꣳ स्कन्दति तदभिमन्त्रयते यद्य दुग्धं पृथिवीमभ्यदोषधीरप्यसरद्यदापः। पयो गृहेषु पयो अग्नियासु पयो वत्सेषु पयो अस्तु तन्मयीत्याह पय एवात्मन्गृहेषु पशुषु धत्ते ऽप उपसृजत्यद्भिरेवैनदाप्नोतीति ब्राह्मणमथ वै भवति यो वै यज्ञस्यार्तेनानार्तꣳ सꣳसृजत्युभे वै ते तर्ह्यार्च्छत आर्च्छति खलु वा

---

१ Thus M; B and G (sec. m.) om. ऋषि; तदुरात्रिसत्रेष्वग्नीष्टोम U; तदतिरात्रे सत्रे ष्टष्ठोम Be; तदुरात्रिसत्रेष्टष्ठोम G (pr. m.).

२ एष i.s.o. एव M.

एतदग्निहोत्रं यदुह्यमानꣳ स्कन्दति यदभिदुह्यादिति[१] । स यस्याग्निहोत्रं दुह्यमानꣳ स्कन्दति नैनदभिदोग्धि । तदेव यादृक्कीदृक् च होतव्यमथान्यां दुग्ध्वा पुनर्होतव्यमनार्तिनैवार्तं यज्ञस्य निष्करोतीति ब्राह्मणमथ वै भवति यद्युद्वृतस्य स्कन्देच्चतस्रो ऽञ्जलीन्कृत्वा पुनरेयाद्यज्ञं विच्छिन्द्याच्च स्कन्देत्तन्निषद्य पुनर्गृह्णीयादिति । स[२] यत्रैव स्कन्दति तदेव स्थालीं निधायाग्निमिष्टमानीय पुनरभ्युन्नीय तदेव यादृक्कीदृक् च होतव्यमथान्यां दुग्ध्वा पुनर्होतव्यमनार्तिनैवार्तं यज्ञस्य निष्करोतीति ब्राह्मणमथ वै भवति वि वा एतस्य यज्ञश्छिद्यते यस्याग्निहोत्रेऽधिश्रिते स्वान्तरा धावति । रुद्रः खलु वा एष यदग्निर्यद्ग्रामान्त्यावर्तयेद्रुद्राय पशूनपिदध्यात्पशुर्यजमानः स्याद्यदपोऽन्वतिषिञ्चेदनाद्यमग्नेरापोऽनाद्यमाभ्यामपिदध्याद्गार्हपत्याङ्गस्कादायेदं विष्णुर्विचक्रम इति वैष्णव्यर्चाहवनीयाद् ध्रुवꣳसयन्नुद्रुवेदिति । स वैष्णव्यर्चाहवनीयाद् ध्रुवꣳसयन्नुद्रुवति । यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ संतनोतीति ब्राह्मणमथ भस्मना शुनः पदमपिवपति शान्त्या इति ब्राह्मणम् । ॥ २३ ॥

अथ वै भवति नि वा एतस्याहवनीयो गार्हपत्यं कामयते नि गार्हपत्य आहवनीयं यस्याग्निमनुद्धृतꣳ सूर्यो ऽभिनिम्रोचति । दर्भेण हिरण्यं प्रबध्य पुरस्ताद्धरेदथाग्निमथाग्निहोत्रमिति । स यस्याग्निमनुद्धृतꣳ सूर्यो ऽभिनिम्रोचति दर्भेण

---

१ Thus M, तदभिदु॰ B Be G, न तदभिदु॰ U.

२ om. Be U.

हिरण्यं प्रवध्य परिक्रमीं पूर्वः प्रतिपद्यते ऽन्वग्ब्राह्मण आर्षेय दूध्नेनाज्यगात्मनाग्निहोत्रेणाथैतद्धिरण्यमाहवनीयस्यायतने सादयित्वापोद्धृत्य हिरण्यं प्रदक्षिणमावर्त्येध्मं प्रतिष्ठापयत्यथ वै भवत्यग्निहोत्रमुपसाद्या तमितोरासीत। व्रतमेव हतमनुम्रियते। ऽन्तं वा एष आत्मनो गच्छति यस्याग्न्यन्तमेष यज्ञस्य गच्छति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभिनिम्रोचति। पुनः समन्य जुहोत्यन्तेनैवान्तं यज्ञस्य निष्करोतीति ब्राह्मणमथ वै भवति वरुणो वा एतस्य यज्ञं गृह्णाति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभिनिम्रोचति। वारुणं चरुं निर्वपेत्तेनैव यज्ञं निष्क्रीणीत इति ब्राह्मणमथ वै भवति नि वा एतस्माहवनीयो गार्हपत्यं कामयते नि गार्हपत्य आहवनीयं यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेति। चतुर्गृहीतमाज्यं पुरस्ताद्धरेदथाग्निमथाग्निहोत्रमिति। स यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेति चतुर्गृहीतेनाज्येन परिक्रमीं पूर्वः प्रतिपद्यते ऽन्वग्ब्राह्मण आर्षेय दूध्नेनाज्यगात्मनाग्निहोत्रेणाथैतदाज्यमाहवनीयस्यायतने सादयित्वापोद्धृत्याज्यमर्धेध्मं प्रतिष्ठापयत्यथ वै भवति पराचो वा एतस्मै व्युच्छन्ती व्युच्छति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेत्युषाः केतुना जुषतां यज्ञं देवेभिरन्वितम्। देवेभ्यो मधुमत्तमꣳ स्वाहेति प्रत्यङ्निषद्याज्येन जुहुयात्प्रतीचीमेवास्मै विवासयतीति ब्राह्मणमथ वै भवत्यग्निहोत्रमुपसाद्या तमितोरासीत। व्रतमेव हतमनुम्रियते। ऽन्तं वा एष आत्मनो गच्छति यस्याग्न्यन्तमेष यज्ञस्य गच्छति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेति। पुनः समन्य जुहोत्यन्तेनैवान्तं यज्ञस्य निष्करोतीति

ब्राह्मणमथ वै भवति मित्रो वा एतस्य यज्ञं गच्छति यस्याग्नि-
मनुद्धृतꣳ सूर्यो ऽभ्युदेति । मैवं चरं निर्वपेत्तेनैव यज्ञं निष्क्रीणीत
इति ब्राह्मणमथ वै भवति यस्याहवनीये ऽनुद्धाते गार्हपत्य
उद्धायेद्यदाहवनीयमनुद्धाय गार्हपत्यं मन्थेद्विच्छिन्द्याद्ब्राह्मत्व्यमस्मै
५ जनयेद्यदै यज्ञस्य वास्तव्यं क्रियते तदनु रुद्रो ऽवचरति । यत्पूर्व-
मन्ववस्येद्वास्तव्यमग्निमुपासीत । रुद्रो ऽस्य पशून्घातुकः स्यादा-
हवनीयमुद्धाय गार्हपत्यं मन्थेदिति । स आहवनीयमुद्धाय
गार्हपत्यं मन्थतीतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः ।
स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति ।
१० छन्दोभिरेवैनꣳ स्वाद्योनेः प्रजनयतीति ब्राह्मणमथ वै भवति
गार्हपत्यं मन्थति । गार्हपत्यं वा अन्वाहिताग्नेः पशव उपतिष्ठन्ते ।
स यदुद्धायति तदनु पशवो ऽपक्रामन्तीत्यथैनमुपतिष्ठत इषे
रय्यै रमस्व सहसे द्युम्नायोर्जे पत्यायेत्यथैनमुपसमिन्द्धे सारस्वतौ
लोतौ समिन्धाताꣳ सप्ताऽसि विराडसीति ॥ २४ ॥

१५ अथ वै भवंति वज्रो वै चक्रं । वज्रो वा एतस्य यज्ञं
विच्छिनत्ति यस्यानो वा रथो वान्तराग्नी यात्याहवनीयमुद्धाय
गार्हपत्यादुद्धरेदिति । स आहवनीयमुद्धाय गार्हपत्यादिध्म-
मुद्धरति यदग्ने पूर्वं प्रभृतं पदꣳ हि ते सूर्यस्य रश्मीनन्वाततान ।
तच्च रथिष्ठामनुसंभरैतꣳ सं नः सृज सुमत्या वाजवत्येति । पूर्वे-
२० णैवास्य यज्ञेन यज्ञमनुसंतनोतीति ब्राह्मणमथैनमुपतिष्ठते त्वमग्ने
सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वितन्वत इत्यग्निः
सर्वा देवता देवताभिरेव यज्ञꣳ संतनोतीति ब्राह्मणमथाग्नये

पथिकृते पुरोडाशमष्टाकपालं निर्वपत्यन्वाहार्यमासाद्यानड्वाहं
हरति[1] सा प्रसिद्धेष्टिः संतिष्ठते[1] ऽथ वै भवति यस्य प्रातः-
सवने सोमो ऽतिरिच्यते माध्यंदिनꣳ सवनं कामयमानो
ऽभ्यतिरिच्यत इति[1] स[1] प्रातःसवने सोमे ऽतिरिक्ते प्राङायन्नाह
होतुश्चमसमनून्नयध्वमुन्नेतः सर्वꣳ एव राजानमुन्नय मातिरीरिच ५
इति[1] होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्त्सर्वꣳ
एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य
बर्हिषी आदाय वाचंयमः प्रत्यङ्[2] द्रुत्वा[2] स्तोत्रमुपाकरोति[1]
स्तुवते[1] तदेतद्गायत्रꣳ साम पञ्चदशं गौर्धयति मरुतामिति
धयद्वतीषु कुर्वन्ति[1] होत्र एषोत्तमेति प्राङ्[1] समानमत १०
ऊर्ध्वमथ वै भवति यस्य माध्यंदिने सवने सोमो ऽतिरिच्यत
आदित्यं द्वितीयसवनं कामयमानो ऽभ्यतिरिच्यत इति[1] स[1]
माध्यंदिने सवने सोमे ऽतिरिक्ते प्राङायन्नाह होतुश्चमसमनू-
न्नयध्वमुन्नेतः सर्वꣳ एव राजानमुन्नय मातिरीरिच इति[1]
होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्त्सर्वꣳ एव १५
राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य
बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति[1]
स्तुवते[1] तदेतद्गौरिवीतꣳ साम सप्तदशं वएमहाꣳ अभि सूर्ये-
त्येतासु[3] कुर्वन्ति[1] होत्र एषोत्तमेति प्राङ्[1] समानमत ऊर्ध्व-

---

१ om. M.

२ प्रत्यङ्डुत्य Be.

३ Thus M; -एतावत् i.s.o. -एतासु all the other MSS.

मंथ वै भवति यस्य तृतीयसवने सोमो ऽतिरिच्येतोक्थ्यं कुर्वीत । यस्योक्थ्ये ऽतिरिच्येतातिरात्रं कुर्वीत । यस्यातिरात्रे ऽतिरिच्यते तं वै दुष्प्रज्ञानमित्यतिरात्रे ऽतिरिक्ते प्राङायन्नाह होतुस्त्रमसमनूनयध्वमुन्नेतः सर्वग्र एव राजानमुन्नय मातिरी-
५ रिच इति । होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्सर्वग्र एव राजानग्र समुन्नीयोत्तरवेद्याग्र सग्सादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । तदेतद्बृहत्सामैकविग्रं वैष्णवीषु ग्निपिविष्टवतीषु कुर्वन्ति । होत्र एषोत्तमेति प्राञ्चः । समानमत
१० ऊर्ध्वम् ॥ २५ ॥

[1]इति तु छन्दोगवक्तृचेषु कामयमानेषु । ते चेन्न कामयेरन्प्रातःसवने ऽतिरिक्ते याग्र स्थालीमलग्र राज्ञे ऽतिग्रिष्टाय मन्यते तस्या उपरिष्टादाग्नयणमानीयाधस्तादुपगूह्याति । चिरभिविष्यन्द्यति । सो ऽभिविष्यन्दमानः सर्व आग्नयणः संपद्यते ।
१५ तं चिरभिहिंकृत्य परिमृज्य सादयति । माध्यंदिने सवने ऽतिरिक्ते तथैव याग्र स्थालीमलग्र राज्ञे ऽतिग्रिष्टाय मन्यते तस्या उपरिष्टादाग्नयणमानीयाधस्तादुपगूह्याति । चिरभिविष्यन्द्यति । सो ऽभिविष्यन्दमानः सर्व एवाग्नयणः संपद्यते । तं तथैव चिरभिहिंकृत्य परिमृज्य सादयति । तृतीयसवने ऽतिरिक्ते हारि-
२० योजनसेवाचाभिविष्यन्द्यति । न हि पुनर्ग्रहणं विद्यते । ऽथातो

---

१ Cp. Rudradatta on Āp. XIV. 18. 13.

ध्रुवस्यैव[१] परिहीणस्य[१] मीमाꣳसैन्द्राग्निभ्यामेनमृग्भ्यां परिगृह्य जुहुयादिन्द्राग्नी[२] वै देवानां पुनःपुनरभ्युपाकारं[३] यजामह इत्येतदेकमाश्विनीभ्यामेनमृग्भ्यां परिगृह्य जुहुयादश्विनौ वै[४] देवानां भिषजौ ताभ्यामेवास्मै भेजषं करोतीत्येतदेकं वैष्णवीभ्यामेनमृग्भ्यां परिगृह्य जुहुयाद्यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपिविष्टमभ्यतिरिच्यत इत्येतदेकमवभृथेनैनꣳ सहाभ्यवहरेद्यथा मेऽन्यानि सोमलिप्तानि पाप्मानमेवं म एव भविष्यतीत्येतदेकं बर्हिषैनꣳ सहाभ्युपोषेदेष वा अग्निर्वैश्वानरो यत्प्रदाव्यो ऽग्नय एष वैश्वानराय गृह्यते ध्रुव एवमग्नौ वैश्वानरे हुतो भविष्यतीत्येतदपरमथ पुनर्दीक्षते यज्ञो ह[५] वै[५] यज्ञस्य प्रायश्चित्तिरिति[६] ह्येकाहयाजिनो ऽथ सत्रिणां मार्जालीये[७] परिष्यन्दं[७] निष्यन्दनवन्तं[७] कृत्वा तदेनं निनयन्ति श्वो भूते हि ते श्रोष्यन्तो[८] भवन्ति ॥ २६ ॥ एकादशः ॥

उक्तः सꣳसवो ऽथ वै भवत्यार्तिं वा एते नियन्ति येषां दीक्षितानां म्रियते तं यदवव्रजेयुः क्रूरकृतामिवैषां लोकः

---

१ ध्रुवस्य परिहीणस्यैव M.

२ इन्द्रो i.s.o. इन्द्राग्नी all exc. M.

३ Thus MGU; °भ्युपकारं Be; B om. यजि।

४ हि Be.

५ Thus M Be; ह्यैव the other MSS.

६ °रिती again most of the MSS.

७ Thus MB Bhav.; मार्जालीयोपरिविष्यंदनवंतं Be UG (pr. m.); मार्जालीये परिविष्यंदन्निष्यन्दनवंतं G (sec. m.).

८ Thus MU · श्रोष्यंतो Be BG.

स्यादाहर दहेति ब्रूयादिति । दीक्षितं चेदुपतपद्विन्देदाग्नी-
ध्रीयग्रथनो[१] ह[२] भवति । तदस्मै भक्षानाहरन्ति यावदलं भक्षाय
मन्यते । स यद्यहागदो[३] भवति पुनरेति । यद्यु वै प्रैति
सर्वेभ्यो ऽग्निभ्यो ऽङ्गारान्निर्वर्त्यारण्योरग्नीन्समारोह्यान्तरेण
५ चात्वालोत्करावुदक्कुपनिर्हत्य तेनैनं दहेयुस्तं चिराचेण ग्रीतीकृत्वा
संचिनुयुस्ते तथाकृतेन[४] षडहमश्स्थां[५] काङ्क्षेयुरथ मश्स्थिते
षडहे ऽस्थिकुम्भं[५] याचति । तस्मिन्संचितमवधाय तं दक्षिणतो
वेद्यै निधाय सर्पराज्ञिया ऋग्भि स्तुयुरियं[६] वै सर्पतो राज्ञ्यसा
एवैनं परिददति । वृद्धं तदित्याऊर्यत्स्तुतमननुग्रस्तमिति ।
१० होता प्रथमः प्राचीनावीती मार्जालीयं परीयाद्यामीरनुब्रव-
न्सर्पराज्ञीनां[६] कीर्तयेदिति । तेषां तथा परीतानामध्वर्युर्जघन्यः
पर्येत्यथ यज्ञोपवीतं कृत्वा यथेतं त्रिः पुनः प्रतिपरियन्ति । तेषां
तथा परीतानामध्वर्युः पूर्वः पर्येत्यथैनमादायन्तरेण चात्वा-
लोत्करावग्नीनं चास्थिकुम्भं च निधायाङ्गिरवोचत्यप[७] नः
१५ शोशुचदघमिति[७] । तस्मिन्नैचावरणायान्यद्दाग्नृह्यन्त्यथातिग्रिष्टश्
मत्रस्सते । तस्यावभृथवेलायामस्थिकुम्भं निधायाङ्गिरवोचत्येतद्-

---

१ Thus M; ०ग्नीध्रीयेग्र० the other MSS.

२ om. M.

३ Thus M; यद्यहाग० Be, यद्युहाग० the other MSS.

४ कृतेनाषड० M Be.

५ स्थि left out by all exc. M.

६ The passage from दृयं वै unto यामीरनुब्रुवन् left out by all exc. M.

७ ०वोचत्यप BG.

वभृथ ँउ[1] वैवैष[1] भवत्यपि[1] वा[1] यो[1] ऽस्य स्रो[2] नेदिष्ठी स्यात्तस्य स्थाने तं दीक्षयेत्संवत्सरे ऽस्थीनि याजयन्त्यथ[3] वै भवति ॥ २७ ॥

असुर्यं वा एतस्माद्वर्णं कृत्वा पशवो वीर्यमपक्रामन्ति यस्य यूपो विरोहति[4] लाष्ट्रं वज्रूरूपमालभेतेति[4] सक्तिणां चेद्यूपो विरोहेत्संप्रच्छिद्यास्य[5] चषालꣳ सवनीयस्य लाष्ट्रमुपालम्भं कुर्युः ५
रपि वा लाष्ट्रं ब्रह्मौदनꣳ अपयित्वैताः शाखाः प्रवृश्चेयुः प्र वा तक्ष्णुयुरपि वा लाष्ट्रीः स्रुवाञ्छतीर्ङ्कृत्वैताः शाखाः प्रवृश्चेयुः प्र वा तक्ष्णुयुरपि वा लाष्ट्रे[5]लष्ट्र[5] इत्येव[5] ब्रूयादित्यथ वै भवत्यार्ति-मेते नियन्ति येषां दीक्षितानामग्निरुद्वायति[4] यदाहवनीय उद्वायेद्यत्तं मन्येद्विच्छिन्द्याद्वा[4]त्यमस्मै जनयेद्यदाहवनीय उद्वा- १०
येदाग्नीध्रादुद्धरेद्यदाग्नीध्र उद्वायेद्गार्हपत्यादुद्धरेद्यद्गार्हपत्य उद्वा-येदत एव पुनर्मन्येदत्र वाव स निलयते[4] यत्र खलु वै निलीन-मुत्तमं पश्यन्ति तदेनमिच्छन्ति[4] यस्माद्वारोरुद्वायेत्तस्मारणी कुर्यात्क्रमुकमपिकुर्यादिति[4] स यस्माद्वारोरुद्वायति तस्मारणी कृत्वा क्रमुकशकलमन्ववधाय[6] तान्येवावत्तानग्निं संनिधाय मन्थे- १५
दिति[4] स तान्येवावत्तानि संनिधाय मन्थतीतः प्रथमं जज्ञे

---

१ Thus M; उवैवैष भवत्यपिवायो G; उवैष भवति यो U; इवैवैष भवत्यपिवा थो B; उवैषद्यक्तयो Be.

२ All MSS. ins. वा exc. M.

३ याजयत्यथ Be U.

४ Thus MBG; ०क्षेत्तंप्रच्छि० Be.

५ Thus M; लाष्ट्रं लाष्ट्रेत्येव.B; लाष्ट्रलाष्ट्रेत्येव GU, लाष्ट्रेत्येव Be.

६ Thus MU-Be; क्रमुकं० BG; अन्ववधाय MUG Be; अन्वाधाय B.

अग्निः स्वाद्योनेरधि जातवेदाः । स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति । छन्दोभिरेवैनꣳ स्वाद्योनेः प्रजनयतीति ब्राह्मणम् ॥ २८ ॥

अथ यद्याहवनीयगार्हपत्यावुद्वायेयातां गार्हपत्यं मथित्वाग्नीध्रीयादाहवनीयमुद्धरेद्यद्याग्नीध्रीयगार्हपत्यावुद्वायेयातां गार्हपत्यं मथित्वाग्नीध्रीयमुद्धरेदथ यद्याग्नीध्रीयाहवनीयावुद्वायेयातां गार्हपत्यादाग्नीध्रीयमुद्धृत्य तत आहवनीयमुद्धरेदथ यदि सर्व[1] एवोद्वायेयुर्गार्हपत्यं मथित्वाग्नीध्रीयमुद्धृत्य तत आहवनीयमुद्धरेदित्यथ वै भवति गार्हपत्यं मन्थति । गार्हपत्यो वा अग्नेर्योनिः । स्वादेवैनं योनेर्जनयति । नास्मै भ्रातृव्यं जनयतीति ब्राह्मणमथ वै भवति यस्य सोम उपदस्येत्सुवर्णꣳ हिरण्यं दधा विच्छिद्यजींषे ऽन्यदाधूनुयाज्जुह्वयादन्यदिति । स यस्य सोम उपदस्यति तत्सुवर्णꣳ हिरण्यं दधा विच्छिद्यजींषे ऽन्यदाधूनोति मुखे चमसे ऽन्यदवधाय जुहोति । सोममेवाभिषुणोति सोमं जुहोतीति ब्राह्मणमथ वै भवति सोमस्य वा अभिषूयमाणस्य प्रिया तनूरुदक्रामत्तत्सुवर्णꣳ हिरण्यमभवद्यत्सुवर्णꣳ हिरण्यं कुर्वन्ति प्रिययैवैनं तनुवा समर्धयन्तीति ब्राह्मणमथ वै भवति यस्याक्रीतꣳ सोममपहरेयुः क्रीणीयादेव । सैव ततः प्रायश्चित्तिरिति ब्राह्मणमथ वै भवति यस्य क्रीतमपहरेयुरादाराꣳश्च फाल्गुनानि चाभिषुणुयादित्यादाराः चुद्रढणानि[2] ।

---

१ सर्वत M.

२ Thus M, चुक्कढ० the other MSS.

फाल्गुनानि हैमवतानि। तेषामलाभे श्वेतकानां प्रतिनिधि-
र्विज्ञायते द्वतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहर-
त्तस्य पर्णमच्छिद्यत। तत्पर्णोऽभवत्तत्पर्णस्य पर्णत्वमिति।
तस्मात्पर्णत्वरूणामेवाभिषवः[1] कार्य इति। घृतेन प्रातःसवने
श्रीणीयादिति। घृतमेतद्भवति। दध्ना मध्यंदिन इति। दध्ये- ५
तद्भवति। नीतमिश्रेण द्वतीयसवन इति। विमथितꣳ सपि-
लकसुद्भृतं[2] प्राङ्नवनीतभावादित्येतदाचक्षते। अग्निष्टोमः सोमः
स्याद्बृहद्रथंतरसामा। य एवर्त्विजो वृताः स्युस्त एनं याजयेयुरिति।
त एवैनं याजयन्त्येकां गां दक्षिणां दद्यादित्येकां गामच
दक्षिणां ददाति। यदिह दास्यन्भवति तदमुत्र ददाति। पुनः १०
सोमं क्रीणीयाद्यज्ञेनैव तद्यज्ञमिच्छति। सैव ततः प्रायश्चित्ति-
रिति ब्राह्मणम्[3] अथ वै भवति सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः[4]
कामेभ्यः[4] सर्वेभ्य स्तोमेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः पृष्ठेभ्य
आत्मानमागुरते यः सत्रायागुरत। एतावान्खलु वै पुरुषो
यावदस्य वित्तꣳ सर्ववेदसेन यजेतेत्यतिरात्रं विश्वजितमुपयन्त्य- १५
थाच[5] सर्ववेदसं ददाति। सर्वपृष्ठो ऽस्य सोमः स्यात्सर्वाभ्य एव

---

१ Thus M; ०त्वरूणिसेवाभि० BG; ०त्वरूणिश्चेवाभि०. U; त्वरूणि-
ल्वेवाभि० Be.

२ Thus all; are we to read सर्पिस्कम्० ? सपिलकमप्राङ्नवनी० Be U;
सपिलकंसुद्धनकंप्राङ्नवनी० M, but the व seems to be cancelled.

३ om. M

४ सर्व om. M.

देवताभ्यः सर्वेभ्यः कामेभ्यः सर्वेभ्य स्तोमेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निष्क्रीणीत इति ब्राह्मणम् ॥ २९ ॥

पवमानः सुवर्जन इति सौचामण्यामेष भवति । ब्राह्मणमुत्तरमथ वै भवति तस्मादैश्वदेवेन यजमानः संवत्सरीणꣳ स्वस्तिमाशास्त इत्याशासीत । तस्मादरुणप्रघासैर्यजमानः परिवत्सरीणꣳ स्वस्तिमाशास्त इत्याशासीत । तस्मात्साकमेधैर्यजमान इदावत्सरीणꣳ स्वस्तिमाशास्त इत्याशासीत । तस्माच्छुनासीरीयेण यजमानोऽनुवत्सरीणꣳ स्वस्तिमाशास्त इत्याशासीतेत्यथ वै भवत्यग्नेः कृत्तिकाः शुक्रं परस्ताज्ज्योतिरवस्तादिति नक्षत्रेष्टकाभिर्विकल्पन्त इति ब्रुवते । अथ वै भवति यत्पुण्यं नक्षत्रं तद्वङ्कुर्वीतोपवुषमिति[1] । प्रातः कुर्वीत । संगवे कुर्वीत । मध्यंदिने कुर्वीतापराह्णे कुर्वीत । सायं कुर्वीत । यावति तत्र सूर्यो गच्छेद्यत्र जघन्यं पश्येत्तावति कुर्वीत । यत्कारी स्यात्पुण्याह एव कुरुत इति । ब्राह्मणमुत्तरे ब्राह्मणमुत्तरे ॥ ३० ॥ द्वादशः ॥

॥ इति चतुर्दशः प्रश्नः ॥

---

१ Thus M and Bhav.; तद्वट्कु॰ the other MSS.; the text of T. Br. I. 5. 2. 1. has वषट्कुर्वीत but cp. the comm.

[1]अश्वमेधेन यक्ष्यमाणो भवति राजा विजिती सार्वभौमः । स एतद्देवयजनं जोषयत आश्विनं प्रागाश्विनं दक्षिणाश्विनं प्रत्यगाश्विनमुदक् । छिन्दन्ति वृक्षान्म्र स्खलानि भिन्दन्ति प्रति निम्नान्पूरयन्ति किंशारूणि निरस्यति । नदीनां तीर्थानि सर्वतःप्रस्रवणानि पल्वलानि कुर्वन्त्यभ्रंलिहौ मध्यतो देव- यजनस्य जोषयते सशस्राविणावनुपदासिनौ पुण्यनामानौ यद्येवं विन्दन्ति । यद्यु वा एवं न विन्दन्ति खालैनावभिवाह्या- भिर्वाभिहार्याभिर्वाङ्गिः पूरयन्ति । यथा लेव सशस्राविणावनु- पदासिनौ पुण्यनामानौ भवतस्तथा । तावपरेण मध्यतो देव- यजनं जोषयते द्विस्तावद्यथाग्नेर्विधायां । तच्छालां कुर्वन्ति प्राचीनवंशां दिक्षतीकाशां दक्षिणतो वर्षीयसीं । तस्यै दक्षि- णतो ऽश्वशालां कुर्वन्ति । तदश्वत्थानाम्[2] श्लीषाणामवाचीना- ग्राणामश्वव्रजं[3] कुर्वन्त्यथास्यैते संभारा उपकृप्ता भवन्त्यश्वो रूपीयो यो[4] ऽस्य[4] सदश्वानाम् सत्तमस्तस्यान्ये ऽपरिमिता

---

१ As all the MSS., with the exception of M, are mostly very corrupted, the text is given according to M; when the reading of M differs from the reading taken up in the text, this is mentioned; but otherwise the various readings of the other MSS. are, as a rule, not given.

२ तदश्वस्थानं M, but cp. Ap. XX. 7. 7.

३ श्लीषाणाम॰ M; शिशीसुष्याम॰ B Be (pr. m.); शिमष्याम॰ Be (sec. m.); शिशीमद्दसाम॰ U.

४ Thus corrected, cp. infra XV. 8 s. f.; यो om. M; यस्य the other MSS.

निरमणा निरष्टाः कृष्णश्च श्वा चतुरक्षो द्वौ दासावनुजाये च पुत्रो ऽन्वाधेयाये च जरत्पूर्वा चैषीकश्चाभ्यूहः सैध्रकं च मुसलं पौष्णश्चलेयश्च[1] चत्वारि शतानि गोमृणाः शतं तल्पानाः राजपुत्राणाः शतमराज्ञामुग्रमणाः[2] शतः सूतग्रामणीनाः शतं चत्तसंग्रहीढणां चत्वारो महान्त ऋत्विजस्तानन्वितरे[3] तान्काले ऽपदातीन्समावहन्ति ॥ १ ॥

आ सुब्रह्मण्याया[4]स्तृतीयोरापो दिग्भ्यः संभृताश्चतुरः[3]साहस्रान्हिरण्मान्सुवर्णरजतौ च रुक्मौ द्वे अन्ये हिरण्ये द्वौ वीणागाथिनौ ब्राह्मणं च राजन्यं च द्वे रथ्ये मौञ्जीं च कुशमयीं चोभे चयोदग्रारत्नावेतेनोपक्लृप्तेन चित्रामाथतीमुपरमत्यद्य[4] चित्रयेत्यरण्योरग्नीन्समारोह्य शालामभिप्रेति ये ते पन्थानः सवितः पूर्व्यासो ऽरेणवो वितता अन्तरिक्षे। तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहीत्युत्तरेण शालां परीत्य पूर्वया द्वारा शालां प्रपाद्य गार्हपत्यस्यायतने मथित्वाग्नीन्विहृत्य गार्हपत्यमुपतिष्ठते नमो ऽग्नये पृथिविक्षिते लोकस्कृते लोकमस्मै यजमानाय देहीति[1] नमो वायवे

---

१ All MSS. the accus.

२ उग्राणां left out in all the MSS.

३ We would expect here and in the following words also the nomin.

४ Thus M; अथ i.s.o. अद्य all the other MSS.; cp. supra p. 145, 3, and infra XVIII. 8, 16.

ऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहीत्यन्वाहार्य-
पचनं। नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यज-
मानाय देहीत्याहवनीयमधास्तेतत्पुरस्तादेव जघनेनाश्वशाला-
मेकापस्तावं विमितं कारितं भवति। तदृधाग्निमुपसमाधाय
मृत्यवे स्वाहा मृत्यवे स्वाहेति नवतिमाज्ञतीर्जुहोति प्रयासाय ५
स्वाहेत्येकादश। शतायुर्वै पुरुषः शतवीर्य आत्मैकशतो यावा-
नेव पुरुषस्तस्मान्मृत्युमवयजत इति ब्राह्मणमथ केशश्मश्रु वाप-
यित्वा लोमानि संहृत्य नखानि निकृत्य दतो धाव्य स्नाता-
वहते वाससी परिदधाते। उभौ मानुषेणालङ्कारेणालङ्कृतौ
भवतो ऽहतवाससावथाभ्यां व्रतोपायनीयं पाचयति। तस्या- १०
ग्नितौ भवतः सर्पिर्मिश्रस्य पयोमिश्रस्याथापराह्णे मुखयोर्हिरण्ये
अन्वस्येते ॥ २ ॥

सुवर्णं यजमानो रजतं पत्नी रजतानि वा यदि बह्वो
भवन्त्यथास्य वाचंयमस्य सायमग्निहोत्रं जुहोत्युपसंगच्छन्त एन-
मेते राजगृहाः सूतग्रामण्यः[1] क्षत्तसंग्रहीतारः क्षत्तृविशा[2] १५
इति। तेभ्यः षष्टौहीं वेहतं ददाति। तां ते पचमाना रम-
यन्तो जागरयन्त आसते। ऽथ प्रातराचाममाचामन्तो हिरण्ये
प्रोथतस्ते पौंश्चलेय आदत्ते। ऽयादित्यमुद्यन्तमुपतिष्ठन्ते द्रष्टे
नम उपद्रष्टे नमो ऽनुद्रष्टे नमः ख्याते नम उपख्याते नमो
ऽनुख्याते नमः शृण्वते नम उपशृण्वते नमो ऽनुशृण्वते नमः २०

---

१ Thus B; ग्रामण्यः the other MSS.

२ cp. XVIII. 18.

सते नमो ऽसते नमो जाताय नमो जनिष्यमाणाय नमो भूताय नमो भविष्यते नम इत्यथ वैश्वदेवीꣳ सांग्रहणीं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । यावदेवाचाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता चतुष्टयीष्वप्सु ब्रह्मौदनꣳ श्रपयित्वाभिघार्योदङ्मुदासयत्यथैतां पात्रीं निर्णिज्योपस्तीर्य तस्मामेतꣳ रजतꣳ रुक्मं प्रक्षालितमवदधाति । तस्मामेनमसंन्नञ्चिवोद्धरति सर्पिरासेचनं कृत्वा प्रभूतमाज्यमानीयाधोपरिष्टात्सुवर्णꣳ रुक्मं प्रक्षालितमवदधात्यथैतान्महत[1] ऋत्विज[1] उत्तरतो ऽनुदिग्गमुपवेश्य तानानुपूर्वमाचमय्य तेभ्य एनं भूमिꣳ स्पृग्भनुच्छिन्दन्निवोपोदति ॥ ३ ॥

स आह ब्राह्मणाश्च राजानश्चानेन माश्वेन मेध्येन स्वस्ति समापयाता[2] ब्रह्मज्यताया[2] इति । तं तथेतीतरे प्रत्याहरनेन त्वामश्वेन मेध्येन स्वस्ति समापयिष्यामो ब्रह्मज्यताया इत्यथ

---

१ मर्त्विजः M, but cp. supra p. 205. 5.

२ Thus M; समीपयाता the other MSS. I am in doubt whether we ought to read समापयाथाब्रह्मज्यताया (समापयाथ conj.); in this case the avagraha should be read before ब्रह्मज्याताया (line 13); but the following. अथ ब्रह्मज्यतामस्मे संजानते seems to plead against this reading.

३ Thus M; ब्र (or ह्र) ज्यताया all the other MSS.; by this omission of ह्म it is clear that all the MSS., with the exception of M, derive from one common source.

४ This passage left out in all the MSS. exc. M.

ब्रह्मज्यतामस्मै संजानते ऽथैनान्सꣳग्राह्यि सकृत्सकृत्प्राश्याप्रत्यवमृशन्तो धारयाध्वा इत्यथैतस्मिन्सर्पिरासेचने रशने संतर्प्य परिकर्मिणे प्रयच्छति द्विरपरं प्राश्य प्रमृꣳसन्ति राद्धस्ते ब्रह्मौदन इति[१] तेभ्यश्चतुरः साहस्राञ्छिष्कान्ददाति सुवर्णरजतौ च रुक्मौ च ये चास्याभिषेक्तारस्ते ऽध्वर्युमभिषिञ्चन्ति ५
स आह ब्राह्मणाश्च राजानश्चाध्वर्युरेतौ द्वौ संवत्सरौ राजा भविष्यति तस्य शुश्रूषध्वं यो ह्यस्य[२] न शुश्रूषिष्यते सर्वꣳ तं[३] ज्यास्यन्तीत्यथाध्वर्युरेतौ द्वौ संवत्सरौ राजा भवति यजमान इतीतरमाचक्षते स आह ब्रह्मन्नꣳ मेध्यं भन्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति बधानेतीतरः प्रत्याह देवेभ्यः १०
प्रजापतये तेन राध्नुहीति ॥ ४ ॥ प्रथमः ॥

अथ रशनामादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्यादायाभिमन्त्रयत इमामगृभ्णन्रशनामृतस्येति तयाश्वमभिदधात्यभिधा असि भुवनमसि यन्तासि धर्तासि सो ऽग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः १५
पृथिव्यां यन्ता राड् यन्तासि यमनो धर्तासि धरुण इत्येवमेव द्वितीयाꣳ रशनामादत्ते तयैवमेवाश्वमभिदधाति ते अश्वस्यानुपृष्ठमनुपृणक्त्येतस्मिन्काले ऽनुजायै च पुत्रो ऽन्वाधेयायै च स्वबन्धाभ्याꣳ स्थानमभिधत्तो ऽथैष पौꣳस्नेयो जरत्पूर्वया

---

१ This passage ( cp. 207. 12 ) left out in all the MSS. exc. M.

२ ह om. M.

३ तत् Be, न M, UB om. this passage.

सव्यं जानु वेष्टयित्वा सैप्रकेण सुश्लेन श्वानमनूपतिष्ठते । ऽध्वर्युः पुरस्तात्प्रतिपद्यते सह व्रतेन तस्यानाः राजपुत्राणां । ब्रह्मा दक्षिणतः सह व्रतेनाराज्ञामुग्राणाः । होता पश्चात्सह व्रतेन सूतग्रामणीनामुद्गातोत्तरतः सह व्रतेन चत्तसंग्रहीतृणां । मध्ये ऽस्वः श्वा चाथ दक्षिणः हृदमभिप्रयान्ति । द्यौस्ते पृष्ठं क्रमैरत्यक्रमीद्व्याघ्राव्याघ्रावाजीति चिभिरनुवाकैरा क्रोडादश्वमभिधावयन्ति[1] । तमध्वर्युः पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्प्रोचत्यनेनाश्वेन मेध्येनेष्टायः राजा वृत्रं वध्यादिति । तस्यानु प्रोचणः व्रतं तस्या राजपुत्राः प्रोचन्ति । ब्रह्मा दक्षिणत उदङ्मुखस्तिष्ठन्प्रोचत्यनेनाश्वेन मेध्येनेष्टायः राजाप्रतिधृष्यो ऽस्त्विति । तस्यानु प्रोचणः व्रतमराजान उग्राः प्रोचन्ति । होता पश्चात्प्राङ्मुखस्तिष्ठन्प्रोचत्यनेनाश्वेन मेध्येनेष्टायः राजास्यै विशो वज्रमै वज्रायै वज्रजाविकायै वज्रव्रीहियवायै वज्रमाषतिलायै वज्रहिरण्यायै वज्रहस्तिकायै वज्रदासपुरुषायै रयिमत्यै पुष्टिमत्यै वज्रराय-
स्पोषायै वज्रसर्वधनायै राजास्त्विति । तस्यानु प्रोचणः व्रतः सूतग्रामण्यः[2] प्रोचन्त्युद्गातोत्तरतो दक्षिणामुखस्तिष्ठन्प्रोचत्यनेनाश्वेन मेध्येनेष्टायः राजा सर्वमायुरेत्विति । तस्यानु प्रोचणः व्रतं चत्तसंग्रहीतारः प्रोचन्ति । दिग्भ्यो ऽस्वः समुचन्तीति ब्राह्मणमथास्यैष पौःस्नलेयः सः ग्निष्टो भवति यदा लोपमी-

---

१ ०धापयंति M.

२ Thus BU; ०ण्यः M Bc.

वाम्यथ शुनः प्रहराभीत्युपसीवत एष पौश्चलेयः सैप्रकेण मुसलेन शुनः प्रहन्ति तमत एवानुमन्त्रयते ॥ ५ ॥

यो अर्वन्तं जिघाꣳसति तमभ्यमीति वरुण इति तमस्यास्याधस्पदमुपास्य दक्षिणापक्षावयति परो मर्तः परः श्वेत्यथास्य ब्रह्मा हस्तं गृह्णाति ब्रह्मणो वा यजमानो ऽहं च त्वं च वृत्रहन्त्संबभूव सनिभ्य आ। अरातीवा चिदद्रिवो ऽनु नौ शूर मꣳसते भद्रा इन्द्रस्य रातय इत्यैतमेषीकमभ्यूहं मौञ्जीभ्याꣳ रज्जुभ्यामन्तयोरभिदधाति तत्सह वेतसशाखोपसंबद्धा भवति तदेतेन शतं तल्या राजपुत्रा विविच्यन्ते तेषामनु विवेकमितरे द्वे अन्यतरमन्तꣳ शते गृह्णीतो द्वे अन्यतरमन्तꣳ शते अथैनान्मुꣳग्राख्यनेनैषीकेणाभ्यूहेनाभ्युदूहन्[1] इव पुरस्तात्प्रत्यञ्चमूर्मिणाश्वमभिधावयाता[2] इत्यभिधाव्यमाने[3] ऽध्वर्युर्यजमानं वाचयत्यभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानꣳ रजाꣳसि। स्वेना हि वृत्रꣳ शवसा जघन्थ न शत्रुरन्तं विविदद्युधा त इत्यैनꣳ संवेश्य दक्षिणापक्षावयत्यैतमश्वं प्रदक्षिणमावर्त्य ग्राह्यमानयति यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम्। एतꣳ स्तोतरेतेन पथा पुनर-

---

१ ॰भूहंत MSS. exc. M.

२ ॰भिधापयाता M; ॰धावर्धता the other MSS.; if अभिधावयाता is the correct reading we have here a form of the same kind as समापयाता (supra p. 207, 12).

३ ॰धाव्यमाने again M.

श्वमावर्तयामि न इति । तमध्वर्युः पूर्वाभि स्तोकीयाभिरन्वेत्य-
ग्नये स्वाहा सोमाय स्वाहेत्येतेनानुवाकेन पुनःपुनरभ्युपाकारं
यावदस्य स्तोका उपरमन्त्यथैतमश्वमग्रेण शालां प्राञ्चं स्थाप-
यित्वा प्रपद्याश्वस्य सावित्राणि जुहोत्यग्नये स्वाहा वायवे
५ स्वाहेति सवित्रे सावित्रमष्टाकपालं प्रातर्निर्वपत्यासाद्य पुरस्ता-
द्भागाजुहोत्यग्नये स्वाहा स्वाहेन्द्राग्निभ्यामिति पञ्च पुरस्ता-
त्स्विष्टकृतस्त्रयोऽग्नीतिमश्वचरितान्युपजुहोतीङ्काराय स्वाहेङ्क-
ताय स्वाहेत्यसमुदिते त्र्योदश प्रद्रावाजुहोत्याथनाय स्वाहा
प्रायणाय स्वाहेति । सा प्रसिद्धेष्टिः संतिष्ठते । अथैतमश्व
१० प्रदक्षिणमावर्त्य पूर्वया द्वारा शालां प्रपद्यान्तर्वेदि प्राञ्चं
स्थापयित्वाह ॥ ६ ॥

यद्वा इदमाहुः पदेपदे ह वा अश्वस्य मेध्यस्याध्वर्युर्जुहो-
तीहैव वयं तद्धोष्यामो यथा नः पदेपदे हुतं भविष्यतीति ।
तस्य पत्सु धृतीर्जुहोत्यच्छण्णा वा पर्यारिणीर्वेह धृतिः स्वाहेह
१५ विधृतिः स्वाहेहंरन्तिः स्वाहेह रमतिः स्वाहेत्यथैनं प्राञ्चमु-
त्क्रामय्य प्रोक्षति प्रजापतये त्वेति पुरस्तादिन्द्राग्निभ्यां त्वेति
दक्षिणतो वायवे त्वेति पश्चादिश्वेभ्यस्त्वा देवेभ्य इत्युत्तरतो
देवेभ्यस्त्वेत्यधस्तात्सर्वेभ्यस्त्वा देवेभ्य इत्युपरिष्टादथैनमतिप्रोक्षेण
प्रोक्षति क्ष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै
२० त्वान्तरिक्षाय त्वा दिवे त्वा सते त्वासते त्वाद्भ्यस्त्वौषधीभ्यस्त्वा

---

१ ॰भामाजुहो॰ M. २ प्रद्रवां MSS., but cp. infra 214, 9.

विश्वेभ्यस्त्वा भूतेभ्य इत्यथास्य[1] रूपाणि जुहोत्यङ्क्ष्येताय स्वाहा-ञ्जिसक्थाय स्वाहा कृष्णाय स्वाहा श्वेताय स्वाहेत्येताभ्यामनुवाकाभ्याम्। अथास्योपोत्थायाश्वनामभिर्दक्षिणं कर्णमाजपति विभूर्मात्रा प्रभूः पित्राश्वो ऽसि हयो ऽस्यत्यो ऽसि नरो ऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि ययुर्नामासीत्यथैनमुपतिष्ठत आदित्यानां पत्वान्विहीत्यथैनꣳ रश्मनाभ्यामुत्सृजति भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्य इत्यथैनं देवताभ्यः परिददाति देवा आज्ञापयतेत्यचाक्षा एतानपरिमितान्निरमणान्निरष्टानुपावसृजन्त्यथैनमेतानि चत्वारि शतानि गोप्तृणामनुयुञ्जते प्रास्तकवचा वितताधिरूढा यथा युद्धाय तथा[2]। तेभ्यः पक्वाग्रनं प्रयौति[3]॥ ७॥

स आह ब्राह्मणाश्च राजानश्च यस्येमे पक्वाग्रनमुपावहरिष्यन्ते मयाप्रसूता मोपवादिष्टेति। स आह ब्राह्मणाश्च राजानश्च बहिर्देवयजनाद्वाहनं व्युदचध्वं यस्यायं वडवाभिः सꣳसृज्यते सर्वꣳ तं ज्यास्यन्तीति। ते बहिर्देवयजनाद्वाहनं व्युदचन्ते[3]। ऽश्वैश्चैव साण्डैश्चरन्त्यश्वतरैश्च। न वडवाभिर्ना-

---

१ The passage अथास्य up to श्वेताय स्वाहेत्येताभ्यामनुवाकाभ्याम् left out in all exc. M.

२ Thus M, which, however, omits तथा; all the other MSS. are wholly corrupted.

३ Thus M; व्यदचंति Be; व्युदंचंति U; व्युदंचं B.

पशवः संतिष्ठन्ते । ऽथापराह्णे सविच आसविचे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ पौर्णमासवैरूपाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । ऽथैतौ वीणागाथिनावतिप्रगृह्णीतो । ऽथैष राजन्यो वीणागाथी गायतीत्यजिना दृत्यघुष्या दृत्यसुरं संग्राममहन्नित्येवं मिश्राखिस्रो गाथाः । प्रातरग्निहोत्रे हुते ब्राह्मणो वीणागाथी गायति सायमग्निहोत्रे हुते राजन्यस्तावेवमेव संवत्सरं गायतो । ऽथ सावित्रमष्टाकपालं प्रातर्निर्वपत्यासाद्य पुरस्ताद्वागाज्जुहोत्यसमुदिते[1] धृतीश्च जुहोति प्रद्रावाꣳश्च[2] जुहोति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ मध्यंदिने सविचे प्रसविचे पुरोडाशमेकादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथापराह्णे सविच आसविचे द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ श्वो भूते सावित्रीभिरेव प्रतिपद्यते । स एवमेव सावित्रीभिरहरहर्यजमानश्चतुरो मास एति काममिष्ट्वा कामं पशुबन्धेन कामं यवाग्वयणेनार्थं चतुर्षु मासेषु पर्यवेतेषु सावित्र्येष्ट्वा वरुणप्रघासान्पशूनालभन्ते ॥ ६ ॥

तेषां पशुपुरोडाशानानुवर्तन्ते वरुणप्रघासहवीꣳषि । वरुणप्रघासहवीꣳषि वैवैषां पशुपुरोडाशा भवन्ति । तानानुवर्तते मध्यमा सावित्री । प्रसिद्धाः पशवः संतिष्ठन्ते । ऽथापराह्णे

---

१ ०ताद्वागाजुहो० M as above, p. 211, 6.

२ Thus M; प्रद्रवांश्च the other MSS.; the value of the word is उद्द्रावः ।

सविच आसविचे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । अथ पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धिं निवर्तयते । अथ श्वो भूते सावित्रीभिरेव प्रतिपद्यते । स एवमेव सावित्रीभिरहरहर्यजमानो ऽपराऽऋतुरो मास एति ५ काममिष्ट्वा कामं पशुबन्धेन कामꣳ श्यामाकाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु पौर्णमास्या उपवसथ आनीकवतं पशुमालभते । तस्य पशुपुरोडाशमनुवर्तत आनीकवतꣳ हविरानीकवतो वैवास्य पशुपुरोडाशो भवति । तमनुवर्तते प्रथमा सावित्री । प्रसिद्धः पशुः संतिष्ठते । अथ मध्यंदिने १० सांतपनं पशुमालभते । तस्य पशुपुरोडाशमनुवर्तते सांतपनꣳ हविः । सांतपनो वैवास्य पशुपुरोडाशो भवति । तमनुवर्तते मध्यमा सावित्री । प्रसिद्धः पशुः संतिष्ठते । अथापराह्णे सविच आसविचे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । अथ सायं गृहमेधीयेन चरत्यथापरराचे पूर्णदर्व्या[1] १५ चरत्यथ प्रातः क्रैडिनं पशुमालभते । तस्य पशुपुरोडाशमनुवर्तते क्रैडिनꣳ हविः । क्रैडिनो वैवास्य पशुपुरोडाशो भवति । तमनुवर्तते प्रथमा सावित्री । प्रसिद्धः पशुः संतिष्ठते । अथ मध्यंदिने साकमेधान्पशूनालभन्ते[2] । ॥ १० ॥

---

१ पूर्णदर्वेण all, but cp. vol. I, p. 142. 5 ; Āp. has also पूर्णदर्व्य, but the Śat. Br. पूर्णदर्व ; the word occurs again xvii. 57 and in the Dvaidha ; Bhav. in his comm. on the latter has दर्व।

२ लभंवे MU Be ; लभवे B

तेषां पशुपुरोडाशानानुवर्तन्ते महाहवीꣳषि । महाहवीꣳषि वैवैषां पशुपुरोडाशा भवन्ति । तानानुवर्तते मध्यमा सावित्री । प्रसिद्धाः पशवः संतिष्ठन्ते । ऽथापराह्णे पित्र्यज्ञेन चरति । पित्र्यज्ञेन चरित्वा वैयम्बकैश्चरति । वैयम्बकैश्चरित्वादित्यं पशुमालभते । तस्य पशुपुरोडाशमनुवर्तत आदित्यꣳ हविरादित्यो वैवास्य पशुपुरोडाशो भवति । तमनुवर्तत उत्तमा सावित्री । प्रसिद्धः पशुः संतिष्ठते । ऽथ पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । ऽथ श्वो भूते सावित्रीभिरेव प्रतिपद्यते । स एवमेव सावित्रीभिरहरहर्यजमानो ऽर्धचतुर्थान्मास एति काममिष्ट्वा कामं पशुबन्धेन कामं प्रौढ्याग्रयणेनाथामावास्याया उपवसथीये ऽहन्सावित्र्येष्ट्वाग्निकानि सावित्राणि ऋत्वोखाः संभृत्य पशुग्रीर्षाणि च वाचयं पशुमालभते[१] । तस्य प्राजापत्यस्थूपर उपालम्भ्यो भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । तावनुवर्तते मध्यमा सावित्री । प्रसिद्धौ पशू संतिष्ठेते । अथापराह्णे सवित्र आसवित्रे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ श्वो भूते सावित्रीभिरेव प्रतिपद्यते । स एवमेव सावित्रीभिरहरहर्यजमान एतमर्धमासमेति काममिष्ट्वा कामं पशुबन्धेनाथ चतुर्षु मासेषु पर्यवेतेषु सावित्र्येष्ट्वा ॥ ११ ॥

शुनासीरीयाꣳश्शूनालभन्ते[२] । तेषां पशुपुरोडाशानानुवर्तन्ते शुनासीरीयहवीꣳषि । शुनासीरीयहवीꣳषि वैवैषां पशु-

---

२ °लभंते M, °लभते the other MSS.

पुरोडाशा भवन्ति । ताननुवर्तते मध्यमा सावित्री । प्रसिद्धाः पशवः संतिष्ठन्ते । ऽथापराह्णे सवित्र आसवित्रे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ पौर्ण-
५ मासवैष्णवाभ्यामिष्ट्वा यजमानायतन उपविश्य चेष्ण्या ग्रस्त्या लोहितायसस्य च क्षुरेण ग्रीवर्षन्नि च वर्तयते परि च वपते पुरस्तादेवाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽधोपरिष्टात्संतिष्ठन्ते चातुर्मास्याः पशवः संतिष्ठन्ते सावित्र्यः ।

॥ १२ ॥ तृतीयः ॥

१० अथाश्वगाव्यायामश्वं निगृह्णन्त्यथैनं तीर्थादानीय पवयित्वा चिहविषमग्नीदीक्षणीयामिष्टिं निर्वपति । तस्यै तावन्त्युत्सीदन्ति यावन्ति दीक्षणीयायाः । अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङावृत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य त्रीणि पूर्वाणि वैश्वदेवानि जुहोति स्वाहाधिमाधीताय स्वाहेत्यथ
१५ सप्त प्राणाञ्ऋतूंर्जुहोति प्राणाय स्वाहा व्यानाय स्वाहेत्येकविंशतिमग्नीं दीक्षां जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति । पञ्चाध्वरदीक्षाञ्ऋतूंर्जुहोति[1] षडग्निदीक्षा एकामृतुदीक्षां ध्रुवो देवानां कर्मणेति । सप्ताहान्येतयेष्ट्या यजत इति । स त्रीणि-त्रीण्येव पूर्वाणि वैश्वदेवानि जुहोत्युत्तरामुत्तरामृतुदीक्षां ।
२० द्वे[2] अन्तत[2] ऋतुदीक्षे[2] जुहोति महीमू षु सुचामाणमित्येतदे-

---

१ Thus M, ०दीक्षाञ्जुहोति the other MSS.

२ Thus M, तेद्वेनटेक्रतु० Be, वेद्वनटक्रतु० U, तेद्वनद्रतु० B.

वाहदींचते ' संवत्सरमुख्यं[1] विभर्ति ' द्वादशोपसदो ' ऽथैनमेता यथान्नातं विशः पर्यवस्यन्ति ' नेदीय एनमेते[2] कर्मकृत उपसंगच्छन्ते तक्षाणश्च रथकृतश्च[3] मयकृतश्च[3] कुलालाश्च द्वयाः कर्मारा नखकृतः सप्तमे ' ऽथैताभ्यस्तनूः संभ्रियते ॥ १३ ॥

एकशतं वैल्वानि द्वार्वाचितानि छिन्दन्ति[4] तानि प्रवक्लानि ५
कृत्वाचार्य[5] चितुतैकविंशतिं यूपाञ्छिन्दतैकविंशत्यरत्नीन्[6] राज्ञुदालमग्निष्ठं पौतुद्रवावुपस्थावानौ षड् वैल्वान् षट् खादिरान् षट् पालाशान्यालाशमुपशयं पालाशं पालीवतं पालाशं विशालयूपमेकतयानि दारुमयाणि पात्राणि कुरुत षट्त्रिंशतं स्रुवान्दीर्घदण्डान् षट्त्रिंशतमनुवेषान्दीर्घदण्डांश्चतुरः[7] वाष्टौ वेन्द्राणमानि चतुश्चक्राणि वृहच्चक्राणि यथा समानि यूपाग्रैः क्षुरपरिमितान्यारोहणमहानसानि कुरुतैकं वैतसं कटं कुरुताश्वस्योपस्मरणायेत्यथैताभ्यस्तनूः संभ्रियते १०

---

१ °मुखां M.

२ एवमेवे M.

३ °कृताश्चमयस्क्र° M; °कृताश्चायस्क्र° Be; the other MSS. are defective; cp. infra 219, 1.

४ Thus M (we expect छिन्न), छिंदंति the other MSS.

५ Uncertain; कृत्वारचार्यां M, कृत्वावयायं BU; कृत्वावंचार्यं Be (pr. m.), कृत्वाचार्यं Be (sec. m.?); cp. infra xv. 19 (223, 19).

६ Thus M, °त्यरलिं the other MSS.

७ Thus (only °वेषां) M; षट्त्रिंशतं दर्वीं दीर्घदंडाश्च° UBe; B om. these words. What is meant by अनुवेष I do not see. Read perhaps °शतं दर्वीर्दीर्घदण्डाश्च°; cp. p. 224 8.

स्वरथं कुरुतापरिमितान्वधान्कुरुतेत्यथैतान्मयस्कृतः सꣳग्राह्य-
परिमितं चर्मण्यं कुरुतेत्यथैनान्कुलालान्सꣳग्राहि यथैकविꣳ-
शतिविधायाग्नय एवमिष्टकाः कुरुत तिस्रो महतीः कुभीः
कुरुत यथाश्वं तूपरं गोमृगमित्येतान्साङ्गाञ्क्रपयेयुरपरिमिता
५ स्थालीः कुरुतेति ॥ १४ ॥

अथैतान्कालायसकृतः सꣳग्राहि सायकं कुरुत सित्तिमं-
कल्पोदकं[1] कृष्णं कृष्णात्मरूꣳ सुवर्णꣳ सुवर्णात्मरं चतुरः कालाय-
सान्लोहायसात्मरूꣳश्चतुरो लोहायसान्कालायसात्मरून्षट्चिꣳ-
शतꣳ सुवर्णाच्जतात्मरून् षट्चिꣳशतꣳ रजतान्सुवर्णात्मरूꣳ-
१० स्त्रीणि च शतानि चयस्त्रिꣳशतं च सौवर्णानाꣳ सूचीनां
त्रीणि च शतानि चयस्त्रिꣳशतं च राजतानां त्रीणि च
शतानि चयस्त्रिꣳशतं च सीसानामेकं कालायसस्य कमण्डलुं
कुरुताश्वतेजन्ये अपणायेत्यथैतान्सुवर्णकृतः सꣳग्राहि परःशतꣳ
शतपलान्निष्कान्कुरुत सुवर्णरजते महिम्नोः पात्रे कुरुतैकत-
१५ यानि सौवर्णानि पात्राणि कुरुत यावत्यः पल्लयस्तावतः[2]
सौवर्णानुपशयान्कुरुत रजतग्रन्थीन्राजतान्वा सुवर्णग्रन्थीन्यावत्यः
पल्लयस्तावन्ति[3] सौवर्णानि कुम्भकुरीराणि कुरुत रजतशङ्कूनि
राजतानि वा सुवर्णशङ्कूनि यावत्यः पल्लयस्तावतः[4] सौवर्णान्क-

---

१ I have simply accepted the reading of M; if it is correct, I do not see; सत्तिमगुल्फोदकं Be B, सत्तिमगल्फादकं U.

२ पल्ल्यः MSS., but cp. Āp. xx. 157 and infra.

३ पल्ल्य० MBU; पलय० Be.

४ पल्ल्य० all.

मण्डलून्कुरुत रजतराखान्राजताञ्चा सुवर्णराखानेकꣳ सौवर्णं विधवनं कुरुत त्रीणि सौवर्णानि धवित्राणि कुरुत रजतदण्डानि राजतानि वा सुवर्णदण्डानि सहस्रꣳ सौवर्णाञ्काञ्चाञ्कुरुत सहस्रꣳ राजताञ्सहस्रꣳ सामुद्रान्हिरण्मयं कमण्डलुं[1] हिरण्मयं[2] षड्बीशꣳ[2] हिरण्मयꣳ[2] संदानमिति[3] ॥ १५ ॥ ५

अथैताञ्चखलक्तः[3] सꣳग्राह्यपरिमितान्यष्टमानि कुरुतेत्यथास्तैतान्यन्यान्युपकॢप्तानि भवन्ति शतं घृतचर्माणि शतं मधुचर्माणि शतं तण्डुलचर्माणि शतं पृथुकचर्माणि शतं लाजाचर्माणि शतं करम्भचर्माणि शतं धानाचर्माणि शतꣳ सक्तुचर्माणि शतं मसूरचर्माणि शतं प्रियङ्गुतण्डुलचर्माणीत्यथास्तै एक- १०
विꣳशतिः प्रतिप्रस्थातारः सꣳश्रिष्टा भवन्त्यात्मना द्वाविꣳशस्ते[4] जनपदेभ्यः पशून्समचन्ति[5] तथारूपान्यथारूपाꣳस्ते विदुर्ग्रामेषु ग्राम्यान्वन्यरण्य आरण्यान्गिरिषु गैरेयान्नदीषु नादेयान्यञ्जरेषु वयाꣳसि कुम्भीषु भरीसृपानिति ॥ १६ ॥ चतुर्थः ॥

प्रसिद्धः[6] संनिवापो ऽथ प्रायणीयेन चरति प्रायणीय- १५
येन चरित्वा पदेन चरति पदेन चरित्वार्षभे चर्मन्सहस्रेण

---

१ °पुं M.

२ Thus M; हिरण्मयं चिंशंहिरण्मयं संदानानीति BU. Be (pr. m.); हिरण्मयमुपबर्हणं षट्चिंशं हिरण्मयं संदानानीति Be (sec. m.).

३ Thus M; °तान्खलक्तः the other MSS.

४ °विंशतिस्ते M.

५ Thus M; समवंति the other MSS.

६ प्रसिद्ध M.

राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्याथान्वहं प्रवर्ग्यो-पसद्भ्यां प्रचरति । द्वादशाह एवैष । एकविंशतिविधो ऽग्नि-र्निष्टीयते । तस्यैकविंशतिच्छदिः सदो भवत्यथाहवनीयं प्रणयत्याहवनीयं प्रणीय सदोहविर्धाने संमिनोति । सदोह-विर्धाने संमित्याग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्यावृता यूपमुच्छ्रयति । स्वर्वन्तꣳ राज्जुदालमग्निष्टसुत्सृज्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा वसतीवरी-र्गृह्यात्यथ पशुपुरोडाशं निर्वपति । तमनुवर्तन्ते ऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये गृहपतय इत्येतान्यग्नये गायत्रायेत्येषा च दग्रहविरिष्टिस्तस्या एता याज्यापुरोनुवाक्या भवन्ति समिद्धि-श्चामाग्नया नः सुवर्विदितीडान्ताः पशुपुरोडाशाः संतिष्ठन्ते । पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके । ऽथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्त्यथातो महाराज एव बुध्यन्ते । समानं कर्मा परिधीनां[२] परिधानात्परिधिष्वनुवर्तयति कस्त्वा युनक्ति स त्वा युनक्तिति षण्मध्यमे षड् दक्षिणार्धे पञ्चोत्तरार्धे । ऽथ राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यद्भिरदेत्यग्निष्टोमं क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा पवमानात्पवमानꣳ स्वण्यन्याचति बर्हिस्तृणपक्षं चाथाहोद्गात-

---

१ अग्नये गृ० इत्येतानि om. M.

२ परिधि M.

र्वर्हिश्च ते ग्रतपलं चाश्वो म उद्गाद्यत्विति । ते ऽश्वस्य वालधिꣳ समन्वारभन्ते ऽग्निस्ते वाजिन्नुङ्क्तु त्वारभे स्वस्ति मा संपारय वायुस्ते वाजिन्नुङ्क्तु त्वारभे स्वस्ति मा संपारयादित्यस्ते वाजिन्नुङ्क्तु त्वारभे स्वस्ति मा संपारयेत्यथोदञ्चो ऽभि[1] पवमानꣳ सर्पन्त्युत्तरत एष वडबाव्रज उच्छ्राय्या परिश्रितो भवति । तं ५ विदूषन्त्यभ्यश्वं वडबाः क्रन्दन्त्यभ्यश्वो वडबाः क्रन्दति । सो ऽश्वस्योद्गीथस्तत्पुण्या वाचः संप्रवदन्ति ॥ १७ ॥

उदगाशीदा अयमश्वो मेध्य आयुरुदगासीदसुभूतमुदगासीद्ब्रह्मवर्चसमुदगासीदिदमुदगमीदिदमुदगासीदिति पुण्या वाचः संप्रवदन्त्यसृजन्ति वडबा । अश्वग्राव्णायमश्वं निगृह्णन्त्यश्वाम्ना १० आसुकुम्निकमन्नमुपकिरन्त्यथाहोद्गातर्धेनुग्रतं[2] च ते ग्रतपलं च त्वं म उद्गायेति । तस्य चतसृषु बर्हिष्यवमानो[3] ऽष्टाखष्टाखाज्यानि[3] । द्वादशो माध्यंदिनः पवमानः । षोडशानि पृष्ठानि । सविꣳशः[4] आर्भवः[4] पवमानस्तुर्विꣳशमग्निष्टोमसाम । तं चतुष्टोम इत्याचक्षते । समानं कर्माग्निनाङ्गिरादाग्निनं ग्रहं १५ ग्रहीष्यन्नेकादश रशना आदाय यूपमभ्येति । स्वर्वन्तꣳ राज्ञुदा-

---

१ भि all.

२ Thus (आसुकुम्निकमंनसु०) M; आकुकमंडिनसु० the other MSS.

३ Thus corrected, cp infra xviii. 34 and Śat. Br. xiii 5 1. 1. ०पवमानोष्टाष्टा न्याज्यानि, with खा above the lacuna, M, पवमानेष्टाष्टान्याज्यानि BU; ०पवमानोऽष्टाष्टान्याज्यानि Be.

४ Thus M; संविंशतिरार्भवः BU; विंशतिरार्भवः Be; cp. infra l.c.

लमग्निष्टसुत्सृज्यैकादशिनान्यशूलुपाकरोति । तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय । तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि हुत्वाष्टौ संवर्गाङ्कृतीर्जुहोत्यर्वाङ् यज्ञः संक्रामतिति । हृतीयं दक्षिणानां ददाति । वैश्वकर्मणानि हुत्वा नव पर्याग्नीर्जुहोति भूतं भव्यं भविष्यदिति । नाचाम्यभिषेको । ऽहीनसंततिं करोत्यृजुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति हृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । समानं कर्मा पवमानात्यवमानेन चरित्वा स्वे धामन्पशुभिश्चरति[१] । तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वसाहोमाः समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिग्गो । नाना दिग्ग इत्येके । समानं कर्मा पत्नीसंयाजेभ्य । उपकाग्र एवैषो ऽग्निष्टोमश्चतुष्टोमः संतिष्ठते पत्नीसंयाजान्तः । ॥ १८ ॥ पञ्चमः ॥

अथास्यैतानि घृतमौचाणि चर्माण्युपस्तीर्णानि भवन्युत्तराꣳ श्रोणिमुत्तरेण पक्षसꣳहितान्यथैतेषां घृतचर्मणां विꣳशतिं वा चतुर्विꣳशतिं वापोद्धृत्याधेतरैरन्नानि संप्रयुवन्त्यथैतेषां दार्वाचितानां विꣳशतिं वा चतुर्विꣳशतिं वा मध्ये ऽग्नेरचार्य[२]

---

१ चरंति M.

२ Thus M. ग्नेरचार्यं BU ग्नराचम Be.

चित्वाथेतराणि[1] संछिद्यसंछिद्यैव संप्रकिरन्ति । तदेतां चतुरश्रां देवपुरमध्यात्ममायातयत्यपि वा पक्षपुच्छानभिनिरूहति[2] यथा समावती यूपाग्रैः स्यादथैनाꣳ[3] समुच्छ्रित्य[3] परिश्रयन्ति । तस्योदीचीं द्वारं कुर्वन्ति । तदेतानीन्द्राणसान्युपवर्तयन्ति चत्वार्यनुदिशमवान्तरदिशास्तिराणि यद्यष्टौ भवन्ति । तेषां चत्वारश्चत्वार एकैकमधिरोहन्ति दशान्ये राचिकर्मिणो । ऽथैभ्य स्थालीभिराज्यान्यभिहरन्त्यष्टमैरन्नान्यथाध्वर्युरादत्ते[4] स्रुवं च दीर्घदण्डं दर्विं[5] च दीर्घदण्डामाददत एकविꣳशतिं[6] प्रतिप्रस्थातारो दशान्ये राचिकर्मिणो । ऽथाध्वर्युः स्रुवेणाज्यस्योपहत्य चीणि पूर्वाणि वैश्वदेवानि जुहोति । स्वाहाधिमाधीताय स्वाहेति स्रुवेरेवाज्यानां जुक्षति दलते स्वाहेति दर्वैरन्नानामदन्तकाय स्वाहेति । त एवमेवैतमनुवाकं । यदेतस्यानुवाकस्य पारं यन्त्यथैतेनानुवाकेन व्यवदधाति ॥ १९ ॥

पूर्वा श्लोकीया अथैतमनुवाकं दिक्षा । अथैतमनुवाकमुत्तरा श्लोकीया अथैतमनुवाकमेकविꣳशिनीं[7] दीक्षामथैतमनुवाकमृतुदीक्षा अथैतमनुवाकमश्वस्य सावित्राण्यथैतमनुवाकं ।

---

१ छित्वा० M.

२ Thus M; ०पुक्षनामभिनिरूहति Be; ०पुक्षानामभिनिरूहनंति U; ०पुक्षनामभिर्निरूहणंति B.

३ ०थैनांत्समु० Be.

४ ०ष्टौमैरंनान्य० M, but cp supra p. 220, 6.

५ Thus MBU; दर्वीं Be.

६ Thus M, ०प्रतिः Be, ०प्रति BU.

त एवमेवैतानन्वाकानेतेनैवानुवाकेन । यदैतेषामनुवाकानां पारं यन्त्यथैतानन्वाकानुपसंक्रामन्ति वैश्वदेवानि चाश्वाङ्गानि च द्वावश्वरूपाणामोषधीनां च वनस्पतीनां च द्वावपाꣳ संधानानां चाभिधानानां च संज्ञवस्थैक । उक्तः खारीहोमस्त एवमेवैतानन्वाकानेतेनैवानुवाकेन । यदैतेषामनुवाकानां पारं यन्त्यथैतानन्वाकानभिनिवर्तन्ते ॥ २० ॥

एकस्मै स्वाहा द्वाभ्याꣳ स्वाहेति । त एवमेवैतानन्वाकानेतेनैवानुवाकेन पुनःपुनरभ्युपाकारं जुह्वत्यथ वसतीवरीणां परिहरणकाले ऽधिद्रवन्ति । परिहृतासु वसतीवरीष्वाह्वताꣳ सुब्रह्मण्यायां पुनरेवाधिद्रवन्ति । त एवमेवैतानन्वाकानेतेनैवानुवाकेन पुनःपुनरभ्युपाकारं जुह्वतः समाप्नुवन्ति । तानि वा एतान्यश्वस्य सर्वायुषाणीत्याचक्षते । ॥ २१ ॥

समाप्तय इति हैक आहुरेतर्हि सर्वाꣳ रात्रिं जुह्वत्यथ प्रातरनुवाकमुपाकरिष्यन्नावद्रवतो ऽध्वर्युश्च प्रतिप्रस्थाता च द्वावन्यावधिद्रवतो रात्रिकर्मिणावथ[1] राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यङ्गिरदैत्युक्थ्यं[2] क्रतुमुपैति । समानं कर्मोपाꣳशोरुपाꣳशुꣳ होष्यन्निन्द्राणसमधिद्रुत्य चतस्रः स्रुवाहुतीर्जुहोत्युषसे स्वाहा व्युष्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहेति । प्रसिद्धो ऽभिषवः । समानं

---

१ ०कर्मिणावथ M

२ उदैति M, उदेति the other MSS.

कर्मान्तर्यामादन्तर्यामꣳ होष्यन्निन्द्राणसमधिद्रुत्य चतस्रः स्रुवाञ्ज्यतीर्जुहोत्युदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहेत्येतदुदित आदित्य उपरमन्ति राद्धिकर्मिणो व्यवच्छिन्दन्ति परिश्रयणानि निवर्तयन्तीन्द्राणसानि प्रसिद्धꣳ सुवर्णरजतैर्ग्रहा गृह्यन्ते समानं कर्माग्रयणाद्ग्रहादाग्रयणं गृहीत्वा सुवर्णरजताभ्यां द्वौ महिमानौ ग्रहौ गृह्णाति यः प्राणतो य आत्मदा इत्यथोक्थ्यं गृह्णाति समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वा चतुर्विꣳशतिꣳ रश्मना आदाय यूपानभ्यायन्ति चतस्रश्चतस्र इतरे परिकर्मिणः स्वर्वन्तꣳ राज्जुदालमग्निष्टमुत्सृज्य तस्माद्दक्षिणमेव पूर्वं पौतुद्रवमुपस्थावानमुच्छ्रयति ॥ २२ ॥

अथोत्तरं चौन्दक्षिणतो वैल्वाꣳस्त्रीनुत्तरतस्त्रीन्दक्षिणतः खादिराꣳस्त्रीनुत्तरतस्त्रीन्दक्षिणतः पालाशाꣳस्त्रीनुत्तरतो ऽनैतं पालाशमुपश्रयं दक्षिणतो न्यस्यति तूष्णीꣳ स्वर्वन्तान्यूपानुत्सृज्याथाध्वर्युरग्निष्ठ उपाकरोत्यश्वं तूपरं गोमृगमित्येताꣳस्त्रीन्प्राजापत्यानथ पर्यङ्ग्यानुपाकरोत्याग्नेन्द्रं[1] कृष्णलला-ममैन्द्रापौष्णं पौष्णमाग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ श्रितिपृष्ठौ बार्हस्पत्यौ धात्रे पृषोदरꣳ सौर्यं बलबं पेत्वमित्यथाध्वर्युरग्निष्ठ एवोपाकरोत्यग्नये ऽनीकवते रोहिताञ्जिरनड्वा-

---

१ ०त्याग्नेन्द्रं M (sec. m); ०त्याग्नेयं M (pr. m.) and all the other MSS., but cp infra xv. 26 med. (229, 16).

नित्येकादशाथाध्वर्युरग्निष्ठ एवोपाकरोति सोमाय स्वराज्ञे ऽनो-
वाहावनड्वाहाविति द्वन्दिनो[१] ऽथाध्वर्युरग्निष्ठ एवोपाकरो-
तीन्द्राय राज्ञे सूकर इत्येकादशारण्यान्नैषाग्निष्ठे पशूषष्टिर्भव-
त्यथ रोहितो धूम्ररोहित इति दशाष्टादग्निनो ऽनुवाकास्तेषां
५ पूर्वा एव नवतो दक्षिणेषु यूपेषूपस्थापयन्त्युत्तरा नवत उत्तरे-
ष्वाग्नेन्द्रा दक्षिणेषां मुख्या भवन्त्यैन्द्रासूरा उत्तरेषामथ मयुः
प्राजापत्य इति दश दशिनो ऽनुवाकास्तेषां पूर्वा एव पञ्चतो
दक्षिणेषु यूपेषूपस्थापयन्त्युत्तराः पञ्चत उत्तरेषु[१] सोमापौष्णा
दक्षिणेषां मुख्या भवन्त्यैन्द्रापौष्णा उत्तरेषामथैतस्मिन्नुपशये
१० मनसैव यं द्वेष्टि तमुपाकरोति[१] यद्यु वै न द्वेष्यादुस्ते पशु-
रित्यनुदिशत्येतस्मिन्काल आहवनीये स्वाहाकृतिं जुहोत्युपा-
कृताय स्वाहेति[१] ॥ २३ ॥ षष्ठः ॥

अथैतमश्वमेधेन यूपान्स्वरथे युनक्ति युञ्जन्ति ब्रध्नमरुषं
चरन्तं परि तस्थुष इत्यथास्य पृष्ठं मर्ज्यते रोचन्ते रोचना
१५ दिवीत्येवमेवोत्तरं योग्यं युनक्ति[१] तस्यैवमेवोत्तरतः[२] प्रष्टिमुप-
नियुनक्ति[१] तयोः पृष्ठं मर्ज्यते युञ्जन्त्यस्य काम्या हरी

---

१ चतुर्विंशतिं पशून् i.s o. द्वन्दिनः M. But TS. v. 6 21 are enumerated only 22 paśus. The reading of M, however, would agree with the statement made infra (l. 3), that there are 60 paśus (3+11+11+24 ( 22 acc. to the Saṃhitā! )+11). Should the text of TS. l.c. be incomplete?

२ ०वोत्तरं M but cp. supra xi. 6 (p. 73, 3); this passage is left out in all the other MSS.

विपक्षसा रथे। शोणा धृष्णू नृवाहसेत्यथ केतुं कृण्वन्नकेतव इति ध्वजं प्रतिमुञ्चत्यथ यजमानं वर्मसंनह्यनीयाभिः संनह्यति जीमूतस्येव भवति प्रतीकमिति चतुर्दशभिर्धयारूपमथ रथमुपतिष्ठते वनस्पते वीड्वङ्गो हि भूया इति तिसृभिरनुच्छन्दसमथ दुन्दुभिमुपधमत्युपश्वासय पृथिवीमुत द्यामिति तिसृभिरनुच्छन्दसमथ दक्षिणꣳ हृदमभिप्रयाति द्यौस्ते पृष्ठं क्रमैरत्यक्रमीद्राज्याक्रान्त्राजीति त्रिभिरनुवाकैरा क्रोडेभ्यो ऽश्वानभिधावयन्त्यथैतꣳ[1] रथं प्रदक्षिणमावर्त्य प्राखामानयति यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम्। एतꣳ स्तोतरेतेन पथा पुनरश्वमावर्तयासि न इति तानध्वर्युरुत्तराभि स्तोकीयाभिरन्वैत्यग्नये स्वाहा सोमाय स्वाहेत्येतेनानुवाकेन पुनःपुनरभ्युपाकारं यावदेषाꣳ स्तोका उपरमन्त्यथैतमश्वमग्रेण यूपान् स्वरथात्प्रमुच्य सौवर्णेन संदानेन संदित्याध्वर्योरावसथं वियोगं वर्तयन्त्यथ महिषी वावाता परिवृक्तीत्येता असै [2]गन्धान्गणान्मणीꣳश्चादायाभ्यायन्त्यश्वं[1] तस्य यत्प्राक् क्रोडात्तन्महिष्यभ्यनक्ति वसवस्त्वाञ्जन्तु गायत्रेण छन्दसेति पौतुद्रवेण प्रतिहितानां जायाभिः सहाथ यत्प्रतीचीनं क्रोडादा नाभेस्तद्वावाताभ्यनक्ति रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसेति ॥ २४ ॥

गौरुगुलवेनाराज्ञां जायाभिः सहाथ यत्प्रतीचीनं नाभेरा

---

१ °भिधापयंत्य° M (as supra xv. 5 and 6, p. 209. 7, 210. 12); °भिनापयंत्य° the other MSS.

२ Thus M, गंधान्त्सगणान्मणी° Be; गंधाद्गणामणी° BU.

पुच्छात्त्यरित्वृत्त्यभ्यनक्त्यादित्यास्त्वाञ्जन्तु जागतेन छन्दसेति मौक्षेन[1] सूतग्रामणीनां च क्षत्तसंग्रहीतृणां च जायाभिः सह तस्य ये प्राचीनं वहसः केशास्तेषु महिषी सहस्रꣳ सौवर्णान्काचानावयति भूरिति प्रतिहितानां जायाभिः सहाथ ये प्रतीचीनं वहसः केशास्तेषु वावाता सहस्रꣳ राजतान्काचानावयति भुव इत्यराज्ञां जायाभिः सहाथैषा परिवृक्ती वालेषु सहस्रꣳ सामुद्रान्काचानावयति सुवरिति सूतग्रामणीनां च क्षत्तसंग्रहीतृणां च जायाभिः सह यथेतं पत्नयो[2] वन्ध्यथ महिषी वावाता परिवृक्ती माहानसी[3] दासीत्येता[4] अस्मै मधुमिश्रान्लाजानुपकिरन्ति ॥ २५ ॥

लाजी३च्छाची३न्यग्नो[5] ममां३[5] व्यायै गव्याया एतद्वा अन्नमत्तेतदन्नमद्धि प्रजापत इति[6] यस्मै ह्यन्नमत्ति तस्मै ह्यार्धुका प्रजा[6] भवतीति[6] विज्ञायते[6] ऽथैतमग्नꣳ संदानात्प्रमुच्य निर्मन्थ्यस्यावृता निर्मन्थ्येन प्रचरति प्रहृत्याभिहृत्याधाध्वर्युरग्निष्ठे नियुनक्त्यग्नं वपरं गोमृगमित्यथास्य पर्यङ्काग्नियुनक्त्यग्नेन्द्रं कृष्णलोहमैन्द्रापौष्णं पौष्णमित्येताꣳस्त्रीन्ललाट

---

१ Thus M; मौक्षे the other MSS.; cp. Āp. xx. 15. 12 (मौक्षकृतेन)।

२ Thus all (not पत्न्यो)।

३ Thus M, महानसी BU; महानसि Be.

४ Thus M; दासी० the other MSS.

५ Pluti sign not in MSS.

६ M om. प्रजा and reads भवंतीति।

आग्नेयौ कृष्णग्रीवौ ग्रीवासु । त्वाष्टौ लोमशसक्थौ सक्थ्योः । गितिपृष्ठौ बार्हस्पत्यौ पृष्ठे । धात्रे पृषोदरमुदरे । सौर्यं बलबं पेलं पुच्छ इत्यध्वर्युरग्निष्ठ एव नियुनक्त्यग्नये ऽनीकवते रोहिताञ्जिरनड्वानित्यध्वर्युरग्निष्ठ एव नियुनक्ति सोमाय स्वराज्ञे ऽनोवाहावनड्वाहावित्यध्वर्युरग्निष्ठ एव नियुनक्ती- ५
न्द्राय राज्ञे सूकर इति । सर्वानेवारण्यान्नियोजनेनैवानुवर्तयते[१] याꣳश्च ग्राम्याणां पशूनामुत्सृज्यन्नवत्यारण्याꣳश्चाथ दक्षिणा-
न्प्रतिप्रस्थातारो नियुञ्जन्त्यथोत्तरानथैतमश्वं नित्येन प्रोक्षेण प्रोक्ष्यातिप्रोक्षेण प्रोक्षति जङ्घे बीजमिति । नित्येनैवेतरान्पशू-
नथ दक्षिणाप्रतिप्रस्थातारः प्रोक्षन्त्यथोत्तरानथैतमश्वमतिप्रोक्षेण १०
यूपान्प्रोक्षणीरवघ्रापयति ॥ २६ ॥

अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोकस्तं जेष्यस्यथावजिघ्र । वायुः पशुरासीदादित्यः पशु-
रासीदिति । यदि नावजिघ्रति पुनरेवावघ्रापयत्यग्निः पशु-
रासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः [२]स ते लोक- १५
स्तस्मात्त्वान्तरेष्यामि यदि नावजिघ्रसि । वायुः पशुरासीदा-
दित्यः पशुरासीदिति । यदि नावजिघ्रति पुनरेवावघ्रापय-
त्यग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः[२]
स ते लोकस्तं जेष्यसि यद्यवजिघ्रसि । वायुः पशुरासीदादित्यः

---

१ Thus M; ०वर्तयति the other MSS.

२ ... २ This passage is found in M only.

पशुरसीदितीश्वरो ऽवघातोरित्येतस्मिन्काल[1] आहवनीये स्रुवाङ्कृतिं जुहोत्याज्यस्थाय स्वाहेति ॥ २७ ॥ सप्तमः ॥

अथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूहीत्यभ्याद्धातीध्मं परि समिधꣳ ग्निनष्टि वेदेनोपवाजयत्यनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति संसृष्टे स्रुग्भ्यामुत्तरमथासꣳस्रग्नयन्स्रुचावुदङ्कृत्याक्रम्य जुक्राश्वं[2] तूपरं गोमृगमित्येतान्समनक्त्यथ पर्यङ्ग्यानथेतरानथ दक्षिणानथोत्तरानथ यथायतनꣳ स्रुचौ सादयित्वा प्रवरं प्रवृणीते प्रसिद्धमृत्विजो वृणीते सीदति होता प्रसवमाकाङ्क्षति प्रसूतः स्रुचावादायात्याक्रम्याऽऽह समिद्भ्यः प्रेष्येति समिद्धो अङ्गिरो दृढं मतीनामित्येता अश्वस्याग्रियो भवन्ति वषट्कृते जुहोति प्रेष्य प्रेष्येति चतुर्थाष्टमयोः समानयमानो ऽष्टमे सर्वꣳ समानयते परि स्वाहाकृतीभ्यः सꣳस्रावꣳ ग्निनष्टि दग्ध प्रयाजानिष्ट्वोदङ्कृत्याक्रम्य सुवर्णं च सायकं च याचति तौ जुक्रामक्रा ताभ्यामश्वं तूपरं गोमृगमित्येताऽसमनक्ति कालायसैः पर्यङ्ग्यान्लोहायसैरितरान्सुवर्णैर्दक्षिणाञ्जतैरुत्तरानथ यथायतनꣳ स्रुचौ सादयित्वाह पर्यग्नये क्रियमाणायानुब्रूहीति नित्ये पर्यग्निकरणे ऽनुवर्तयति मेषस्त्वा पचतैरवतु लोहितग्रीवस्त्वागैः प्रत्यवरिरिति पर्यग्निकृतानामेतेषां पशूनामुत्सृजन्त्यवी[3] द्वे धेनू

---

१ Thus (वघ्रातो॰) M only, वघ्राणे॰ or वघ्राणे॰ the other MSS.

२ जुक्रा om. M

३ Thus M, ॰ख्जंत्यपि the other MSS.

भौमी दिग्भ्यो वडवे द्वे धेनू भौमी वैराजी पुरुषी द्वे[1] धेनू भौमी इन्द्राय राज्ञे सूकर इति सर्वानेवाचारण्यानथ[2] पर्यग्निकृतैः पशुभिरुदञ्चः प्रतिपद्यन्ते। तेषामैन्द्रासूरा उत्तरार्धा भवन्त्यथ उपचारतो। ऽश्वमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभते। पृथगितरान्परिक्रमिण उदञ्चो नयन्त्यनुपूर्वमत्यतिषजन्तो। ऽथ याचति बर्हिश्च प्रतपनं च क्रुञ्चिं चाधीवासं च कम्रिषु तार्ष्यं चेत्युत्तरत एतद्वङ्कवं संस्तीर्णं भवति। तदस्याथ निह्नयमानायोपास्थति बर्हिश्च प्रतपनं च क्रुञ्चिं चाधीवासं च कम्रिषु चेत्येतत्त्रितयं। तार्ष्येण संज्ञप्यमानं यामेन साम्ना प्रस्तोतानूपतिष्ठते। पृथगितरेभ्यस्तं दूतराम्राचो वोदीचो वा निह्नन्त्यङ्कवतो माधून्संज्ञपयतेत्युक्त्वैतेनैव यथेतमेत्य पृषदाज्यावकाश आसते। ऽथैतौ ब्रह्मोद्यं वदतो होता च ब्रह्मा चान्तरेण यूपं चाहवनीयं च। दक्षिणतो ब्रह्मा भवत्युत्तरतो होता। होता ब्रह्माणं पृच्छति ॥ २८ ॥

किꣳ स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः। किꣳ स्विदासीत्यिगंगिला किꣳ स्विदासीत्यिलिम्पिलेति। तमितरः प्रत्याह द्यौरासीत्पूर्वचित्तिरस्य आसीद्बृहद्वयः। रात्रिरासीत्यिगंगिलाविरासीत्यिलिम्पिलेति। तमितरः पृच्छति कः स्विदेकाकी चरति क उ स्विज्जायते पुनः। किꣳ स्विद्धिमस्य भेषजं किꣳ स्विदावपनं महदिति। तमितरः प्रत्याह

---

१ द्वेद्वे M.

२ च om. M.

सूर्य एकाकी चरति चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महदिति । तमितरः पृच्छति पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम् । पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योमेति । तमितरः प्रत्याह वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिम् । सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योमेति । संज्ञप्तान्प्राङ्जुहोति संज्ञप्ताञ्छतिं यत्यग्नयो मायून्कषतेत्यथ सप्त प्राणाङ्कृतीर्जुहोति प्राणाय स्वाहा व्यानाय स्वाहेति । षट्चिꣳशतमश्वस्तोमीयाञ्जुहोति[1] यदक्रन्दः प्रथमं जायमानो मा नो मित्रो वरुणो अर्यमा ये वाजिनं परिपश्यन्ति पक्वमुत स्मास्य द्रवतस्तुरण्यत दूत्यायाभ्यायन्ति शमितार ऊपेतनेति । पाशेभ्यः पशून्प्रमुच्यमाननुमन्त्रयते ऽदितिः पाशान्प्रमुमोक्तेतानिति । पृथगविशाखाभिरुपसज्येमां दिशं निरस्यन्यरातीयन्तमधरं कृणोमि यं द्विष्मस्तमिन्प्रतिमुञ्चामि पाशानित्यैताः पल्वयः सौवर्णैरुदकमण्डलुभिरुदायन्ति । ता अश्वस्यानुपृष्ठं प्राणानाप्याययन्त्यो[2] यन्त्यनुपूर्वमितरेषां[2] पशूनामेषा महिषी प्रास्य केशान्वासः परिधाय सौवर्णेन विधवनेन विधुवाना चिरपत्तैरश्वं पर्येत्यवन्ती स्थावन्तीस्थावन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां निधीनां त्वा निधिपतिꣳ हवा-

---

१ ०स्तोमीयांजुहोति M. (cp. Āp xx. 21. 11); ०स्तोमीयंजु० (cp. T. Br. III. 9 12. 1.) the other MSS.

२ Thus M; ०प्याययंत्यनुपूर्व० the other MSS.

महे वसो ममेति। चिः परीत्योत्तरतस्तिष्ठति प्रतिहितानां जायाभिः सहैवं वावातारात्रां जायाभिः सहैवं परिवृक्तौ सूतग्रामणीनां च चक्तसंग्रहीतृणां च जायाभिः सह। यथेतं पत्नयो यन्त्यथैतमश्वꣳ सर्वैरलङ्कारैरलङ्कृत्य परिश्रयन्ति। तस्योदीचीं द्वारं कुर्वन्त्यथैतां महिषीꣳ सर्वैरलङ्कारैरलङ्कृत्य[1] ५ तां[1] निङ्कुवानां[1] गर्हमाणामध्वर्युरुदानयत्यम्बे अम्बाल्यम्बिके न मा नयति कश्चन। ससस्त्यश्वक इति। साश्वमुत्तरत उपसंविश्य शिरस्तो वास उपधत्ते[2]। तावध्वर्युस्तार्ष्णेण[2] संप्रोर्णोति सुभगे काम्पीलवासिनि सुवर्गे लोके संप्रोर्णोमीत्यथैषा महिष्युपस्थे ग्रेफमाधत्त आहमजानि गर्भधमा त्वमजासि गर्भधम्। तौ सह १० चतुरः पदः संप्रसारयावहा इति। तामध्वर्युरनुमन्त्रयते वृषा वाꣳ रेतोधा रेतो दधात्विति प्रतिपद्य य आसां कृष्णे लक्ष्मणि सर्दिग्टदिं परावधीदित्यातो ऽथैषा पत्नी गर्हते ॥ २९ ॥

अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वक इति। तां यजमानो ऽभिमेथत्यूर्ध्वामेनामुच्छ्रयतादिति। सा १५ तथैव गर्हते। तां वावाताभिमेथति यद्धरिणी यवमत्तीति। सा तथैव गर्हते। तां परिवृक्त्यभिमेथतीयं यका शकुन्तिकेति। सा तथैव गर्हते। ताꣳ सर्वे गणा अभिमेथन्ते[3] माता च ते

---

१ Thus M; ०लंकृतां निङ्कवानां the other MSS.

२ Thus M; उपत्त एना अध्वर्यु० Be; उपतैना अध्वर्यु० B, उपैना अध्वर्यु० U.

३ Thus, ātmanepadam, all.

पिता च त इति । नाच गर्हते । मुहूर्तमश्वमुपसंविश्योपोत्थाय वासः परिधायाङ्गिर्मार्जयत आपो हि ष्ठा मयोभुव इति तिसृभिरनुच्छन्दसं दधिक्राव्णो अकारिषमिति चतुर्भिः । सर्व एव सुरभिमतीमृचं जपन्ति ये यज्ञे ऽपूतं[1] वदन्ति । नयन्ति पत्नीं । व्यवच्छिन्दन्ति परिश्रयणमश्वस्यालङ्करणमध्वर्योरावसथं हरन्त्यथैतस्मिञ्छल्मलिशर्च आशुपिष्टानि संयुत्य तैरनुलोममश्वं प्रलिम्पन्त्यथ[2] महिषी वावाता परिवृक्तीत्येता अस्मै गणान्सूचीश्चादायाभ्यायन्त्यश्वं । तस्य यत्प्राक् क्रोडात्तस्मिन्महिषी सौवर्णाभिः सूचीभिरसिपथाङ्कल्पयन्त्येति गायत्री त्रिष्टुब् द्विपदा या चतुष्पदेति द्वाभ्यां प्रतिहितानां जायाभिः सहाथ यत्प्रतीचीनं क्रोडादा नाभेस्तस्मिन्वावाता राजताभिरुत्तराभ्यां द्वाभ्यामराज्ञां जायाभिः सहाथ यत्प्रतीचीनं नाभेरा पुच्छात्तस्मिन्परिवृक्ती सीसाभिरुत्तराभ्यां द्वाभ्यां सूतग्रामणीनां च चक्तसंग्रहीतृणां च जायाभिः सह । यथेतं पत्नयो यन्त्यध्वर्योरावसथं सूचीर्हरन्त्यथ सुवर्णं च सायकं च याचति । ताभ्यामश्वस्य क्रोडमापिनष्टीत्यमश्वं[3] विग्रासतेति[3] । कस्त्वा छ्यति कस्त्वा विग्रास्तीत्येतत्षड्ऋचं यजमानं वाचयति । यदैतस्य सूक्तस्य पारमेत्यथाध्वर्युरश्वस्य क्रोडात्पिशितमुत्पिनष्टी-

---

१ The avagraha added by me

२ •लिंपंत्यथ MB, •लिपत्यथ Be U

३ Thus M; क्रोडमापिनसित्यमश्वलंपिरवानसेति Be, क्रोडमापिनविर्थमश्व (श्वं) लं पिखानसेति BU.

त्यमश्वं[१] विशसतेत्याऽमिति[१] । नाश्वस्य वपा भवति । चन्द्रमिव मेदः परिहृत्य[२] साश्वस्य वपा । वपा[३] तूपरस्यैवं गोमृगस्य । कालायसैः पर्यङ्ख्राणां लोहितायसैरितरेषाꣳ सुवर्णैर्दक्षिणेषाꣳ रजतैरुत्तरेषाम् । ॥ ३० ॥

अश्वस्यैवाध्वर्युर्वपया प्रथमया प्रतिपद्यते । ऽनूचीरितरा ५
आहरन्त्यश्वस्यैव वपायै प्रतितप्यमानायै बर्हिषो ऽग्रमुपास्यत्युपेतरा यच्छन्त्युत्तरतो ऽश्वस्य तूपरस्य गोमृगस्येति वपाः अपयन्ति दक्षिणत इतरेषां पशूनामश्वस्यैव वपाꣳ सुवाङ्कृत्याभिजुहोत्युपेतरा यच्छन्त्यथ [४]स्वाहाकृतिप्रेषेण चरित्वा सꣳस्रावेण पृषदाज्यमभिघार्याश्वस्यैव वपामभिघारयत्युपेतरा यच्छन्त्यथ पुरस्तात्स्वाहाकृतिꣳ[४] सुवाङ्कृतिꣳ कृत्वा सुवर्णेन महिमानं जुहोति तस्य ते द्यौर्महिमेत्यथोपस्तीर्य द्विः सुवेणाश्वस्यैव[५] वपाꣳ समवद्यन्त्याह प्रजापतय इत्युपाꣳशु हयस्य छागस्योस्रस्य वपानां मेदसो ऽवदीयमानस्यानुब्रूहीत्युच्चैर्यावतीः[६] सुक्ष्मंभवत्युपेतराः पाद्या वेडसूनेन वोपोद्यच्छन्ति । द्विरभि- १५

---

१ Thus (without, however, the pluti sign) M ; ०तमुच्चपिनष्टि इत्यमश्वं विशसते इत्यामिति Be, and thus also BU (but र्थं i.s.o. इत्य)।

२ ०वत्तं MSS exc. M.

३ वपां M.

४ ..४ left out in all the MSS. exc. M.

५ एव om. M.

६ वदीयमानानामनु० M, cp. supra xi. 5 (p. 70, 11).— यावती M, यावति the other MSS. cf. supra l.c.

धारयत्यत्याक्रम्याश्राव्याह प्रजापतय इत्युपाꣳशु हयस्य छाग-
स्योस्रस्य वपा[1]मेदः प्रस्थितं प्रेष्येत्युच्चैर्वषट्कृते वपा[2] जुहोत्यधो-
परिष्टाद्रजतेन महिमानं जुहोति तस्य ते पृथिवी महिमे-
त्यथ पर्यङ्ग्याणां वपाभिश्चरत्यथेतरेषामथ दक्षिणेषां प्रति-
५ प्रस्थातारो वपाभिश्चरन्त्यथोत्तरेषां याꣳश्च ग्राम्याणां पशूना-
मुदस्राचीदारण्याꣳश्च स्रुवाऊत्यस्रेषां वपाभ्यः प्रतिजुहोत्युपाꣳ-
श्वेतेषां पशुजातानां वपाभिश्चरन्ति प्राजापत्यानाꣳ सावि-
त्राणाꣳ सारस्वतानां पौष्णानां यामानां पित्रदेवतानां द्यावा-
पृथिव्यानां वायव्यानाꣳ सौर्याणां वैश्वकर्मणानामित्यधोप-
१० रिष्टात्स्वाहाकृतिꣳ स्रुवाऊतिꣳ हुत्वा वपाश्रपणीरनुप्रहृत्य
समुत्क्रम्य चात्वाले मार्जयन्ते[1] ऽथ पशून्विग्रास्ति[2] ग्रामितरि-
त्याह माश्वस्य लोमापिकृतीर्माश्वस्यास्थि[3] सꣳग्रारीर्यथाङ्गमेनं[4]
विकृत्य ग्रामिचे कुम्भ्याꣳ समवग्रमयतादेवं ह्यपरमेवं गोमृग-
मथ दक्षिणमश्वग्रफं गोमृगकण्ठमिति ग्रामिचे निष्यचतादथ-
१५ स्रयेन कमण्डलुंनाश्वतेजनीꣳ श्रपयतादित्यथ सावित्रꣳ हुत्वा
प्रसर्पन्ति प्रातःसवनाय[1] तदृजुधा संतिष्ठते[1] ॥ ३१ ॥
अष्टमः ॥

---

१ वपा M; वपां B Be U.

२ वपां MB; वपा Be.

३ Thus M; संग्रास्ति Be B; सग्रास्ति U.

४ Thus M; लोमविकृतीमांस्यास्थि संसारायथा० B, लोमाविकृतीमांस्यास्थि संसारायथा० U, लोमाविकृंतनी etc. (as U) Be.

अथ सावित्रꣳ हुत्वा प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहाः गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि हुत्वाष्टौ संवर्गाङ्गतीर्जुहोत्यर्वाङ् यज्ञः संक्रामत्विति । कामं दक्षिणानां[1] ददाति । वैश्वकर्मणानि हुत्वा नव पर्यग्नीर्जुहोति भूतं भव्यं भविष्यदिति । प्रसिद्धो ५
ऽन्यभिषेको[2] । ऽहीनसंततिं करोत्यृजुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । अथ सावित्रꣳ हुत्वा प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णात्यथोक्थ्यं गृह्णाति । समानं कर्मा पवमानात्यवमानेन चरित्वाथैतान्यशून्याचत्यश्वं तूपरं गोमृगमित्यथ पर्यङ्ग्यानथेतरानथ दक्षिणानथोत्तरानुत्त- १०
रतो ऽश्वस्य तूपरस्य गोमृगस्येति हविरुपसादयन्ति दक्षिणत इतरेषां पशूनामथ वैतसे कटे ऽश्वस्य[3] हृदयं निधाय सुवर्णेन च सायकेन च तस्याग्रे ऽवद्यन्नाह ॥ ३२ ॥

मनोतायै हविषो ऽवदीयमानस्यानुब्रूहीत्येकादशावदाना- न्यवद्यत्येवं तूपरस्यैवं गोमृगस्य । कालायसैः पर्यङ्ग्याणां लोहा- १५
यसैरितरेषाꣳ सुवर्णैर्दक्षिणेषाꣳ रजतैरुत्तरेषां । नाश्वस्य[4] तूपरस्य गोमृगस्येति स्विष्टकृते ऽवद्यत्यवद्यन्नीतरेषां पशूनां ।

---

१ M ins. प्रति after कामं and leaves a blank for two akṣaras before दक्षि० ।

२ Thus M; भिषवो the other MSS.

३ श्वꣳ M.

४ Thus M; वाश्वस्य the other MSS.

नाश्वस्य[1] तूपरस्य गोमृगस्येतीडामवद्यत्यवद्यन्नीतरेषां पशूना-
मधैतमश्वं[2] वैतसे कटे यथाङ्गं[3] चिनोति । पुरस्तात्प्रत्यञ्चं
तूपरमायातयति । पश्चात्प्राचीनं गोमृगमथ जुह्वपभृतावाद-
दान आह प्रजापतय इत्युपाꣳशु हयस्य क्रागस्योखस्य हविषो
५ ऽनुब्रूहीत्युच्चैरित्याक्रम्याश्राव्याह प्रजापतय इत्युपाꣳशु हयस्य
क्रागस्योखस्य हविः प्रस्थितं प्रेष्येत्यच्चैर्वषट्कृते तान्त्सहैव कटेना-
ग्नावनुप्रहरति ॥ ३३ ॥

द्यौस्ते पृष्ठं क्रमैरित्यक्रमीद्वाज्याक्रान्वाजीति चिभिरनुवाकै-
रथ पर्यङ्ग्याणाꣳ हविर्भिश्चरित्यथेतरेषामथ दक्षिणेषां प्रति-
१० प्रस्थातारो हविर्भिश्चरन्त्यथोत्तरेषां । याꣳश्च ग्राम्याणां
पशूनामुदस्राचीदारण्याꣳश्च स्वाङ्कृत्यस्तेषाꣳ हविर्भ्यः प्रतिजु-
होत्युपाꣳश्वेतेषां पशूजातानाꣳ हविर्भिश्चरन्तीत्युक्तमेतदथ
पुरस्ादनस्यतेः समान्यो दिग्गः प्रतियजत्यथ वनस्पतिना
चरत्यथ पुरस्तात्खिष्टकृतो गोमृगकण्ठेन प्रथमामश्वतेजनीमुप-
१५ जुहोत्यथ खिष्टकृता चरत्येतस्मिन्काल आहवनीये स्वाङ्कृतिं
जुहोति ङ्कताय स्वाहेति । ॥ ३४ ॥

अथैतं प्रसेकमग्नावायातयति दक्षिणतो वोदञ्चं पश्चादा
प्राञ्चं । तस्य स्रुगिव पूर्वार्धो[4] भवत्येवमेव मथं । चमस इव

---

१ Thus M Be ; नानाश्वस्य UB.

२ MSS. exc M ins here पशूनां ।

३ Thus M ; यथाङ्गं Be ; यथाङ्गं BU.

४ पूर्वार्धं M , पूर्वार्धो the other MSS., but cp supra x 54 (p. 56, 9).

बुध्नस्तस्मिꣳश्चतुर[१] उपसृणान आहाग्रमत्तः संततमानय स्तोगान्निगदिष्यामीति। स यत्र धारामिं प्राप्नोति तत्प्रतिपद्यते स्तोगान्दꣳष्ट्राभ्यां मण्डूकाञ्जम्भ्येभिरिति चतुर्दशानुवाकाग्प्रयासाय स्वाहेति पञ्चदशमथ द्वे आकृती जुहोतीलुवर्दाय स्वाहा बलिवर्दाय स्वाहेति षट्त्रिꣳशतमश्वस्तोमीयाꣳस्तिस्रो[२] द्विपदा ५
दृमा नु कं भुवना सीषधेमापो हि ष्ठा मयोभुव दृति चाचैतं प्रसेकमग्नावनुप्रहरत्यथैनꣳ सꣳस्रावेणाभिजुहोति। समानं कर्मानूयाजेभ्यो। ऽथ पुरस्तादुत्तमस्यानूयाजस्याश्वग्रफेनाश्वतेजनीमुपजुहोति[३]। समानं कर्मा पत्नीसंयाजेभ्यो। ऽथ पुरस्तादुत्तमस्य पत्नीसंयाजस्यायस्मयेन कमण्डलुनाश्वतेजनीमुपजुहोत्यजुधैकविꣳश उक्थ्यः संतिष्ठते पत्नीसंयाजान्तो। ऽथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्ति। ॥ ३५ ॥ १०

नवमः ॥

अथातो महाराज्य एव बुध्यन्ते। प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति। परिहिते प्रातरनुवाके ऽपो ऽश्वैत्यङ्गिरुदैत्यतिरात्रं[४] क्रतुमुपैति। प्रसिद्धो ऽभिषवः। प्रसिद्धं ग्रहा गृह्यन्ते। समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वैकादꣳ रꣳना आदाय यूपमभ्यैति। स्वर्वन्तꣳ १५

---

१ बुध्नंतस्मि० all, but cp. l.c.

२ ०स्तोमियास्तिस्रो MSS.

३ अश्वस्य i s.o. अश्व० (before तेजनीम्) all the MSS. exc. M.

४ Thus M; the other MSS. are more or less defective.

राज्नुदाज्ञमग्निष्टसुत्सृज्यैकादश प्रातर्गव्याग्राजापत्यान्पशूनुपाकरोति । तेषां प्रमिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय । तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रमिद्धो ऽभिषवः । प्रमिद्धं ग्रहा गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि हुत्वाष्टौ संवर्गाङ्कृतीर्जुहोत्यर्वाङ् यज्ञः संक्रामत्वित्यवभृष्टं दक्षिणानां ददाति । वैश्वकर्मणानि हुत्वा नव पर्यग्नीर्जुहोति भूतं भव्यं भविष्यदित्युत्सन्नो ऽग्न्यभिषेको । नाचाहीनसंततिं करोत्यृजुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रमिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णात्यथोक्थ्यं गृह्णाति । समानं कर्मा पवमानात्यवमानेन चरित्वा खे धामन्पशुभिश्चरति । तेषाꣳ समानी मनोता समानी देवता समानः प्रत्यभिमर्शनः समानो वसाहोमः समानो वनस्पतिः समानः खिष्टकृत्तेषवाꣳसमानीडा समान्यो दिग्भ्यः । समानं कर्मा पत्नीसंयाजेभ्यः । पत्नीः संयाज्य प्राङेत्य ध्रुवामार्ष्याभूतीश्चानुभूतीश्च जुहोत्या मे गृहा भवन्त्वग्निना तपो ऽन्वभवदित्येताभ्यामनुवाकाभ्यामथ भूताभव्यौ होमौ जुहोति भूताय स्वाहा भविष्यते स्वाहेत्यथाध्वरिकाणि सम्मिष्टयजूꣳषि हुत्वा दशाग्निकान्युपजुहोति । समानं कर्मावभृथादर्वैतस्मिन्नवभृथे द्वितीयामवभृथाहुतिꣳ हुत्वा दश वारुणान्युपजुहोति नमो राज्ञे नमो वरुणायेत्यथ मृत्यवे स्वाहा मृत्यवे स्वाहेति नवतिमाहुतीर्जुहोति प्रयासाय स्वाहायासाय स्वाहेत्येकादश । शतायुर्वै पुरुषः

शतवीर्य आत्मैकशतो यावानेव पुरुषस्तस्मान्मृत्युमवयजत इति ब्राह्मणम् ॥ ३६ ॥

अथैष आचेयो विद्वतः शुक्लो विक्लिधस्तिलकवान्पिङ्गाक्षः[१] खलतिर्विकटः कुनखी कुजः शिपिविष्टो नग्न उपमज्जति[२] तस्य मूर्ध्नि जुहोति जुम्बकाय स्वाहेत्यथास्या एतच्छतं विषयं ददात्यथैनमिषुजितात्प्रथमन्ति[३] मा मे राष्ट्रे वात्सीरिति[३] प्रसिद्धो ऽवभृथ उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति तस्यै सौरीर्नव श्वेता वशा इत्युपालम्भ्या भवन्ति तासां प्रसिद्धं वपाभिश्चरित्वाग्नेय गार्हपत्यं पात्नीवतमुच्छ्रित्य तस्मिञ्छगलं कल्माषं किकिदीविं विदीगयमिति त्वाष्ट्राञ्पशूनुपाकरोति तान्पर्यग्निकृतानुत्सृज्याज्येन सर्ष्टां करोत्यथ पशुपुरोडाशान्निर्वपति पशुपुरोडाशौ वाथ पुरस्तात्पशुपुरोडाशस्विष्टकृतो दश यथान्युपजुहोति नमो राज्ञे नमो वरु-

---

१ तिलकावान्पिंगलाक्षः M.

२ Thus M; उपदिज्जति the other MSS.

३ Wholly uncertain. ददात्यथैनमिषुजिताम्प्रथमंति मा मे राष्ट्रे वात्सीरिति M, ददात्यैनामिचु(षि) तात्प्रथमंत्रिमासै राष्ट्रेष्वेवात्सीरिति B.Be (pr. m.); ददात्येनामिषुचितान्प्रथमंत्रिमासे राष्ट्रेष्वेवात्सीरिति Be (sec. m); ददात्यैनामिचुषितात्प्र० etc. (as B) U; this is certain, that प्रथमंति is a third person of a verb; I have conjectured प्रथमन्ति (cp. Śāṅkh. śrs. xvi. 18, 20: निःषेधन्ति); then the foregoing must be an ablative; but whether दृषुजितात् is the correct reading I do not see.

णायेत्यथ पुरस्तात्पशुखिष्टकृतो दश[१] गव्यान्युपजुहोति मयोभूर्वातो अभिवातूषा इति । प्रसिद्धं पशवः संतिष्ठन्ते । अथोदवसानीययेष्ट्वाग्नेणाहवनीयं विशालयूपमुच्छ्रित्य तस्मिन्नेतान्पशूनुपाकरोत्याग्नेयमैन्द्राग्नमाश्विनमिति । तेषां प्रसिद्धं वपाभिश्चरित्वा पशुपुरोडाशान्निर्वपति । तानानुवर्तन्ते । अष्टौ देवसुवाꣳ हवीꣳष्यग्नये ऽꣳहोमुचे ऽष्टाकपाल इत्येषा च दशहविरिष्टिस्तस्या एता याज्यापुरोनुवाक्या भवन्ति ॥ ३७ ॥

अग्नेर्मन्वे प्रथमस्य प्रचेतस इत्यथ पुरस्तात्पशुपुरोडाशखिष्टकृतो दश ब्रह्मवर्चसान्युपजुहोत्या ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामित्यथ पुरस्तात्पशुखिष्टकृतो दश संनतिहोमानुपजुहोत्यग्ने समनमत्पृथिव्यै समनमदिति । प्रसिद्धं पशवः संतिष्ठन्ते । अथैतैरन्वहं द्वादशभिर्ब्रह्मौदनैश्चरति । तेषामुक्तं चरणं यथामुचैकस्यान्यच[२] रथनाभ्यामैभ्य एताभ्यः शतं शतपलान्निष्कान्ददाति । सुवर्णरजते महिम्नोः पात्रे ददात्येकतयानि[३] सौवर्णानि पात्राणि ददाति हिरण्मयं कमण्डलुं[४]

---

१ om. M.

२ Thus M (for यमुच cp. supra xv. 4); यथासुचैकस्यच the other MSS., as all the MSS. contain a case form of एक, I did not venture to change यथासुचैवमन्यच, *i.e.*, yathā amutra evam, a. r.

३ Thus M; ०त्येनानि the other MSS.

४ ०ण्डुं or ०ण्डुं MU.

हिरण्मयं[१] षड्वीशꣳ[१] हिरण्मयꣳ संदानमित्यथ[२] वीणा-
गाथिभ्याꣳ शतं विपथौ ददात्यथर्तुपशुभिर्यजत[३] ऋतुपर्यायं
वा समानेषु वाग्न्यायतनेषु पिशङ्गास्त्वयो वासन्ताः सारङ्गा-
स्त्वयो ग्रैष्माः पृषन्तस्त्वयो वार्षिकाः पृश्नयस्त्वयः शारदाः पृश्नि- ५
सक्थास्त्वयो हैमन्तिका अवलिप्तास्त्वयः शैशिराः संवत्सराय
निवत्सꣳ इत्यथ दैविकाहविर्भिर्यजते । ऽथ चैधातवीयया
यजते । ऽथ सौचामण्या यजते । संतिष्ठते ऽश्वमेधस्त्रिभिः
संवत्सरैः । संतिष्ठते ऽश्वमेधः संतिष्ठते ऽश्वमेधः । ॥ ३८ ॥
दशमः ॥

॥ इति पञ्चदशः प्रश्नः ॥

---

१ Left out in the MSS. exc. M.

२ संदावमि० MSS. exc. M

३ यजत M, यजंत the other MSS

द्वादशाहेन यज्यमाणो भवत्येको वा बहवो[१] वोतो[१] ह्येको[१] दक्षिणावता यजते । स[२] यद्येको[२] यदि बहवो ऽमावास्याया एव षडहेनोपरिष्टाद्दीक्ष्यन्ते । ते[३] गृहपतेररण्योः संजानते पृथग्वा । ते यदि गृहपतेररण्योः संजानते मथित्वा गार्ह-
५ पत्यमाहवनीयमुद्धरन्ति[४] । ग्रामाद्धृतश्रपणमाहरन्ति । यद्यु वै पृथक् संजानते गृहपतिरेव प्रथमो मन्यते[५] । तदेवेतरे[६] पर्युपविश्य मथित्वामथित्वैव गार्हपत्यꣳ संनिवपन्ति । तस्मा-देकवद्भूतादाहवनीयमुद्धरन्ति । ग्रामाद्धृतश्रपणानाहृत्य संनि-वपन्त्यथ यदि पश्चादपर[७] आगच्छति मथित्वैव गार्हपत्ये ऽधि
१० निवपत्याहवनीये ऽधि ग्रामाद्धृतश्रपणमाहृत्याथर्जत्युपो[८] एनं[८] पूर्वेषु कर्मसु क्रियन्ते । ऽथातः पवनस्यैव मीमाꣳसा । गृहपति-मेवाध्वर्युः प्रथमं पवयत्यथ होतारमथ ब्रह्माणमथोद्गातारं प्रतिप्रस्थाताध्वर्युं पवयति प्रस्तोतारं प्रशास्तारं ब्राह्मणाच्छꣳ-सिनमाग्नीध्रः प्रतिप्रस्थातारं पवयत्यच्छावाकं नेष्टारं पोतारꣳ

---

१ Thus M only (regarding उतो हि cp. infra xvi 13 260, 5), बहवो वा॰यद्येको all the other MSS

२ Given only by M

३ Only in M.

४ Thus M only, ॰हरन्ति all the other MSS.

५ मंथति M

६ तदैवे॰ all the MSS. exc. M.

७ पश्चेवापर M.

८ Thus M, ॰माहृत्यर्जत्यु॰ T Be 11 D, ॰माहृत्यनिवपंत्यपुत्पुजत्यु॰ B Be, ॰माहृत्यनिवपत्यथैनं U

सदस्यमुन्नेताग्नीध्रं पवयति ग्रावस्तुतꣳ सुब्रह्मण्यं प्रतिहर्तार-
मात्मानमन्ततस्ते चेद्भूयुरध्वर्युर्वाव[1] सर्वस्य पवयिता स नः सर्वा-
न्पवयतिति स एवैनान्सर्वान्पवयत्यपि वान्योऽन्यं पवयन्ति[2]
यद्यधीयन्तो भवन्ति[3] ॥ १ ॥

तेषां प्रसिद्धा दीक्षणीयेष्टिस्तायते[4] सकृदाश्राविते स ५
यत्राह भरतवदिति तद्गृहपतेरेवार्षेयं प्रथमं वृणीते[5] ऽथ
होतुरथात्मनो ऽथ ब्रह्मणो ऽथोद्गातुरथ प्रतिप्रस्थातुरथ
प्रस्तोतुरथ प्रशास्तुरथ ब्राह्मणाच्छꣳसिनो ऽच्छावाकस्य सदस्य-
स्याग्नीधः पोतुर्नेष्टुर्यावस्तुत उन्नेतुः सुब्रह्मण्यस्य प्रतिहर्तु-
रन्ततो[6] ब्रह्मण्यदिति समानं[7] ते[8] सर्वे[8] एव[8] दीक्षाऽतिषु १०
समचारभन्ते[9] गृहपतिमेवाध्वर्युरुक्त्वैः कृष्णाजिने वाचयति[10]
तदेवेतरे[11] ऽनुनिक्रामन्त्यपि[12] वान्योऽन्यं वाचयन्ति यद्यधी-
यन्तो भवन्ति[13] ते यथोत्साहं व्रतदुघमुपयन्त्येकैकां[14] वा
बक्कीर्वा[15] तेषां यथैव प्रवरानुपूर्व्यमेवं[16] घर्मोच्छिष्टे[17] ऽति-

---

१ Thus MTD Be 11 U (pr. m.), वा (i s. o. वाव) B Be U (sec. m).

२ Thus M; sing. the other MSS.

३ प्रवणीवे M.

४ Thus M; ते सर्वे (without एव) T Be 11 U D; समानमंततः सर्व एव B Be.

५ Thus MUD; तदेवेतरे the other MSS.

६ Thus M; नुनिष्क्राम० all the other MSS.

७ Thus (व्रतदुघमु०) Be 11 DUT, ०दुहमुप० B; ०दुघ उप० M.

८ एवं om. M.

९ Thus M B Be; ०क्षिष्टेष्व० T Be 11 DU.

याज्यभक्षेषु[१] षोऽग्निनि । षष्ठ्यामुपसद्युत्तरवेदिꣳ संनिवपन्ति यद्यनग्निचित्यो भवत्यथ यदि साग्निचित्यः प्रथमायामेवोपसद्युत्तरवेदिꣳ संनिवपन्ति ॥ २ ॥

तेषां द्वादश दीक्षा द्वादशोपसदो द्वादशाहं प्रसुता[२] । न द्वादशाहे ऽग्निं चिन्वीतेत्येक आहुश्चिन्वत उ हैके । प्रसिद्धेन कर्मणोपवसथाद्यन्ति । तेषां ज्योतिष्टोमो वैश्वानरः प्रायणीयो ऽतिरात्रस्तायते । स यत्र माध्यंदिने सवने तृतीयसवनाय वसतीवरीभ्यो ऽवनयति तदसतीवरीकलग्ने यावन्माचीरतिग्निष्याग्नीध्रं[३] द्रुत्वा छायायै चातपतश्च सन्धौ गच्छति हविष्मतीरिमा आपो हविष्मान्देवो अध्वरो हविष्माꣳ आविवासति हविष्माꣳ अस्तु सूर्य इत्येषाहीनसंततिरेतामेव पुनःपुनश्चोदयिष्यामि[४] इति वदन्तः । सो ऽत्र वैव[५] यज्ञस्य पुनरालम्भं जपति यज्ञायज्ञियस्य[६] वा स्तोत्रे ग्रंथुवाके वा । तेषां ज्योतिष्टोमो वैश्वानरः प्रायणीयो ऽतिरात्रः संतिष्ठते । तस्मिन्सꣳ-

---

१ Thus M T Be 11 DU ; ०भक्षे B Be.

२ प्रसुतः all the MSS. exc. M, cp infra xvi 12 init

३ Thus ( यावन्माचीर० ) MT Be 11 ; ०माचीम० D ; ०माचम० B Be U.—All the MSS. exc. M अवग्निष्य ।

४ Thus M B Be ; ०ष्यामह T Be 11 DU.

५ Thus M in accordance with the Dvaidha ; सोत्रैव T Be 11 U ; सोचवै B Be ; सौत्रैव D.

६ ०यज्ञियस्य T Be 11 DU ; ०यज्ञीयस्य MB Be.

स्थिते विवर्तयन्ति[1] परिधीननुप्रहरन्ति[1] प्रस्तरं[1] पत्नीसंया-
जान्तो ऽतिप्रैषेण ब्रह्मा वाचं यच्छति परिहतासु वसतीव-
रीष्वाहृतायाꣳ सुब्रह्मण्यायां ब्रह्मा वाचं विसृजते प्रति-
पद्यते[2] दिवा प्रातरनुवाकेनाज्ञा संक्रामन्होता क्रन्दाꣳस्यन्वाह
निमील्याध्वर्युरुपाꣳशुं जुहोति राज्ञे रूपमिति वदन्त्सायते ५
चित्पदग्निष्टोमो रथंतरसामा माहेन्द्रस्य स्तोत्रे रथो युक्तो
ऽत्याधावति[3] रथशब्देन माहेन्द्रस्य स्तोत्रमुपाकरोत्येतावदेवै-
तदहः शिल्पं क्रियते ऽहीनसंततिं करोत्यथ श्वो भूते तायते
पञ्चदश उक्थ्यो बृहत्सामा दुन्दुभिनैतदहरध्वर्युर्माहेन्द्रस्य[4]
स्तोत्रमुपाकरोत्येतावदेवैतदहः शिल्पं क्रियते ऽहीनसंततिं १०
करोत्यथ श्वो भूते तायते सप्तदश उक्थ्यो वैरूपसामाधावे-
नैतदहरध्वर्युर्माहेन्द्रस्य स्तोत्रमुपाकरोत्येतावदेवैतदहः शिल्पं
क्रियते ऽहीनसंततिं करोत्यथ श्वो भूते तायत एकविꣳश
उक्थ्यो वैराजसामाग्नेयश्च[5] षोडशी[5] चातिग्राह्यावनतिग्राह्यः[5]
षोडशीत्येक आहुरेकविꣳशमेतदहर्न्यूङ्खं[6] भवति[6] विराजां वा १५

---

१ Plural MT Be 11 DU and Dvaidha; singular B Be.

२ Plural M.

३ Thus M; धावति Keś; यावति Be TD; भवति B Be

४ Thus M; दुंदुभिशब्देनैतद० the other MSS.

५ Thus M only; ०ग्नेयश्च षोडशी च नातिग्राह्यः Be, ०ग्नेयश्च षोडशिनातिग्राह्यः B; ०ग्नेयं च षोडशिनी चातिग्राह्याश्च नातिग्राह्यः Be 11 T (the latter only षोडशीनि) UD.

६ Thus M, न्यूंखयंति all the other MSS.

प्रतिपत्सु न्यूङ्खयन्ति शस्त्रे[१] वेत्येतदेकमथापर[२] प्रातरनुवाके न्यूङ्खयन्ति हविष्कृत्युभयेषु प्रस्थितेषु माहेन्द्रस्याश्रावणे । न तत ऊर्ध्वं न्यूङ्खयन्तीत्यरणीहस्त[३] एतदहरध्वर्युर्माहेन्द्रस्य स्तोत्रमुपाकरोति । तदुद्गातुर्दक्षिण[४] ऊरौ मन्यति[५] । तं जातꣳ सर्व एवाभिहिङ्कुर्वन्ति ॥ ३ ॥

तस्य मीमाꣳसा । गार्हपत्ये ऽनुप्रहरेत्प्रतिष्ठाकामानामाग्नीध्रे[६] प्रजाकामानाꣳ[७] । आग्निध्रे पशुकामानामाहवनीये स्वर्गकामानामित्यनादृत्य तदाहवनीय[८] एवानुप्रहरति भवतं नः समनसाविति । प्रहृत्याभिजुहोत्यग्नावग्निश्चरति प्रविष्ट इत्येतावदेवैतदहः श्लिष्टं क्रियते । ऽहीनसंततिं करोत्यथ श्वो भूते तायते क्षिण्व उक्थ्यः शाक्वरसामैन्द्रो ऽतिग्राह्यो । ऽङ्गिरेतदहरवकामिश्चाभिरध्वर्युर्माहेन्द्रस्य[९] स्तोत्रमुपाकरोति । तासां

---

१ शस्त्रेशस्त्रे Be B.

२ न ins. TD Be 11 U.

३ Thus MT Be 11 UD, ०रणीभ्यामे० B Be.

४ तमुद्गा० M.

५ मंथंति M.

६ ०ग्नीध्रीये B Be U.

७ प्रजननका० M.

८ Thus M only; तंतमाह० T Be 11 DU (pr. m.); तमाह० U (sec. m.); एतमाह० B Be.

९ All MSS. ins. एव after ऋङ्गिर्, exc. M.

मीमाꣳसा । चावाले ऽवनयेदास्रावे निनयेत्स्रोचणीः[१] कुर्वीत[२] पुरोडाशीयानि पिष्टानि संयौयादित्यनादृत्य[३] तदुद्गात्रधीना एवैनाः कुर्यादुद्गातारो[४] हैताभिररण्येगेयानाꣳ सान्नाꣳ शुचꣳ शमयन्तो मन्यन्ते । ता उ चेदध्वर्यवे प्रब्रूयुरपो ऽभ्यवहरतेत्येव ब्रूयादित्येतावदेवैतदहः श्लिष्टं क्रियते । ऽहीनसंततिं करोत्यथ श्वो भूते तायते चयस्त्रिꣳश उक्थ्यो रैवतसामा सौर्या ऽतिग्राह्यो । ऽङ्गिरश्चैतदहर्दूर्वामिश्राभिरध्वर्युर्माहेन्द्रस्य स्रोचसुपाकरोति । ॥ ४ ॥

तासामुक्ता मीमाꣳसा । स्वयमृतुयाजमेवैतदहर्भवति । नैतदहरन्योऽन्यस्यर्तुयाजं यजन्ति[५] । स यद्याहाध्वर्यू यजतमिति तदध्वर्यू जघनेन हविर्धाने उपविश्य स्वयमृतुयाजं यजतो ये३[६] यजामहे ऽश्विनाध्वर्यू आध्वर्यवादृतुना सोमं पिबतामर्वाञ्चमद्य यव्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम्। पृङ्क्तं हवीꣳषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू ऋतुना सोमं पिबतां वौ३षदिति । स यद्याह ग्रहपते यजेति तद्ग्रहपतिर्जघनेन गार्हपत्यमुपविश्य स्वयमृतुयाजं यजति

---

१ वनयित्रो० M Be B.

२ Thus M; कुर्वते the other MSS.

३ संयौयादि० MDU T Be 11; संयूयादि० B Be.

४ All MSS. exc. M ins. तद् after कुर्यात्।

५ Plural only M.

६ Sign of pluti only in D Be B.

षडहो ऽहीनसंततिं करोत्यथ वसतीवरीः परिहृत्य पयाꣳसि विग्रिय्योपवसन्ति ॥ ५ ॥ प्रथमः ॥

अथ श्वो भूते चतुर्विꣳशं छन्दोमसुपयन्ति बृहत्सामानमथ श्वो भूते चतुश्चत्वारिꣳशं छन्दोमसुपयन्ति रथंतरसामानमथ श्वो भूते ऽष्टाचत्वारिꣳशं छन्दोमसुपयन्ति बृहत्सामानमथ श्वो भूते चतुर्विꣳशमग्निष्टोमसुपयन्ति रथंतरसामानमविवाक्यमेतदहर्भवति नैतदहरन्योऽन्यस्मा उपहताय याऽर्गाथया[1] वा नाराशꣳस्या वा विब्रूयादिति तदु वा आहुर्न वै यज्ञः संतिष्ठते यन्न विब्रूयादिति विब्रूयादिति[2] वै[2] नो[2] ब्राह्मणं भवति नैतदाद्रियेत[3] नाद्रियेतेति[3] स्थितिरननुष्टुभमेतदहर्भवति नानुष्टुभो ऽधीयते[4] ते चेदनुष्टुभ उद्धरेरन्नध्वर्युरनुष्टुभ[5] उद्धरेदमूर्या उप सूर्ये याभिर्वा सूर्यः सह। ता नो हिन्वन्त्वध्वरमित्येतया सौर्या[6] गायत्र्या वसतीवरीः परिहृत्य पयाꣳसि विग्रिय्योपवसन्ति ॥ ५ ॥ प्रथमः ॥

---

१ Thus T Be 11 DU; याऽर्गाथाया B Be; याऽरथवाया M, but above थ and व two akṣaras are written, which I am unable to decipher.

२ Thus M; the other MSS. विब्रूयादिति once only and चैवैनो।

३ Thus M; most of the other MSS. om. here and at the collateral passages (xvi. 6 s. fin., xvi. 16 s. fin.) नाद्रियेत।

४ धीयते all the MSS. exc. M.

५ Thus Be, and M, which inserts only चेद् after अध्वर्युः।—अनुष्टुभमु॰ both times B; the whole passage runs thus in T Be 11: तंचेन्ननुचनुभम उद्धरेद्देनुष्टुभ उद्धरेदमूर्या; in U; ह्तंचंननुवननुष्टुभ उद्धरेद्दे ऋनुष्टुभ उद्धरेदमूर्या; in D· तंचेननुचन्ननुष्टुभमुद्धरेद्देनुष्टुभ उद्धरेदमूर्या।

६ Thus M only, सौर्यर्चा all the other MSS.

वरीर्ग्लौयाङ्कृदे त्वा मनसे त्वेत्यपोङ्कृत्यैतामन्यया सौम्या[१] गायत्र्या राजानमुपावहरेद्विष्णो त्वं नो अन्तम इत्यपोङ्कृत्यैतामन्यया वैष्ण्या गायत्र्या राजानमुपतिष्ठेत । स उ चेद्विद्वानुष्टुभमभिव्याहरत्यत्यक्रमिषमिति[२] होचे प्राह । होता-
५ नाप्नस्थापयिता । होतास्य तद्धरैरपिवयति[३] । स उ चेन्मन्येतामितकामो[४] वा अहमस्मि यदृङ्मयं वेदे यजुर्मयमेव[५] तद्यावेवाचरात्रयौ[५] वेदौ तौ[५] संपादयेतामिति[५] नैतदाद्रियेत । नाद्रियेतेति स्थितिः । संतिष्ठत एष चतुर्विंशो ऽग्निष्टोमो रथंतरसामा ॥ ६ ॥

१० तस्मिन्संस्थिते समिद्धारा[६] यन्त्याहृत्य[६] समिध आग्नी-

---

१ Thus M only; सौर्या B Be; सौर्यया Be 11 TUD.

२ The text is corrupt in all the MSS., and I am at a loss how to emend; अत्यक्रमिषम् is my conjecture; अक्षमिषमिति B; अमिषमिति Be; अवयामिषमिति TDU; अवयामिषति Be 11; अद्भुमन्या (or न्मा) मुजीषमिति M. Probably we are to read an iṣ-aorist 1 ps. sing. act. Keś. has: सत्याग्निषमिति नीचैर्जेतास्मि नाग्निता (*sic*).

३ Thus conjecturally. All the MSS. ॰वपति exc. M, which has ॰पवयति ।

४ ॰कामा MT Be 11 DU; ॰कामः B Be, which om. वा; all the MSS. exc. M begin a new kh. with अहमस्मि ।

५ Thus M; यजुर्मयं वैतान्यावावेवाचरात्रयौ वेदौ ततौ संपा॰ T Be 11 D; यजुर्मयं वैतान्यचरात्रयौ वेदौ संपा॰ B Be; यजर्मयं वैतान्यावेवाचरात्रयौ वेदौ संपा॰ U.

६ Thus corrected; समिद्धारयंत्या॰ MSS.

ग्रीये संन्यस्यन्ति[१]। तेषु समन्वारब्धेष्वाहवनीये स्रुवाहुतिं[२] जुहोति प्रजापतये स्वाहेति मनसाथ सदः प्रसर्पन्ति तूष्णीꣳ-स्रोमाय। संप्रस्तुताग्निदित्वाध्वर्युर्मनसैव प्राङ् द्रुत्वा मनसेमां[३] पात्रं कृत्वा मनसान्यं[४] ग्रहं प्रजापतये गृह्णात्युपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णामीति[५]। यदिदं किं च तदिति मनसा परिस्मृज्य सादयत्येष ते योनिः प्रजापतये त्वेत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा मनसैव स्रोचमुपाकरोति। मनसा[६] प्रस्तौति[६]। मनसा प्रस्तौति। मनसोद्गायति। मनसा प्रतिहरति। मनसा होत्र एषोत्तमेति प्राङ्मनसा होताक्रयते। मनसाध्वर्युः प्रत्याक्रयते। मनसा ग्रꣳसति। मनसा प्रतिगृणाति। यदैतस्य[७] मानसस्य ग्रस्तस्य पारमेत्यथ होतोच्चैश्चतुर्होतृन्व्याचष्टे। तस्मा[८] अध्वर्युः प्रतिगृणाति ॥ ७ ॥

ओꣳ होतस्त्था होतः सत्यꣳ[९] होतरर्रात्स्म होतरिति।

---

१ सं० found in M only.

२ स्रुवाञ्जतीर् T Be 11 UD.

३ Thus M; मनसैव the other MSS.

४ All the MSS. exc. M. om. अन्यं।

५ इति om. M.

६ om. B Be U.

७ यदेतस्य B Be.

८ तस्माद् T Be 11 UD.

९ Be 11 TD ins. च, not M Be BU, cp. xii 16 (109, 14).

यद्यु वै होता नाध्येत्यन्य[1] उ[2] होचाग्रꣳसी ग्रꣳसति । तस्मा उ प्रतिप्रस्थाता प्रतिगृणाति । यदैतेषां पारं यन्त्यथाध्वर्यु-र्मनसैव प्राङ् द्रुत्वा मनसैव तं ग्रहमुपोद्यच्छते[3] । मनसाश्राव-यति । मनसा प्रत्याश्रावयति । मनसा वषट्कृतानुवषट्कृते द्रुत्वा हरति भक्षं । मनसा समुपह्वय भक्षयन्ति । मनसा निर्णिज्य पात्रं प्रयच्छति । संतिष्ठत एष तूष्णीꣳस्तोमो । ऽथर्त्विजो विपृच्छत्यधिदृत्वसूर्यं[4] वाचं विसृज्यध्वाꣳद[5] नत्वचेषू[6] इत्यधि-दृत्वसूर्य[7] इति वै नो ब्राह्मणं भवति । ते ऽधिदृत्वसूर्य एव वाचं विसृजन्ते । तानेवासीनान्परिश्रयन्ति । पत्नीशाले पत्नीः परिश्रयन्त्यथानतिसर्पन्तावध्वर्यू धिष्ण्याग्वर्हिर्भ्यामौदुम्बरीꣳ समन्वारभेते दृह धृतिरिह विधृतिरिह रन्तिरिह रमति-रिति[8] । ते यथासमुदितं[9] वाचं विसृजन्ते ॥ ८ ॥

अथातः सर्पणस्यैव मीमाꣳसा । दक्षिणस्य हविर्धानस्याधो-

---

१ Thus MT B 11; ०न्यतु D; ०न्यो B Be.

२ Most of the MSS. have the plural.

३ विपृच्छंत्य० all exc. M.

४ Thus emended hesitatingly; विसृज्यध्वान्नत्वचेषू—त्यधि० M, विसृज्य-ध्वासंनत्वचेषू इत्यधि० T Be 11 D; विसृज्यध्वासंनत्वचेष्वित्यधि० U; विसृज्यध्व-मिति वासंनत्वचेष्विति वा अधि० B Be; Keś.: समाप्ते तूष्णीꣳस्तोमे ऽध्वर्युः ऋत्विजो विपृच्छति अधिदृत्वसूर्यं वाचं विसृज्यध्वमा (*sic*) नत्वचेष्विति । इतर ऋत्विजः प्रतिब्रूयुः अधिदृत्वसूर्यं वाचं विसृज्यामह (*sic*) इति वा । उदितेषु नत्वचेषु विसृज्यामह (*sic*) इति वा ।

५ Thus M B Be and cp. Āp. XXI. 12. 7, रमतामिति T Be 11 DU.

६ ०दितां M.

ऽधो ऽच्छ सर्पेयुरेतेन ह वै सर्पाः सस्रपुस्तो वै ते जीर्णा-
स्तनूरपाघ्नतेति। तदु वा आङ्ऋषो वा अपथेन प्रतिपद्यते
स्थाणुं वा हन्ति गर्तं[१] वा पतति भेषꣳ स न्येति। वषट्कार-
पथेनैव सर्पेयुरेष वाव[२] स्वर्ग्यः[२] पन्था यद्वषट्कारपथ इति।
तदु वा आङः पराङिव वा एषो ऽग्नान्तः पन्था यद्वषट्कार- ५
पन्थो। ऽध्वर्युपथेनैव सर्पेयुरेष वा[२] अर्वाचः[२] पराचः[२] स्वर्ग्यः
पन्था यदध्वर्युपथ इति। ते ऽध्वर्युपथेनैव सर्पन्ति। तेषु
समन्वारब्धेष्वाहवनीये स्रुवाऊतिं जुहोत्युपसृजन्नाचे वत्सं
धारयन्धरुणो धयन्। रायस्पोषमिषमूर्जमस्मासु दीधर-
त्स्वाहेति। समुल्लम्य चात्वालदेशे जपन्ति वागेतु वागुपेतु १०
वाङ्मोपेतु वाग्यदकर्म यन्नाकर्म यदत्यगाम यन्नात्यगाम
यदत्यरीरिचाम यन्नात्यरीरिचाम प्रजापतौ[४] प्रजापतिं[४]
तत्पितरमप्येत्विति[५]। तदाच्यन्तः[५] प्रतितिष्ठन्ति। तेषां य
एव प्रायणीयो ऽतिरात्रः स उदयनीयः। सन्नादुदवसाय

---

१ कर्तं B Be.

२ Thus M; वाव पराचः स्वर्ग्यः B Be; वाचस्वर्ग्यः T; वाचस्वर्ग्यः Be 11 DU.

३ Text not wholly certain: वा ऋवाच पराच M; वावपराचः all the other MSS.

४ Thus U (sec. m.) B Be; प्रतिपत्नौ तत्प्रजापतौ तत्पितर० T Be 11 D; M reads as B, but with तत् also before प्रजापतिं।

५ Thus B Be, तदाच्यांतनः Be 11 DU, तदाच्यांतनः T, तावदाच्यंतनः M.

ज्योतिष्टोमेनाग्निष्टोमेन चतुष्टोमेन पृष्ठ्यगमनीयेन सहस्र-दक्षिणेनैकैको यजेत ' ॥ ६ ॥ द्वितीयः ॥

अथातो ग्रहकॢप्तेरेव सोमाꣳसैन्द्रवायवाग्रं प्रथममहः ' शुक्राग्रं द्वितीयमाग्रयणाग्रं तृतीयं च चतुर्थं चैन्द्रवायवाग्रं पञ्चममहः ' शुक्राग्रꣳ षष्ठं च सप्तमं चाग्रयणाग्रमष्टममहरैन्द्र-वायवाग्रे[१] नवमदशमे[१] ' इति[२] न्वा[२] अध्वर्यवो[२] ' अथ छन्दोगवॢचतो ' [३]गायत्रीप्रातःसवनः [३]प्रथमस्त्रिरात्रस्त्रिष्टु-ब्माध्यंदिनो[४] जगत्तृतीयसवनो[५] ' जगत्प्रातःसवनो द्वितीय-स्त्रिरात्रो गायत्रीमाध्यंदिनस्त्रिष्टुत्तृतीयसवनस्त्रिष्टुप्प्रातःसवन-स्तृतीयस्त्रिरात्रो जगन्माध्यंदिनो गायत्रीतृतीयसवन इति[६] ' तस्मात्सच्छन्दस[७] उपयन्ति ' ॥ १० ॥

---

१ Thus MT Bell UD and Keś; चैन्द्रवायवाग्रमष्टममहः शुक्राग्रं नवममहरैन्द्रवायवाग्रं दशमम् B Be; on the whole passage cp. also Āp. xxi. 14. 5.

२ My correction; इतीन्वध्व० M; इतीन्वाध्व० T Be 11 DU; इतीमे ध्व० B Be.

३ Thus M only; गायत्रीप्रातःसवनं प्रथमं त्रिरात्रं the other MSS

४ Thus M only (on the form त्रिष्टुब्स० cp. TS. vii. 2 8. 3); त्रिष्टुप्मा० B Bell; त्रिष्टुभमा० Be TD, त्रिष्टुभोमा० U.

५ All exc. M जगतीतृती०।

६ T Bell DU om. इति and read ०सवनस्तस्मा०; on this whole passage cp. Sāy. on Ait. Br. iv. 25 10.

७ Thus all exc. M, which has तस्मात्समंछंद and Be 11 which reads: तस्माच्छंदस। The reading of M might be correct.

अथातः पशुकृत्तेरेव मीमाꣳसैन्द्राग्नाः पशवः स्युरित्येक आहुरग्नेरयं लोको वायोरन्तरिक्षमसाविन्द्रस्य यदैन्द्राग्नः पशुर्भवति वायव्यो वसाहोम इमानेव[१] तल्लोकान्प्रीणन्ति[१] एषु लोकेषु प्रतितिष्ठन्तो यन्त्यथ[२] ये[३] ऽनैन्द्राग्नान्प्रतिपद्यन्ते[३] यथा श्रेयसे ऽनाहत्य[४] पापीयस आहरन्ति[५] तादृक्तत्साꣳसादैन्द्राग्नाः[६] पशवः स्युरित्येतदेकमतिरात्रपशवो ऽभितो मध्य ऐन्द्राग्ना एकादशिना[७] अभितो मध्य ऐन्द्राग्नाः सर्वाग्नेया[८] एव स्युरित्येतदेकꣳ सर्वैन्द्र[९] एव स्युरित्येतदेकꣳ सर्वप्राजापत्या[१०] एव स्युरित्येतदेकꣳ सर्वैकादशिना[११] एव स्युरित्येतदपरं तेषाꣳ सर्वैकादशिनैर्यतां प्रभिद्धमेव प्रथमे ऽहनि प्रथमामेका- १०

---

१ Thus M; इमानेवैतैर्लो॰ B Be; इमानैवतैर्लो॰ T Be 11 D; इमानेवनैर्लो॰ U. – प्रीणंत M, प्रीणयंत all the other MSS.

२ यांत्यथ M.

३ Thus M (without, of course, avagraha); येन्येनैन्द्राग्नान्प्र॰ U; येन्येनैन्द्राग्नाः प्र॰ B Be; येन्येनैन्द्राग्नांप्र॰ T Be 11 D.

४ नान्येनाहत्य M.

५ आहरति MU Be 11 D, आहरंति B Be.

६ तत् after नाहक् found in Be B only.

७ ऐका॰ M only, but cp. TS. vi. 6. 5. 1.

८ सर्व आग्ने॰ Be.

९ Thus MU; सर्व ऐन्द्रा B Be; सर्वैन्द्राग्ना T Be 11 D.

१० Thus M; सर्वे or सर्वाः प्रा॰ the other MSS.

११ सर्व ऐका॰ B Be.

दग्निनीमालभन्त[१] आग्नेयस्य वारुणमुपालम्भ्यं[२] कुर्वन्ति । तथा-
स्यैतानि दश मध्यमान्यहान्यनतिरिच्यमानाः पशवो ऽनुभवन्ति ।
प्रसिद्धमेवोत्तमे ऽहन्युत्तमामेकादशिनीमालभन्त[३] । आग्नेयस्य
वा वारुणस्य वा वैश्वदेवमुपालम्भ्यं कुर्वन्ति । ॥ ११ ॥

तदु वा आहुर्यद्वादश[४] दीक्षा द्वादशोपसदो द्वादशाहं
प्रसुताः कथमस्यैतान्यहानीष्टान्याप्रीतानि[५] पशुमन्ति भव-
न्तीति । तिस्र एकादशिन्यो ऽग्नीषोमीयो वैश्वदेवो ऽनूबन्ध्या ।
षट्त्रिंशतमसेते[६] पशवः [७]षट्त्रिंशतमेतान्यहान्येवमस्यैतान्यहा-
नीष्टान्याप्रीतानि पशुमन्ति भवन्तीति । तदु वा आहुर्य-
द्वादश दीक्षा द्वादशोपसदो द्वादशाहं प्रसुताः कथं द्वाद-
शाहेन संवत्सर आप्यत इति । द्वादश पौर्णमास्यो द्वादशाष्टका
द्वादशामावास्या । एतानि ह[८] वै[९] संवत्सरस्य वर्षिष्ठान्यहान्येता-

---

१ ०भंत MB Be; ०भत the other MSS. (cp. Āp. xxi. 14. 7); the last time DU also plural.

२ Thus M; वारुणस्य वा वैश्वदेवसुपा० B Be; वा वरुणस्य etc. (as B Be) T Be 11 UD.

३ यदु om. all the MSS. exc. M.

४ M only has preserved this correct reading, all the other MSS. are badly corrupt.

५ Thus all; are we to correct ०त्रिंशत एते?

६ Thus all, exc. M, which reads: षट्त्रिंशमेतान्य०; are we again to correct षट्त्रिंशत एतानि?

७ Thus B Be; ह om M; नवे TBe 11 DU.

न्यनु संवत्सर आप्यते [1]समाप्तो द्वादशाहः [1] समाप्तः संवत्सर-काम [1] एवं द्वादशाहेन संवत्सर आप्यते[1] [1] ॥ १२ ॥ तृतीयः ॥

संवत्सराय दीक्षिष्यमाणाः समवस्यन्ति [1] तद्ध स्मैतत्पूर्वे संवत्सरꣳ समवसायासते ऽन्योऽन्यस्मान्नूक्तं[2] च मानुषं च विजिज्ञासमाना [1] उतो[3] ह्येकः ग्रमरथस्य[4] कर्ता भवति [1] ते चतुरहे पुरस्तान्माघ्यै पौर्णमास्यै दीक्षन्ते [1] तेषामेकाष्टकायां क्रयः संपद्यत [1] इति नु यदि समामविज्ञाय[5] दीक्षन्ते [1] यद्यु वा एतस्यामेवैकाष्टकायाꣳ समां[6] विजिज्ञासन्ते[6] चतुरह एव पुरस्तात्फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्यै दीक्षन्ते [1] तेषामपरपक्षस्याष्टम्यां क्रयः संपद्यते [1] तेनैकाष्टकां न कुम्बत्कुर्वन्ति [1] तेषां पूर्वपक्षे सुत्या संपद्यते [1] पूर्वपक्षं मासा अभि संपद्यन्ते [1] पूर्वपक्षे प्रसवः पूर्वपक्षे वैषुवतं पूर्वपक्ष उत्थानꣳ [1] समानं द्वादशाहिकं कर्म [1] तथैव षष्ठ्यामुपसद्युत्तरवेदिꣳ संनिवपन्ति यद्यनग्निचित्यं भवत्यथ यदि साग्निचित्यं प्रथमायामेवोपसद्युत्तरवेदिꣳ संनिवपन्ति [1] ॥ १३ ॥

---

१...१ Thus M; i. s. o. संवत्सरकाम एवं T Be 11 DU · संवत्सरकामेकाम एवं; acc. to B Be the passage runs thus. एवं द्वादशाहेन संवत्सर आप्यते समाप्तो द्वादशाहः समाप्तः संवत्सरक्रतुः।

२ Thus M Be; ॰स्यानुक्तं Be 11; ॰स्यायुक्तं BUD.

३ Thus M Be (sec. m.), cp. supra xvi. 1 (p. 245, 1); उज्ञाता the other MSS.

४ The word occurs again xvii. 43 and Drāhy. v. 4. 11.

५ समांविज्ञाय M.

६ Thus M; समामविज्ञायासते Be; समामविज्ञासंते the other MSS.

तेषां द्वादश दीक्षा द्वादशोपसदः संवत्सरं प्रसुता न संवत्सरे ऽग्निं चिन्वीतेत्येक आङ्गश्चिन्वत उ हैके प्रसिद्धेन कर्मणोपवसथाद्यन्ति तेषां प्रसिद्धं ज्योतिष्टोमो वैश्वानरः प्रायणीयो ऽतिरात्रः संतिष्ठते तस्मिन्त्सँस्थिते चतुर्विँशम-
५ मुक्थ्यमारभ्मणीयमुभयसामानमुपयन्त्यथाभिप्लवँ षडहमुपयन्ति ज्योतिरग्निष्टोमो गौरुक्थ्य आयुरुक्थ्यो गौरुक्थ्य आयुरुक्थ्यो ज्योतिरग्निष्टोमस्तं चतुरुपयन्ति रथंतरंबृहद्रथंतरंबृहदिति विपर्यासं पृष्टे भवतः पृष्ठ्यः षडहः स मासस्तेनैवँ संपन्नेन पञ्च मासान्यन्त्यथैतँ षष्ठं मासँ संभार्यँ
१० संभरन्ति त्रयो ऽभिप्लवाः षडहास्तान्यष्टादशाहानि प्रायणीयारभ्मणीयौ तानि विँशतिरहानि पृष्ठ्यः षडहो ऽभिजित्त्रयः परःसामानः स मासो ऽथ वैषुवतमथैतं वैषुवते ऽह्न्येकविँशमग्निष्टोमसुपयन्ति बृहत्सामानं तस्य सौर्यो ऽतिग्राह्यः सौर्यः पशुरुपालम्भ्यस्तद्धैतदेके[2] दिवैवैतेनाङ्गा प्रति-
१५ पद्यन्त उदित आदित्ये दिवाकीर्त्यमहरिति वदन्तो यथैवान्येषामङ्गामेवमुपाकुर्यादिति मौद्गल्यस्तस्य महादिवाकीर्त्यँ होतुः पृष्ठं विकर्ण ब्रह्मसामं भासो ऽग्निष्टोमो ऽथोर्ध्वं वैषुवतात्तीनाबृत्तान्स्वरानुपयन्त्यथ विश्वजितमुपयन्त्यथाबृत्तं पृष्ठ्यँ

---

१ The following acc to M; the other MSS. are all more or less corrupt.

२ corrected hesitatingly; तद्धोनैवदेक M, तद्धोचैतदेके Be; तद्धोतैतदेके Be 11 D; तद्धोतत्तदेके B, तद्धोततदेके U pr. m; तद्धोतुः तदेको U sec. m., cp. infra. xvi. 16 (p. 263. 1) and xvii. 11.

षडहमुपयन्ति। [१]चयस्त्रिꣳशप्रभृत्याद्ययणाद्यमेतद्वहर्भवत्यथा-
वृत्तमेवाभिप्लवꣳ षडहमुपयन्ति ॥ १४ ॥

ज्योतिरग्निष्टोम आयुरुक्थ्यो गौरुक्थ्य आयुरुक्थ्यो
गौरुक्थ्यो ज्योतिरेवाग्निष्टोमस्तं तथैव चतुरुपयन्ति। बृहद्रथंतरं-
बृहद्रथंतरमिति विपर्यासं[२] पृष्ठे[३] भवतः। पृष्ठ्यः षडहः पुरस्तात्सं ५
मासस्तेनैवꣳ संपन्नेन पञ्च मासान्यन्त्यथैतꣳ[४] षष्ठं मासꣳ
संभार्यꣳ संभरन्ति। द्वावभिप्लवौ षडहौ तानि द्वादशाहानि।
गोआयुषी तानि चतुर्दश। चत्वार्यूर्ध्वं वैषुवतात्तान्यष्टादश।
दशरात्रो महाव्रतं चातिरात्रश्च। स मासस्तदेतन्मासिपृष्ठं
गवामयनम्। ॥ १५ ॥ चतुर्थः ॥ १०

अनुत्सर्गं बृहद्रथंतराभ्यामिवोत्तमे मासि सकृत्पृष्ठान्युपेयु-
स्तद्द्वितीयं गवामयनं। दशमास्यꣳ[५] तृतीयमभिप्लवाश्चाचीयन्तिꣳ[५]
च तदङ्गिरसामयनं। पृष्ठ्याश्चाचीयन्ति च तदादित्यानामयन-
मग्निष्टोमाश्चाचीयन्ति च तत्प्रजापतेरयनं। प्रायणीयोदय-
नीयावभितो मध्ये ऽग्निष्टोमास्तद्द्वितीयं प्रजापतेरयनꣳ। १५
सर्वाग्निष्टोमा[६] एव स्युरिति तत्तृतीयं प्रजापतेरयनमथातो

---

१ चयस्त्रिंꣳशप्र॰ M; चयस्त्रिंꣳशत्प्र॰ the other MSS.

२ All MSS. exc. M ins. इति।

३ Thus M; पृष्ठौ Be UD; पृष्ठ्यौ B; पृष्ठ्यौ Be 11.

४ Thus M; मासाꣳश्चर्यंत्य॰ B Be 11 DU (pr. m.); मासानुपर्यंत्य॰ Be

५ Thus M; दशममास्यं तृतीयमभि॰ Be; दशमासामभिप्ल॰ BU (pr. m.); दशममासमभिप्ल॰ Be 11 U (sec. m.).

६ सर्वेग्नि॰ Be.

ग्रहकृप्तेरेव मीमाꣳसा । तद्धैतदेके[१] सारस्वतवैष्णवौ ग्रहौ गृह्णन्ति प्रायणीयादेवाग्ने ऽतिरात्रादोदयनीयाद्वाग्वै सरस्वती यज्ञो विष्णुस्ते वाचं चैव यज्ञं च मध्यतः परिगृह्यानार्ता उदृचं गमिष्याम[२] इति वदन्तस्तदु वा आर्ज्जयदाचा[३] यज्ञ-
५ स्तायते तेन सरस्त्यान्ना[४] यदु[५] यज्ञस्तेन[५] विष्णुर्न[६] वै[६] नो ब्राह्मणं भवति । सारस्वतवैष्णवौ ग्रहौ गृह्णीयादिति नैतदा-द्रियेत[७] । नाद्रियेतेति[७] स्थितिः । ॥ १६ ॥

अथातो ऽश्वदाभ्ययोरेव ग्रहणं । प्रायणीये ऽदाभ्यं गृह्णीयादꣳशुं वैष्णवते ऽदाभ्यं महाव्रत उभौ प्रायणीय उभौ
१० वैष्णवत उभौ महाव्रते । यच्च क्व चैवैनौ[८] गृह्णीयादित्येतद्-परमंयातः परःसाम्नामेव ग्रहणं । ते वा एते परःसामानः पुरस्ताद्वैष्णवात्ग्रहमन्वहमितः पराञ्चो गृह्यन्त उपयामगृहीतो ऽस्यꣳशुस्त्वौषधीभ्यो जुष्टं गृह्णाम्युपयामगृहीतो ऽस्योषधीभ्यस्त्वा

---

१ Thus Be; तद्धैतदेके MUD; तद्धैतदेके Be 11; तद्धैतेनदेके B; cp. supra p. 261, 14.

२ °यामंह Be and M, but, if I see right, the ह has been struck out.

३ °र्याचा M.

४ All MSS. exc. M °ग्ना इति ।

५ Thus M; यद्यज्ञस्तेन Be; यज्ञंयज्ञस्तेन the other MSS.

६ वै om. BUD Be (pr. m.).

७ Thus M (cp. supra p 252, 10); नैतदाद्रियेत आद्रियेतेति the other MSS.

८ Thus M, चैनौ the other MSS.

प्रजाभ्यो जुष्टं गृह्णाम्युपयामगृहीतो ऽसि प्रजाभ्यस्त्वा प्रजापतये जुष्टं गृह्णामीत्यथ वैषुवते ऽह्नि शुक्राग्रा ग्रहा गृह्यन्ते[1] समानं कर्माग्रयणाद्ग्रहादाग्रयणं[2] गृहीत्वा चोन्पर:सान्नो गृह्णात्युपयामगृहीतो ऽस्यद्भ्यस्त्वौषधीभ्यो जुष्टं गृह्णाम्युपयामगृहीतो ऽस्योषधीभ्यस्त्वा प्रजाभ्यो जुष्टं गृह्णाम्युपयामगृहीतो ऽसि प्रजाभ्यस्त्वा प्रजापतये जुष्टं गृह्णामीत्यथ सौर्यर्चा[2] सौर्यमतिग्राह्यं गृह्णाति ॥ १७ ॥

तरणिर्विश्वदर्शत ज्योतिस्कृदसि सूर्याय त्वा भ्राजस्वते जुष्टं गृह्णामीति[1] परिमृज्य सादयत्येष ते योनिः सूर्याय त्वा भ्राजस्वत इत्यथावृत्तान्गृह्णात्युपयामगृहीतो ऽसि प्रजाभ्यस्त्वा प्रजापतये जुष्टं गृह्णाम्युपयामगृहीतो ऽस्योषधीभ्यस्त्वा प्रजाभ्यो जुष्टं गृह्णाम्युपयामगृहीतो ऽस्यद्भ्यस्त्वौषधीभ्यो जुष्टं गृह्णामीति[1] सप्तैतद्धरतिग्राह्या गृह्यन्त इति ब्राह्मणमथोर्ध्वं वैषुवतात्त्रयहमन्वहमावृत्तानेव गृह्णाति वैश्वकर्मणादित्याभ्यां विपर्यासमुपयामगृहीतो ऽसि प्रजाभ्यस्त्वा प्रजापतये जुष्टं गृह्णामीत्यथ वैश्वकर्मणं[1] विश्वकर्मन्हविषा वावृधान ज्योतिस्कृदित्युपयामगृहीतो ऽस्योषधीभ्यस्त्वा प्रजाभ्यो जुष्टं गृह्णामीत्यथादित्यमदितिर्न उरुष्यत्वित्युपयामगृहीतो ऽस्यद्भ्यस्त्वौषधीभ्यो जुष्टं गृह्णामीत्यथ वैश्वकर्मणमथादित्यमथोर्ध्वं त्र्यहाद्वैश्वकर्मणादित्याभ्यामेव विपर्यासमेत्या

---

१ गृह्णं ins M.

२ om B Be 11 UD.

महाव्रतात्तावुभौ सह महाव्रते गृह्येते । अथैतं महाव्रतीये ऽह्नि प्राजापत्यमतिग्राह्यं गृह्णाति । वे क्रतुमपिवृञ्जन्ति विश्व दृत्यनुद्रुत्योपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णामीति । परिवृज्य सादयत्येष ते योनिः प्रजापतये त्वेति । ॥ १८ ॥

५ अथातः पशुकृतेरेव सौमाग्र्यैन्द्राग्नानां[1] प्रगृह्य सांति-राचपशवो ऽभितो मध्य ऐन्द्राग्ना । ऐकादशिना[2] अभितो मध्य ऐन्द्राग्नाः । सर्वाग्नेया[3] एव स्युरित्येतदेकम् । सर्वैन्द्राग्ना[4] एव स्युरित्येतदेकम् । सर्वप्राजापत्या[5] एव स्युरित्येतदेकम् । सर्वैकादशिना[6] एव स्युरित्येतदपरं । तेषाम् सर्वैकादशिनैर्यतां[7]
१० प्रसिद्धमेवोत्तमस्य दशरात्रस्य तृतीये ऽह्नस्तदग्र उक्त्वा एका-दशिन्याप्यते । तस्य नवाहान्यपशून्यतिरिच्यन्ते । तेष्वेतान्नव ब्राह्मणवतः पशूनालभन्ते वैष्णवं वामनमित्येतान्येषामेवं[8] यतां वार्हस्पत्यो वैष्णवते सवनीयः संपद्यते । तस्य सौर्यमुपा-लम्भ्यं कुर्वन्ति । यद्यु वा एतान्नव[9] ब्राह्मणवतः पशून्न
१५ विन्दन्ति नवैतानि मध्यमानि सांवत्सरिकाण्यहान्यैन्द्राग्नपशूनि

---

१ Thus M; सौमाग्र्या उक्तैवैन्द्राग्नानां Be, सौमाग्र्या ऐन्द्रा B Be 11 UD.

२ Thus M, एका॰ the other MSS.

३ सर्व आग्ने॰ MSS. exc M.

४ सर्व ऐ॰ MSS; this passage is missing in M

५ सर्वप्रा॰ MSS. exc. M.

६ Thus M, सर्व ऐका॰ Be, सर्व एका॰ the other MSS.

७ Thus M, युतां or यताः the other MSS.

८ ॰मेवं M Be; ॰मेव the other MSS

९ M; एतंनव Be 11 BUD, एतानेव Be.

कुर्वन्ति । तेषामेवं यतामैन्द्राग्नो वैष्णवते सवनीयः संपद्यते । तस्य सौर्यमुपालम्भ्यं कुर्वन्ति । सावित्रो महाव्रते । तस्य प्राजापत्यस्थपर ऐन्द्रश्वर्षभ उपालम्भ्यौ भवतः । ॥ १६ ॥

पञ्चमः ॥

श्वो महाव्रतमित्युपकल्पयते [१]ऽपरिमितान्नयानपरिमितान्दुन्दुभीꣳस्तावत[२] उ[३]वेवाजिसृतश्चर्म[२] चेडसंवर्त[२] च भूमिदुन्दुभिमार्षभं चर्म सलाङ्गूलं ब्राह्मणं च शूद्रं चार्द्रं[४] च चर्मकर्त[५] श्रेङ्खꣳ होता कूर्चावध्वर्युर्बर्हीहोचका[६] औदुम्बरीमुद्गातासन्दीमुपकल्पयते[१] । वाणं च ग्रततन्तुमाघाटीः पिच्छोलाः[७] कर्करीका इति तदु पत्नयः । कटपरिवारं च मिथुनौ चापरिमिताश्च दासस्तावत उ[८]वेवोदकुम्भानथैतं[९] महाव्रतीये ऽह्नि पञ्चविꣳशमग्निष्टोममुपयन्ति रथंतरसामानꣳ । समानं कर्मा माहेन्द्राद्ब्रह्मन्माहेन्द्रं ग्रहं[८] गृहीत्वाथैतान्संभारानायातयति । जघनेनाग्नीध्रं गर्त[९] खानयित्वार्षभेण क्रूरचर्मणोत्तरलोम्नाभि-

---

१...१ This passage found in M and Be sec. m. only.

२ तावत एवा० Be.

३ Corrected (cp. infra p. 267. 5); चेडासंवर्त M; चेषुसं० Be.

४ om. Be.

५ ०र्त्रची० M Be.

६ पिꣳछोलाः M here and infra.

७ Thus M; एवोद० the other MSS.

८ om. all exc. M Be.

९ कर्त M Be 11 (pr. m.) D.

विघ्नन्ति[१] । तस्य लाङ्गूलमुत्खिद्य हन्तानूपतिष्ठते । ऽथैतान्दुन्दुभीननुदिग्गमासञ्जयति । तानाहननैरनाघ्नन्त[२] एते हन्तारो ऽनूपतिष्ठन्ते । ऽथैते रथाः समन्तं देवयजनं परीत्योत्तरतस्तिष्ठन्ति[३] । तेषां तिसृधन्वी राजपुत्रो मुख्यो भवति ॥ २० ॥

तस्मा अग्नेणाग्नीध्रमिडसंवर्ते[४] चर्मकर्तं व्यवास्यति । तं काल एव ग्रस्त्याहरण्त्यथैतौ ब्राह्मणस्य शूद्रस्यान्तरेण सदोहविर्धाने तिष्ठत आर्द्रं चर्मकर्तमादाय । स्रेङ्खꣳ होतासजते । कूर्चावध्वर्युरुपस्तृणीते । इसीर्हाचका । औदुम्बरीमुद्गातासन्दीमारोहत्यादत्ते वाणꣳ श्रततन्तुमांघाटीभिः पिच्छोलाभिः कर्करीकाभिरित्युद्गातारं पत्नयः पर्युपविशन्त्यथ दक्षिणे वेद्यन्त कटपरिवारे मिथुनौ संप्रवादयतो[५] । ऽथैता दास उदकुम्भानधिनिधाय मार्जालीयं पर्युपविशन्त्यथाध्वर्युः कूर्चयोरासीनो माहेन्द्रस्य स्तोत्रमुपाकरोति । स्तुवते माहेन्द्राय । प्रस्तुते साम्नि संप्रेषमाहाजिसृत आजिं धावत दुन्दुभीन्समाघ्नताभिषोतारो ऽभिषुणताग्नीदाग्निरं विनयोलूखलमुद्गादय प्रतिप्रस्थातः

---

१ °भिविनिघ्नंति M; cp. supra XI. 10 (p. 79. 4) and infra XVII. 39, XVIII. 18.

२ Corrected; तानाहाहननैराहनत M; तानाहननैरनाहत B Be 11 UD; तानाहननैरन्वाहनना Be.

३ Thus M; परीत्यरटंतोत्तरतस्ति° all the other MSS

४ Thus M; °मिषुसंवर्ते all the other MSS.

५ Thus M; संप्रवादेतो BUD (pr. m.) Be 11 (pr. m.); संभवतो Be 11 (sec m.) D (sec. m.); संप्रवादेयतो Be.

सौम्यस्य विद्धीति । यथासंप्रैषं ते कुर्वन्ति । धावन्त्याजिसृत । आघ्नन्ति दुन्दुभीन्त्संप्रवदन्ति वाच । आघाटीभिः पिञ्छोलाभिः कर्करीकाभिरित्युद्गातारं पत्नय उपगायन्ति ॥ २१ ॥

भद्रमु नाम सामास्ति । तदु वाचोपगीयते । ऽथैष तिसृधन्वी राजपुचश्चर्मावभिनत्ति । तं ब्राह्मणो ऽनूपतिष्ठते मापरात्सीर्मातिव्यात्सीरिति । तत्तथैव चिभिरन्तर्हितमवभिनत्त्यथैतौ ब्राह्मणश्च शूद्रश्चार्द्रं चर्मकर्तं व्यायच्छेते दमे ऽरात्सुरिमे सुभूतमक्रन्निति ब्राह्मण । दम उदासीकारिण दमे दुर्भूतमक्रन्निति वृषलो । ब्राह्मणः संजयति । नश्यति वृषलः । संवर्तते मिथुनावथैता दास्य उदक्कुम्भानधिनिधाय मार्जालीयं परिनृत्यन्त्युपस्थानुपहत्य दक्षिणान्पदो निम्नन्तीरिदंमधुं गायन्त्यासाꣳ सङ्कल्परीतानां प्रथमां वाचयति ॥ २२ ॥

गाव एव सुरभयो गावो गुग्गुलुगन्धयः । गावो घृतस्य मातरस्ता इह सन्तु भूयसीर्हैमहाꣳ इदं मधित्युपस्थानुपहत्य दक्षिणानेव पदो निम्नन्ति । द्वितीयं परीतानां प्रथमामेव वाचयति ननु गावो मद्धीरस्य गङ्गाया उदकं पपुः । पपुः सरस्वत्यै नद्यै ताः प्राचीरुज्जगाहिरे हैमहाꣳ इदं मधित्यु-

---

१ Thus M; °पगायंतेषैष BUD Be 11; °पगायंत्यथैष Be.

२ I. s.o. त्यवभिनत्ति B Be 11 UD: भवति।

३ Thus M and cp. Āp. XXI. 19. 18; निम्नंतीदं° the other MSS.

४ Thus M; ताः प्रातरप्राचीनं जगाभिरे (or जगाभिः) the other MSS.; Kes.: ताः प्राचीश्चोज्जगाहिरे; cp. Āp. XXI. 20. 3.

पस्यानुपहत्य दक्षिणानेव पदो लिम्पन्ति । त्रीयं परीतानां प्रथमामेव वाचयति यदा राखन्धौ[१] वदतो[१] ग्राम्यं[२] मङ्कीरदाग्रकौ[१]। चेमाध्वस्यतो ग्रामे[३] मानङ्गाग्रदत्ते वहन्मैमहाग्रं इदं मध्वित्यिधैना उत्तरेण मार्जालीयं तिष्ठन्यो वाचयतीद्[४]मेव मधु सारघमयग्रं सोमः सुतो दृत्त् । तमिन्द्र परितातपोर्हैमहाग्रं इदं मध्विति । ता अत ऊर्ध्वमिदं मध्विदं मध्विदं मध्वित्येव[५] परियन्ति । तेषां य एव प्राचीनो ऽतिरात्रः स उदयनीयः । सत्रादुदवसाय ज्योतिष्टोमेनाग्निष्टोमेन[५] षडहेन पृष्ठ्यप्रवनीयेन सहस्रदक्षिणेनैकको यजेत ॥ २३ ॥ षष्ठः ॥

१० स्वर्गकामो द्विरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तया राजानं क्रीणाति यया मन्यते द्विरात्रस्य मे सतो ऽमावास्याया उपवसथीये ऽह्नः पूर्वमहः संपद्यत उत्तरस्मिन्नुत्तरमिति । तस्य तथा संपद्यते । ऽभिप्लवः पूर्वमहर्भवति गतिरुत्तरं । ज्योतिष्टोमो ऽग्निष्टोमः पूर्वमह१५ र्भवति । तेजस्वेनावरुन्द्धे । सर्वस्तोमो ऽतिरात्र उत्तरग्रं । सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै । गायत्रं पूर्वं छन्दाम भवति । त्रैष्टुभ-

---

१ Uncertain; राखंधौवंदतो M, राखधोधो वदतो Be 11; राधोखधोतो वंदतो Be, धारोधौवंदतो U, D indistinct

२ Thus M, ग्राम्यसंकी॰ Be Be 11.

३ ग्रामे M, ग्रामो the other MSS.

४ ॰त्येवमेव M.

५ Thus M Be; ज्योतिष्टोमेन चाग्निष्टोमेन the other MSS.

मुत्तरे। रथंतरं पूर्वे ऽह्न्साम भवति। बृहदुत्तरे। वैखानसं पूर्वे ऽह्न्साम भवति। षोडश्युत्तरे। हविष्मन्निधनं पूर्वमहर्भवति। हविष्कृन्निधनमुत्तरं। नानैवार्धमासयोर्भवतो नानावीर्यं भवत इति ब्राह्मणं। संतिष्ठते द्विरात्रस्त्रिरात्रेण यज्ञमाणो भवति। स उपकल्पयते सहस्रं। तस्मिन्नुन्नतो वेहद्दामन इति भवत्यं- ५
धास्यैषा सहस्रतम्यन्यतएनी कण्डूलतोपक्लृप्ता[1] भवति। दीक्षते। रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति। द्वादशोपसदः। ॥ २४ ॥

तायते प्रथमे ऽह्न्यग्निष्टोमस्तस्य चित्पात:सवनं पञ्चदशं माध्यंदिनं सवनं सप्तदशं तृतीयसवनं। स दाक्षिणानि १०
ऊलाग्नीध्रे सुवाऊतिं जुहोति त्वं सहस्रमानय। उन्नत उदलस्याभिनस्खचम्। सा मा सहस्र आभज प्रजया पशुभिः सह पुनर्मा विशताद्रयिरित्युन्नत एतेषां चयाणां चित्पञ्चतानां[2] प्रथमो नीयते। ऽहीनसंततिं करोति। तायते द्वितीये ऽह्न्युक्थ्यस्तस्य पञ्चदशं प्रातःसवनं सप्तदशं माध्यंदिनं सवन- १५
मेकविंशं तृतीयसवनं। स दाक्षिणानि ऊलाग्नीध्रे सुवाऊतिं जुहोत्यूर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छ पाहि मा मा मा हिंसीः सा मा सहस्र आभज प्रजया पशुभिः सह पुनर्मा विशताद्रयिरिति। वेहदेतेषां चयाणां चित्पञ्चतानां[2] प्रथमा[3] नीयते। ऽहीनसंततिं करोति। तायते तृतीये ऽह्न्य- २०

---

१ Thus M and Karmāntasūtra; कमंडलतो० the other MSS.

२ Sic MSS.! ३ प्रथमो M Be.

त्रतिराचस्तस्य सप्तदशं प्रातःसवनमेकविꣳशं माध्यंदिनꣳ सवनं चिण्व आर्भवः पवमानस्तयस्त्रिꣳशमग्निष्टोमसामैकविꣳशान्युक्थानि सषोडशिकानि । षोडशं प्रथमꣳ राचिसाम पञ्चदशानीतराणि चित्रद्रायंतरः[1] सन्धिः । स दाक्षिणानि ऊलाग्नीध्रे स्रुवाऋतिं जुहोति त्वꣳ सहस्रस्य प्रतिष्ठासि[2] वैष्णवो वामनस्त्वम् । सा[3] मा सहस्र आभज प्रजया पशुभिः सह पुनर्मा विशताद्रयिरिति । वामन एतेषां त्रयाणां चत्वारिꣳशच्छतानां[4] प्रथमो नीयते । नाचाद्दीनसंततिं करोति ॥ २५ ॥

अथैताꣳ सहस्रतमीमुत्तरेणाग्नीध्रं[5] पर्याणीयाहवनीयस्यान्ते द्रोणकलशमवघ्रापयेदाजिघ्र कलशं मह्यरुधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । सा मा सहस्र आभज प्रजया पशुभिः सह पुनर्माविशताद्रयिरिति । प्रजयैवैनं पशुभी रय्या समर्धयति प्रजावान्पशुमाञ्चयिमान्भवति य एवं वेदेति ब्राह्मणमथ वै भवति तया सहाग्नीध्रं परेत्य पुरस्ात्प्रतीच्यां तिष्ठन्त्यां जुहुयादिति । स तया सहाग्नीध्रं परेत्य पुरस्ात्प्रतीच्यां तिष्ठन्त्यां जुहोत्युभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा

---

१ Thus M; बृहद्राथंतरः Be; बृहद्रथंतरः the other MSS.

२ प्रतिष्ठा असि all, also M.

३ स M

४ Thus M only (sic!), चत्वारिꣳशतानि all the other MSS.

५ ०ग्नीध्रीयं MSS; U sec. m. ०ग्नीध्रे ।

सहस्रं वि तदैरयेयामिति । मेधाविभक्तं वै चिराचे सहस्रꣳ । साहस्रीमेवैनां करोति । सहस्रस्यैवैनां मात्रां करोतीति ब्राह्मणमथास्यै रूपाणि जुहोत्यश्वेताये स्वाहा कृष्णाये स्वाहा श्वेताये स्वाहेत्यथास्या उपोत्थाय नामभिर्दक्षिणं कर्णमाजपतीडे रन्ते ऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अग्निये नामानि सुकृतं मा देवेषु ब्रूतादिति । देवेभ्य एवैनमावेदयत्यन्वेनं देवा बुध्यन्त इति ब्राह्मणम् ॥ २६ ॥

अथैतासꣳ सहस्रतमीमन्तरेण चात्वालोत्करावुदीचीं नीयमानामनुमन्त्रयते सा मा सुवर्गं लोकं गमय सा मा ज्योतिष्मन्तं लोकं गमय सा मा स्वर्ग्यस्योक्थ्यस्य लोकस्य गमय सा मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्मा विशताद्रयिरिति । प्रजयैवैनं पशुभी रय्यां प्रतिष्ठापयति । प्रजावान्पशुमान्रयिमान्भवति य एवं वेदेति ब्राह्मणमथ वै भवति तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाध्वर्यवे वा दद्यात्सहस्रस्य सा दत्ता भवति सहस्रस्य प्रतिष्टीतं भवतीति ब्राह्मणमथ वै भवति यस्मामविद्वान्प्रतिगृह्णाति तां प्रतिष्टीयादेकामसि न सहस्रमेकां त्वा भूतां प्रतिगृह्णामि न सहस्रमेका मा भूताविश मा सहस्रमित्येकामेवैनां भूतां प्रतिगृह्णाति न सहस्रं य एवं वेदेति ब्राह्मणमथ वै भवति स्योनासि सुषदा सुशेवा स्योना माविश सुषदा माविश सुशेवा माविशेत्याह । स्योनैवैनꣳ सुषदा सुशेवा भूताविशति नैनꣳ हिनस्तीति ब्राह्मणमथ वै भवति ब्रह्मवादिनो वदन्ति सहस्रꣳ सहस्रतम्यन्वेती२

सहस्रतमीꣳ सहस्राꣳमिति । यत्राचीमुत्सृजेत्सहस्रꣳ सहस्रतम्यन्विया-त्तत्सहस्रमप्नुयाच्च । सुवर्गं लोकं न प्रजानीयात्प्रतीचीमुत्सृजति । ताꣳ सहस्रमनु पर्यावर्तते । सा प्रजानती सुवर्गं लोकमेति । यजमानमभ्युत्सृजतीति । तां पुरस्तात्प्रतीचीं यजमानमभ्युत्सृजति । क्षिप्रे सहस्रं प्रजायत उत्तमा नीयते प्रथमा देवाङ्गच्छतीति ब्राह्मणं । तेन हैतेन रौहिणेयः क्रोथुनिः[१] कौलाश्वो[२] यास्क ऋतुमुखेषु विहृतेनेजे[३] । ऽथो[२] हाजमाम[२] मग्रको गार्ग्य आरुणेरन्तेवासी । स[४] ह[४] सꣳस्था-मदृष्टोवाच[४] ननु मत[५] एकाहाꣳ इति । नेति हैनं प्रत्युवाच । तꣳ होपेयाय । तस्मा उ हैनꣳ स उवाच । तेन ह स्म[६] समस्तेनैव[६] यजते । तमेतं गर्गचिराच इत्याचक्षते । ॥ २७ ॥ सप्तमः ॥

चतुरो वीरानवरुरुत्समानञ्चतुराचाय दीक्षते । [७]तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहान्यग्निष्टोमा एवैते चतु-

---

१ Thus M; काथुनि B Be 11 D; क्राथनिः Be.

२ लौकाश्वो B.

३ Thus M; विहृतेनेजेताजगाम B Be 11 DU; विहृतेनेयजेताथो हाजगाम Be.

४ Thus M, संहस्रꣳस्थो (स्था) दृष्टोवाच B Be 11 UD; सहस्रं दृष्टोवाच Be.

५ Doubtless corrupt; thus reads M; तर Be 11 D, तर BU, तप Be

६ Thus M, स्म (श्म)श्रगस्ते (स्तै) नैव the other MSS.

७ From here unto दीक्षते, p. 274. 5, left out in M.

र्विꣳशाः पवमानाः[१] उद्यत्स्तोमाः[१] स्युरित्येतदेकमेकोऽग्निष्टोमो द्वावुक्थ्यावथातिरात्रश्छन्दोगानु[२] सामविकल्पं[३] पृच्छेयुरित्येतदपरमचिꣳ श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपानमन्नेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यमित्येताङ्कामानवरुरुत्समानश्चतूरात्राय[४] दीक्षते। तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहान्यग्निष्टोमा एवैते चतुष्टोमाः स्युरित्येतदेकमेकोऽग्निष्टोमो द्वावुक्थ्यावथातिरात्रश्छन्दोगानु[२] सामविकल्पं पृच्छेयुरित्येतदपरं। पुष्टिकामश्चतूरात्राय दीक्षते। तस्यापरिमिता दीक्षा द्वादशोपसदो। ऽथ वै भवति पुरोडाश्निय उपसदो भवन्तीति। प्रथमे चतूरात्र आग्नेय आज्य आग्नेयमष्टाकपालꣳ सायंप्रातरन्ववधाय जुहोति। द्वितीये चतूरात्रे सौम्य आज्ये सौम्यं चतुष्कपालꣳ सायंप्रातरन्ववधाय जुहोति। तृतीये चतूरात्रे वैष्णव आज्ये वैष्णवं चिकपालꣳ सायंप्रातरन्ववधाय जुहोति। तस्य चिदृत्सन्नदग्नौ विपर्यासꣳ स्तोमौ भवतः। प्राणो वै चिदृदन्नꣳ सन्नदग्नः प्रजापतिः। प्राणाच्च खलु वा इदमन्नाद्याच्च

---

१ Thus (without visarga) Be; पवमानस्तत्स्तोमा B Be 11 UD.

२ I am in doubt whether छन्दोगानु सा० पु० or छन्दोगाननु सा० पु० should be put into the text; Be has each time the last mentioned reading, M presents once the first, once the last mentioned; the other MSS. छंदोगाञ्चनु or °तु or छंदोगाञ्च।

३ स्तोमवि० B Be 11 DU; सामवि० Be.

४ Thus Be; °नवरुरुत्स (त्सु) कामश्च० B Be 11 UD.

परिगृह्य प्रजापतिः प्राजायत । प्राणाच्चैवैतदन्नाद्याच्च परिगृह्य यजमानः प्रजायते । तस्माद्दान्यग्निष्टोमा एवैते चतुस्त्रिꣳशवमानाः स्युरित्येतदेकमेकोऽग्निष्टोमो द्वावुक्थ्यावथातिरात्रꣳछन्दोगानु[1] सामविकल्पं पृच्छेयुरित्येतदपरम् ॥ २८ ॥

प्रजातिकामो[2] वा व्यावृत्कामो वा पशुकामो वा[3] वाचो[3] वान्तं[3] परिजिगाꣳसन्यच्चरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि चित्पृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्यः पञ्चविꣳशोऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठोऽतिरात्रः । सारस्वतेनायनेनैष्यन्तो[4] द्वयीर्गा उपकल्पयन्त ऋषभैकादशा[5] अन्याः[6] ऋषभैकशता[7] अन्यास्तेषामाश्वत्थी हविर्धानं चाग्नीध्रं च भवतस्तद्धि सुवर्ग्यं । चक्रीवती भवत । उलूखलबुध्न एषां यूपो भवति । ते सरस्वत्यै जघन्योदके[8] दीक्षन्ते । तेषामयमेव चित्पृदग्निष्टोमः संतिष्ठते । तस्मिन्नꣳस्थिते ऽभि यूपं वहन्त्यभि धिष्ण्यान्हरन्त्यग्निष्टे ऽनषि

---

१ Cp. page 274, note 2.

२ प्रजापतिकामो all MSS. exc. M.

३ Thus M Be; वावाचमंत Be 11 वावाचामंत BUD.

४ ०नैष्यतो (०ते) MSS. exc. M.

५ Thus M, ऋषभैकादश Be; ऋषभैका Be 11 BUD.

६ om. M.

७ Thus all, exc. M, which has ऋषभैकादशता ।

८ Thus B Be 11 UD; जघनेनोदके Be M.

समवग्रमयन्ते[१] यदेषाꣳ समवग्रमयितव्यं[१] भवति । ते[२] ऽनेनैव[२] षष्ठेन[२] षडहेन प्रतिपद्यन्ते । ऽहरहः ग्रम्यान्यासेग्रम्यान्यासे यजमाना आक्रोग्रन्तो ऽज्यानिमिच्छमाना यदा दꣳ ग्रतं कुर्वन्त्यथैकमुत्यानं । यदा ग्रतꣳ सहस्रं कुर्वन्त्यथैकमुत्यानं । यदैषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्यानं ग्राचे वा प्रस्रवणे । ॥ २६ ॥

अथातो मुन्ययनमित्याचक्षते । अमणः खारीविवधौ[३] सरस्त्यै जघन्योदके[४] ऽग्नये व्रतपतये पुरोडाग्रमष्टाकपालं निर्वपति । सा प्रग्रिङ्निष्टिः संतिष्ठते । ऽथैताꣳ सवनेष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादग्रकपालं वैग्वदेवं द्वादग्रकपालमिति । तया समस्तया वा[५] विच्छेतया वा प्रतिपद्यते । ऽहरहः ग्रम्यान्यासेग्रम्यान्यासे यजमानः[६] आक्रोग्रन्नज्यानिमिच्छमानो[७] यदैनं[८] प्रतिराधुवन्ति यदा वास्यैतं खारीविवधमाच्छिन्द्यन्त्यथैकमुत्यानं[९] ग्राचे वा प्रस्रवणे । ॥ ३० ॥ अष्टमः ॥

---

१ Thus Be; समाग्रम० M; the other MSS. are wholly corrupt.

२ Thus M; तमेवषष्ठेन B Be 11 UD; तेनैवषट्षष्ठेन Be.

३ Thus M; ०विवधः Be; ग्रारीवधा the other MSS.

४ Corrected; जघनोदके M Be 11, जघनेनोदके the other MSS.

५ All exc. M om.

६ यजमाना M.

७ Corrected; ०क्रोग्रमज्या० B Be 11 UD; ०क्रोग्रंज्या० Be; ०क्रोग्रंनोज्या० M.

८ Thus MU Be 11; यदैवं BD; यदेवं Be.

९ Thus M Be; ग्रारीविवेधमा० Be 11; राग्रीविवेधुमा BUD.

पशुकामः सप्तराचाय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि चित्रदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्य एकविंश उक्थ्यस्त्रिणव उक्थ्यः पञ्चविंशो ऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठो ऽतिरात्रो । बृहद्रथतरे पूर्वेद्युरहःसूपेत्य प्रत्यक्षं विश्वजिति पृष्ठान्युपयन्ति । ब्रह्मवर्चसकामो ऽष्टराचाय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि चित्रदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्य एकविंश उक्थ्यस्त्रिणव उक्थ्यस्त्रयस्त्रिंश उक्थ्यः पञ्चविंशो ऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठो ऽतिरात्रः । प्रजासु वा चुचुक्रासु ज्योगामयावी वा नवराचाय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि ज्योतिर्गौरायुरित्येतमेव ऋचं चिरुपयन्ति । तेषामायुरतिरात्र उत्तममहर्भवति । प्रजातिकामो वा व्यावृत्कामो वाभिचरन्नभिचर्यमाणो[1] वा दशरात्राय दीक्षिष्यमाणो दशहोतारꣳ कृत्वा दशरात्राय दीक्षते । तस्याप्तरिमिता दीक्षा द्वादशोपसदस्तस्याहानि चित्रदग्निष्टोमो ऽग्निष्टुदाग्नेयीषु भवति । पञ्चदश उक्थ्य ऐन्द्रीषु । चित्रदग्निष्टोमो वैश्वदेवीषु । सप्तदशो ऽग्निष्टोमः प्राजापत्यासु तीव्रसोम । एकविंश उक्थ्यः सौरीषु । सप्तदशो ऽग्निष्टोमः प्राजापत्यासूपहव्यस्त्रिणवावग्निष्टोमावभित ऐन्द्रीषु । त्रयस्त्रिंश उक्थ्यो वैश्वदेवीषु । विश्वजित्सर्वपृष्ठो ऽतिरात्रः ॥ ३१ ॥

---

१ वाभिचरन् left out in all exc. M.

प्रजाकामा एकादशराचाय दीक्षन्ते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि ज्योतिरतिरात्रः । पृष्ठ्यः षडहस्त्रयस्त्रिंशोमा । अथातिरात्रो । ऽथाहीनविधिः पृष्ठ्यः षडहस्त्रयस्त्रिंशोमा । दशममहरथातिरात्रो । ऽथायं पौण्डरीक एकादशराचो ऽयुतदक्षिणो ऽश्वसहस्रदक्षिणस्तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहान्यभ्यासङ्गः षडहस्त्रयस्त्रिंशोमा । दशममहरथातिरात्रो । ऽन्वहꣳ सहस्रꣳसहस्रं ददात्युत्तमे ऽहन्यश्वसहस्रं[1] ददात्यथातो ज्योतिरयनमित्याचक्षते । स भरतद्वादशाह इत्येक आहुर्दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि ज्योतिरतिरात्रो[2] । ज्योतिरग्निष्टोमो । ऽष्टौ ज्योतीꣳष्युक्थ्या[3] । ज्योतिरेवाग्निष्टोमो । ज्योतिरेवातिरात्र उक्तो द्वादशाहो । दशमं चाहरतिरात्रं च महाव्रतं व्यवदधाति । स उवेव[4] चयोदशराचः । ॥ ३२ ॥ नवमः ॥

अथ पूर्वश्चतुर्दशराचो । ऽतिरात्रः । पृष्ठ्यः षडहः । प्रत्यङ् षडहो । ऽथातिरात्रो । ऽथोत्तरश्चतुर्दशराचो । ऽतिरात्रो । ज्योतिर्गौरायुरिति त्र्यहः । पृष्ठ्यः षडहः । प्रत्यङ् त्र्यहो । ऽथातिरात्रो । ऽथ पूर्वः पञ्चदशराचो । ऽतिरात्रो । ज्योतिर्गौरायुरिति त्र्यहो । दशराचो । ऽथातिरात्रो । दशमं चाहरतिरात्रं च

---

१ ऋश्व० M.

२ Thus MUD ; ज्योतिराचो B Be , Be 11 def.

३ Thus M (sec. m.) BUD ; ०क्थ्यानि M (pr. m.) Be ; Be 11 def.

४ Thus Be B 11 DU ; स चेव B , स एव M.

महाव्रतं[१] व्यवदधाति । स उवेवाव्राह्मणः[२] षोडशरात्रो । ऽथोत्तरः पञ्चदशरात्रो । ऽतिरात्रस्त्रिवृदग्निष्टोमो[३] । ज्योतिर्गौरायुरिति[४] त्र्यहः । पृष्ठ्यः षडहः । प्रत्यङ् त्र्यहो । ऽथातिरात्रो । ऽथ सप्तदशरात्रो । ऽतिरात्र एकः पञ्चाहो । दशरात्रो । ऽथातिरात्रो । दशमं चाहरतिरात्रं च महाव्रतं[१] व्यवदधाति । स उवेवाव्राह्मणो[२] ऽष्टादशरात्रो । ऽथ विंशतिरात्रो । ऽतिरात्रो । ज्योतिर्गौरायुरिति चयस्त्र्यहाः । पृष्ठ्यः षडहः । प्रत्यङ् त्र्यहो । ऽथातिरात्रो । ऽथैकविंशतिरात्रो । ऽतिरात्रः । पृष्ठ्यः षडहः । सप्तैतानि मध्यमानि सांवत्सरिकाण्यहानि भवन्ति । प्रत्यङ् षडहो । ऽथातिरात्रः । ॥ ३३ ॥ दशमः ॥

अथ पूर्वश्चतुर्विंशतिरात्रो । ऽतिरात्रो ज्योतिर्गौरायुरिति चत्वारस्त्र्यहा दशरात्रो ऽथातिरात्रो । दशमं चाहरतिरात्रं च महाव्रतं[१] व्यवदधाति । स उवेवाव्राह्मणः[२] पञ्चविंशतिरात्रो[४] । ऽथोत्तरश्चतुर्विंशतिरात्रो । ज्योतिरतिरात्रः । पृष्ठ्यः षडहस्त्रयस्त्रिंशात्त्रयस्त्रिंशमुपयन्त्यथानिरुक्तं पृष्ठ्यꣳ षडहमुपयन्ति । चित्रत आयतने चयस्त्रिंशमुक्थ्यमुपयन्ति[५] रथंतरसामानं । तस्य चतुर्विंशाः पवमाना भवन्ति । पञ्चदशस्यायतने त्रिणव-

---

१ All MSS. exc. M ins. च ।

२ Some of the MSS. उवेवव्राह्मणः ।

३ त्रिवृदग्निष्टु° M.

४ Thus M Be; चतुर्विंशति° B Be 11 DU.

५ अग्निष्टोमम् i.s o. उक्थ्यम् M.

मुक्थ्यमुपयन्ति बृहत्सामानं । तस्याष्टाविंशाः पवमाना भवन्ति ।
सप्तदशस्यायतन एकविंशमुक्थ्यमुपयन्ति वैरूपसामानं । तस्य
द्वाविंशाः[१] पवमाना भवन्ति । स्व एवायतन[२] एकविंश-
मुक्थ्यमुपयन्ति वैराजसामानं । तस्य षट्विंशाः पवमाना
भवन्ति । स्व एवायतने[२] त्रिणवमुक्थ्यमुपयन्ति शाक्वरसामानं । ५
तस्य चत्वारिंशाः पवमाना भवन्ति । स्व एवायतने चय-
स्त्रिंशमुक्थ्यमुपयन्ति रैवतसामानं । तस्य चतुश्चत्वारिंशाः
पवमाना भवन्ति । चयस्त्रिंशात्त्रयस्त्रिंशमुपयन्ति । तस्या-
ष्टाचत्वारिंशाः पवमाना भवन्त्यथातृत्तं पृष्ठ्यं षडहमुप-
यन्ति । ॥ ३४ ॥ १०

त्रिवृतो ऽधि त्रिवृतमुपयन्ति । स्तोमानां संपत्त्यै प्रभवाय ।
ज्योतिरग्निष्टोममुपयन्त्यथातिरात्रो । ऽथ त्रिंशद्रात्रो । ज्योति-
रतिरात्रः । पृष्ठ्यः षडहस्त्रयस्त्रिंशात्त्रयस्त्रिंशमुपयन्ति ।
त्रिणवमुपयन्त्येकविंशमुपयन्ति । त्रिवृतमग्निष्टुतमुपयन्ति ।
पञ्चदशमिन्द्रस्तोममुपयन्ति । सप्तदशमुपयन्त्येकविंशमुपयन्ति । १५
चतुर्विंशमुपयन्ति । चतुर्विंशात्यष्टान्युपयन्ति । चयस्त्रिंशा-
त्त्रयस्त्रिंशमुपयन्ति । त्रिणवमुपयन्ति । द्वावेकविंशावुपयन्ति ।
चतुरश्चतुष्टोमान्स्तोमानुपयन्त्यथातिरात्रो । ऽथ द्वाचिंश-
द्रात्रो । ऽतिरात्रो । ज्योतिर्गौरायुरिति नव अहाः । प्रत्यङ्
अहो । ऽथातिरात्रो । ऽथ चयस्त्रिंशद्रात्रो । ऽतिरात्रस्त्रयः । २०

---

१ Thus M Be 11, द्वाविंशाः the other MSS.

२ एव om. M.

पञ्चाहा । विश्वजित्सर्वपृष्ठो ऽतिरात्र । एकः पञ्चाहो । दशरात्रो । ऽथातिरात्रो । दशमं चाहरतिरात्रं च महाव्रतं[१] व्यवदधाति । स उवेवाब्राह्मणश्चतुस्त्रिंशद्रात्रः[२] ॥ ३५ ॥ एकादशः ॥

अथ षट्त्रिंशद्रात्रो । ज्योतिरतिरात्रश्चत्वारो ऽभिप्लवाः षडहा । दशरात्रो । ऽथातिरात्रो । दशमं चाहरतिरात्रं च महाव्रतं व्यवदधाति । स उवेवाब्राह्मणः[३] सप्तत्रिंशद्रात्रो । ऽथैकस्मान्नपञ्चाशद्रात्रो । ऽतिरात्रस्त्रयस्त्रिवृतो ऽग्निष्टोमा । अथाचिरात्रो । दश पञ्चदशा उक्थ्या । अथातिरात्रस्तेषाꣳ षोडशिमद्दशममहर्भवति । द्वादश सप्तदशा उक्थ्या । अथातिरात्रः । पृष्ठ्यः षडहो । ऽथातिरात्रो । द्वादशैकविꣳशा उक्थ्या । अथातिरात्रो । ऽथ संवत्सरकुप्त एकस्मान्नपञ्चाशद्रात्रो । ऽतिरात्र । आरभ्णीयमहस्त्रयो ऽभिप्लवाः षडहास्त्र्यष्टादशाहानि । प्रायणीयारभ्णीयौ । तानि विꣳशतिरभिजित्त्रयः परःसामानो । ऽथ वैषुवतं । त्रयो ऽर्वाक्सामानो । ऽथ विश्वजिदावृत्तो ऽभिप्लवः षडहो । गोआयुषी । दशरात्रो । महाव्रतं चातिरात्रश्चाथैकषष्टिरात्र[४] । एतस्यैव सतो ऽभितो नवरात्रं पृष्ठ्यौ षडहावुपोहति । तयोरावृत्त उत्तरो । ऽथ

---

१ All MSS. exc. M ins. च ।

२ उवेब्रा० Be.

३ The passage अथैकषष्टिरात्र up to चातिरात्रश्च (p. 282 2) is left out in all the MSS. exc. M Be, and the tradition preserved by Be is rather corrupt, cp. Pañc. br. XXIV. 19. 1.

अतरात्रो[1] ऽतिरात्रो ज्योतिर्गौरायुरिति अहश्चतुर्दशाभिस्रवाः षडहा दशरात्रो महाव्रतं चातिरात्रश्चाथ सहस्रात्रो[1] ऽतिरात्रो नवनवतिस्तिवृतो ऽग्निष्टोमाः अतं पञ्चदशा उक्थ्याः अतꣳ सप्तदशा उक्थ्याः अतमेकविꣳशा उक्थ्याः अतं त्रिणवा उक्थ्याः अतं त्रयस्त्रिꣳशा उक्थ्याः अतं चतुर्विꣳशा उक्थ्याः अतं चतुश्चत्वारिꣳशा उक्थ्याः अतमष्टाचत्वारिꣳशा उक्थ्या नवनवतिरेव[1] त्रिवृतो ऽग्निष्टोमा अथातिरात्रः[1] ॥ ३६ ॥ द्वादशः ॥

॥ इति षोडशः प्रश्नः ॥

---

१ Thus Be; °नवतिमेव the other MSS.

अतिरात्रं करिष्यन्नुपकल्पयते चतुरो ऽतिरात्रपशूनरुण-पिङ्गमश्वमौदुम्बरꣳ षोडशिपात्रं चतुस्रक्ति ज्यायसो ऽम्भृणा-ज्ज्यायस एकधनानदीचते । रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति । द्वादशोपसदः । प्रसिद्धेन कर्मणोपवसथादेत्यथ[१] वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसत्यथातो महा-रात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छै-त्यद्भिरुदैत्यतिरात्रं[२] क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहादाग्रयणं[३] गृहीत्वा षोडशिनं गृह्णात्यातिष्ठ वृत्रहन्नयमित्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं[४] गृहीत्वा चतस्रो रश्मना आदाय यूपमभ्येति । स्रुवन्नं यूपमुत्सृज्य चतुरो ऽतिरात्रपशूनुपाकरोत्याग्नेयमैन्द्राग्नमैन्द्रꣳ[५] सारस्वतीं

---

१ Thus U, cp. supra XVI. 3 (p. 247. 6) ; ॰णोपवसथादेत्याथ M ; ॰णोपवसथादेत्यथ D ; ॰णोपवसथादेत्याथ Tr ; ॰णोपवसथादेत्य Be, ॰नोपवस-थादथ B Be 12 , ॰णोपवसथ्यादथ H.

२ उदैति M, उदेति the other MSS.

३ ग्रहं ins. B 12 D.

४ om B Be.

५ इष्णिꣳ ins. M.

मेषीमिति[१] । तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातः-सवनाय । तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सव-नाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहादाग्रयणं[२] गृहीत्वा[२] षोडशिनमभिगृह्णातीन्द्र-मिद्धरी वहत इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोड- ५
शिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णात्यृजुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णात्यथ षोडशिनमभिगृह्णात्यसावि सोम इन्द्र त इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं १०
गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । ॥ १ ॥

समानं कर्मा पवमानात्पवमानेन चरित्वा स्वे धाम-न्यग्नयुभिश्चरति[३] । तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वसाहोमाः समानो वनस्पतिः १५
समानः खिष्टकृत्प्रैषवान्त्समानीडा समान्यो दिशो । नाना दिश इत्येके । समानं कर्मा ध्रुवद्ध्रुवसमेभ्यो । ध्रुवद्धि-

---

१ Instead of इति B Be and U (sec. m.) have the clause: अपि वा सारस्वतीं मेषीमेवोपाकुर्यात्; Tr. has the same words after इति; they are clearly an interpolation, cp. the Dvaidha.

२ D ins. ग्रहं and reads गृहीत्वाथ।

३ Thus Tr Be 12 HD, चरंति the other MSS.

श्चमसैश्चरित्वा त्रिभिरुक्थ्यपर्यायैश्चरतीन्द्रावरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामित्यथ षोडशिना चरित्वाग्राङ्गायञ्जाह होतुश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति । होत्रचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्त्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । तदेतꣳ षोडशिनꣳ सह सꣳसादयन्त्यथैनमुपतिष्ठते ॥ २ ॥

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया संविदानस्त्रीणि ज्योतीꣳषि सचते स षोडशी ॥ एष ब्रह्मा य ऋत्वियः । इन्द्रो नाम श्रुतो गणे ॥ प्र ते महे विदथे शꣳसिषꣳ हरी । य ऋत्वियः प्र ते वन्वे । वनुषो हर्यतं मदम् ॥ इन्द्रो नाम वृतं न यः । हरिभिश्चारु सेचते । श्रुतो गण आ त्वा विशन्तु । हरिवर्पसं गिर इत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् ङुत्वा समयाविषिते सूर्ये हिरण्येन षोडशिन स्तोत्रमुपाकरोति । पुरस्तात्प्रत्यञ्चमरुणपिशङ्गमश्वं धारयन्ति श्यामं वा । हिरण्यꣳ संप्रदाय स्तुवते ॥ ३ ॥

होत्र एषोत्तमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाक्रयते होता । प्रत्याक्रयते ऽध्वर्युः । शꣳसति । प्रतिगृणात्यथ यत्र होतुरभिजानात्या त्वा वहन्तु हरय इति तदुभयतोमोदं[1] प्रतिगृणात्योषा मोद इव मदे मदा मोद

---

१ ०मोदं M Tr Be B ; ०मदं Be 12 DU , मंद H.

द्रवोमधेत्यथ[१] यत्र होतुरभिजानाति प्रप्र वस्त्रिष्टुभमिति तत्प्रसिद्धमुक्थ्यं[२] प्रतिगीर्य प्राङेत्योद्यच्छत एतꣳ षोडशिनं ग्रहमनूद्यच्छन्ते चमसानाधावयत्यो आवयास्तु औषडुक्थशा यज सोमानामिति । वषट्कृते[३] षोडशिनं जुहोतीन्द्राधिपते ऽधिपतिस्त्वं देवानामस्यधिपतिं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्दिः सर्वाꣳ-श्चमसाञ्जुक्षत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष द्रन्द्रेण षोड-शिना पीतस्येति । तस्य[४] व्युदितो[४] भक्षो । यजमानवग्नो हि[५] यजमानस्य होत्रवग्नो होतुस्तावु चेद्ध्वर्यवे प्रब्रूयातां वषट्कर्तुर्भक्ष द्रत्येव ब्रूयात्तथात्मानं भक्षान्नान्तरेति[६] । तस्य भक्षः ॥ ४ ॥

द्रन्द्रश्च मरुत्वश्च राजा तौ ते भक्षं चक्रतुरग्र एतम् । तयोरनु भक्षं भक्षयामि वाग् जुषाणा सोमस्य तृप्यतु तस्य त द्रन्द्रेण षोडशिना पीतस्य मधुमत उपह्वतस्योपह्वतो भक्षया-मीति । निर्णिज्य पात्रं प्रयच्छत्यत्रैतमरुणपिशङ्गमश्वं ददाति

---

१ The pratigara thus only in the Vivaraṇa; all the MSS. (exc. only M, which has the first time also मोद द्रव) and Keś. read मोदैव i.s.o. मोद द्रव ।

२ तत् only found in MDUBe 12.

३ Thus M Tr Be 12 Be UD Keś.; वषट्क्रतानुपवषट्क्रते HB.

४ Thus MDH(= विविधमुक्तः) ; तस्याप्युदितो the other MSS.

५ Thus Be 12 HDU Keś.; च Be B; om. M Tr.

६ Thus M (writing: भक्षांना॰) ; भक्षमंतरेति Be 12; भक्षांतरेणेति H Tr, भक्षांतरेणोजि U; भक्षांतरे Be, भक्षानतरे B, D om this passage.

श्यामं वा । होढ्चमसमेवैते चयः समुपह्वय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा[1] मार्जयन्ते । अथ संप्रैषमाह प्रतिप्रस्थातरायणहतीयं गृहहतीयानि जाघनीः पृषदाज्यं गोपायाग्नीदाश्विनं ते द्विकपालꣳ घृतमथपरराचे[2] अस्खिति । यथासंप्रैषं तौ कुरुतो । अथ विनिःसृप्य राचये प्रसर्पन्ति । संप्रसृप्तान्विदित्वाध्वर्युः प्राङायन्नाह ॥ ५ ॥

होतुश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति । होढ्चमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्त्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् स्रुवा स्रोचमुपाकरोति । स्रुवते । होच एषोन्नमेति प्राङ्होतुः कालात्पराङावर्तते अध्वर्युरस्मैनमाक्षयते होता । प्रत्याक्षयते अध्वर्युः । ग्रꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतꣳ होढ्चमसमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयासु औषडुक्थ्यश्च यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तयैव द्विर्दिः सर्वाꣳश्चमसाञ्जुहुत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण पीतस्येति । होढ्चमसमेवैते चयः समुपह्वय भक्षयन्ति । यथाचमसं चमसान्हिन्व म

---

१ M here and infra •भक्षा।

२ Thus HB Tr Be and cp. Karmānta ; घृतमथापर• ℧ , घृतमथपर• M Be 12 D, Keś.

दित्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्त्सर्वभक्षा मार्जयन्ते । ऽथ प्राङायन्नाह ॥ ६ ॥

मैत्रावरुणस्य चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति । मैत्रावरुणचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्त्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्रोचमुपाकरोति । स्रुवते । मैत्रावरुणायेषोत्तमेति प्राङ्मैत्रावरुणस्य कालात्पराङावर्तते ऽध्वर्युरभ्येनमाक्रयते मैत्रावरुणः । प्रत्याक्रयते ऽध्वर्युः । ग्रꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं मैत्रावरुणचमसमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयासु औषडुक्थग्रा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तयैव द्विर्द्विः सर्वाꣳश्चमसान्निरुक्त्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष द्रन्द्रेण पीतस्येति । मैत्रावरुणचमसमेवैते चयः समुपक्षय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्त्सर्वभक्षा मार्जयन्ते । ऽथाह प्रतिप्रस्थातश्चमसगणौ ते प्रचरेति । तच्छ्रुत्वा प्रतिप्रस्थाता प्राङायन्नाह ॥ ७ ॥

ब्राह्मणाच्छꣳसिनश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति । ब्राह्मणाच्छꣳसिचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्त्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्रोचमुपाकरोति । स्रुवते । ब्राह्मणाच्छꣳसिन एषोत्तमेति प्राङ्ब्राह्मणाच्छꣳसिनः काला-

दृत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्त्सर्वभक्षा मार्जयन्ते । होत्रे प्रथमꣳ स्रुवते ऽथ मैत्रावरुणायाथ ब्राह्मणाच्छꣳसिने ऽथाच्छावाकायाध्वर्युः पूर्वाभ्यां चमसगणाभ्यां प्रचरति प्रतिप्रस्थातोत्तराभ्याꣳ । सर्व ऐन्द्राः[1] ग्रहाश्चमसगणाः[1] भवन्तीति[2] वा[2] अयं[2] प्रथमश्चतुःपर्यायः[3] संतिष्ठत । एवमेव ५
द्वितीयः संतिष्ठत । एवं तृतीयो । मध्यमेन पर्यायेण श्लिष्यवन्त स्रुव चरन्त्यथ विनिःसृप्य राथंतराय संधये प्रसर्पन्ति ॥ ९ ॥

संप्रस्थाप्यविदित्वाध्वर्युः प्राङायन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वꣳ एव राजानमुन्नय मातरीरिच इति । होत्रचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्त्सर्वꣳ एव १०
राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । [4]तदेतमाग्निमुपस्तीर्णाभिधारितꣳ सह सꣳसादयन्त्यथाप[5] उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् स्रुवा स्रोचमुपाकरोति । स्रुवते । होत्र एषोन्नमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाक्रयते होता । प्रत्याक्रयते ऽध्वर्युः । ग्रꣳसति । प्रतिगृणात्या १५

---

१ Thus Be 12, M (the last however चमसग०); HTr DU om. ग्रहा; Be B चमसगणाभ्यां प्रचरति i. s. o. सर्व ... भवन्तीति वा।

२ भवंतीतीन्वा अथं M; भवंतीतीन्वायं U, the other MSS. om. इति न्वा or न्वा alone.

३ चतुष्पर्यायः M.

४ Thus Tr; तदेतदाग्नि० all the other MSS.; after आग्निम् some of the MSS. have पुरोडाशम् here and *infra* (p. 291, 4 and 6).

५ Thus MTr Be DHU, सꣳ om. Be 12 B.

महाहनाच्छस्यते[१] । परःसहस्रमाश्विनं भवतीति ब्राह्मणं प्रसिद्धसुक्थं प्रतिगीर्यं प्राङायन्नाहाश्विभ्यां तिरोअक्षियानाꣳ सोमानामनुब्रूहीति । प्राङेत्योद्यच्छत एतꣳ होढ्रचमसमनूद्यच्छन्त आश्विनमुपोद्यच्छन्ते चमसानधाआवयत्यो आवयासु औषडश्विभ्यां तिरोअक्षियान्सोमान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति । [२]तदेतमाश्विनमुपस्तीर्णाभिघारितꣳ सह जुह्वति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्दिः सर्वाꣳश्चमसाञ्जुह्वत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्षो ऽश्विभ्यां पीतस्येति । तस्य भक्षः सर्वगणस्य ते सर्वगणाश्विभ्यां पीतस्य तिरोअक्षियस्य सोमस्य सुषुतस्य मधुमत उपह्वतस्योपह्वतो भक्षयामीति । होढ्रचमसमेवैते क्षयः समुपह्वय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्यायय्न्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथ संप्रेषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सक्तत्सक्तत्संमृड्ढीत्याहरन्त्येतानाग्नीध्रादौपयजानङ्गाराꣳस्त्रानयेण होतारं निवपत्युपसीदत्युपयष्टा गुदहतीयैरेतानि गुदहतीयान्येकादग्रधा कृत्वोपयष्टोपयजति । समानमत ऊर्ध्वꣳ संतिष्ठते ऽतिरात्रः । ॥ १० ॥ प्रथमः ॥

---

१ Thus HD, महोहना० Tr; महानहा० M; महानाम्ना० Be 12 B; महानाम्या० U; महानाम्नात् Be; my copy of the vivarana (Burnell MSS) reads· यास्महाहनात्, the words are explained thus: यावद्विस्रष्टं यातयो भवति तावत्।

२ तदेतदा० all the MSS. exc. Tr

एकादशिनीं करिष्यन्यूपाञ्छन्तिꣳ ऋत्वाथ तां दिग्गमेति यत्र त्रयोदश यूपान्वेत्यन्मन्यते। तानुपप्लवदादग्नान्यात्रीवत-त्रयोदशाञ्छित्त्वावाहयत्या[1] वा हारयत्योह्य निस्थिष्ठत्यवतत्र-णानामेव स्वरून्कुरुते[2]। ऽथास्यैषा पूर्वेद्युरेव रथाक्षेणैकादशधा वेदिर्विमिता भवति। स यत्राग्निष्ठस्य यूपावटं परिलिखति तद्धेतꣳ रथाक्षं याचति। तेन दक्षिणतो[3] मिमीत उपरसंमितं यूपावटं परिलिखत्यथोदङ् मिमीत उपरसंमितमेव यूपावटं परिलिखति। स एवमेव दक्षिणमुत्तरमित्यष्टौ यूपावटान्परि-लिखति। तद्वैतदेक[4] उपवसथीय एवाहन्येतान्यूपानुच्छ्रयन्ति[5] यजमानो वा अग्निष्ठो ऽङ्गानामितरे[6] रूपमिति[6] वदन्तः। स १०

---

१ ०दशाꣳश्छि० H only.— ०क्षिलावाहरत्या HU; क्षिलावाहयत्या MB Be Ms Msc (the latter: ताञ्छित्त्वा मनुष्येष्वस्य आवाहयति विहारसमीपे प्राप-यति। आ वा हारयति ... शकटादिना आहारयति वा). Probably this is the true reading and accordingly also IV. 1 (vol. I, p. 108, 12; in the note read Ekādaśinī-Sūtra i.s.o. Aptoryāma-Sūtra) should be corrected.

२ Thus MU Be; स्वरुं० the other MSS.

३ दक्षिणा MU.

४ Thus Be U Msc; तद्वैकदेक B; तद्वोतदेक M, तथोतैनदेक H; तथैतदेक Ms; cp *supra* p. 261, 14; 263, 1.

५ ०येतान् om. M.

६ Thus M Be Ms Msc; the other MSS. (U is def.) seem to point to another reading: ऽङ्गानीतरे यूपा इति।

यदेनं तत्रानुच्छ्रयन्तं ब्रूयाद्व्यङ्गो[1] न्वा[1] अयं यजमानो भविष्यतीति तथा हैव स्यात्तदु वा आर्ड्यदिमे[2] यूपा अपशवः शून्यीभूतास्तिष्ठेयुर्यज्ञवास्तुरूपमिव स्याद्यज्ञवेशसमिव[1] श्वो भूत एवाहन्येतान्यूपानुच्छ्रयेदिति[1] ताञ्छ्वो भूत एवोच्छ्रयन्त्यग्निष्ठ एकादशिनीरश्वनाः[3] परिवीय वासयन्ति[1] ॥ ११ ॥

समानं कर्माश्विनाङ्गहादाश्विनं यहं गृह्णीत्वैकादश रश्वना आदाय यूपमभ्येति[4][1] तदेते यूपाः प्रज्वालिताः प्रपन्नाः संपन्नचषालाः प्रागवटेभ्य उपशेरते[1] स्वर्वन्तमग्निष्टसुत्सृज्य तस्माद्दक्षिणमेव पूर्वमुपस्थावानमुच्छ्रयत्यथोत्तरम्[1] स एवमेव दक्षिणमुत्तरमित्यष्टौ यूपानुच्छ्रयत्यथ वै भवत्युपरसंमितां मिनुयात्त्रिवृल्लोककामस्येति समा उपरेषु भवन्ति[1] रश्वनसंमितां मनुष्यलोककामस्येति समा रश्वनासु भवन्ति[1] चषालसंमितामिन्द्रियकामस्येति समाश्चषालेषु भवन्ति[1] सर्वान्समान्प्रतिष्ठाकामस्येति सर्वान्समान्प्रतिष्ठाकामस्य करोति[1] ये त्रयो मध्यमास्तान्समान्यशस्कामस्येति तान्समान्यशस्कामस्य करोति[1]

---

१ Thus M; °ङ्गोंगान्वा, °ङ्गान्वा, यथोंगान्वा the other MSS; °ङ्गोवा Ms.

२ यदिमे M Bhav.; यदिमि Be; यदीमे the other MSS.

३ Thus conjecturally; ऐकादशिना° (or नी ?) M, एकादशिन° the other MSS.; एकादश° Ms and Msc. Cp. Ap. XIV. 5. 12.

४ यूपान° M Be, यूपस° the other MSS., also Ms and Msc.

व्यतिषजेदितरानिति व्यतिषजति। स एवमेव[1] दक्षिणमुत्तरमित्यष्टौ यूपान्व्यतिषजति॥ १२॥

अथ वै भवति यं कामयेत प्रमायुकः स्यादिति गर्तमितं तस्य मिनुयादुत्तरार्धं वर्षिष्ठमथ ह्रस्वीयाꣳसमित्युत्तरार्धमत्र वर्षिष्ठं मिनोति दक्षिणार्धꣳ ह्रस्वीयाꣳसमेषा वै गर्तमिद्यस्त्वेवं मिनोति ताजक्प्रमीयत इति ब्राह्मणं। दक्षिणार्धं वर्षिष्ठं मिनुयात्सुवर्गकामस्याथ ह्रस्वीयाꣳसमिति दक्षिणार्धमत्र वर्षिष्ठं मिनोत्युत्तरार्धꣳ ह्रस्वीयाꣳसमाक्रमणमेव तत्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्या इति ब्राह्मणमथ वै भवति यदेकस्मिन्यूपे द्वे रश्मने परिव्ययति तस्मादेको द्वे जाये विन्दते। यन्नैकाꣳ रश्मनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दत इति ब्राह्मणमथ वै भवति यं कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषजेदित्युपान्ते तस्य व्यतिषजति। स्त्र्येवास्य जायत इति ब्राह्मणमथ वै भवति यं कामयेत पुमानस्य जायेतेत्यान्तं तस्य प्रवेष्टयेदित्यान्तं तस्य प्रवेष्टयति। पुमानेवास्य जायत इति ब्राह्मणमत्रैतमुपप्रयं दक्षिणतो न्यस्यति तूष्णीꣳ। स्वर्वन्तान्यूपानुत्सृज्याग्नेयमेवाग्निष्ठ उपाकरोति॥ १३॥

सारस्वतीमुत्तरे सौम्यं दक्षिणे पौष्णमुत्तरे बार्हस्पत्यं दक्षिणे वैश्वदेवमुत्तर ऐन्द्रं दक्षिणे मारुतमुत्तर ऐन्द्राग्नं दक्षिणे सावित्रमुत्तरे वारुणं दक्षिणे। अथ वै भवति यदि

---

१ स्व om. M, स्वम् om Ms.

कामयेत यो ऽवगतः सो ऽपरुध्यतां यो ऽपरुद्धः सो ऽवगच्छत्वित्यैन्द्रस्य लोके वारुणमालभेत वारुणस्य लोक ऐन्द्रं[1] य एवावगतः सो ऽपरुध्यते यो ऽपरुद्धः सो ऽवगच्छतीति ब्राह्मणमथ[1] वै[1] भवति[1] यदि कामयेत प्रजा मुह्येयुरिति पशून्व्यतिषजेदिति[1] पशूनेवाच[2] व्यतिषजति[1] प्रजा एव मोहयतीति ब्राह्मणमथ वै भवति यदभिवाहतो ऽपां वारुणमालभेत प्रजा वरुणो गृह्णीयाद्[1]चिणत उदञ्चमालभते ऽपवाहतो ऽपां प्रजानामवरुणग्रहायेति ब्राह्मणमथैतस्मिन्नुपशये मनसैव यं द्वेष्टि तमुपाकरोति[1] यद्यु वै न द्वेष्यारुस्ते पशुरित्यनुदिशति[1] समानं कर्मा पर्यग्निकरणात्पर्यग्निकृतानामेतेषां पशूनां पञ्च दक्षिणार्ध्यान्पशूनुपक्रम्यैव स्रापयित्वा द्वावुपातिनीयाथेतरैर्व्यतिषजत्यथ पर्यग्निकृतैः पशुभिरुदञ्चः प्रतिपद्यन्ते[1] तेषां वारुण उत्तरार्ध्यो भवत्याग्नेय उपचरत[1] आग्नेयमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभते पृथगितरान्परिकर्मिण उदञ्चो नयन्त्यनुपूर्वमव्यतिषजन्तस्तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय[1] तदृजुधा संतिष्ठते[1] ॥ १४ ॥ द्वितीयः ॥

अथ वै भवतीष्टं वपया भवत्यनिष्टं वशयाथ पाङ्क्तीवतेन प्रचरतीति[1] स यत्रैकादशिन्या अनुबन्ध्यस्येष्टं[3] वपया भवत्यनिष्टं वशया तज्जघनेन गार्हपत्यमौपसदायां वेद्याम्

---

१ अथ वै भ० om. Be BU.

२ एव om MH Ms.

३ °बंधस्ये० MH.

स्रुग्वयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं । चिर्यजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं जपत्युद्धन्त्युद्धता-दाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथाग्नेय[1] गार्हपत्यं पात्नीवतस्य यूपावटं परिलिखति । समानं कर्मा स्रुचाꣳ सादनात्सादयित्वा स्रुचो ऽग्नेण गार्हपत्यं पात्नीवतमुच्छ्रित्य तस्मिꣳस्त्वाष्ट्रꣳ षाण्डमजं पशुमुपाकरोति[2] । तं पर्यग्निकृतमुत्सृज्याज्येन सꣳस्थां करोत्यथ चतुर आज्यस्य गृह्णान आह त्वष्ट दृत्युपाꣳश्वनुब्रूहीत्युचैरित्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युचैर्वषट्कृते जुहोतीति नु वपायाः प्रतिचरति । चतुर एवाज्यस्य गृह्णान आह त्वष्ट दृत्युपाꣳश्वनुब्रूहीत्युचैः ॥ १५ ॥

अत्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युचैर्वषट्कृते जुहोतीति नु पशुपुरोडाशस्य प्रतिचरति । चतुर एवाज्यस्य गृह्णान आहाग्नय दृत्युपाꣳश्वनुब्रूहीत्युचैरित्याक्रम्याश्राव्याहाग्निमित्युपाꣳशु यजेत्युचैर्वषट्कृत उत्तरार्धपूर्वार्धं ऽतिहाय पूर्वार्धाऽऽज्यतीर्जुहोतीति नु पशुपुरोडाशस्य खिष्टकृतः प्रतिचरति । चतुर एवाज्यस्य गृह्णान आह त्वष्ट दृत्युपाꣳश्वनुब्रूहीत्युचैरित्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युचैर्वषट्कृते जुहोतीति नु हविषः प्रतिचरत्याज्येन दिग्नो जुहोति । पृषदाज्येन वनस्पतिमाज्यस्य खिष्टकृतमाज्यस्येडामवद्यति । पृषदाज्येनानू-

---

१ यदाग्नीध्रस्त्रिर्हरति found in MUH only.

२ पशुम् om. Ms.

याजान्यजति । सो ऽचैव पत्नीः संयाज्याचैव समिष्टयजूंषि[1] जुहोति । संतिष्ठते पात्नीवतः । ॥ १६ ॥ तृतीयः ॥

अथ वै भवति यो ऽग्न्याधेयेन नर्ध्नोति स पुनराधेयमाधत्ते यो ऽग्निं चित्वा नर्ध्नोति स पुनश्चितिं चिनुत इत्यग्निं चित्वा ज्यानानो द्वादशेष्टका उपकल्पयते ऽष्टौ याजुषीश्चतस्रो लोकंपृणाः । स यच[2] होत्तरवेदिर्व्याघारितोपन्युप्तसंभारा[2] भवति तद्वाभ्यामात्मन्यग्निं[3] गृह्णीते मयि गृह्णाम्यग्ने अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृशाष्टौ याजुषीरुपदधाति येनर्षयस्तपसा सत्त्रमासतेति । चतस्रो लोकंपृणा लोकं पृण छिद्रं पृणेत्यथ चितिकृष्टाभिमृशति चित्तिमचित्तिं चिनवद्दि विद्वानित्याग्नेय्या गायत्र्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा इति । तायते पशुबन्धो वाग्निष्टोमो वा । स प्रज्ञातः संतिष्ठते । ॥ १७ ॥ चतुर्थः ॥

[4]जर्वरो गृहमतिर्धृतराष्ट्र ऐरावतो ब्रह्मा दक्षस्तापसो होता पृथुश्रवा दूरेश्रवा[5] उद्गाता श्लावश्वाजगावश्च[6] प्रस्तोढप्रति-

---

१ ०ष्टयजुर् MH.

२ Thus M; तचेहोत्त० D; यचाहोत्त० the other MSS.

३ Thus M Be B U, ०त्मंनग्निं or ०त्मग्निं Be 7 D.

४ On the following cp. Baudh. grhs III, adhy. 10 and Pañc br XXV, 15.

५ Found in M only

६ Thus M, श्याव० or गाव० the other MSS

हर्तारौ ग्रितिष्ठो मैचावरुणस्तचको वैग्रालेयो ब्राह्मणाच्छ꣡꣯-
स्युपरीतिस्तार्क्ष्यः[१] सदस्यः ग्रिखातिग्रिखौ नेष्टापोतारावरुणो[२]
ऽच्छो[२] ऽच्छावाकस्त्रुक्पिग्रङ्गावाग्नीध्रावजिरो[३] माहेयः सुब्रह्मण्यो
ऽर्बुदो ग्रावस्तुत्साण्ड उन्नेता पशुको[४] ध्रुवगोपः कौतुस्तावध्वर्यू[५]
अरिमेजयश्च जनमेजयश्चैते वै सर्पाणा꣡꣯ राजानश्च राज- ५
पुत्राश्च खाण्डवे प्रस्थे सत्त्रमासत पुरुषरूपेण विषकामास्तेषां
दग्रस्तोमान्यन्यान्यहान्यासन्दादग्रस्तोमान्यन्यान्याचीयन्ति[६] च।
स यद्दग्रदग्रेति तस्मात्सर्पा दꣳ꣡ग्रुका दꣳ꣡ग्रुवीर्यास्तदेत-
श्लोकं[७] यौचीयं पग्रव्यꣳ सत्त्वं[८] य एतदुपयन्ति नैतान्सर्पा
हिꣳ꣡सन्ति[८] ॥ १८ ॥ पञ्चमः ॥ १०

तपो ब्रह्मपतिरिरा पत्नी ब्रह्मैव ब्रह्मा सत्यꣳ होतामृत-
मुद्गाता भूतं भविष्यच्च प्रस्तोतृप्रतिहर्तारावृतं मैचावरुण ऋतवः
सदस्या आर्तवा उपगातारस्तेजो ब्राह्मणाच्छꣳ꣡सी यग्नो ऽच्छा-

---

१ Thus (उपरीतिस्) M, अपरिगिस् Be; अपरिगीस् U; अपगरस् Be 7 D; अपरिगीर्धस् B.

२ Uncertain; ०वरुणोच्छा M; ०वरुणाच्चो Be Be 7; वरुणाच्चो BUD; the Pañc. br. has अरुण आट्यः।

३ Thus M; ०त्रुक्पिग्रं० Be 7 D; ०त्रुक्पिग्रंग आग्नीध्रोऽजिरो B Be U.

४ Thus M; उन्नेतापशुगो Be (thus also the MSS. of the Gṛhya); ०पशुगोपो Be 7 BUD.

५ Thus M; कौत्सस्ताव० BU; कौत्साव० Be, क्रौंचस्ताव० Be 7 D.

६ ०हान्यासन्दा ... न्यन्यान्य० om. M.

७ Thus M; दंग्रवीया० Be, दंस्रवीया० U, रंस्रवीया० B; in Be 7 the whole passage is left out.

वाकस्त्विषिश्चापचितिश्च नेष्टापोतारावग्निरेवाग्नीध्रो वाक्सु-
ब्रह्मण्यो भगो ग्रावस्तुदूर्गृहेता बर्ह[1] ध्रुवगोपो[1] मनो ऽध्वर्यु-
श्चक्षुः प्रतिप्रस्थाता सेदिश्चाग्नया[2] चेध्मवाहौ दिष्टिर्विग्रास्ता[3]
मृत्युः ग्रभितेते वै विश्वसृजः प्रथमाः सत्त्रमासां चक्रिरे[4]
५ तेषाꣳ ग्रतꣳ समा दीक्षा ग्रासञ्छतमुपसदः सहस्रं प्रसुता-
स्तेदेषाभिवदति विश्वसृजः प्रथमाः सत्त्रमासत सहस्रसंमं
प्रसुतेन यन्तः। ततो मिषदमिषत्संबभूव ततो ह जज्ञे
भुवनस्य गोपा दृत्यग्निष्टोमैर्वाव[5] ते[5] तदीयुस्तेदेतदृद्धमयनं[6]
प्रजननं[7] यदग्निष्टोमाः[4] ॥ १६ ॥ षष्ठः ॥

१० कुण्डपायिनामयनेनैष्यन्तो दीक्षन्ते[4] पञ्च सवतो धुरा-
स्तेषामियमेव प्रज्ञाता संवत्सरदीक्षा[4] समानं कर्मारभ्णीया-
दारभ्णीयेनेष्ट्वेन्द्रं पयो दोहयति सांनाय्यस्य वाहृता तूष्णीं
वाथ वसतीवरीः परिहृत्याविग्रिय्य[8] पयाꣳस्युपवसन्त्यथ[8] श्वो
भूत ग्रामावास्येन हविषा यजन्ते[4] तेन यन्त्यष्टाविꣳग्रति-

---

१ Thus M; वनंभ्रु॰ U; वनभ्रु॰ Be B; चतभ्रु॰ Be 7 D.

२ Thus MUDBe 7; सेदीश्चाग्नया Be, सेदिरश्चाग्नयो B.

३ चितिर् i s o. दिष्टिर् M, but cp. Pañc. br. XXV. 18 4.

४ Thus M (reading only तदिपु॰ i.s.o तदोयु॰); ॰मैर्वावहेतचिदिस्तदे॰ Be; ॰मैर्वावहेतन्निदिस्तदे॰ BU ॰मैर्वावह्नेभिरियुस्तदे॰ D; ॰मैर्वावहवेभियुस्तदे॰ Be 7.

५ Uncertain; प्रजन M, प्रजनि all the other MSS.

६ Thus corrected with some hesitation, cp. Karmānta-Sūtra III. 25, पर्याहृत्य पर्यांसि विग्रिय्य M, but all the other MSS. पर्याहृत्य-विग्रिय्य पर्यांस्यु॰।

रहानि । प्रायणीयारम्भणीयौ । स मासः[१] । पौर्णमासहविर्भिर्यन्ति मासं । वैश्वदेवहविर्भिर्यन्ति[२] मासं । वरुणप्रघासहविर्भिर्यन्ति मासम् । साकमेधहविर्भिर्यन्ति मासम् । शुनासीरीयहविर्भिर्यन्ति षड्विंशतिरहान्यभिजित्त्रयः[३] परः-सामानः । स मासो । वैषुवतं । त्रयो ऽर्वाक्सामानो । ऽथ विश्वजित्त्रयस्त्रिंशेन[४] यन्ति मासं । त्रिणवेन यन्ति मासमेकविंशेन यन्ति मासम् । सप्तदशेन यन्ति मासं । पञ्चदशेन यन्ति मासं । त्रिवृता यन्ति द्वादशाहानि । गोआयुषी । तानि चतुर्दश । चत्वार्यूर्ध्वं वैषुवतात्तान्यष्टादश । दशरात्रो महाव्रतं चातिरात्रश्च । स मासः । ॥ २० ॥

अथैषां कुण्डानि । ते यत्सर्व एव त्रिवेदसो[५] भवन्ति तदेषां कुण्डमथ यदन्योऽन्यमनुपरिसर्पं[६] याजयन्ति तदेषां कुण्डमथ यदत्यरुकैश्चमसैर्भक्षयन्ति[७] तदेषां कुण्डं । तेषां य एव ब्रह्मा स एव[८] ब्राह्मणाच्छंसी स पोताथ यो होता स एव मैत्रावरुणः सो ऽच्छावाको । ऽथ य उद्गाता स एव

---

१ Thus MB Be; Be 7 D present here a lacuna of two akṣaras.

२ UBD here and *infra* each time यजंति i.s.o. यन्ति।

३ षट्त्रिंशति॰ i.s.o. षड्विंशति॰ M.

४ After विश्वजित् Be ins. मासं।

५ Thus M; ॰वेदसो the other MSS.

६ Thus M; परि om. all the other MSS.

७ यत्यरुकै॰ M.

८ एव om all exc. M.

प्रस्तोता स प्रतिहर्ताथ यो ऽध्वर्युः स एव प्रतिप्रस्थाता स नेष्टाथ य आग्नीध्रः स एव ग्रावस्तुत्[1] सुब्रह्मण्यः स उन्नेताथोपनिषदो[2] ऽग्निश्चतुर्होता[3] वायुः पञ्चहोता चन्द्रमाः षड्होता प्रजापतिः सप्तहोतासावादित्यो नवहोतैता वै देवता एतेनायनेनायꣳस्तेता वै ता आर्ध्नुवन्त्सुवर्ग[4] लोकमायन्य एवं विद्वाꣳस एतेनायनेन यन्त्यृध्नुवन्त्येव सुवर्ग[4] लोकं यन्ति । ॥ २१ ॥ सप्तमः ॥

उत्सर्गिणामयनेनैष्यन्तो दीक्षन्ते तेषामियमेव प्रज्ञाता संवत्सरदीक्षा समानं कर्मा पृष्ठ्यात्षडहात्पृष्ठ्येन षडहेनेष्ट्वेन्द्रं पयो दोहयति सांनाय्यस्य वाहृता तूष्णीं वाथ वसतीवरीः परिहृत्याविग्निध्य[5] पयाꣳस्युपवसन्त्यथ प्रातरहरुत्सृज्य[6] ज्योतिष आयतने प्राजापत्यं पशुमालभन्ते तस्य पशुपुरोडाशमनुवर्तते ऽग्नये वसुमते पुरोडाशो ऽष्टाकपालो माध्यंदिन इन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्त्यैन्द्रꣳ सांनाय्यꣳ सा द्विहविरिष्टिः संतिष्ठते ऽथैतदैन्द्रꣳ सांनाय्यꣳ समुपहृत्य भक्षयन्त्यथापराह्णे वैश्वदेवं द्वादशकपालं निर्वपन्ति वैश्वदेवं चरुं ताभ्यां चरन्ति देवताप्रभृतीभ्यामिडान्ताभ्या-

---

१ All MSS exc. M ins. एव ।

२ Thus M Be 7, °निषदग्नि° Be B U; °निषदौग्नि° D

३ स्वर्ग all.

४ सुवर्ग M, स्वर्ग the other MSS.

५ परिहृत्यवि° MSS., cp. *supra* p 299, n. 6.

६ अहर् om. Be 7 D.

मंथ[१] पशुना चरति मनोताप्रभृतिनेडान्तेनाघानूयाजैश्चरित्वा प्रदक्षिणमावृत्य प्रत्यङ्ङावृत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य वसतीवरीः परिहृत्य पयाꣳसि विघ्रिय्योपवसन्त्यथ श्वो भूते गवा प्रतिपद्यन्ते । त एवमेवैतेन[२] यज्ञो[२] मासिमासि सृजन्तः पञ्च ज्योतीꣳष्यसृजन्त्यथामुत आवृत्ताꣳश्चतुरश्च[३] चयस्तिꣳश्चस्तोमानसृजन्त्येकं[४] च ज्योतिरथ श्वो भूत आयुषैव प्रतिपद्यन्ते । ॥ २२ ॥ अष्टमः ॥

तपश्चितामयनेनेष्यन्तो[५] दीक्षन्ते । तेषामियमेव प्रज्ञाताग्निदीक्षा । समानं कर्मा संनिवापात्संसिङ्क्तः संनिवापो । ऽथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्याथैतां पञ्चहविषमिष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं चिकपालमिति । तया सकृदेवेष्ट्वा नाद्रियेरन्नित्येक आऽऽहरेतयैवाहरहः संवत्सरं यजेरन्नित्येके । प्रथमे ऽहन्सर्वैरन्वहमेकैकया[६] षष्ठे ऽहन्सर्वैरन्वहमेकैकया । प्रथमे द्वादशाहे ऽग्निं चिन्वीतेत्येक आऽऽहुस्तदु

---

१ ०प्रभृतीभ्या० MD Be 7; ०प्रभृतिभ्या० Be BU.

२ Thus M; एवनेवोयंतो Be BU, एवतोत्यतो Be 7 D.

३ च om. M.

४ Thus M, चयस्तिꣳश्चस्तो० the other MSS.

५ ंताप० all exc. M.

६ चन्यासर्वै० M.

वा आङ्क्[१] रुद्रो वा एष यदग्निः। स एतर्हि जातो यर्हि सर्वश्चितः। स यथा वत्सो जात स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति। संवत्सर उवेवास्यातो भागधेयं। नैतस्याग्नां चनेयादित्युत्तमे[२] द्वादशाहे ऽग्निं चिन्वीतेत्येतदपरम्॥ २३॥

अथातो ऽहरहश्चयनस्यैव मीमाꣳसा। सद्यश्चितिं निश्चिष्टन्त्यथ लोकंपृणा दृष्टका उपदधन्मासमेति। मासि तथादेवतं कुरुते। द्वितीये मासे पुरीषचितिः। सद्यश्चितिं निश्चिष्टन्त्यथ मुष्टिनो ऽनु प्रकारं[३] मासमेति। मासि तथादेवतं कुरुते। तृतीये मासे वण्डचितिश्चतुर्थे[४] मासे पुरीषचितिः। पञ्चमे मासे मध्यमा चितिः। षष्ठे मासे पुरीषचितिः। सप्तमे मासे वण्डचितिरष्टमे[५] मासे पुरीषचितिर्नवमे मासे सप्त स्कन्ध्या उपदधात्या नक्षत्रेष्टकाभ्यो। दशमे मासे[६] पुरीषचितिरेकादशे मासे[६] संयच्च प्रचेतास्येत्येता उपदधात्या विकर्णेर्द्वादशस्य[७]

---

१ आङ all exc. M.

२ My conjecture; between ०ग्नां and नेया० M has a blank of one akṣara, all the other MSS. ०ग्नांजनेया०।

३ Thus Be BU, मुष्टिनानुप्र० M Be 7 D.

४ Thus M, (मासे)ऽन्वक्द्वंद्वचितिः Be; न्यद्वंद्वचितिः the other MSS I am not sure about the meaning of वण्ड; it occurs repeatedly *infra* and once in the Karmānta. Perhaps वण्ड "without the tail (of the Agni)"

५ Thus M, द्वंद्व० the other MSS

६ मासि all exc. M

७ Thus M D U, विकर्णेर्द्वा० B Be 7, विकर्णैर्द्वा० Be.

मासस्याष्टाविꣳशतिरहानि पुरीषमेकान्नत्रिꣳशे शतरुद्रीयꣳ । श्वो भूते वसोर्धारा । ॥ २४ ॥

अथोपरिष्टान्मासमित्याचक्षते । मासस्य प्रथमे ऽहन्सद्यश्चितिं निश्लिष्टन्ति सतयादेवतꣳ[1] सस्रुद्दोहसं । [2]मासं प्रवर्ग्योपसद्भां यन्ति । द्वितीयस्य मासस्य प्रथमे ऽहन्पुरीषचितिः । सद्यश्चितिं निश्लिष्टन्ति सतयादेवतꣳ सस्रुद्दोहसं । द्वितीयं[3] मासं प्रवर्ग्योपसद्भां यन्ति । तृतीयस्य मासस्य प्रथमे [4]ऽहन्चण्डचितिश्चतुर्थस्य मासस्य प्रथमे ऽहन्पुरीषचितिः । पञ्चमस्य मासस्य प्रथमे ऽहन्मध्यमा चितिः । षष्ठस्य मासस्य प्रथमे ऽहन्पुरीषचितिः । सप्तमस्य मासस्य प्रथमे ऽहन्चण्डचितिरष्टमस्य मासस्य प्रथमे ऽहन्पुरीषचितिर्नवमस्य मासस्य प्रथमे ऽहन्सप्त स्कन्ध्या उपदधात्या नक्षत्रेष्टकाभ्यो । दशमस्य मासस्य प्रथमे ऽहन्पुरीषचितिरेकादशस्य मासस्य प्रथमे ऽहन्संयच्च प्रचेताश्चेत्येता उपदधात्या विकर्णेर्द्वादशस्य मासस्य प्रथमे ऽहन्पुरीषचितिरेकान्नत्रिꣳशे शतरुद्रीयꣳ । श्वो भूते वसोर्धारा । ॥ २५ ॥

अथ पुरस्तान्मासमित्याचक्षते । मासं प्रवर्ग्योपसद्भां यन्ति ।

---

१ Thus all, not ०देवताꣳ ; also *infra*.

२ Be 7 BU ms. द्वितीयं ।

३ om. B.

४ The whole passage from ऽहन्चण्ड० up to मासस्योत्तमे (p. 305, 4) left out by all exc. M.

मासस्योत्तमे ऽहन्सद्यश्चितिं निश्लिष्टन्ति सतयादेवतꣳ ससूद-
दोहसं[1] द्वितीयं मासं प्रवर्ग्योपसद्भ्यां यन्ति[1] द्वितीयस्य
मासस्योत्तमे ऽहन्पुरीषचितिः[1] सद्यश्चितिं निश्लिष्टन्ति सतया-
देवतꣳ ससूददोहसं[1] द्वतीयस्य मासस्योत्तमे ऽहन्वण्डचिति-
५ श्चतुर्थस्य[1] मासस्योत्तमे ऽहन्पुरीषचितिः[1] पञ्चमस्य मासस्यो-
त्तमे ऽहन्मध्यमा चितिः[1] षष्ठस्य मासस्योत्तमे ऽहन्पुरीष-
चितिः[1] सप्तमस्य मासस्योत्तमे ऽहन्वण्डचितिरष्टमस्य[2]
मासस्योत्तमे ऽहन्पुरीषचितिर्नवमस्य मासस्योत्तमे ऽहन्सप्त
स्कन्ध्या उपदधात्या नचचेष्टकाभ्यो[1] दशमस्य मासस्योत्तमे
१० ऽहन्पुरीषचितिरेकादशस्य मासस्योत्तमे ऽहन्संयच्च प्रचेता-
श्चेत्येता उपदधात्या विकर्णद्वादशस्य[3] मासस्याष्टाविꣳशे
ऽहन्पुरीषमेकान्नत्रिꣳशे[4] व्रतसद्रीयꣳ[1] स्वो भूते वसोर्धारा[1] ॥
२६ ॥

अथात उत्थानानामेव मौमाꣳसाभिजितेष्ट्योत्तिष्ठेयुरित्येत-
१५ द्ब्राह्मणसंपन्नमर्पि वाभिजितेष्ट्यायैताꣳ[5] सवनेष्टिं [6]निर्वपन्त्या-
ग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपाल-

---

१ Thus M Be 7, हन्वंद्व० B हन्द्वंद्व० Be.

२ Thus M Be 7, हन्द्वंद्वचि० B; हन्द्वंद्वंचि० Be

३ Thus M, the other MSS. as *supra* (p. 303, 13).

४ ०विꣳशे Be 7 D.

५ Thus MU; ०ष्ट्याप्तेताꣳ B Be, ०ष्ट्यायैतां D; ०ष्ट्युयेतां Be 7.

६ Thus M Be BU. निर्वपत्या० Be 7 D

मिति[1] तया समस्तया वा विकृतया वा प्रतिपद्यन्ते[1] वसतीवरीषु मृत्पिण्डमन्ववधायाहरहर्वसतीवरीः[1] परिहरमाणा यन्त्यथ संवत्सरसंपन्नं ब्रह्मणो[2]ऽयनमित्याचक्षते[2] चतुरो मासो दीक्षाभिर्यन्ति चतुर उपसद्भिश्चतुरो मासः प्रसुतास्तदाहुः क एतावत्तपस्तप्यान्यसाधारणं कुर्वीतान्तेवासिषु वोपहवमिच्छेत[3] ५ दक्षिणावता वैनं याजयेयुरिति[1] सो ऽन्तेवासिषु[4] वैवोपहवमिच्छते[4] दक्षिणावता वैनं याजयन्ति[1] ॥ २७ ॥ नवमः ॥

अथ वै भवति कृन्दश्चितं चिन्वीत पशुकाम इति[1] स कृन्दश्चिद्यच्च क्व चाऽऽकृतिरागच्छति[5] जुहोत्येव तच्चाथ[6] यदन्यदाऽऽकृतिभ्यः शरीरवद्यजुरेव तच्च जपति यजुरेव रथ्यनयोर्यजु- १० रश्वगर्दभयोर्यजुरुखायै प्रवृञ्जने[7][1] यजते[8] वायव्येन पशुना[1] दीक्षते[1] विमायाग्निं परिखायापस्यायतने यजुरेव[9] तच्च[9] जपति यजुः सर्वासामिष्टकानामुपधाने[1] जुहोति शतरुद्रीयं[1] कुरुते वसोर्धाराः[1] श्येनचितं चिन्वीत सुवर्गकाम इत्यथमे-

---

१ °मन्ववधाय° MB Be U; °मन्वाधाय° Be 7 D.

२ Thus M; ब्राह्मणायन° the other MSS.

३ वा om. Be BU.— इच्छंते i. s. o. इच्छेत Be 7 D

४ Thus M Be; °षुवोपहव° Be 7 D; °षूपहव° BU.— इच्छंते i s. o. इच्छते all exc. M.

५ चाऽऽकृतीरागच्छंति M.

६ Thus M Be BU; तद् Be 7 D.

७ प्रवृंजनेयजते M; प्रवृंजनेवयजते B Be, प्रवृंजन्नेव DU.

८ °रेवच B Be U

वैष[१] श्येनचित्कङ्कचितं[१] चिन्वीत यः कामयेत श्रीर्षण्वानमुष्मिन्लोके स्यामित्येतस्यैव सतो ऽरत्निमात्रेण प्राक् शिर इव निरूहति । स तथा विमितो भवति यथा न बर्हिर्वेदि यूपः स्यात् । लजचितं चिन्वीत चतुःसीतं प्रतिष्ठाकाम इत्येतस्यैव सतो ऽरत्निमात्रेण पक्षावग्रीवणीयाꣳसौ भवतस्तावन्मात्रेणापिपक्षौ वरीयाꣳसौ । तौ मनागपनतौ परोऽणीयाꣳसौ[२] भवत । एकैकामृचा[३] सीतां क्षरति । प्रउगचितं चिन्वीत भ्रातृव्यवानित्येतस्यैव सतः समुद्गृह्याꣳसौ[४] प्रागायातयति । स तथा विमितो भवति यथा न बर्हिर्वेदि यूपः स्यादुभयतःप्रउगं चिन्वीत यः कामयेत प्रजाताञ्भ्रातृव्यान्नुदेय प्रतिजनिष्यमाणानित्येतस्यैव सतः समुद्गृह्यैव श्रोणी प्रत्यगायातयति । स तथा विमितो भवति यथा न बर्हिर्वेदि यूपः स्यात् । ॥ २८ ॥

रथचक्रचितं चिन्वीत भ्रातृव्यवानिति विज्ञायत । आकृतिविकारः शब्दसंयोगाद्यावानग्निः[५] सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वानुशर्करमन्तःशर्करमिष्टकाः परिचिनोत्यथान्ततो[६] ऽथान्तरत । एवमेवा[७] स्वयमातृण्णाया । अथा-

---

१ Thus M only; इत्युपमावैष (or इत्यथायमेवैष) श्येनचितिः the other MSS

२ परो om. all exc. M.

३ एकैकामच M; ऋचा om. Be.

४ Thus M Be BU; समुद्गृह्यैव श्रोणी Be 7 D.

५ Thus MBU; शुभसंयो॰ Be; चाषाः संयो Be 7 D.

६ Thus MD Be 7; ॰थांतरतो Be U; B. om.

७ Thus M; एवमेव the other MSS.

भितः स्वयमातृण्णां[1] मध्ये नाभिमिव करोति[1] तस्या[1] अनु-
दिग्गमवान्तरदिग्गमरानिव[2] नेमिमिवेष्टका[2] आयातयति[1] स
एष रथचक्रचिद्ब्राह्मणवतः परिक्रय्यो[1] द्रोणचितं चिन्वीतान्न-
काम इत्येतस्यैव सतो ऽरत्निमात्रेण प्रागोष्ठमिव निरूहत्यथ[3]
मध्ये निम्नमिव[4] करोति[1] स एष द्रोणचिदन्नकामस्य परि- ५
क्रय्यः[1] समूह्यं चिन्वीत पशुकाम इति विज्ञायते[1] पुष्कर-
पर्णं[5] रुक्मं[5] हिरण्मयं पुरुषं[5] सुचावित्येतल्लक्षणमित्या-
चक्षते[5][1] कुरुत एव तदथो पुरीषस्यैवेष्टका[6] आयातयति[1]
स एष समूह्यः पशुकामस्य परिक्रय्यः[1] परिचाय्यं चिन्वीत
ग्रामकाम इत्यनुशर्करमन्तःशर्करमिष्टकाः परिचिनोत्यथा- १०
न्ततो[7] ऽथान्तरत[7][1] एवमेवा[8] स्वयमातृण्णाया[1] अथाभितः
स्वयमातृण्णामिष्टकाः परिचिनोति[1] स एष परिचाय्यो ग्राम-
कामस्य परिक्रय्यः[1] ॥ २९ ॥

---

१ °मवांतरदिश° M Be; °मवांतरदेश° B Be 7 UD.

२ °मरान्ननेमिमितिवेष्टका MSS. exc M, which has °मरानिवनेमिवेष्टका; perhaps an allusion to R.V. I. 32. 15, TBr. II. 8. 4. 3.

३ अथं i s. o. अथ all exc. M.

४ Thus M Be; म्निमिव the other MSS.

५ °तल्लक्षण° M.

६ पुरुष° M.

७ Thus M; °थांततोथांतत B Be; °थोतथोखांतर Be 7 D; °थांततो-थोतथांतत U

८ Thus M, एवमेव the other MSS

श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुया-
मिति। षट् प्राञ्चः पुरुषास्त्रयः पुरस्तात्तिर्यञ्चौ[1] द्वौ पश्चा-
त्तिर्यञ्चौ स आत्मा। तस्य माचा। यदि ग्रीवदघ्नं पुरस्ता-
न्नाभिदघ्नं पश्चाद्यदि नाभिदघ्नं पुरस्ताज्जानुदघ्नं पश्चाद्यदि
५ जानुदघ्नं पुरस्तादुत्फदघ्नं पश्चाद्यदि गुल्फदघ्नं पुरस्तात्समं भूमेः
पश्चात्स एष श्मशानचित्पितृलोककामस्याथ खैष कूर्मचिद-
ब्राह्मणो। मध्य उत्पृष्टः[2] परिक्रम्य। एतस्यैव सतो ऽरत्नि-
माचेण प्राक् शिर इव निरूहति। तस्यावान्तरदिशं पादा-
निवेष्टका आयातयति। स एष कूर्मचिदब्राह्मणो मध्य उत्पृष्टः
१० परिक्रम्यः। ॥ ३० ॥ दशमः ॥

सौत्रामण्या यक्ष्यमाणो भवति। स उपकल्पयते रोहितं
चर्मानड्वहꣳ सौमं च क्लीवं च श्मश्राणि च तोक्मानि[3] च
व्रीहीन्नग्नꣳ[4] चूर्णक्तं[5] चीणि नानावृक्षाणि पात्राणि चया-
न्सक्तूꣳस्त्रयाणि लोमानि घृतं च श्येनपत्त्रं च गर्भिणीं वडवा-
१५ मासन्दीमिण्डं कुम्भं कारोतरं विश्राख्यौ दीर्घवꣳशꣳ स्त्रिक्यꣳ
श्रतातृष्णꣳ शतमानꣳ हिरण्यꣳ सतं च वाल च ब्राह्मण-
माऊत्या उच्छेषणस्य पातारं यदि ब्राह्मणं न विन्दति

---

१ ॰त्तिर्यञ्चौ all, but cp J. As. Soc. of Bengal. 1875, p. 265.

२ Thus M Be BU; उत्कृष्टः Be 7, उत्तृष्णः D.

३ तोक्मानि M and thus also all the MSS. of the grhyasūtra I. 8; तोक्मानि the other MSS.

४ नग्नꣳ॰ M

५ ॰क्तां all exc. MT

वल्मीकवपामथामावास्येन वा हविषेष्ट्वा नक्षत्रे वाग्नेय शालाꣳ रोहिते चर्मणि सुरासोमः सꣳसन्नः[१] प्रेते। तं दक्षिणतः क्लीव उपास्ते। सीसेन क्लीवाक्ष्ण्याणि क्रीणातीदं तवेदं ममेति। क्रीतः सुरासोम इत्यथैनमादाय पूर्वया द्वारा शालां प्रपाद्य जघनेन गार्हपत्यमुपसादयत्यथैतेषां व्रीहीणामधानवन्त्यथे- ५ तरान्गार्हपत्य[२] एककपालमधिश्रित्य[३] भर्जन्ति[४]। तेषां ये फलन्ति लाजास्ते[५] भवन्त्यथ य[५] उ[५] न फलन्ति तास्तर्यो। गार्हपत्ये नवां कुम्भीमधिश्रित्य प्रोदकमिवौदनꣳ[६] अपयन्त्यथैनं विस्राव्य कठिने[७] वा पाजके वा विषजन्त्यथैनान्भृगुणान-वघ्नन्ति[८]। तेषां यानि च चुद्राणि यास्च तर्यस्ता उत्सेके १० संप्रकिरन्ति। तं मासर इत्याचक्षते। ऽथ मानमादाय विमिमीत[९] एकꣳ श्यामाणां द्वे तोक्मानां[१०] त्रीणि लाजानां

---

१ Thus (संसन्नः or संसंनः) MT Be U (pr. m.); संपंनः Be Tr U (sec. m.), समंन. H; Bhav. periphr. सादितः।

२ Thus Be Tr; ॰पत्येकक॰ U; ॰पत्य एक॰ T; MHB om एक॰; but cp. *supra* XIII. 25 (p. 136. 2).

३ Thus M, as *supra* l. c.; भर्जयंति the other MSS.

४ ते लाजा MT Tr.

५ Thus MT Tr; ये (omitting उ) the other MSS.

६ ॰मिवौदनं MH Be; ॰मिवोदनं Tr TBU.

७ Thus T Tr H; कठिने MB Be; U corrupt.

८ Thus M, भृगुणान Tr; भुग्नान् or सुग्नान् the other MSS; Bhav. once, भृगुणान्, once सुग्नान्।

९ वि om M Tr T.

१० Thus Be; तोक्मानां the other MSS.

चत्वारि नग्नहोरयैतमोदनं चूर्णैरनुप्रकिरन्नासरेणावोक्षन्संपादयति[१] ॥ ३१ ॥

खादीं त्वा खादुना तीव्रां तीव्रेणामृतामृतेन सृजामि सꣳ सोमेनेत्यथैतामासन्दीमग्नेणाहवनीयं पर्याहृत्य दक्षिणतो निदधात्यासन्यामिण्डमिण्डे कुम्भं कुम्भे कारोतरमवदधात्यथैतमोदनमभितः कारोतरं परिचिनोत्यथैनमपिधायाभिमृशति सोमो ऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेति। तिस्रः सꣳसृष्टा वसति। तिस्रो हि राचीः क्रीतः सोमो वसतीति ब्राह्मणमथ तिसृषु व्युष्टासु तायते चिपशुर्वा चतुष्पशुर्वा पशुबन्धो ऽयास्येषा पूर्वेद्युरेव सौचामणिकी, वेदिर्विमिता भवति। तां परिस्तीर्य स्रुग्घयजुर्हरति ॥ ३२ ॥

इदमेव प्रसिद्धं पौरोडाशिकं। त्रिर्यजुषा तूष्णीं चतुर्थं। पूर्वं परिग्राहं परिगच्छति। करणं जपत्युद्धन्त्युद्धतादाग्नीध्रस्त्रिर्हरति। यदाग्नीध्रस्त्रिर्हरत्यथ चात्वालसादृता चात्वालं परिलिखत्युत्तरवेदेरादृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्साद्य युपावटं[२] खात्वाग्नेरादृता[३] द्वावग्नी प्रणयत आहवनीयादेवाध्वर्युरन्वाहार्यपचनात्प्रतिप्रस्थाताग्निवत्युत्तरं परिग्राहं परिगच्छ योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्रुक्वा संप्रेषमाह प्रोक्षणीरासादये-

---

१ °नुप्रकारं 1 s o °नुप्रकिरन् M T, संपादयति M (pr. m.), संपावयति M (sec m ).

२ यूपा° खात्वा om. M T.

भावर्हिरुपसादय स्रुवꣳ स्रुचिꣳ स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च दध्ना चोदेहि प्रतिप्रस्थातः सुरासोमस्य विद्धीत्यध्वर्युरेव प्रसिद्धं पाशुबन्धिकं कर्म चेष्टत्यथ प्रतिप्रस्थाता सुराꣳ[1] संपवव्य[2] सग्रस्थामादाय पूर्वया द्वारोपनिर्हत्यान्तर्वेद्यासादयति ॥ ३३ ॥ ५

यावदेवाचाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता सत उदीचीनदग्रेण वालेन सुरां पुनाति पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता। वारेण शश्वता तनेति। वायुः पूतः पवित्रेणेति यदि सोमातिपवितो भवत्यथादत्ते पर्णमयं पात्रं। तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतो ऽस्यश्विभ्यां त्वा जुष्टं गृह्णामीति। बर्हिषी अन्तर्धाय कृष्णसक्तुभिश्च[2] सिꣳहलोमभिश्च श्रीणात्यपोद्धृत्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिरश्विभ्यां त्वेत्यथादत्ते नैयग्रोधं पात्रं। तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतो ऽसि सरस्वत्यै त्वा जुष्टं गृह्णामीति। बर्हिषी अन्तर्धाय १५ बदरसक्तुभिश्च व्याघ्रलोमभिश्च श्रीणात्यपोद्धृत्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिः सरस्वत्यै त्वेत्यथादत्ते आश्वत्थं पात्रं। तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामीति।

---

१ सुरासोमस्यपवव्य M.

२ च om. here and every time *infra* B Be H.

बर्हिषी अन्तर्धाय कर्कन्धुसक्तुभिश्च वृकलोमभिश्च श्रीणात्यपोद्धृत्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा सुचाम्ण इति ॥ २४ ॥

ताञ्चघनेन सुग्दण्डान्प्राचो वोदीचो वायातयत्यथैताꣳ सुराꣳ सप्तरेकामादाय दक्षिणमग्निमुपसꣳसर्पति[१] । तमभितो[२] गर्तौ[३] खानयति । तदुपसादयति विशाखौ[३] दीर्घवꣳग्रꣳ श्लिक्ष्णꣳ शताढ्याꣳ शतभानꣳ हिरण्यꣳ सतं च वालं चाथ दक्षिणमग्निमग्रेण पुराणभस्मनः[४] खरं करोति । तदुपसादयति ब्राह्मणमाऊत्या उच्छेषणस्य पातारं । यदि ब्राह्मणं न विन्दति वल्मीकवपामथाप उपस्पृश्य यूपस्याहृता यूपमुच्छ्रयति । खर्वन्तं यूपमुत्सृज्याथैतान्यशूनुपाकरोत्याश्विनं धूम्रꣳ सारस्वतं मेषमैन्द्रमृषभं । बार्हस्पत्यं पशुं चतुर्थं यदि सोमातिपवितो भवति । तेषां प्रसिद्धं वपाभिश्चरित्वाश्विनसारस्वतावध्वर्युरादत्त । ऐन्द्रं प्रतिप्रस्थाता । ग्रहावादायोपोत्तिष्ठन्नाहाश्विभ्याꣳ[५] सरस्वत्या इन्द्राय सुचाम्णे सुराम्णाꣳ[६] सोमानामनुब्रूहीति । युवꣳ सुराममश्विनेत्येतामन्वाहात्याक्रम्याआ-

---

१ Thus M Tr TBH सर्पति Be U.

२ Thus ( with ग ) B Be ( pr. m. ) H ; ॰भितः क॰ MT Tr , ॰भितो क॰ Be (sec. m.).

३ विशाखौ M.

४ Thus MT Tr , भस्मना B Be U H.

५ Thus M Tr. ; उपतिष्ठन् i.s.o. उपोत्तिष्ठन् the other MSS.

६ Thus ( cp Āp. XIX. 2. 18) M Tr , सुराम्ण BH Be U ; T def.

व्याहाश्विभ्याꣳ सरस्वत्या इन्द्राय सुचामणे सुरामण: सोमान्प्रस्थिताꣳप्रेष्येति । मैत्रावरुणो होता यच्चदश्विना सरस्वतीमिन्द्रꣳ सुचामाणमिति । पुत्रमिव पितरावश्विनोभेति यजत्यैहाग्ने हविरास्ये त इति वषट्कृते जुहोति ॥ ३५ ॥

यस्मिन्नश्वास ऋषभास उक्षण इत्यनुवषट्कृते ऊत्वाश्विनस्य ५
सꣳस्रावꣳ सारस्वते ऽवनयति । सारस्वतस्य सꣳस्रावमैन्द्रे ।
तं ब्राह्मणो भक्षयति नाना हि वां देवहितं यदश्चेति द्वाभ्यां ।
[1]यदि ब्राह्मणं न विन्दति वल्मीकवपायामवनयत्येतेनैव मन्त्रेणाथैतानि पात्राणि बल्बजग्रस्य[2] पूरयित्वा पर्णमये श्येनपत्त्रमवगूहति । तद्विग्राह्यावुच्छ्रित्य दक्षिणाग्रं वꣳशं प्रोहति १०
वꣳशे ग्रिक्यꣳ सजति[3] ग्रिक्ये ग्रताहस्याꣳ ग्रताहस्यायां वालं
वाले ग्रतमानꣳ हिरण्यमथैताꣳ सुराꣳ सप्ररेकामादाय
ग्रताहस्यायाꣳ समवनयति सोमप्रतीका: पितरस्तृप्णुतेति ।
चरति[4] ग्रताहस्येत्युपतिष्ठन्ते[5] पवमान: सुवर्जन इत्येतेनाष्टर्चेनाथ यदि सोमातिपवितो भवति पितृणां धैाज्यानुवाक्या- १५
भिरुपतिष्ठन्त उदीरतामवर उत्परास आहं पितृन्त्सुविद-

---

१ अथ ins. MT Tr.

२ Thus H; बल्बजग्रस्य MTB Be U; बिल्वग्रस्य Tr.

३ Thus M Tr, सजयति T; सचति B Be U; सचयति H.

४ Thus Tr Be HU (sec. m.); चसि (sic) B, चरंति U (pr. m.); चरति MT.

५ Plural T Tr U (pr. m.); sing. the other MSS

चाऽ अवित्सीदं पितृभ्यो नमो अस्त्वद्येत्यध्वर्युर्होता ब्रह्मा त उपतिष्ठन्ते । यचैव शतात्तां धारयति तच्चिदधाति प्रतिष्ठित्या इति ब्राह्मणं । तदेवैनां निधाय दक्षिणतो निदधात्यथैतानि पाचाणि पुराणभस्मनः खरे सादयति ॥ ३६ ॥

पितृभ्यः स्वधाविभ्यः स्वधा नमः पितामहेभ्यः स्वधाविभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधाविभ्यः स्वधा नम इत्यथ गर्भिणीं वडवां ददात्यथाप उपस्पृश्य वार्हस्त्यस्य पशुपुरोडाशं याचति । तेन प्रचरति[1] देवताप्रभृतिनेडान्तेनाथ पशुभिश्चरति मनोताप्रभृतिभिरिडान्तैरथैतान्पुरोडाशान्याचत्यैन्द्रमेकादशकपालऽ सावित्रं द्वादशकपालं वारुणं दशकपालमिति । तैश्चरति देवताप्रभृतिभिरिडान्तैरनूयाजैश्चरित्वा प्रदक्षिणमावृत्य प्रत्यङ्ङावृत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य त्रीणि पाशुबन्धिकानि समिष्टयजूऽषि जुहोति यज्ञ यज्ञं गच्छैष ते यज्ञो यज्ञपते देवा गातुविद इत्यथैतमवभृथऽ मऽसादयन्ति[2] यत्किंचित्पुरुरात्रिष्टं भवति तत्सह हृदयशूलानि भवन्त्येतत्समादायान्तरेण[3] चात्वालोत्करावुदङ्नुपनिष्क्रामन्ति ॥ ३७ ॥

द्वे स्रुती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वं भुवनऽ समेत्यन्तरा पूर्वमपरं च केतुमिति ।

---

१ चरति M Tr

२ Thus M Tr Be, °सादयति HBU, संप्रकिरंति T

३ भवंत्ये° HU, भवंतीत्ये° M, भवतीत्ये° T, भवत्ये° B Be

प्रसिद्धꣳ हृदयशूलैश्वरित्वाथैतानि पात्राण्युदकान्ते पराञ्चि सादयति यस्ते देव वरुण गायत्रश्छन्दाः पाशो ब्रह्मन्प्रतिष्ठितः। तं त एतेनावयज इति पर्णमयं ' यस्ते देव वरुण त्रिष्टुप्छन्दाः पाशः क्षत्रे प्रतिष्ठितः। तं त एतेनावयज इति नैयग्रोधं ' यस्ते देव वरुण जगतीछन्दाः पाशो विट्सु प्रतिष्ठितः। तं त एतेनावयज इत्याश्वत्थं ' यस्ते देव वरुणानुष्टुप्छन्दाः पाशः पशुषु प्रतिष्ठितः। तं त एतेनावयज इति प्लताह्णां ' तूष्णीꣳ सतं वाक्षं च ' प्रसिद्धो ऽवभृथः ' साम चैव नाह देवीराप एष वो गर्भ इति चाथाप्रतीक्षमायन्ति वरुणस्यान्तर्हित्यै ' प्रपथे समिधः क्रुर्वत एधो ऽस्येधिषीमहीत्येत्याहवनीये ऽभ्यादधाति समिदसि तेजो ऽसि तेजो मयि धेहीत्यथाहवनीयमुपतिष्ठन्ते ऽपो अन्वचारिषꣳ रसेन समसृक्ष्महि। पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसेत्यथ कुसीदेन सक्तुहोमेन चरत्यथ देवता उपस्थाय यूपमुपतिष्ठते। संतिष्ठते सौचामणी[१] ' ॥ ३८ ॥ एकादशः १॥

[२]वेदमधीत्य स्नास्यन्नुपकल्पयत एरकां चोपबर्हणं च

---

१ सौचामणि. all exc. M; at the close of this adhyāya T adds इति चरकसूत्रम्।

२ The text of adhyāya 12 is based on M(ackenzie), cp. Preface, p. II, and on the following MSS. of the Gṛhyasūtra Ma(dras), on the whole a very good copy in grantha, E(gmore), nāgarī copy of grantha original; T(anjore), grantha, breaking of after the words अपाशो ऽसीत्युक्त्वाच्छ in kh. 41; H(aug), B(enares), these two closely related and on the whole rather bad. I made

नापितं च क्षुरं च दारूणि चोपस्तरणं च वृकलाꣳश्च दन्तधाव-
नमुष्णाश्चापः शीताश्च सर्वसुरभिपिष्टं[1] चाञ्जनं च स्रजं
चादर्शं चाहतं च[2] वासः प्रावरणं[3] च वसनान्तरं बादरं मणिꣳ
सुवर्णोपधानꣳ सूचं च[4] प्रवर्तौ च दण्डं चोपानहौ च[5]
५ क्षत्रमानडुहं चर्म सर्वरोहितमित्येते ऽस्य संभारा उपकॢप्ता
भवन्ति । स्नानस्य मीमाꣳसा । रोहिण्याꣳ स्नायादित्येकं ।
प्राजापत्यं वा एतन्नक्षत्रं । तदस्य प्राजापत्य एव नक्षत्रे स्नातं
भवत्यथो सर्वान्रोहान्रोहाणीति[6] । तिष्ये स्नायादित्येकं ।
बार्हस्पत्यं वा एतन्नक्षत्रं । तदस्य बार्हस्पत्य एव नक्षत्रे
१० स्नातं भवत्यथो बृहस्पतिप्रसूतो ऽसानीत्युत्तरयोः फल्गुन्योः
स्नायादित्येकं । भाग्यं वा एतन्नक्षत्रं । तदस्य भाग्य[7] एव

---

also use of G (gṛhyaprayoga MS. Burnell cvii, which cites often literally passages of the Grhya), Prm. (Prayogamālā printed at Bombay), Pś (Prayogaśikhāmaṇi, No. 3108 of the Leiden collection), Ks (Kanakasabhāpati's kārikā, Burnell cix) and Pc (Prayogacūḍāmaṇi, Telugu MS., collection Mackenzie No 21). Adhyāya 13 is contained only in M and E. The two adhyāyas 12 and 13 are now also printed in the Grantha Edition of the Baudhāyana smārtasūtra, designed by me as "Ed."

१ सार्व॰ EG.

२ only in Ed. TE.

३ Thus EHG; प्रावारं MT, प्रपारं Ma. प्रवारणं Ed.

४ om. HBM (sec. m.)

५ om. THB Ma

६ Thus B; रोहतीति i.s.o. रोहाणीति the other MSS. and Ed.

७ भग्य TM Ma.

नच्चे स्नातं भवत्यथो भाग्यो ऽसानीति । हस्ते स्नायादित्येकꣳ । सावित्रं वा एतन्नच्चं । तदस्य सावित्र एव नच्चे स्नातं भवत्यथो सवितृप्रसूतो ऽसानीति । चित्रायाꣳ स्नायादित्येकमैन्द्रं वा एतन्नच्चं । तदस्यैन्द्र एव नच्चे स्नातं भवत्यथो चित्रो ऽसानीति । विशाखयोः स्नायादित्येकमैन्द्राग्नं वा एतन्नच्चं । तदस्यैन्द्राग्न एव नच्चे स्नातं भवत्यथो विशाखो ऽसानि प्रजया पशुभिरित्येतेषामेकस्मिन्नापूर्यमाणपक्षे पुरादित्यस्योदयाद्व्रजमभि प्रपद्यते । नैनमेतदहरादित्यो ऽभितपेत्तदहꣳ स्नातानामु ह वा एष एतत्तेजसा यशसा तपत्यन्तर्लोम्ना चर्मणा व्रजमभिविध्यन्ति । पूर्वार्धमध्ये व्रजस्याग्निमुपसमाधाय संपरिस्तीर्याहरन्त्येतान्संभारान्सकृदेव सर्वान्त्सहꣳ सर्वाणि मानुषाणीत्येतस्माद्ब्राह्मणाद्दक्षिणतो ब्राह्मण उपविशत्युत्तरत उदपात्रं पालाग्नीं च समिधं निदधात्य-

---

१ Thus HB, सानीति the other MSS. and Ed.

२ Thus MB; ॰त्येषामेकस्मिन्न॰ H; ॰त्येकेषामेतस्मिन्नै॰ Ma TE. and Ed

३ Thus all exc. Ma and Ed., which have तदहस्य i.s.o. तदह and E: ॰तपेन्मध्यंदिनꣳ तदहस्य स्नाता॰; Bhāradvāja also has the reading accepted by me on the authority of the best MSS (=तदहःस्नातानाम् as a compositum ?).

४ ॰मु ह वा only MT; ॰मुखा वा Ma; ॰मुखं the other MSS., मुखं वा Ed.

५ ॰भिनिघ्नंति MSS. (and Ed.) exc E, which om. the second præpos.; cp. *supra* XI. 10 (p. 79, 4), XVI. 20 (p. 267, 1), XVIII. 18.

६ Thus MT; सर्वाणि i.s.o. सर्वान् HB; संभरति i.s.o. सर्वान् E Ma., Ed.

७ Before दक्षिणतो Ma ET and Ed. ins. दर्भेषु ।

८ Thus M Ma HB; ब्राह्मणमुपवेशयत्यु॰ E; ब्रह्मणमुपविशत्यु॰ T.

परेणाग्निमुदीचीनप्रतिषेवणामेरकाꣳ साधीवासामास्तीर्य[१] तस्यां प्राङ्मुख उपविश्यत्युत्तरतो नापित ' उत्तरत उपवर्हणमामध्यंदिनं भिक्षां दद्यादपीह[२] गां पचेद्यद्या चेद्रस्य[३] स्याद्' चैतां[३] पात्राग्नीꣳ समिधमाज्येनाक्ता मध्यंदिने ऽभ्याद-
५ धांति ॥ ३९ ॥

इमꣳ स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया । भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव स्वाहेत्यथैरकायामुदीचीनशिरा निपद्यते आयुषं[४] जमदग्नेः कश्यपस्य आयुषमगस्त्यस्य[४] आयुषमृषीणां[४] आयुषं[४]
१० यद्देवानां आयुषं[४] तन्मे अस्तु आयुषमित्युच्यमानमनुमन्त्रयते[४] शिवा मे भवथ सꣳसृग्र इति ' क्षुरमभिमन्त्रयते क्षुरो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीरित्युच्यमानमनुमन्त्रयते यत्क्षुरेण वर्चयसि[५] वप्ता वपसि केशश्मश्रु वर्चय मे मुखं मा म आयुः प्रमोषीरिति ' श्मश्रूण्येवाग्रे
१५ वपते ऽथोपपक्षौवथ केशान्यथोपपादमितराणङ्गान्येतस्माद्वेषा[६] जरसा[६] पूर्वं आयुषि प्रयान्ति पूर्वं आयुष्यन्नादा भवन्ति

---

१ Thus Ma TE, Ed.; ॰स्तृणीते M; HB om. this passage.

२ ॰दपि ह Ed.

३ Thus E Ma; चेत्तस्य स्याद॰ TH; चेतस्य स्याद॰ B; चेस्याद॰ M, चेदश्यस्याद॰ Ed.

४ Thus EM Ma G, Ed.; चियायुष॰ THB Prm

५ Thus all exc. E॰ वर्धयसि and T: वर्चसि ।

६ Or should we write ॰षाजरसा? What may be the sense of these words?

य एवं विद्वाꣳसो लोमानि वापयन्ते । स यदि लोमानि वापयिष्यमाणः स्यात्केशश्मश्रु वापयित्वा लोमानि सꣳहृत्य नखानि निकृन्तयीताथैतानि समुच्चित्य ब्रह्मचारिणे प्रयच्छन्नाहेमानि हृत्वा दर्भस्तम्बे वोदुम्बरमूले वा निधत्तादिति । तानि स तत्र निदधात्यपरेणाग्निं प्राङ्मुख उपविश्य मेखलां विस्रꣳसयत इमां विष्यामि वरुणपाशमिति । यो ऽस्य तत्र[1] रातेः[1] पुत्रो वान्तेवासी वा भवति तस्मै प्रयच्छन्नाहेमाꣳ हृत्वा न्यग्रोधे वोदुम्बरमूले वा निधत्तादिति । तासु[2] स तत्र निदधातीदमहममुष्यामुष्यायणस्य शुचा पाप्मानमवगूहाम्युत्तरस्य[3] द्विषञ्च इति । वृकलैः प्रधाव्य दन्तान्विधावयते[4] ऽन्नाद्याय व्यपोहध्वं भगो राजायमागमत् । स मे मुखं प्रसर्पतु वर्चसे च भगाय चेत्यूभयीरपः संनिषिञ्चत्यूर्णासु शीता आनयति दैवमानुषस्य[5] व्यावृत्त्या इति । तामामञ्जलिनोपहत्याभिषिञ्चत्यापो हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति तिसृभिः । षोढाविहितो वै पुरुष इत्येतस्माद्ब्राह्मणादैतस्य[6] सर्वसुरभिपिष्टꣳ समुदायुत्य त्रिः प्रसिञ्चति ॥ ४० ॥

---

१ तत्रारातेः T Ma.

२ Thus TM Ma ; तास् EHB, Ed

३ Thus (अवगूहामि) MHB Prm Pśm ; अपगू॰ T Ma EG Pc. Ed.

४ Thus M Prm ; ॰धापयते all the other MSS. and G, Ed.

५ दैव॰ ET and Bhāradvāja ; देव॰ the other MSS., Ed. and the Prayogas.

॰ऐतस्य Ma E, Ed. ; ॰ऽनस्य MHB ; T indistinct.

नमः शाकजञ्जभाभ्यां नमस्ताभ्यो देवताभ्यो या अभिग्राहिणीरित्यनुलिम्पते[१] ऽप्सरासु[१] च[२] यो गन्धो गन्धर्वेषु च यद्यग्नः । दिव्यो यो मानुषो गन्धः स मामाविशत्विहेत्यथाहतं परिधत्ते स्वा मा तनूराविश शिवा मा तनूराविशेत्येवमेवोत्तरासङ्गमेवमेवात[३] ऊर्ध्वमथैतं वादरं मणिꣳ सुवर्णोपधानꣳ सूचे प्रोत्य दर्व्यामाधाय दर्विदण्डे[४] सूचेण पर्यस्य जुहोतीयमोषधे त्रायमाणा महमाना महस्वती । सा मा करोतु सोमवर्चसꣳ सूर्यवर्चसं ब्रह्मवर्चस्विनमन्नाद[५]ं करोतु स्वाहेत्यथैनमुदपात्रे[६] ऽनुपरिश्रावयति[६] विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विष इत्यपाग्नौ ऽवोक्ष्णया परिहरति वध्यꣳ हि प्रत्यङ्गं प्रतिमुञ्चन्ति व्यावृत्त्या इत्येतस्माद्ब्राह्मणादथैतौ प्रवर्तौ सूचे प्रोत्य दर्व्यामाधाय दर्विदण्डे[७] सूचेण पर्यस्य जुहोत्यायुष्यं वर्चस्यꣳ सुवीर्यꣳ रायस्योषमौद्भिद्यम्[८] । इदꣳ हिरण्यं वर्चसे[९] जैत्रायाविशतादिमꣳ[१०]

---

१ Thus Ma, Ed., ०नुलिंपेत्यश्च० E, ०नुलिंपंतेश्च० T, ०नुलिंपेदश्च० M; ०नुलिंपेत्य० HB.

२ MTE and Ed. om.

३ Thus (उत्तरासंगयम्) ET, Ed., ०मेवासंगमे० M Ma, HB corr.

४ Thus M Ma दर्वी० ET Prm, and Ed., HB om.

५ ०स्विनम० HM Ma B, ०सिनम० T, Ed, E indistinct

६ Thus M; ०पात्रेण परि० T Ma E Prm, Ed.; पात्रेणानुपरि० HB Ps.

७ Thus M Ma HB: दर्वी० EG and Ed.

८ ०मौद्भियम् M Ma G and Ed., ०मौद्भिदम् EHB Prm Ps

९ Thus MG, Ed., जैत्राया० the other MSS and Prm Ps.

१० इमꣳ M Ma EG and Ed., इमाꣳ H, इमा B.

रयिꣳ स्वाहेति । द्वितीयां जुहोति शुनिमिवाहꣳ[१] हिरण्यस्य पितुरिव नामाग्रभैषम्[२]। तन्मा करोतु सोमवर्चसꣳ सूर्यवर्चसं ब्रह्मवर्चस्विनमन्नादं[३] करोतु स्वाहेति । तृतीयां जुहोत्युच्चैर्वाजि[४] पृतनासहꣳ[५] सभासाहं धनंजयम्। सर्वाः समृद्धीर्ओषधयो हिरण्ये याः समाहिताः स्वाहेति । चतुर्थीं जुहोति विराजं च स्वराजं चाभिष्टिर्या[६] च नो गृहे। लक्ष्मी राष्ट्रस्य या मुखे तया मा सꣳसृजामसि स्वाहेति । पञ्चमीं जुहोति यशो मा कुरु ब्राह्मणेषु यशो राजसु मा कुरु। यशो विशेषु शूद्रेष्वहमस्मि यशस्तव[७] स्वाहेत्यथैनावुदपात्रे[८] ऽनुपरिस्रावयति[८] विश्वा उत त्वया वयमित्येतया । तयोरन्यतरमादाय दक्षिणे कर्ण आबध्नीत[९] आयुष्यं वर्चस्यमित्येताभिः

---

१ Thus (शुनिम्) M Ma Prm Pś and Ed., शुनीम् EG, शुमिम् HB; शुनम् only Ks.

२ Thus Pś; नामाग्रभैजषं Prm, नामाग्रहीच्चमग्राहं E, नामग्रहं M Ma BHG; नामाग्रहं, Ed.

३ ०स्विनम० M Ma HB; ०सिनम० EG and Ed.

४ ०र्वाजि all exc. G, which has rightly ०र्वादि।

५ Thus the MSS.; पृतनाजि the Prayogas

६ Thus Prm, चाभिस्त्रीया G; चाभिश्रीया Pś; चाभिषौर्या Pc, चाभिश्रौर्या M Ma and Ed.; चाभिग्रौर्या E; चाभिशार्या BH.

७ Thus M Prm Pc G; यशस्त्व Ma E, Ed.; यशत्व Pś; यशत HB

८ Thus M; ०पाचेणपरि० Ma E Prm, Ed.; ०पाचेणानुपरि० B, पाचेणनुपरि० H.

९ Thus HB; स्रावयति M Ma E Prayogas.

पञ्चभिरथैनमनुपरिवर्तयत[1] ऋतुभिस्त्वार्तवैः संवत्सरस्य धाय-
मा[2] तैस्त्वा सहानुकरोमीत्येवमेवोत्तरं प्रवर्तमाबध्नीते । ऽथ
स्रजं प्रतिमुञ्चते[3] ॥ ४१ ॥

शुभिके शिर आरोह शोभयन्ती मुखं मम । मुखꣳ
हि मम शोभय भूयाꣳसं च भगं कुरु ॥ यां त्वा जहार
जमदग्निः श्रद्धायै कामायान्ये[4] । तां त्वेमां प्रतिमुञ्चे[5] ऽहं
वर्चसे च भगाय चेति । चैककुदेनाञ्जनेनाङ्के यदाञ्जनं
चैककुदं जातꣳ हिमवत उपरि । तेन त्वामाञ्जे मयि पर्वत-
वर्चसमस्त्वित्यादर्शे परिपश्यते यन्मे मनः परागतमादर्शे परि-
पश्यतः । इदं तन्मयि पश्याम्यायुष्यं वर्चस्यं मे अस्त्वित्यथोपा-
नहावुपमुञ्चते द्यौरसीति दक्षिणे पादे पृथिव्यसीत्युत्तरे ।
ऽथ दण्डमादत्ते सखा मा गोपायेति । छत्रमादत्ते दिव्यो
ऽसि सुपर्णो ऽन्तरिक्षात्मा पाह्येति । सो ऽवैवास्त आ नक्त-
माणामुदयादथोदितेषु नक्तंचरेषूपनिष्क्रम्य दिश उपतिष्ठते
देवीः षड्वीरूर् नः कृणोत विश्वे देवास इह वीरयध्व-
मिति । मा हास्महि प्रजया मा तनूभिरिति नक्त-
माणि । मा राधाम द्विषते सोम राजन्निति चन्द्रमसꣳ ।

---

१ Thus M, ॰वर्तयति Ma, Ed., ॰वर्तनि H

२ धायसा MBH, Ed.; धायया Ma. यायसा E (from grantha original!).

३ Thus M Ma E; ॰मुचते B, ॰मुच्यते H, ॰मुञ्चति Ed

४ Thus M Prm Ks Pś; कामायान्ये Ma, Ed, राकायान्ये HB

५ Thus Prm G: ॰मुंचतु Ma E, ॰मुंच M. ॰मुञ्चामि Ed

मसुपस्थाय[1] यत्रयत्र[2] कामयते तदेतीत्येतत्समावर्तनम्[1] ॥

## ४२ ॥ द्वादशः ॥

अथेतरत्तूष्णीमेव[3] तीर्थं स्त्वोदेत्यथ यदि रथं लभते रथंतरमसीति दक्षिणं चक्रमभिमृशति बृहदसीत्युत्तरं वामदेव्यमसीति मध्यमथ रथं प्रवर्तमानमनुमन्त्रयते ऽयं वामश्विना रथो न मा दुःखे मा सुखे रिषदित्यथ यदि ग्रमरथं करिष्यन्भवत्यप उपस्पृश्येमामभिमृशतीह धृतिरिह विधृतिरिह रन्तिरिह रमतिरिह रमतामित्यथास्मा आचार्यः कूर्चमाहारयति[1] तं प्रदक्षिणं पर्यस्योदगादृत्त उपविशति पुरस्तादेनं प्रत्यङ्मुपोहते राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषमित्यथास्मा उदकमाहारयति[1] तेनास्य पादौ प्रक्षालयत्यवनेक्तु:[4] पाणी संमृशति मयि महो मयि भगो मयि भगो मयि यज्ञ इत्यप उपस्पृश्य मय्यिन्द्रियं वीर्यमित्युरः प्रत्यात्मानं प्रत्यभिमृशते[1] ऽथास्मा अन्यदाहारयति[1] तत्प्रतिगृह्णात्या[5] म[5] अगादृचसा[5] यज्ञसा सꣳसृज पयसा तेजसा च तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति ब्राह्मणः[1] प्रियं पशूनां कुर्वधिपतिं प्रजानामिति राजन्यस्तदुपस्पृश्य प्राक् सेक्तवा[6] इत्याह[1]

---

१ Thus E; स उपस्थाय M; Ma HB, Ed om the first præpos

२ Thus Ma E, Ed., ०स्थायैव यत्र MBH.

३ अथेतरतूष्णी० E; अथेतरंतूष्णी० M

४ My conjecture; ०त्यवनेक्तुः M; E omits this passage.

५ ०त्या मा आगान्च० or आगन्च० MSS.

My conjecture; सक्तवा E Ps, सेक्तवा M.

मधुपर्कं प्रोक्तमभिमन्त्रयते स मावतु स मा पातु स मा जुषतामित्युभाभ्यां हस्ताभ्यां प्रतिगृह्णाति ॥ ४३ ॥

आ[1] म अगाद्वर्चसा यशसा सꣳसृज पयसा तेजसा च तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति ब्राह्मणः । प्रियं पशूनां कुर्वधिपतिं प्रजानामिति राजन्यस्तस्मिꣳश्चित्किंचिदापति-तꣳ[2] स्यात्तदङ्गुष्ठेन च महानाम्न्या चोपसंगृह्येमां दिशं निरस्यति नेष्टाविद्धं क्रन्तामि या ते घोरा तनूस्तया तमाविश यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्य ससुदायुत्य चिः प्राश्नाति प्राण[3] इदं[3] ते बलिꣳ हरामि श्रेष्ठं माधिपतिं कुर्विति । सोमो ऽसि सोमपं मा कुर्विति द्वितीयमन्नमस्यन्नादं मा कुर्विति तृतीयं । चिः पीलोच्छिष्टं ददाति[4] । यमात्मनः श्रेयाꣳसमिच्छेत्तस्मै शेषं दद्यादुपनीतां[5] गामनुमन्त्रयते[5] जहि मे पाप्मानमुपनेतुश्चेति[6] । तां कुर्वन्ति वोत्सृजन्ति वा । स यदि करिष्यन्भवति कुरुतेत्याहाथ यद्युत्सृक्ष्यन्भवति तामनुमन्त्रयते गौर्धेनुभव्या मातॄणां रुद्राणां दुहिता वसूनाꣳ स्वसादित्यानाम-मृतस्य नाभिः । प्र णु वोचं चिकितुषे जनाय मा गामनागाम-

१ The mantras are abbreviated in the MSS

२ °तस्मिꣳश्चित्किं° MSS

३ प्राणा MSS, probably read प्राणेदं ।

४ om. M.

५ Thus E; °दुपवीतांगोग्राम° M

६ °मुपवेतुश्चेति MSS.

दितिं वधिष्ट ॥ पिबतूदकं तृणान्यत्त्वोमुत्सृजतेत्यथास्मा ओदन-
माहारयति । तमश्नाति ब्रह्म त्वाश्नातु ब्रह्म त्वाश्नाविति ।
तच्चतुष्टयो ऽर्थो दधि मधु घृतमाप इति । पञ्चतय इत्येके
दधि पयो मधु घृतमाप इति ॥ ४४ ॥ चयोदशः ॥

ब्राह्मणो ह सोमार्थः शुक्लेन पिङ्गाक्षेण मूर्धभिक्तेन[1] ५
विस्रवता पथि समाजगाम । तꣳ होवाच कथा[2] विद्यां
भगवन्नमिति । सोमो राजास्मीति हैनं प्रत्युवाच । तं
मा कदध्वर्युरनैश्वयनविदभ्यसौषीद्यचो[3] मा कदध्वर्युरनैश्वयन-
विदभिषुणोतीत्यमहं[4] तत्र विस्रवाणꣳसावसौ ब्राह्मणो नैश्वय-
नानि वेद । तं गमिष्यामि । स म[5] इमान्वर्णान्मुꣳरोपयि- १०
ष्यतीति[6] । ते यत्रावभृथमवयन्ति[7] तदौदुम्बर्या शाखया
पलाशशाखया वा स्रुवेण वानाज्यलिप्तेन दध्ना पयसा वा
मधुमिश्रेण नैश्वयनैर्हविषोषमभिजुक्षति । यत्ते ग्रावणा चिच्छिदुः
सोम राजन्नित्येतेनानुवाकेनाभिर्गोभिर्यदतो न ऊनमित्येतया

---

१ मूर्धभिक्तेन M Be, मूर्धाभिषिक्तेन the other MSS.

२ Thus M कथं the other MSS.

३ The reading कदध्व० is my conjecture M reads ढदडध्व०, but a horizontal stroke has been put above the ढ, cancelling this akṣara क्रुडध्व० Be 7, क्रुडध्व० the other MSS — ०भ्यसौषीद् my conjecture; ०भ्यौषीद् M, ०भ्यासोषीद् the other MSS.

४ ढडध्व० M; ढडध्व० Be 7, क्रध्वध्व० or क्रुडध्व० the other MSS.

५ om. M.

६ ब्राह्मणान् i. s. o. वर्णान् M; ०रोपयिष्यामीति M.

७ यत्रवावभृथ० M.

भवति। तेन पूर्णमासः सेन्द्रः। ऐन्द्रं दध्यमावास्यायां। तेनामावास्या सेन्द्रेति। केनो खिदनीजानस्य सेन्द्रौ भवत इत्यैन्द्राग्नेन पुरोडाशेनेत्येव ब्रूयादित्यथ वै भवति देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत। ते देवा एतामिष्टिमपश्यन्नाग्नावैष्णवमेकादशकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुं। तां ५ पौर्णमासꣳ सꣳस्थाप्यानुनिरवपन्ततो देवा अभवन्परासुराः। यो भ्रातव्यवान्स्यात्स पौर्णमासꣳ सꣳस्थाप्यैतामिष्टिमनुनिर्वपेत्पौर्णमासेनैव वज्रं भ्रातव्याय प्रहृत्याग्नावैष्णवेन देवतास्वं यज्ञं च भ्रातव्यस्य वृङ्क्त इति ब्राह्मणꣳ। स एष भ्रातव्यवतो यथाकामप्रयोगो[1]। मिथुनान्पशून्त्सारस्वताभ्यां। यावदेवास्यास्ति तत्सर्वं १० वृङ्क्त इति ब्राह्मणमथ वै भवति ॥ ४७ ॥

पौर्णमासीमेव यजेत भ्रातव्यवान्नामावास्यामिति। स[2] पौर्णमासीं पौर्णमासीमेव यजेत भ्रातव्यवान्नामावास्याꣳ। हत्वा भ्रातव्यं नाप्नोत्ययतीति ब्राह्मणं। तदेतत्स्तरणावगधं वापरोध्यावगधं[3] वेत्यथ वै भवति साकंप्रस्थायीयेन यजेत १५ पशुकाम इत्येतयेष्ट्या यज्यमाण उपकल्प्यत औदुम्बरं महत्पात्रं प्रभूतमाज्यमित्यथ देवस्य त्वा सवितुः प्रसव इति[4] प्रतिपदं कृत्वाग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालमैन्द्रꣳ

---

१ यथाकामंप्र० M.

२ om. M.

३ परोर्ध्यावगधं M, omitting वा; वापरोध्यावगंधं all the other MSS.

४ इत्येवमेव M.

सांनाय्यं प्रसिद्धुमाग्नेयेन चरित्वाथेतरयोर्हविषोरौदुम्बरे महति पात्रे समवद्यन्नाहेन्द्रायानुब्रूहीति महेन्द्रायेति वा यदि महेन्द्रयाजी भवति महता पूर्णꣳ होतव्यमित्यात्मान्याय्याव्याहेन्द्रं यजेति महेन्द्रमिति वा यदि महेन्द्रयाजी भवति वषट्कृते सहैव पात्रेण जुहोति दृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति ब्राह्मणमथ वै भवति दार्ष्पात्रेण जुहोति न हि सन्मयमाकृतिमानश्नौदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनवरुन्द्धे इति ब्राह्मणं तदेतदभ्यावगधं[1] वा निर्वेदावगधं[2] वेत्यथ वै भवति ॥ ४८ ॥

नागतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्तेषां महेन्द्रो देवतेति म[3] यो[3] ऽन्य[3] एतेभ्यो महेन्द्रमियच्छेत[4] स संवत्सरमिन्द्रमिष्ट्वाग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति सा प्रसिद्धेष्टिः संतिष्ठते ऽथ यामावास्यागच्छेति तस्यां महेन्द्रं यजते सो ऽत ऊर्ध्वं महेन्द्रयाज्येव भवत्यथ वै भवति संवत्सरमिन्द्रं यजेत संवत्सरꣳ हि व्रतं नाति स्वैवैनं देवतेज्यमाना भूत्या इन्द्रे वसीयान्भवतीति ब्राह्मणमथ वै भवति संवत्सरस्य परस्ताद्ग्नये व्रतपतये

---

१ Thus M, ०ऋभ्यावगतो Be; ०ऋच्चावगतो Be 7 U) ०ऋच्छावगतो B.

२ Thus M Be U, ०गंधं B Be 7 D)

३ M समपान्य i. s o स यो ऽन्य।

४ Thus, ०च्छेत, all.

पुरोडाशमष्टाकपालं निर्वपेत्संवत्सरमेवैनं वृत्रं जघ्निवाꣳसमग्नि-
व्रतपतिव्रतमालभ्यति। ततो ऽधि कामं यजेतेति ब्राह्मणमथ
वै भवति ॥ ४९ ॥

नासोमयाजी संनयेदनागतं वा एतस्य पयो यो ऽसो-
मयाजी। यदसोमयाजी संनयेत्परिमोष एव सो ऽनृतं करो- ५
त्यथो ऽपरैव सिच्यते। सोमयाज्येव संनयेत्पयो वै सोमः पयः
सांनाय्यं। पयसैव पय आत्मन्धत्त इति ब्राह्मणमथ वै भवति
वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य
हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति। त्रेधा तण्डुलान्विभजेद्यै
मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्यै १०
स्थविष्ठास्तानिन्द्राय प्रदात्रे दधꣳश्चरुं। ये ऽणिष्ठास्तान्विष्णवे
गिरिविष्ठाय गृह्णते चरुमिति। तस्या एता भवन्त्यग्ने दा
दाशुषे रयिं दा नो अग्ने प्रदातारꣳ हवामहे प्रदाता वज्री
प्र तत्ते अद्य किमित्ते विष्णो परिचक्ष्यं [1]भूदितीन्द्रवीजान-
स्याथानीजानस्य[2]। व्यापन्नयैव[3] पूर्वया यजते ऽव्यापन्नयोत्त- १५
रया[3]। न द्वे यजेत। यत्पूर्वया संप्रति यजेतोत्तरया क्रुध्यट्
कुर्याद्यदुत्तरया संप्रति यजेत पूर्वया क्रुध्यट् कुर्यान्नेष्टिर्भवति
न यज्ञस्तदनु ह्रीतमुख्यपगल्भो जायत। एकामेव यजेत

---

१ भूदितीन्द्रवीजान० all.

२ Thus MDU Be 7, ०नस्याद्या० Be.

३ Thus M, यजेतव्यापन्नयैवोत्तरया BU, यजेताव्यापन्नयोत्तरया Be, thus also but यजेते D. The avagraha added by me.

प्रगल्भो ऽस्य जायते । ऽनादृत्य तद्वे एव यजेत । यज्ञमुखमेव पूर्वयालभते । यजत उत्तरया । देवता एव पूर्वयावरुन्द्धे इन्द्रियमुत्तरया । देवलोकमेव पूर्वयाभिजयति मनुष्यलोकमुत्तरया । भूयसो यज्ञक्रतूनुपैतीति ब्राह्मणमथ वै भवत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै लोके ऽर्धुकं भवतीति ब्राह्मणमथ वै भवति ॥ ५० ॥

दाक्षायणयज्ञेन सुवर्गकामो यजेत । पूर्णमासे मंनयेन्मैत्रावरुण्यामिक्षयामावास्यायां यजेतेत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते ऽहतं वासो । ऽथ पौर्णमास्या उपवसथे ऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथास्यैतद्धरिन्द्राय वत्सा अपाकृता भवन्त्यैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वाहता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यैन्द्रꣳ सांनाय्यꣳ । सा द्विहविरिष्टिः संतिष्ठते । ऽथैतदैन्द्रꣳ सांनाय्यꣳ समुपहृत्य भक्षयन्त्यथाहतं वासः परिधायापरपक्षं व्रतं चरति । तस्यैतद्व्रतं नानृतं वदति न माꣳसमश्नाति न स्त्रियमुपैति नास्य पल्यूलनेन वासः पल्यूलयन्त्यथ यामावास्यागच्छति[1] तस्या उपवसथे ऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथास्यैतदहर्मैत्रावरुणाभ्यां वत्सा अपाकृता भवन्ति । मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वाहता तूष्णीं वाथ प्रातराग्नेय-

---

१ All the MSS exc. M om. the relative pronoun.

मष्टाकपालं निर्वपति मैत्रावरुणीमामिक्षाꣳ । सा द्विहविरिष्टिः संतिष्ठते । वाजिनस्य काले वाजिनेन चरति । निधत्ते वासो । विसृजते व्रतं । विसृष्टव्रत एतं[१] पूर्वपक्षं भवत्यथ पौर्णमास्या-
गच्छत्युत्सीदति व्रतपतिर्यदेवोर्ध्वं व्रतपतेरेन प्रतिपद्यते । तदेतत्संवत्सरावगधꣳ[२] सोमसꣳस्थम्[३] । ॥ ५१ ॥ ५

अथेडादध इत्याचक्षते । समानं वासस्य व्रतपतेश्च । तथैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यग्नीषोमीयमेकादशकपालमैन्द्रꣳ सांनाय्यꣳ । सा द्विहविरिष्टिः संतिष्ठते । ऽतैतदैन्द्रꣳ सांनाय्यꣳ समुपहृत्य भक्षयन्ति । तथाहृतं वासः परिधायापरपक्षं व्रतं १०
चरत्यागच्छत्यमावास्या । [४]तस्या उपवसथे यजते । तथा मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालं मैत्रा-
वरुणीमामिक्षाꣳ । सा द्विहविरिष्टिः संतिष्ठते[४] । वाजिनस्य काले वाजिनेन चरति । निधत्ते वासो । विसृजते व्रतं । १५
विसृष्टव्रत एतं[५] पूर्वपक्षं भवत्यथ पौर्णमास्यागच्छत्युत्सीदन्ति

---

१ एवं M.

२ Thus M ; ०रावगंधं Be ; ०राधवार्ध्यं Be 7 BDU

३ ०सꣳस्था M.

४...४ Thus M only , the other MSS are partly defective, partly corrupt

५ एवं M

व्रतपतिर्यदेवोर्ध्वं व्रतपतेस्तेन प्रतिपद्यते । तदेतत्संवत्सरावगधꣳ[१] सोमसꣳस्थम्[२] । ॥ ५२ ॥

अथ चतुश्चक्रो भ्राट्व्यवतो यज्ञः । समानं वाससस्त्वैव व्रतपतेश्च । तथैवैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वाव्रता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपति सरस्वत उपाꣳशुयाजमग्नीषोमीयमेकादशकपालमैन्द्रꣳ सांनाय्यꣳ । सा चतुर्हविरिष्टिः संतिष्ठते । नैतदैन्द्रꣳ सांनाय्यꣳ मसुपक्रम्य भक्षयन्ति । तथैवाहतं वासः परिधायापरपक्षं व्रतं चरत्यागच्छत्यमावास्या । नैवोपवसथे यजते । तथैव मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वाव्रता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपति सरस्वत्या उपाꣳशुयाजमैन्द्रमेकादशकपालं मैत्रावरुणीमामिक्षाꣳ । सा चतुर्हविरिष्टिः संतिष्ठते । वाजिनस्य काले वाजिनेन चरति । निधत्ते वासो । विसृजते व्रतं । विसृष्टव्रत एतं[३] पूर्वपक्षं भवत्यथ पौर्णमास्यागच्छत्युत्सीदति व्रतपतिर्यदेवोर्ध्वं व्रतपतेस्तेन प्रतिपद्यते । तदेतत्संवत्सरावगधꣳ[१] सोमसꣳस्थम्[२] । ॥ ५३ ॥

म एष चतुश्चक्रो भ्राट्व्यवतो यज्ञः । स यथा ह वा दृदमनश्चतुश्चक्रं व्यवघ्नानमेत्येवꣳ[४] ह वा एष एतेन यज्ञक्रतु-

---

१ Thus M., °संवत्सरावगंधं Be °संवत्सरावराधं the other MSS

२ °संꣳस्था M

३ एवं M

४ Thus M., व्यवघ्नानं एत्ये° Be BU; व्यवघ्नान एत्ये° Be 7 D.

नेष्ट्वा पाप्मानं भ्रातृव्यं व्यवष्वान एति । स एष वसिष्ठयज्ञः केशियज्ञः सार्वसेनियज्ञो । वसिष्ठो ह यत्र सौदासानभिचचारैवꣳ हैनानभिचचार । केशी ह यत्र खाण्डिकमभिचचारैवꣳ हैनमभिचचार । सार्वसेनिर्ह यत्र भ्रातृव्यानभिचचारैवꣳ हैनानभिचचार । ॥ ५४ ॥ पञ्चदशः ॥ ५

ऋतुमांस्यैः सोमैर्यक्ष्यमाणो भवति । स द्वयान्संभारानुपकल्पयत आग्निष्टोमिकाꣳश्च वैश्वदेवसभाराꣳश्च[1] । स[2] पुरस्तात्फाल्गुन्यै[2] वा चैत्र्यै वा पौर्णमास्या आमावास्येन हविषेष्ट्वा दीक्षते । तस्यापरिमिता[3] दीक्षास्तिस्र उपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यक्ष्ये[4] ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतद्धविर्विश्वेभ्यो देवेभ्यो वत्सा अपाकृता भवन्ति । वैश्वदेवं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विश्रिष्योपवसन्त्यथ प्रातस्तिवृद्बर्हिस्तदेकवदेव[5] स्तृणात्यथाग्नेयं पशुमुपाकरोति । तस्य वैश्वदेव उपाकृतम्भवति । तस्य प्रातःसवनीयानुवर्तन्ते वैश्वदेवहवीꣳषि । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरे- १० १५

---

१ Thus MD Be 7, वैश्वदेविकसंभा॰ Be BU.

२ Thus M, स om. B Be; पुरस्तात् om. B Be 7 DU.

३ Thus M Be 7; तस्या ऽपरि॰ Be BUD.

४ Thus MDU, यज्ञोये the other MSS.

५ भवति Be BU ins. after बर्हिस्।

षाꣳ हविषामꣳजुधा चित्पदग्निष्टोमः संतिष्ठते । पुरस्ताद्धाना-
सोमानां वाजिनेन चरति । समानं कर्मावभृथात्प्रसिद्धो
ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति ।
तस्यै द्यावापृथिव्योपालम्भ्या भवति । तयोः प्रसिद्धं वपाभ्यां
५ चरित्वा पशुपुरोडाशौ निर्वपति । संतिष्ठते यथा द्विपशुः
पशुबन्धस्तथाथ पौर्णमासवैमꣳधाभ्यामिष्ट्वेत्युक्त्वेतदथातश्चतुर्षु
मासेषु ॥ ५५ ॥

वरुणप्रघासाभ्याꣳ सोमाभ्यां यक्ष्यमाणो भवति । दीक्षते ।
तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजान
१० क्रीणाति यथा मन्यते पौर्णमास्यै मे यक्ष्यिये ऽह्नितीयमहः
संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवस-
थादेत्यथास्यैतद्धर्मरुद्भ्यो वत्सा अपाकृता भवन्ति । मारुतं
पयो दोहयति सांनाय्यस्य वाहृता तूष्णीं वाथ वमतीवरीः
परिहृत्य पयाꣳसि विशिष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपा-
१५ करोति । तस्य मारुत उपालम्भ्यो भवति । तस्य प्रातःसवनी-
याननुवर्तन्ते सप्त वरुणप्रघासहवीꣳषि । स यत्र प्रातःसवने
धिष्ण्यान्विहरति तदजस्रं मार्जालीयं करोति । समासन्नेषु
हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये
प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ
२० हविषामꣳजुधा पञ्चदश उक्थ्यः संतिष्ठते । ऽहीनसंततिं करो-

---

१ Thus MDU यक्ष्यिये the other MSS.

त्यथास्यैतद्धर्वरुणाय वत्सा अपाकृता भवन्ति । वारुणं पयो दोहयति सांनाय्यस्य वातृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य वारुण उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तते वारुणी च कायश्च[1] । प्रेषवन्तः सवनीया । अनुब्रूहि यजेतीतरयोर्हविषोच्चैर्जुधा सन्नदग्न उक्थ्यः संतिष्ठते । पुरस्ताद्धानासोमानां वाजिनाभ्यां चरति । समानं कर्मावभृथादूर्ध्वमेतस्मिन्नवभृथ उपाददते वारुणे निष्काम तुषानिति । वारुणस्य वारुण्यामिक्षाध्वदानीया भवत्यूर्जीषेण सह तुषान्संप्रकिरन्ति । प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्या मैत्रावरुणीं वशामुपाकरोति । तस्यै कायोपालम्भ्या[2] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ पौर्णमासवैरूपाभ्यामिष्ट्वेत्युक्त्वा मेतदधातश्चतुर्षु मासेषु ॥ ५६ ॥

साकमेधैः सोमैर्यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यक्ष्ये ऽहन्तृतीयमहः संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति ।

---

१ काया च M.

२ Thus M Be 7, काय उपालंभ्यो or कायोपालंभ्यो the other MSS.

तस्यानीकवत उपाक्षम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तत आनीकवतः । प्रेषवन्तः सवनीया । अनुब्रूहि यजेत्यानीकवतस्य । माध्यंदिनीयाननुवर्तते सांतपनः । प्रेषवन्तः सवनीया । अनुब्रूहि यजेति सांतपनस्यर्जुधेकविरूग्र उक्थ्यः संतिष्ठते । ऽहीनसंततिं करोत्यथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्त्यथ सायं गृहमेधीयेन चरत्यथापरराचे पूर्णदर्व्येण[1] चरत्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य क्रैडिन उपाक्षम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तते क्रैडिनः । प्रेषवन्तः सवनीया । अनुब्रूहि यजेति क्रैडिनस्यर्जुधा चिणव उक्थ्यः संतिष्ठते । ऽहीनसंततिं करोत्यथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य प्राजापत्यस्यपर उपाक्षम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते महाहवीꣳषि । प्रेषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषां । तृतीयसवनीयाननुवर्तन्ते महापितृयज्ञहवीꣳषि । स यत्र तृतीयसवने धिष्ण्याञ्चिहरति तदजस्रं मार्जालीयं करोति । समासन्नेषु हविःषु गार्हपत्ये महापितृयज्ञहवीꣳषि अपधित्वा तैर्मार्जालीये प्रचरति । प्रेषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषामृजुधा चैयस्त्रिꣳग्र उक्थ्यः संतिष्ठते । पुरस्ताद्धानामोमानां चैयम्बकैश्चरति । समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ । उदय-

---

१ Thus Be U ॰दर्वेण M Be 7 D.

नीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै वैश्वकर्मणोपाल्लम्भ्या[1] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । तावनुवर्तत आदित्यः । प्रैषवन्तौ पशुपुरोडाशावनुब्रूहि यजेत्यादित्यस्य । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ पौर्णमासवैमृधाभ्यामिष्ट्वेत्युक्तमेतदथातस्तुर्षु मासेषु ॥ ५७ ॥

शुनासीरीयेण सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षास्विष्ट उपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यक्ष्ये ऽहन्मुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्य वसतीवरीः परिहृत्य पयाꣳसि विघ्निष्योपवसन्त्यथास्यैताꣳ रात्रिं वायवे वत्सा अपाकृता भवन्ति । प्रातर्वाय्यं पयो दोहयति सांनाय्यस्य वाहृता तूष्णीं वायाग्नेयं पशुमुपाकरोति । तस्यैन्द्र ऋषभ उपाल्लम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते शुनासीरीयहवीꣳषि । प्रैषवन्तः सवनीयाः । अनुब्रूहि यजेतीतरेषाꣳ हविषाम्जुधा ज्योतिरग्निष्टोमः संतिष्ठते । समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ । उदयनीयेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै[2] सौर्युपाल्लम्भ्या[3] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ

---

१ Thus Be 7 ; ॰कर्मणोपा॰ Be , ॰कर्मण उपाल्लंभ्यो M.

२ तस्यै MU Be ; तस्याः Be 7 D , B om.

३ Thus Be 7 , सौर्योपाल्लंभ्या M , सौर्य उपाल्लंभ्यो Be U.

निर्वपति । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ पौर्णमास-वैमृधाभ्यामिष्ट्वेत्युक्तमेतत् । ॥ ५८ ॥ षोडशः ॥

अथातो ज्योतिरयनमित्याचक्षते । वैश्वदेवेन सोमेन यक्ष्यमाणो भवतीति समानी प्रतिपदेतावदेव नाना । चित्र-दक्षुचाग्निष्टोमो । ज्योतिरिहायातश्चतुर्षु मासेषु वरुणप्रघासेन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्ण-मास्यै मे यक्ष्ये ऽहन्त्सुत्या संपत्स्यत इति । तस्य तथा संप-द्यते । प्रसिद्धेन कर्मणोपवसथादित्यथास्यैतदहर्दया वत्सा अपा-कृता भवन्ति मरुद्भ्यो वरुणायेति । दयं पयो दोहयति सांनाय्यस्य वाचता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य मारुतो वारुण इत्युपालम्भ्यौ भवतस्तस्य प्रातःसवनीया-ननुवर्तन्ते सप्त वरुणप्रघासहवीꣳषि । स यत्र प्रातःसवने धिष्ण्यान्विहरति तदजसं मार्जालीयं करोति । समासकेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषां । माध्यंदिनीयाननुवर्तते[1] वारुणी च कायश्च । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरयोर्हविषोर्ऽजुधा ज्योतिरुक्थ्यः संतिष्ठते । समानमुत्तरं कर्म यथा द्विराचे तथायातश्चतुर्षु मासेषु ॥ ५९ ॥

---

१. Thus MDU, ०वर्तते the other MSS

साकमेधेन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्या-
परिमिता दीक्षाः षडुपसदः । स तथा राजानं क्रीणाति
यथा मन्यते पौर्णमास्यै मे यक्ष्यिये ऽहन्त्सुत्या संपत्स्यत इति ।
तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादित्यथ वसती-
वरीः परिहृत्य पयाꣳसि विघ्निष्योपवसन्त्यथ प्रातराग्नेयं पशु- ५
मुपाकरोति । तस्यानीकवतः क्रौडिनः प्राजापत्यस्यपर इत्युपा-
लम्भ्या भवन्ति । तस्य प्रातःसवनीयाननुवर्तत आनीकवतः ।
प्रैषवन्तः सवनीया । अनुब्रूहि यजेत्यानीकवतस्य । माध्यंदि-
नीयाननुवर्तते सांतपनः । प्रैषवन्तः सवनीया । अनुब्रूहि
यजेति सांतपनस्य । तृतीयसवनीयाननुवर्तन्ते[1] गृहमेधीय- १०
प्रभृतीनि महाहवीꣳषि । स यत्र तृतीयसवने धिष्ण्या-
न्विहरति तदजस्रं मार्जालीयं करोति । महाहविर्भिश्चरित्वा
गार्हपत्ये महापितृयज्ञहवीꣳषि श्रपयित्वा तैर्मार्जालीये प्रच-
रति[2] । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हवि-
षामाज्यस्य ज्योतिरुक्थ्यः संतिष्ठते । समानमुत्तरं कर्म यथा १५
त्रिरात्रे तथा । स उवेव[3] गुनासीरीयः ॥ ६० ॥ सप्तदशः ॥

अथातो महायज्ञ[4] इत्याचक्षते । ज्योतिरतिरात्र इत्येक
आहुर्दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा

---

१ Thus MD; °वर्तते the other MSS.

२ °रंति Be Be 7 DU.

३ Thus M; उंदोन Be 7; उक्थ्येन Be BDU.

४ Thus M Be BU Keś; महापितृयज्ञ Be 7 D.

राजानं क्रीणाति यथा मन्यते पौर्णयास्ये मे यज्ञिये ऽहन्त्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतदहस्त्वया वत्सा अपाकृता भवन्ति विश्वेभ्यो देवेभ्यो मरुद्भ्यो वरुणायेति । चयं पयो दोहयति सांनाय्यस्य वाहृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विग्रिष्योपवसन्नथ [1]प्रातस्त्विट्टहर्हिस्तूदेकवदेव[2] स्तृणात्यथाग्नेयं पशुमुपाकरोति । तस्य वैश्वदेवो मारुतो वारुण आनीकवतः क्रैडिनः प्राजापत्यस्तूपर ऐन्द्र ऋषभ इत्युपालम्भ्या भवन्ति । तस्य प्रातःसवनीयाननुवर्तन्ते वैश्वदेवहवीꣳषि । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषां । माध्यंदिनीयाननुवर्तन्ते सर्वाणि वरुणप्रघासहवीꣳषि ॥ ६१ ॥

स यत्र माध्यंदिनीये सवने धिष्ण्यान्विहरति तदजस्रं मार्जालीयं करोति । समासन्नेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषां । तृतीयसवनीयाननुवर्तन्त आनीकवतप्रभृतीनि महाहवीꣳषि । स यत्र तृतीयसवने धिष्ण्यान्विहरति तदजस्रं मार्जालीयं करोति ।

---

१ Between प्रातस् and त्विट्टह् Be 7 has the following words: (प्रात)-राग्नेयं पशुमुपाकरोति तस्यानीकवतः क्रैडिनः प्राजापत्यस्तूपर इत्युपालंभ्या भवंति तस्य प्रातःसवनीयाननुवर्तंत आनीकवतः प्रैषवंतः सवनीया अनुब्रूहि यजेत्यानीकवत-( स्त्विट्टह् )।

२ Thus ( एकवदेव ) M Be 7  एकधैव Be U ; एकवैव B, D om.

महाहविर्भिश्चरित्वा गार्हपत्ये महापितृयज्ञहवींष्यपचित्वा तैर्माजालीये प्रचरति । प्रेषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषाम्जुधा ज्योतिरतिरात्रः संतिष्ठते । पुरस्ताद्धानासोमानां वाजिनैश्चरित्वा चैयम्बकैश्चरति[१] । समानं कर्मावभृथादूर्ध्वं तस्मिन्नवभृथ उपाददते वारुणे निष्कासं तुषानिति । वारुणस्य वारुणाभिघाध्यवदानीया भवत्यूर्जोषेण सह तुषान्त्संप्रकिरन्ति[२] । प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै द्यावापृथिव्या काया वैश्वकर्मणी सौरीत्युपालम्भ्या भवन्ति । तासां प्रसिद्धं वपाभिश्चरित्वा पशुपुरोडाशानिर्वपति । तानलुवर्तन्न आदित्यप्रभृतीनि पशुनासौरीयहवींष्यि । प्रेषवन्तः पशुपुरोडाशा । अनुब्रूहि यजेतीतरेषाꣳ हविषाꣳ । संतिष्ठते यथा पञ्चपशुः पशुबन्धस्तथाथ पौर्णमासवैमृधाभ्यामिष्ट्वा यजमानायतन उपविश्य चेष्ट्वा श्लक्ष्ण्या लोहितायसस्य च क्षुरेण शीर्षन्नि च वर्तयते परि च वपते पुरस्तादेवाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽथोपरिष्टात्संतिष्ठन्ते चातुर्मास्याः सोमाः संतिष्ठन्ते चातुर्मास्याः सोमाः । ॥ ६२ ॥ अष्टादशः ॥

॥ इति सप्तदशः प्रश्नः[३] ॥

---

१ °वकै° MSS.

२ °किरति M.

३ अथ ( r. इति ) बौधायन उत्तरतन्त्रे प्रथमः प्रश्नः U.

बृहस्पतिसवेन यक्ष्यमाणो भवति । स उपकल्पयते ऽश्व-
चतुस्त्रिꣳशा दक्षिणाः कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ
पर्णमयं पात्रमाज्यमभिषेचनार्थाय वै ब्राह्मणं भवति परिस्रजो
होता भवत्यरुणो मिर्मिरस्त्रिशुक्र इत्येष ह वै परिस्रजो यः
५ स्खलतिः परिकेश्यो[१] । ऽथ[१] हैष मिर्मिरो यः शुक्लो विक्लिध-
स्त्रिलकवान्यिङ्गाचो[२] । ऽथ हैष त्रिशुक्रो यस्त्रिवेदो[३] । दीक्षते ।
तस्यैकराचीणस्य सोमं क्रीणन्ति । तिस्र उपसदस्तायते
त्रिवृदग्निष्टोमो रथंतरसामा प्रवर्ग्यवाग्गायत्रीछ्वेक स्तोमः ।
प्रज्ञातं देवसुवाꣳ हविषां करणं । तस्य बार्हस्पत्यो[४] ऽतिग्राह्यो[४] ।
१० बार्हस्पत्यः पशुरुपालम्भ्यः । समानमाभिषेकस्य कालादभिषेकस्य
काले यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोप-
स्तृणाति । तद्यजमानं प्राङ्मुखमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां
पर्युप्यास्य पर्णमये पात्र आज्यमानीयाभिषिञ्चति बृहस्पतिः
प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् । सप्तास्यस्तु-
१५ विजातो रवेण वि सप्तरश्मिरधमत्तमाꣳसि ॥ देवस्य त्वा
सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो
यन्तुर्यन्त्रेण बृहस्पतिसवेनाभिषिञ्चामीति । समुन्मृष्टे समुत्को-
ग्रन्तीति[५] समानमा मुखस्य विमार्जनात् ॥ १ ॥

---

१ Thus MB Be, परिकेश्यय the other MSS

२ Thus D, तिलकावा॰ M Be 7 U, तीलकवा॰ Be, तीलकावा॰ B.

३ Thus M, त्रिवेदो the other MSS

४ Thus M Be 7 D, ॰पत्यस्यातिग्रा॰ Be BU.

५ M reads समुत्क्रोशंत्यभ्यषेचनायमसो + बृहस्पतिसवेनेति ।

तस्य प्रातःसवने सन्नेषु नाराग्नꣳसेष्वेकादश दक्षिणा नीयन्त । एकादश माध्यंदिने सवने सन्नेषु नाराग्नꣳसेष्वेषु-द्वादशास्तृतीयसवने सन्नेषु नाराग्नꣳसेषु । माध्यंदिन एव सवने ऽश्वं दद्यादिति ह स्माह मौद्गल्यः । स वा एष[1] नैमार्जनो[1] यज्ञः । स यथा ह वा इयं गैरेयी[2] नदी[2] निम्नजत्येवꣳ[3] ह वा एष एतेन यज्ञक्रतुनेष्ट्वा पाप्मानं भ्रातृव्यं निम्नजन्नेति[4] । स एतस्मिन्नेव पूर्वपक्षे चतुष्टोमेनाग्निष्टोमेन यजेत पुरा भेषाच्छान्त्यै । राजा राजसूयेनेजान इच्छति बृहस्पतिसवेनाभिषिच्येयेति[5] । तदु वा आहुर्न वै राजसूयाभिषिक्तो ऽन्येन यज्ञक्रतुनाभिषि-च्येताप्रत्यवरोही ह[6] भवतीत्युभाभ्यां ब्रह्मचत्राभ्यामभिषिच्या[7] १० इत्यभिषिच्येतैवेति[7] । दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः । समानमाभिषेकस्य कालादभिषेकस्य काले माध्यंदि-नीया एवैनं चमसा निम्नजन्तो यन्ति । चतुर्विꣳश एष भवति ।

---

१ Thus M Be 7 D ; एषसवनैमार्जनो BU , एष सर्वाभिनिर्मार्जनो Be.

२ Thus M ; गौरेयो the other MSS. ( U गौरेयोर् ) ।

३ नदी निम्नजंत्येवꣳ M ; नदीनिर्म्नज्येत्येवꣳ B ; नदीर्निर्म्नज्यनेत्येवꣳ Be 7 D , नदीर्निर्म्नज्यंत्येवं U ; नदीं तीत्वा पांसून्निर्म्नजंत्येवꣳ Be. Read perhaps: नदी निम्नजन्त्येत्येवꣳ *i.e.* निम्नजन्ती एति, *cp. infra* निम्नजन्नेति ।

४ निम्नज्यन्नेति Be 7.

५ Thus MD Be 7 , ०भिषिच्येति Be U ; ०भिषिच्चेति B.

६ om. M.

७ Thus M only ; ०भिषिच्यात इत्यभिषिच्येतैवेति U Be 7 D , ०भिषिच्यात इत्यभिषिच्येवेति B ; ०भिषिच्याभिषिच्येतैवेति Be.

राजा राजसूयेन यक्ष्यमाण आध्यायति[1] त्रिषु वर्णेष्वभिषिक्तेष्वथाभिषिच्येय[2] पुरोहिते स्थपतौ सूत इति। पुरोहितो दीक्षते। तस्य तिस्रो दीक्षास्तिस्र उपसदः। समानमाभिषेकस्य कालादभिषेकस्य काले शुक्रामन्थिनोः सꣳस्रावेणाभिषिञ्चति। चतुष्टोम एष भवति॥ २॥

स्थपति[3] स्थपतिसवेन यक्ष्यमाणो भवति स उपकल्पयत आर्षभं चर्म सुवर्णरजतौ च रुक्मौदुम्बरं पात्रं दध्यभिषेचनाय। दीक्षते। तस्य तिस्रो दीक्षास्तिस्र उपसदः। आग्नेयस्य मारुती पृश्निः पष्ठौह्युपाल्लभ्या भवति। सप्त ह्वीꣳषि प्रातःसवनीयाननुवर्तन्ते यदाग्नेयो भवत्यग्निमुखाद्धि देवा इत्येतानि। समानमाभिषेकस्य कालादभिषेकस्य काले यजमानायतन आर्षभं चर्म प्राचीनग्रीवमुत्तरलोमोपस्तृणाति। तद्यजमानं प्राङ्मुखमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्यौदुम्बरे पात्रे दध्यानीयाभिषिञ्चति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण स्थपतिसवेनाभिषिञ्चामीति। समुन्मृष्टे समुत्क्लोशन्तीति समानमा मुखस्य विमार्जनात्। एष स्थपतिसवः सप्तदशो ऽग्निष्टोम। एष एव स्थपतिसव। एष वैश्यसव[4]। एष मासस्वो। मासा ह्येनेनातः[5] पूर्वमोजिरे॥ ३॥

---

१ °ध्यायतीति M. २ Thus MD Be 7; °षिच्येषु Be BU.

३ om. Be BU. ४ वैश्यस्य सव Be 7.

५ i. e. ततः Be 7 चच. D ऋचं।

सूतः[१] सूतसवेन यज्ञमाणो भवति स उपकल्पयते कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रꣳ हिरण्यं घृतमभिषेचनाय ' दीक्षते ' तस्य तिस्रो दीक्षास्तिस्र उपसदो ' ऽष्टौ हवीꣳषि प्रातःसवनीयानन्वर्तन्ते यदाग्नेयो भवत्याग्नेयो वै ब्राह्मण इत्येतानि ' समानमाभिषेकस्य ५
कालादभिषेकस्य काले यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति ' तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युप्य पर्णमये पात्रे घृतमानीय हिरण्येनोत्पूयाभिषिञ्चति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण सूतस- १०
वेनाभिषिञ्चामीति ' समुन्मृष्टे समुत्क्रोशन्नीति समानमा मुखस्य विमार्जनात्स एष सूतसवः सन्नदग्नो ऽग्निष्टोम ' एष एव सूतसव ' एष ग्रामणीसव[२] ' एष ऋतुसव ' ऋतवो ह्येनेनातः पूर्वमीजिरे ' ॥ ४ ॥ प्रथमः ॥

सोमसवेन यज्ञमाणो भवति स उपकल्पयते सौमीꣳ १५
सूतवत्सां कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रं पयो ऽभिषेचनायाथ वै ब्राह्मणं भवति यत्किंच राजसूयमृते सोमं तत्सर्वं भवतीति ' स ग्रामावास्येन हविषेष्ट्वाष्टावहान्यानुमतप्रभृतिभिरेति संवत्सरं चातुर्मास्यैः सप्तेन्द्रतुरीयप्रभृतिभिरथ रश्मिनाꣳ हविर्भिर्यजते ' ऽथ देवसुवाꣳ हविर्भिर्यजते ' २०

---

१ om. M.

२ ग्रामणि॰ M Be.

ऽथैताꣳ सौमीꣳ सूतवग्रामालभते[१] । तस्या असमुदिते यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युप्यास्य पर्णमये पात्रे पय आनीयाभिषिञ्चत्यषाढं[२] युत्सु पृतनासु पप्रिꣳ सुवर्षामप्सां वृजनस्य गोपाम् । भरेषुजाꣳ सुक्षितिꣳ सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण सोमसवेनाभिषिञ्चामीति । समुन्मृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनादथ सꣳसृपाꣳ हविर्भिर्यजते । ऽथ पञ्चहविषा द्विग्रामवेद्या यजते । ऽथ द्विपशुना पशुबन्धेन यजते । ऽथ सात्यदूतानाꣳ हविर्भिर्यजते । ऽथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजते । ऽथ पौर्णमासवैष्णवाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते । ऽथ दैविकाहविर्भिर्यजते । ऽथ त्रैधातवीयया यजते । ऽथ सौत्रामण्या यजते । संतिष्ठते सोमसवो ऽर्धचतुर्दशैर्मासैः[३] ॥ ५ ॥

पृथिसवेन[४] यज्यमाणो भवति स उपकल्पयते रोहितं चर्मानड्वहꣳ सुवर्णरजतौ च रुक्मावौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरापो दिग्भ्यः संभृता[५] । अथ वै ब्राह्मणं भवति

---

१ ॰भवे MD Be UB ; ॰भेत Be 7.

२ The mantra is abbreviated in all the MSS.

३ पृथिवि॰ M, पृथिवी Be every time in this kh.

४ Thus M Be , समाभृता the other MSS

यत्किंच राजसूयमनुत्तरवेदीकं तत्सर्वं भवतीति । स आमावास्येन हविषेष्ट्वावहान्यानुमतप्रभृतिभिरेति सप्तेन्द्रतुरीयप्रभृतिभिरथ रात्रिनाꣳ हविर्भिर्यजते । ऽथ देवसुवाꣳ हविर्भिर्यजते । ऽथैतां चतुर्हविषमिष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुमिति । तस्या[1] असमुदिते[2] यजमानायतने रोहितं चर्मानड्वाहं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राङ्मुपवेश्य सुवर्णरजताभ्याꣳ स्रुक्ताभ्यां पर्युपास्योदुम्बरे द्रोणे चतुष्टयीरपः समवनीयाभिषिञ्चति[3] ये मे पञ्चाग्नयं ददुरश्वानाꣳ सधस्तुतिः । द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणाम् ॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण पृथिव्यै नाभिषिञ्चामीति । समुन्मृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनाद्[4] अथ सꣳसृपाꣳ हविर्भिर्यजते । ऽथ पञ्चहविषा दिग्रामवेष्ट्या यजते । ऽथोपावीत्य द्विपशुं पशुबन्धꣳ सात्यदूतानाꣳ हविर्भिर्यजते । ऽथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजते । ऽथ पौर्णमासवैष्टधाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते । ऽथ दैविकाहविर्भिर्यजते । ऽथ दैधातवीयया यजते । ऽथ सौत्रामण्या यजते । संतिष्ठते पृथिव्यो ऽर्धेन[5] मासेन[5] ॥ ६ ॥

---

१ Thus M Be 7 DUB; तस्यासमु॰ Be.

२ Thus Be 7 DU; समानीय M Be B, but cp. XII. 8 (p. 98, 5).

३ Thus M, धर्ष, र्धै, मासेन the other MSS.

गोसवेन यज्यमाणो भवति स उपकल्पयते ऽयुतं दक्षिणाः सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रं प्रतिधुगभिषेचनाय[१] । दीक्षते । तस्य षड् दीक्षाः षडुपसदः । समानमाभिषेकस्य कालादभिषेकस्य काले यजमानायतने कृष्णाजिनमात्रं वेदेरनुद्धृतं भवति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्यां रुक्माभ्यां पर्युपास्य पर्णमये पात्रे प्रतिधुगानीय[२] बृहत स्तोत्रं प्रत्यभिषिञ्चति रेवच्छातः सहसा वृद्धः क्षत्राणां क्षत्रभृत्तमो वयोधाः। महान्महिम्ने तस्तभानः क्षत्रे राष्ट्रे च जागृहि। प्रजापतेस्त्वा परमेष्ठिनः स्वाराज्येनाभिषिञ्चामि ॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्यै वाचो यन्तुर्यन्त्रेण गोसवेनाभिषिञ्चामीति । समुन्मृष्टे समुत्क्रोशन्नीति समानमा मुखस्य विमार्जनात् । एष गोसवः षट्त्रिंशद्गवः सर्व उक्थ्य उभयसामायुतदक्षिणः[३] । पवमाने कण्वरथंतरं कुर्वन्ति[४] ॥ ७ ॥ द्वितीयः ॥

ओदनसवेन यज्यमाणो भवति स उपकल्पयते रोहितं चर्मानड्वहं सुवर्णरजतौ च रुक्मौ व्रतमानं च प्रवर्तं चतुरो वर्णान्ब्राह्मणं राजन्यं वैश्यं शूद्रं चतुरो रसान्मधु सुरां

---

१ Thus M Be 7 D, प्रतियुग० the other MSS.

२ Thus M; प्रतिधुषमानीय all the other MSS., but cp. Maitr. S. II. 2 7, where the word is also used as a neuter (sc. पयः).

३ Thus Be 7 D; ०सामायुतंदक्षिणाः M; ०सामाप्युतदक्षिणः the other MSS.

४ Thus M, भवति the other MSS.

पय अपश्चत्वारि[१] पात्राणि सौवर्णꣳ राजतं काꣳस्यं मृन्मयं चतस्रो दक्षिणाः घृतमानꣳ हिरण्यं तिस्रो धन्वमष्टां माषैः पूर्णं कमण्डलुं चतुष्टयीः शलाकाः पर्णमय्यौ नैयग्रोध्यावाश्वत्थ्यौ फाल्गुनपाच्यौ[२] चत्वारि नानादृच्याणि पात्राणि सक्तूꣳस्त्रीणि दर्भपुञ्जीलान्यौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरपो दिग्भ्यः ५
संभृताः घृतं[३] च[३] रथं चैतेनोपक्लृप्तेन रोहिणीमायतीमुपरमत्यै[४] रोहिण्येति पूर्वाग्निमन्ववस्तृत्युत्तपनीयꣳ[५] शालीनो ऽन्वाहार्यपचनमाहिताग्निर्याध्वर्युरपरार्च आहृत्य सꣳस्थाप्यौदनꣳ[६] अपयतेति तं तथा अपयन्ति यथा पुरादित्योद्याच्छृतो[७] भवत्युद्यता सूर्येण कार्य इति ब्राह्मणमधौतमोदनꣳ अपयित्वाभिघार्योदञ्चमुदासयत्यधैतां पात्रीं निर्णिज्योपस्तीर्य तस्यामेनमसंन्नन्निवोद्धरति सर्पिरासेचनं कृत्वा प्रभूतमाज्यमानीयाधैताꣳश्चतुरो वर्णान्दक्षिणत उदङ्मुखानुपवेशयत्यधान्वारब्धे यजमाने जुहोति सिꣳहे व्याघ्र उत या १० १५

---

१ आप० all.

२ Thus M; फाल्गुनपाच्यौ Be B; फाल्गुनपाचौ DU; फाल्गुन्यौ पाचीं Be.

३ Uncertain, घृतं च M; सतं च Be 7 D; हृतं च BU; सितं (omitting च) Be.

४ Read perhaps चत्य i.s.o. चथ, cp. XIII. 36 (p. 145, 3), XV. 2 (p. 205, 10) and XVIII. 16.

५ °न्ववस्तृत्यु° M Be 7, °न्वस्तृत्यु° Be BUD.

६ Thus Be BU; एकौदनꣳ M, ओदनं Be BU.

७ Thus M Be 7 D; पुरस्तादादित्य° Be BU.

पृदाकाविति॰ चतस्रः स्रुवाङ्गतीर्ऊर्ध्वाङ्गलैव सꣳस्रावैः प्रवर्तमभिघारयति राडसि विराडसि सम्राडसि स्वराडसीत्यथैतं[१] प्रवर्तमग्नेणाहवनीयं[२] पर्याहृत्य दक्षिणतो निदधाति ॥ ८ ॥

अथैतत्सौवर्णं पात्रं याचति । तस्मिꣳस्त्रिरः पवित्रं मध्वानीय सकूनोप्य पर्णमयीभ्याꣳ शलाकाभ्यामुपमन्थतीन्द्राय त्वा तेजस्वते तेजस्वन्तꣳ श्रीणामीति । तेजो ऽसीति ब्राह्मणाय प्रयच्छति । तत्ते प्रयच्छामीति ब्राह्मणः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्टे तेजस्वदस्तु मे मुखं तेजस्विरो अस्तु मे । तेजस्वान्त्स्वितः प्रत्यङ् तेजसा संपिपृग्धि मेति । चिराचम्य प्रयꣳसति । तस्मा एतत्त्रैव पात्रं ददाति यतमानं च हिरण्मयैतद्राजतं पात्रं याचति । तस्मिꣳस्त्रिरः पवित्रꣳ सुरामानीय सकूनोप्य नैयग्रोधीभ्याꣳ शलाकाभ्यामुपमन्थतीन्द्राय त्वौजस्वत ओजस्वन्तꣳ श्रीणामीत्योजो ऽसीति राजन्याय प्रयच्छति । तत्ते प्रयच्छामीति राजन्यः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्ट ओजस्वदस्तु मे मुखमोजस्विरो अस्तु मे । ओजस्वान्त्स्वितः प्रत्यङोजसा संपिपृग्धि मेति । चिराचम्य प्रयꣳसति । तस्मा एतत्त्रैव पात्रं ददाति तिसृधन्वं चाथैतत्काꣳसं पात्रं याचति । तस्मिꣳस्त्रिरः पवित्रं पय आनीय सकूनोप्याश्वत्थीभ्याꣳ शलाकाभ्यामुपमन्थतीन्द्राय त्वा पयस्वते पयस्वन्तꣳ श्रीणामीति । पयो ऽसीति वैश्याय

---

१ ॰त्रैनं all exc. M.

२ ॰ग्नेणाग्निं M.

प्रयच्छति । तत्ते प्रयच्छामीति वैश्यः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्टे पयस्वदस्तु मे मुखं पयस्वच्छिरो अस्तु मे। पयस्वान्त्स्वितः प्रत्यङ् पयसा संपिपृग्धि मेति । चिराचम्य प्रग्रृह्णति । तस्मा एतच्चैव पात्रं ददात्यष्टां चाथैतन्मृन्मयं पात्रं याचति । तस्मिन्त्स्रिरः पवित्रमप आनीय सक्तू- ५
नोप्य फाल्गुनपात्रीभ्याम्[1] ग्रस्ताकाभ्यामुपमन्थतीन्द्राय त्वायुष्मत आयुष्मन्तम् श्रीणामीत्यायुरसीति शूद्राय प्रयच्छति । तत्ते प्रयच्छामीति शूद्रः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्ट आयुष्मदस्तु मे मुखमायुष्मच्छिरो अस्तु मे। आयुष्मान्त्स्वितः प्रत्यङ्ङायुषा संपिपृग्धि मेति । चिराचम्य प्रग्रृह्णति । तस्मा १०
एतच्चैव पात्रं ददाति माषैश्च पूर्णं कमण्डलुमथैतमोदनमभ्युत्पृष्य प्राश्नाति । तस्य यन्न सहते तदप्सु प्रवेशयत्यथ हिरण्याहृतं निष्पिबति । निष्पिबन्तमनुमन्त्रयत दूममग्र आयुषे वर्चसे कृधि प्रियम् रेतो वरुण सोम राजन्। मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासदित्यथैतं प्रवर्त- १५
मङ्गिः प्रक्षाल्य दक्षिणे कर्ण आबध्नीत आयुष्टे विश्वतो दधदित्यथैनमनुपरिवर्तयत[2] आयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसीत्यथैनं त्रिभिर्दर्भपुञ्जीलैः पवयति यतो वातो मनोजवा यतः चरन्ति सिन्धवः। तासां त्वा सर्वासाम्

---

१ फल्गुनपत्रिभ्यां M; फाल्गुनपात्रीभ्याम् Be 7 BUD; फल्गुनीभ्याम् Be.

२ Thus M; एतं i.s.o. एनं the other MSS.

रुचाभिषिञ्चामि वर्चसेत्यास्य दक्षिणमञ्चिकटं[1] न्यञ्चति[1] समुद्रं द्वासि गच्छना सोम द्वास्यदाभ्यः। अग्निरिव विश्वतः प्रत्यङ् सूर्य इव ज्योतिषा विभूरिति ॥ ९ ॥

यावदेवाचाध्वर्युस्त्रेष्टति तावदेष प्रतिप्रस्थातौदुम्बरे द्रोणे चतुष्टयीरपः समवनीय चतुरो ग्रहान्गृह्णात्यपां यो द्रवणे रसस्तमहमस्मा आमुष्यायणाय तेजसे ब्रह्मवर्चसाय गृह्णामीति पर्णमयेनापां य ऊर्मौ रसस्तमहमस्मा आमुष्यायणायौजसे वीर्याय गृह्णामीति नैयग्रोधेनापां यो मध्यतो रसस्तमहमस्मा आमुष्यायणाय पुष्ट्यै प्रजननाय गृह्णामीत्याश्वत्थेनापां यो यज्ञियो रसस्तमहमस्मा आमुष्यायणायायुषे दीर्घायुत्वाय गृह्णामीत्यौदुम्बरेणाथैतद्रोहितं चर्मानडुहं[2] प्राचीनग्रीवमुत्तरलोमोपस्तृणाति[1] तद्यजमानं प्राङ्मुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्याभिषिञ्चत्यपां यो द्रवणे रसस्तेनाहमिममामुष्यायणं तेजसे[3] ब्रह्मवर्चसायाभिषिञ्चामीति पर्णमयेनापां य ऊर्मौ रसस्तेनाहमिममामुष्यायणमोजसे वीर्यायाभिषिञ्चामीति नैयग्रोधेनापां यो मध्यतो रसस्तेनाहमिममामुष्यायणं पुष्ट्यै प्रजननायाभिषिञ्चामीत्याश्वत्थेनापां यो

---

१ Thus Be: दक्षिणमञ्चिकटन्यञ्चति M. दक्षिणे ऽञ्चिकटे न्यञ्चति BU. दक्षिणे ऽञ्चिकोटं न्यञ्चति Be 7 D.

२ All MSS. exc. M ins जघनेनाग्निं।

३ In Be here and infra all the Datives (°वर्चसाय, ओजसे, वीर्याय

यज्ञियो रसस्तेनाहमिममास्यायणमायुषे दीर्घायुत्वायाभिषिञ्चामीत्यौदुम्बरेण समुन्मृष्टे समुत्क्रोशन्तीति समानमासुखस्य विमार्जनादुत्तरत एतद्रूपायितꣳ शतं[1] तिष्ठति रथस्य[1] तदभिप्रैत्यभिप्रेहि वीरयस्वोग्रश्चेत्ता सपत्नहा। आतिष्ठ मित्रवर्धनस्तुभ्यं देवा अधिब्रवन्नित्यथ रथस्य पक्षसी संगृह्णात्यङ्कौ न्यङ्कावभितो रथं यावितिं रथमातिष्ठत्यातिष्ठ वृत्रहन्निति प्रतिपद्यायं पृणक्तु रजसो उपस्थमित्यातो ऽथैतच्छतं[2] त्रिः प्रदक्षिणं परियाय[3] पुरस्कृत्यायाति तदध्वर्यवे ददाति स एष श्रोदनसवो राज्ञो वा ब्राह्मणस्य वा वैश्यस्य वा पुष्टिकामस्य यज्ञः ॥ १० ॥ तृतीयः ॥ १०

पञ्चशारदीयेन यक्ष्यमाणो भवति स उपकल्पयते सप्तदश निरष्टान्वत्सतरानेकहायनान्त्सं पुरस्तान्मार्गशीर्ष्यै[4] पौर्णमास्या श्रामावास्येन हविषेष्ट्वा सप्तदश मारुतीः पृश्नीर्वत्सतरीरालभते ऽभिप्रोक्षणतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथेतराभिः सꣳस्थां कुर्वन्ति संवत्सरे पर्यवेते मरुद्भ्यः सांतपनेभ्यः सप्तदश पृषतीर्वत्सतरीरालभते ऽभिप्रोक्षणतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथेतराभिरेव सꣳस्थां कुर्वन्ति द्वितीये संवत्सरे १५

---

१ Uncertain again, cp. p. 350, 6.; सतं तिः रथं च M; ह्वतं तिः रथं च Be 7 D; ह्वतं तिः रथस् (omitting च) UB; खितस्तिः रथम् Be.

२ Thus M sec. m., °तंह्वितं pr. m.; °तह्वं Be 7 BDU, °तद्रथं Be.

३ पर्याय M; परियाय B; परीयाय the other MSS.

४ Thus M Be; °ग्रीर्ष्याः Be 7; °ग्रीर्ष्यः DU; °ग्रीर्ष्यं B.

पर्यवेते मरुद्भ्यो गृहमेधिभ्यः सप्तदश कल्माषीर्वत्सतरीरा-
लभते । ऽभिप्रोच्णतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथेतराभिरेव
सꣳस्थां कुर्वन्ति । तृतीये संवत्सरे पर्यवेते मरुद्भ्यः क्रीडिभ्यः
सप्तदशावलिप्ता वत्सतरीरालभते । ऽभिप्रोच्णतो वत्सतरा-
न्स्थापयित्वोत्सृजन्त्यथेतराभिरेव सꣳस्थां कुर्वन्ति । चतुर्थे
संवत्सरे पर्यवेते मरुद्भ्यः खतवद्भ्यः सप्तदश राजीवा[1] वत्स-
तरीरालभते[1] । ऽभिप्रोच्णतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथे-
तराभिरेव सꣳस्थां कुर्वन्त्येतदेवाहर्दीक्षते । संवत्सरमुखं[2]
बिभर्ति । द्वादशोपसदस्तस्याहानि चितृदग्निष्टोमः पञ्चदश
उक्थ्याः सप्तदश उक्थ्याः पञ्चदश उक्थ्याः सप्तदशो ऽतिरात्र-
स्तस्य मारुत स्तोमो भवत्यथैतेषां पशूनां चयः प्रथमे ऽहन्नैन्द्रा-
मारुता उक्षाणः सवनीया आलभ्यन्ते । एवं द्वितीय एवं तृतीय
एवं चतुर्थे । पञ्चोत्तमे ऽहन्नालभ्यन्ते । वर्षिष्ठमिव ह्येतदह-
र्मन्यन्ते वर्षिष्ठः समानानां भवतीति ब्राह्मणमथैतेषां पशूनां
यदि नश्यति म्रियते वा याज्ञमेधे प्रायश्चित्तिस्तां कृत्वाथान्यं
तद्दैवत्यं[3] तद्वर्णं तद्वयसं तद्रूपं[4] तज्जातीयं[4] पशुमालभन्ते ।
स एष पञ्चशारदीयो राज्ञो वा ब्राह्मणस्य वा । यः कामयेत

---

१ Thus Be 7; राजीवां D; राजीवं U; राजीवत्स० Be; राजीवत्स० B, उक्थ्यो राजीवत्स० M.

२ °मुखां M.

३ तद्देवत्यं MSS.

४ om. M

बहोर्भूयान्त्स्यामिति स एतेन यज्ञक्रतुना यजेत। बहोरेव भूयान्भवति॥ ११॥

अग्निष्टुता यज्यमाणो भवति। तस्य सर्वमेव समानं पुरोरुच एवान्या। अस्याजरासो ऽग्न आयूंषि पवस इत्यैन्द्रवायवस्य। यजा नो मित्रावरुणेति मैत्रावरुणस्याश्विना पिबतं सुतमित्याश्विनस्य। द्वे विरूपे चरतः पूर्वापरं चरतो मायया वितिष्ठेतामिति शुक्रामन्थिनोस्त्रीणि शता चौ षहस्राण्यग्निमित्याग्रयणस्य। नियुनक्त्वन्त्यस्य। नित्या ध्रुवस्याग्निनाग्निः समिध्यत इत्यैन्द्राग्नस्याग्निर्देवानां जठरमिति वैश्वदेवस्याग्निश्रियो यदुक्तम ईडे अग्निं स्ववसमिति तिस्रो मरुत्वतीयानां। शुधि श्रुत्कर्ण वह्निभिरिति माहेन्द्रस्य। विश्वषामदितिर्यज्ञियानां त्वे अग्ने स्वाहुत इति तिस्र आदित्यस्य[1] ग्रहस्य[1]। नि त्वा यज्ञस्य साधनमिति सावित्रस्य। नित्या पात्नीवतस्य। नियुनक्ति हारियोजनस्य। स एष चिट्दग्निष्टुत्यविचं। यथा ह वा इदं[2] दावाद्भिदुना[2] अभिदृष्टाः[2] पुनर्णवा[2] ओषधयो समुत्तिष्ठन्त्येवं ह वा एष एतेन यज्ञक्रतुनेष्ट्वा शुचिः पूतो मेध्यो भवति। स यदि सुखेन पापक्रन्मन्येत चिट्टतं कुर्वीतैष ह वै

---

१ आदित्यग्रहस्य M.

२ My conjecture; इयं दवादभिदुनादभिदृष्टां M; इदमभिदुनादभिदृष्टाः B Be 7 (pr. m.) D (pr. m.) U Be (pr. m.); इयं दावादभिदुग्धीदं Be 7 D in margin; इदं देवा अभिदुनादभिदृष्टाः Be (sec. m.).

३ Thus Be 7 BDU; पुनर्नवा Be M.

मुखेन पापं करोति यो ऽनूचानस्य वा मुनेर्वा दुरवगतमव-
गच्छति । यदि बाहुभ्यां पञ्चदशं कुर्वीतैष ह वै बाहुभ्यां
पापं करोति यो ब्राह्मणायोद्यच्छते । यद्युदरेण सप्तदशं कुर्वी-
तैष ह वा उदरेण पापं करोति यो ऽनाश्यान्नस्यान्नमश्नाति ।
५ यदि पद्भ्यामेकविंशं कुर्वीतैष ह वै पद्भ्यां पापं करोति ॥ १२ ॥

य[1] आरट्टान्वा[2] गान्धारान्वा सौवीरान्वा करस्करान्वा[3]
कलिङ्गान्वा गच्छति । स यदि सर्वत्र एव पापकन्मन्येत चतु-
ष्टोमेनाग्निष्टोमेन यजेत । तेन हैतेनर्तुपर्णो भाङ्गास्विन[4] ईजे[5]
ग्रफालानाम्[6] राजा । तेन हेष्ट्वा मृगयामभिप्रययौ । तꣳ
१० हेन्द्रो ऽनुख्यायैवेचां[7] चक्रे ऽहमु त्वा तद्यातयें[8] यन्मा[9] यज्ञ-
क्रतोरन्तराय[9] इति । स ह खिन्न उदकमभ्यवेयाय[10] । तꣳ
ह तत्रैव स्त्रियं चकार । सा सुदेवला नामास । सा हैतदेव
राष्ट्रमभ्यारुरोह । सा स्त्री सती पुत्रान्जनयां चकार । तेभ्यो
हेन्द्रः समदं दधौ । ते हता विदृढाः शिश्रिरे[11] । तानुभया-

---

१ Thus Be 7 D; योराट्टान्वा M Be; योराट्टान्वा B; योरा न्वा U.

२ गन्धा॰ M.

३ Thus M Be 7 D; कार॰ Be BU.

४ ॰गाश्विनꣳ रंजनीयानाꣳ M

५ ॰त्तां M Be 7 U; ॰त्सां Be B.

६ तद्यजातयेय M.

७ i.s.o. यन्मा यज्ञ॰ Be D · यः संश्रयात्मा यज्ञ॰ ।

८ Thus M Be 7 D; ॰मभ्युपेयाय Be B.

९ Corrected, शि (or क्षि?) त्रिरे M, शिश्रिरे the other MSS

नन्तरेण रुद्रन्यासां चक्रे ' ऽथो हेन्द्र आजगाम ' तामु[१] ह्याभ्युपेयाय[१] ' ताꣳ होवाच सुदेवलाऽ[२] इति[२] ' भगव इति ' प्रियं तवैतदिति[३] ' किं मे भगवः प्रियं भविष्यतीत्येवं वै मम तदप्रियमासीद्यन्मा यज्ञक्रतोरन्तरायो वृणीष्व नु यतरे ते पुत्रा जीवेयुरिति ' यानेव भगव स्त्री सत्यध्वगमिमिति ५ होवाच ' तस्मादाजः स्त्रियाः पुत्राः प्रेयाꣳसो भवन्तीति ' स एतस्मिन्नेव पूर्वपक्षे चतुष्टोमेनाग्निष्टोमेन यजेत पुरा भेषाच्छान्त्यै ' ॥ १३ ॥

इन्द्रस्तुता यच्छ्यमाणो भवति ' तस्य सर्वमेव समानं पुरो-रुच एवान्यास्तिष्ठा हरी कस्य वृषा सुते सचेत्यैन्द्रवायवस्येन्द्रं १० वयं महाधनं इति मैत्रावरुणस्य ' द्विता यो वृत्रहन्तम इत्या-श्विनस्य ' स सूर आजनयज्ज्योतिरिन्द्रमुत त्यदाश्वश्वियमिति शुक्रामन्थिनोर्भरेष्विन्द्रमित्याग्रयणस्य ' नित्योक्थस्य ' नियु-नक्ति[४] ध्रुवस्य ' महि त्वेवं पुरु श्चन्द्रमित्यैन्द्राग्नस्योरुं नो लोक-मनुनेषि विद्वानिति वैश्वदेवस्य ' नित्या मरुत्वतीयानां ' नित्या १५

---

१ My conjecture; तामथोभ्युपेयाय B Be; तानभ्युपेयाय M; ताभ्युपेयाय Be 7 D; तामभ्युपेयाय U.

२ सुदेवलाभ्य इति (this is the way in which Nandīnāgarī expresses the pluti) M; सुदेवला इति Be Be 7 D; सुदेवलाति BU. Properly speaking we expect सुदेवलाऽऽ इति, pluti from सुदेवले।

३ तवैतादिति all the MSS. exc. M, which reads तवैतादन्यदिति; is pluti contained again in तवैतात् ?

४ नित्या M only.

माहेन्द्रस्यो॰नो विश्वाभिरूतिभिः कदाचन स्तरीरसीन्द्राय गाव आशिरमिति तिस्र आदित्यस्य[१] ग्रहस्येमां[२] ते धियमिति सावित्रस्य। नियुनक्ति पात्नीवतस्य। नित्या हारियोजनस्य। स एष पञ्चदश इन्द्रस्येन्द्रियकामस्य। यो वा[३] ज्येष्ठवन्धुरपभूतः स्यात्स एतेन यज्ञक्रतुना यजेतामुते हैव ज्येष्ठताम्॥ १४॥

अग्नेर्यामेण यज्यमाणो भवति। दीक्षते। तस्यापरिमिता दीक्षा द्वादशोपसदस्त्रिवृद्बहिष्पवमानः पञ्चदशꣳ होतुराज्यꣳ सप्तदशं मैत्रावरुणस्यैकविꣳशं ब्राह्मणाच्छꣳसिनस्त्रिणवमच्छावाकस्य। त्रयस्त्रिꣳशो माध्यंदिनः पवमानस्तृतीयसवनꣳ होतुः पृष्ठꣳ रथंतरं च वैराजं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्ति। चतुश्चत्वारिꣳशं मैत्रावरुणस्य वामदेव्यं च शाक्करं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्त्यष्टाचत्वारिꣳशं ब्राह्मणाच्छꣳसिनो नौधसं च वैरूपं[४] च सामनी अन्यतरेणान्यतरत्परिष्टुवन्त्येकविꣳशमच्छावाकस्य कालेयं च रैवतं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्ति। तमेतमष्टापृष्ठ इति कुन्दोगा आचक्षते। त्रिणव आर्भवः पवमानस्त्रयस्त्रिꣳशमग्निष्टोममामैकविꣳशान्युक्थानि[५] षोडशिकानि पञ्चदशानीतराणि

---

१ आदित्यग्रह॰ M Be.

२ om Be 7 DU.

३ Thus (and cp. Sāṅkh. XV. 7. 4) M Tr U Be Kes. वैराजं वैराज्यं or वैसत्यं the other MSS.

४ ॰न्युक्थानि M Tr. ॰न्युक्थानि all the other MSS.

चिद्द्राघंतरः सन्धिस्तंत्चुद्राः पशवो ऽतिसेदुः[१] सोमो वा एतद्तिरिच्यमान दृयाय[२] ते[२] देवा[२] अब्रुवन्नग्नोर्वा अयमत्यरेचि तस्य को याम दृति तदग्नोर्यामस्याग्नोर्यामत्वं तस्मा एतान्यतिरिक्तस्योचाण्यवकल्पयां चक्रुस्चिद्द्रोतुर्जरावोधीयं पञ्चदशं मैत्रावरुणस्य सौहविषꣳ[२] सप्तदशं[२] ब्राह्मणाच्छꣳसिन उद्वꣳश्रीयमेकविꣳशमच्छावाकस्य वारवन्तीयं तदु वा आहुर्यदच्छावाकचमसमनु यज्ञः संतिष्ठेतान्नं यज्ञं गमयेदयो हान्नं यजमानो गासुकः[४] स्याद्धोच एव सुवीरन्होतानुशꣳस्यात्तथा मध्यतो यज्ञः समाधीयत[५] इति तदु वा आहुः सर्वाण्येवाश्विनानि स्तुतशस्त्राणि स्युर्यद्धु[६] किंच[७] रात्रिमुपातिरिच्यते सर्वं तदाश्विनमिति[८] त्वेकमथापरं चिद्- ५ १०

---

१ The MSS. of the text seem all to be corrupt: °तिसेदु Tr, तिस्त्रेतुः M (if I see right!); तिसेतुः all the other MSS.; अतिसेदुरतिक्रामतीत्यर्थः Bhav. (read °क्रामन्ती°).

२ Thus M; दृयायतेतंदेवा BUD; दृयायतंदेवा Be, दृयाचवेत्तंदेवा H; दृयाववेतं Tr.

३ सौहविषं सप्त° MH; सौभरन्विहविषं सप्त° UD; सौ (सो) भरन्विहविंशसप्त° Be Be 7; सौभरंन्विहविंशिसप्त° B; सौषध्वं सप्त° Tr.

४ Thus M only; कासुकः all the other MSS.

५ Thus MHTr Keś.; समापयत the other MSS.

६ Thus all the MSS., तच्च (i. s. o. यच्च) Karmānta (one MS. यद्वि) Keś. and Rudr. on Āp. XIV. 4. 15.

७ किंचन M.

८ Some of the MSS. again इती; read perhaps °मिनीक्ष्वेक°.

त्यञ्चदशꣳ[1] सप्तदशमेकविꣳशमर्धमेतेषां देवता अग्निरिन्द्रो विश्वे देवा विष्णुरिति ॥ १५ ॥ चतुर्थः ॥

मृत्युसवेन यक्ष्यमाणो भवति स उपकल्पयते शार्दूलचर्म सुवर्णरजतौ च रुक्मौ वैयाघ्रावुपानहौ[2] चार्मपक्ष्यावुपानहौ वृष्णिवाससं च चौमं च तिस्रो धन्वमात्मन्दीꣳ साधीवासां दुन्दुभिं विमितमौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरथौ दिग्भ्यः संभृताः शतं[3] च[3] रथं[3] चैतेनोपकृप्तेन चिचामायतीमुपरमत्यथ[4] चिन्वेति पूर्वाग्निमन्ववस्त्यत्तपनीयꣳ शालीनोऽन्वाहार्यपचनमाहिताग्निरथान्वारब्धे यजमाने जुहोति व्याघ्रोऽयमग्नौ चरति प्रविष्ट इति षट् स्वाहाकृतीरथ यजमानायतने शार्दूलचर्म प्राचीनग्रीवमुत्तरलोमोपस्तृणाति यत्ते गिर्ल्यं कश्यप रोचनावद्दिन्द्रियावत्युक्थं चिचभानु। यस्मिन्सूर्या अर्पिताः सप्त साकं तन्मिचाजानमधिविश्वेममित्यथ वैयाघ्रावुपानहावुपमुञ्चते[5] द्यौरसीति दक्षिणे पादे पृथिव्यसीत्युत्तरे

---

१ °दशं and the following, neutra HTr., पंचदशः सप्तदश एकविꣳशम° M., nominatives masc. the other MSS. cp also Rudr on Âp I. c

२ वैयाघ्रीयावु° M.

३ Uncertain again. cp supra p 351, 3 शतं च रथं चै° M शतं च रथं चै° Be7 D., रुक्मं च रथं चै° BU., सितं च रथमे तेनो°) Be.

४ Probably M reads चत्य, perhaps rightly. also चथ, cp supra p. 350, 7.

५ वैयाघ्रावु° B. U., वैयाघ्रिमावु M Be 1., वैयाघ्रिमावु° D. वैयाघ्रावु B

ऽथ दक्षिणं जान्वाच्याभिमर्शयति व्याघ्रो वैयाघ्रे ऽधि विश्रयस्व दिशो महीः। विश्रयस्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशदित्यथास्मै धनुः प्रयच्छति यथा राजसूये तथा तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्यौदुम्बरे द्रोणे चतुष्टयीरपः समवनीयाभिषिञ्चति ॥ १६ ॥ ५

या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्ष उत पार्थिवीर्याः। तासां त्वा सर्वासाꣳ रुचाभिषिञ्चामि वर्चसा ॥ अभि त्वा वर्चसाभिषिंचं दिव्येन पयसा सह। यथासा राष्ट्रवर्धनस्तथा त्वा सविता करत् ॥ इन्द्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः। रथीतमꣳ रथीनां वाजानां सत्पतिं पतिम् ॥ वसवस्त्वा पुर- १०
स्तादभिषिञ्चन्तु गायत्रेण छन्दसेति पुरस्तादेता एव तिस्रो ऽनुद्रुत्य रुद्रास्त्वा दक्षिणतो ऽभिषिञ्चन्तु त्रैष्टुभेन छन्दसेति दक्षिणत एता एव तिस्रो ऽनुद्रुत्यादित्यास्त्वा पश्चादभिषिञ्चन्तु जागतेन छन्दसेति पश्चादेता एव तिस्रो ऽनुद्रुत्य विश्वे त्वा देवा उत्तरतो ऽभिषिञ्चन्त्वानुष्टुभेन छन्दसेत्युत्तरत १५
एता एव तिस्रो ऽनुद्रुत्य बृहस्पतिस्त्वोपरिष्टादभिषिञ्चतु पाङ्क्तेन छन्दसेत्युपरिष्टादथास्योर्ध्वमुन्मृज्यते ऽरुणं त्वा वृकमुषं खजंकरमित्यथास्य बाहू अनुमार्ष्टि प्र बाहवा सिसृतं जीवसे न इत्यथैनावुपावहरतीन्द्रस्य[1] ते वीर्यकृतो बाहू उपावहरामीत्यथास्मै धनुः प्रयच्छति यदि पुरस्तादप्रक्तं २०
भवति समुन्मृष्टे समुक्तोग्नन्तीति समानमा मुखस्य विमा-

१ °वुपावहरी° B; °वुपावहरंती Be Be 7 UD; °वुपावरोहती° M.

र्जनादुत्तरत॰ एतद्रूपाधितꣳ शतं[१] तिष्ठति रथस्य[१] । तदभि-
प्रेत्याभिप्रेहि वीरयस्वोग्रस्येत्ता सपत्नहा । आतिष्ठ वृत्रहन्तम-
मुग्रं देवा अधिन्नवन्नित्यथ रथस्य पञ्चमी संगृह्णात्यङ्कौ न्यङ्का-
वभितो रथं यौ ध्वान्तं वातायमनु संचरन्तौ । दूरेहेतिरि-
५ न्द्रियावान्यतवी ते नो ऽग्नयः पप्रयः पारयन्त्वित्यथ रथमुप-
तिष्ठते[२] नमस्त ऋषे गदेत्यथ रश्मीनादत्त एवा ब्रह्मन्नवेदꣳ
तिष्ठा रथे अधि यदञ्जहस्तः । आ रश्मीन्देव युवसे स्वश्व इति[३]
रथमातिष्ठत्यातिष्ठ वृत्रहन्नयमातिष्ठन्तं पर्यनु लेम्रो मदत्विꣳ
विश्वा अवीवृधन्नित्यातो[३] ऽज[४] धनुरधिज्यं[५] कुरुते परि मा
१० सेन्या घोषास्तन्मे ऽनुमतिरनुमन्यतामिति द्वाभ्यामथैतच्छतं[६]
त्रिः प्रदक्षिणं परियाय[७] पुरस्तात्यायात्यचासौ प्रत्यवरोहणत[८]

---

१ Uncertain again; सतं ति॰ रथस्य M; शतं ति॰ रथस्य Be 7 BUD; (॰पाधितः) शतन्ति॰ रथम् (omitting च) Be.

२ Thus M Be BU; रथमुखं i.s.o. रथं Be 7 D.

३ Thus Be U; ॰दधन्नित्यानित्यातो B; ॰दधन्नित्यस्य सतो Be 7 D; M om. आतो।

४ Thus M Be 7 D; अ Be UB.

५ अधिज्यं M, प्रज्यं the other MSS.

६ ॰तच्छतं M; ॰तच्छतं Be 7 BUD, ॰तद्रथं Be.

७ Thus D; पर्याय M; परीयाय Be 7; परीयाय Be; परियायाय BU.

८ Although this reading is presented by M only, I did not hesitate to put it in the text as lectio difficilior, the other MSS. all प्रत्यवरोहण; it seems we have in प्रत्यवरोहणतः an ablat. of the same signification as प्रोक्षणतः X. 10. s. f.; cp. also अभिप्रोक्षणत XVIII. 11 and above all XI. 12 (p. 81 2).

आसन्दीं निदधाति | तां तथा प्रत्यवरोहति यथा राजसूये तथा | ॥ १७ ॥

यावदेवाचाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता वारुणेन प्लुतेनोपरमति | वारुण्यः[1] वारुणौ भवतः खिष्टकृतः खिष्टवत्यावचास्मा[2] एतच्छृतं[3] ददात्यथैनं विमितेनाभिविघ्नन्ति[4] | तस्योत्तरार्धे दुन्दुभिमाघ्नन्त्ययति | तमसंस्थात्यादित्य आघ्नन्त्यथैनꣳ सꣳशास्ति यजमान वाचं यच्छ राष्ट्रे च[5] जागृहीति[5] | सो ऽत ऊर्ध्वं वाचंयमो भवति | स यत्किंच[6] व्याहरति ददामीत्येव व्याहरत्युपसंगच्छन्त एनमेते राजगृहाः सूतग्रामण्यः[7] चत्तसंग्रहीतारः कारुविग्रा इति | तेभ्यः षष्ठौहीं वेहतं ददाति | तां ते पचमाना रमयन्तो जागरयन्त आसते | ऽथाध्वर्युरपरार्च आद्रुत्य चतुष्टयीनामपां प्रदेके मन्थमुपमथ्यावघ्राय[8] वानवघ्राय वा प्रयच्छति | तꣳ स[9] भक्षयति तूष्णीमथैनं नवनीतेनाभ्यनक्त्येना व्याघ्रं परिषस्वजाना इत्यादित्यमुद्यन्-

---

१ वरु० all MSS. exc M.

२ खिष्टकृत्या० all exc. M.

३ Uncertain again, एतच्छृतं Be 7 BUD; एतच्छितं Be; M has a blank of two akṣaras.

४ Thus M; ०भिनिघ्नंति the other MSS.

५ Thus M; चराजगृ० Be BU; चर्माग्नि० Be 7 D.

६ ०किंचिद् M.

७ ०ग्रामण्यः M.

८ उपमंथ्य s.o. उपमथ्य all MSS.

९ Thus M Be; सह the other MSS.

आतिष्ठ्यं परमतामियामिति । ततो वै स आतिष्ठ्यं परमतामैद्यः कामयेतातिष्ठ्यं परमतामियामिति स एतेन यज्ञक्रतुना यजेतातिष्ठ्यꣳ हैव[१] परमतामेति । ॥ १९ ॥ पञ्चमः ॥

सद्यस्क्रिया यज्ष्यमाणो भवति । स यूपं च वृक्षं छेदयति लाङ्गल्यं चैषां यूपस्य कारयति लाङ्गलं लाङ्गल्यस्य । तौ सꣳहत्य भुञ्जते वा नि[२] वा[२] दधत्यथास्यैतत्पुरस्तादेव जुष्टे देवयजने वेदिसंमितं विमित[३] कारितं भवति । तदेतेन लाङ्गलेन[४] परिहार्य[४] कर्षयति । तस्मिञ्जघन्यवाप्यान्यवान्वापयित्वा[५] परिघातयत्यथास्यैते रथा उपकॢप्ता भवन्ति चतुर्युक्त प्रष्टिवाही द्वियोग[६] स्थूरिरिति[६] । तेषु काल एव दधिविनालानासञ्जयन्ति । स ग्रीष्मस्य जघन्याहःसु प्रजहितेषु यवेष्वृत्विजः पदेनाक्रापयतीच्छा वा मा याजयिष्यथ भक्तं वा वः कारयिष्यामीति[७] । तेषूपशमेतेषु काल एव प्रातरग्निहोत्रं जुहोत्युपसंगच्छन्त एनमेत ऋत्विजो । ऽथैनानाह सद्यस्क्रिया मा याजयतेति । तं तथेतीतरे प्रत्याऽऽहुस्तस्मै तदानीमेव

---

१ एव om. M.

२ Thus M only; न वा दधत्य० Be; न वा दधात्य० BU; निदधाति वा Be 7 DU (bis).

३ om. M.

४ Thus MUDB Be 7; ०लेनापरि० Be U (bis).

५ Thus M; तस्मिन्व्रीहीन् यवान्वावापयित्वा Be 7 DU; तस्मिन् जघन्यवापान्यवान्वापयित्वा Be; तस्मिन्व्रीहीन्यवान्वापयित्वा B.

६ Thus M; द्वियुक्स्थूरि० the other MSS.

७ Thus M; करिष्यामीति the other MSS.

सद्यस्कार्याꣳ[१] श्राला कुर्वन्ति । तं[२] तदानीमेव तीर्थादानीय पवयित्वा दीक्षणीयामिष्टिं निर्वपति । तस्माꣳ सꣳस्थितायां सुष्टी चैव न करोति वाचं च न यच्छति । निर्दधत्यस्मा[३] एतद्धविरुच्छिष्टं व्रतभाजनमथ[४] प्रायणीयामिष्टिं निर्वपति । हविष्कृता वाचं विसृजते । ऽत्रास्मा एतद्धविरुच्छिष्टं प्रयच्छन्ति[५] ५
व्रतभाजनमेतन्मसूता एवैते रथा आजिं धावन्ति । योजनं प्राक् चतुर्थं क्लैपदं[६] दक्षिणा प्रष्टिवाही । गव्यूतिं पश्चाद्वियोगः[७] क्रोशमुदक् स्थूरिरिति । ते येनयेन संगच्छन्ते तस्मा आवेदयन्ते यजते ऽयमसावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता सद्यस्क्रियेत्यायन्ति रथा । आगतेषु रथेषु यद्दिनालेषु १०
नवनीतमुत्सीदति तद्दिलाप्योत्पूयाज्यकुम्भे[८] प्रत्यस्यति सद्यस्क्रियाय[९] इति ॥ २० ॥

---

१ Thus M Be U (bis); सद्यस्क्रियां BDU; सद्यस्क्रीया Be 7.

२ तं only given by M.

३ Thus M Be U (bis); निर्दधात्य० B Be 7 DU.

४ Thus M Be U (bis); ०भोजन० B Be 7 DU.

५ ०यच्छति M Be.

६ Corrected.; चतुर्थ्यक्चैतंपदं Be U (bis); चतुर्थ्यक्लैःपदं MBUD, चतुर्थ्यक्लैविक्रीयं पदं Be 7

७ पश्चाद्वियोगः MDUB; पश्चाद्विक्रोशः Be 7; पश्चाद्विगुक् Be.

८ Thus MU (bis), ०याज्यंकुंभे the other MSS.

९ सद्यस्काया Be U (bis), cp. Lāṭy. VIII. 4. 7, सद्यस्कार्यास्कार्यां M; सद्यस्क्रिया Be 7 BDU.

अथ प्रायणीयेन चरति। प्रायणीयेन चरित्वा पदेन चरति। पदेन चरित्वा चिवत्सेन षाण्डेन वत्सतरेण राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्यैकगणा उपसदो भवन्ति। [१]मध्यमयोपसदा प्रचर्योत्तरवेद्यै काले खलेवाली[२] मापयत्यथा- ५ नडुहः संयुज्य यवाग्रक्लृप्त्य[३] मृणन्ति[३]। यवपुरीषैवोत्तरवेदिर्भवत्यथ मध्ये ऽनडुहः संयुज्य प्राचो यवान्प्रगट्लन्नो[४] यन्ति। यववर्हिरेवैषा महावेदिर्भवत्यथाहवनीयं प्रणयत्याहवनीयं प्रणीय सदोहविधाने संमिनोति। सदोहविधाने संमित्याग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय वसतीवरीर्गृह्णाति। तास्तदानी- १० मेव परिहृत्य प्रातरनुवाकमुपाकरोति। परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यङ्गिरस्वत्यग्निष्टोमं क्रतुमुपैति। प्रषिद्धो ऽभिषवः। प्रषिद्धं ग्रहा गृह्यन्ते। समानं कर्माग्निनाङ्गहादाग्निनं ग्रहं गृहीत्वा तिस्रो रज्ज्वा आदाय लाङ्गल्यामभ्येति। तस्मै कटे परमिव चषालभाजनं भवति। प्रक्लान्तां[५] लाङ्गल्यासुत्सृज्याथै-

---

१ All the MSS. exc. M have तन् before मध्यमयो०।

२ M reads क्लां i.s.o. खलेवाली; are we to correct उत्तरवेद्यै काले खलां मापयति? But then somewhere the words खलेवाली यूपो भवति must have fallen out, cp. the Karmānta.

३ Thus M; प्रक्लृत्यगृह्णन्ति B; प्रगृह्णत्यगृह्णन्ति Be; प्रगृह्णत्यगृह्णन्ति U; प्रगृह्णन्ति U.(bis); Be 7 D om this passage

४ प्रगृह्णन्तो M; प्रगृह्णन्तो all the other MSS; read perhaps प्रगृह्णन्नो?

५ Uncertain reading; प्रक्लान्तां M Be U (bis), सचषालान्तां Be 7 DU, सचरषालान्तां B.

तान्पशूनुपाकरोत्यग्नीषोमीयमाग्नेयमनूबन्ध्यमिति। तेषामनूचीनं[१] वपाभिराद्रवन्ति॥ २१॥

अग्नीषोमीयस्याध्वर्युर्वपया प्रथमया प्रपद्यते[२]। ऽनूची इतरे आहरन्ति। परिहितासु स्रोकीयासु घृतासु वपास्वग्नीषोमीयस्य वपया प्रचरति। परीतरे प्रायच्छन्ति। प्रातःसवनीयानामग्नीषोमीयस्य पशुपुरोडाश्नो मुख्यो भवति। स्रुते माध्यंदिने पवमाने ऽग्नीषोमीयेण चरत्यनन्तर्हित[३] आग्नेयस्य[४] वपया चरति। स्वे धामन्नाग्नेयेन[५] चरत्यनन्तर्हित[६] एवानूबन्ध्यस्य[७] वपया चरति। तृतीयसवनीयानामनूबन्ध्यस्य पशुपुरोडाश्नो मुख्यो भवत्यसमुदिते ऽनूबन्ध्येन चरति। संतिष्ठते सञ्चस्क्री। तस्य यदसञ्चस्क्रियते वृद्धूमेवास्य तत्पुनर्यज्ञ[८] एवास्य[९] तदथादित्यास्य[९] ह वा अङ्गिरसश्च सुवर्गे लोके पस्पृधिरे। ते

---

१ °नूचीनां M.

२ प्रतिपद्यते M.

३ Thus M; °र्हितमाग्नेयस्य the other MSS.

४ Thus M Be B U U(bis) D (pr. m.) Be 7 (pr. m.); °ग्नेयस्य Be 7 (sec. m.) D (sec. m.).

५ चरत्य° M Be 7 BD, चरंत्य° Be U U(bis).

६ च ins Be 7 BD

७ Thus my conjecture; तत्पुनर्यज्ञ एवास्य स तथादित्यास्य MU (bis), तद् ध्रुवमेवास्य तत्पुनर्यज्ञ एवास्य स तथादित्यास्य Be तत्सदयज्ञस्य सदथादित्यास्य B तत्सदयज्ञ एवास्य तदथादित्यास्य Be 7 DU

ऽङ्गिरस आदित्यानभिप्रजग्मुरग्निना[1] दूतेन स्वःसुत्या न दूत्यंथास्माकमद्यसुत्येति ॥ २२ ॥

आदित्याः प्रोचुस्तेषां नस्त्वꣳ होतेति। ते ऽसुमादित्यमग्वꣳ श्वेतं भूतं दक्षिणां निन्यिरे[2] हिरण्याभिभूतरग्नं[3]। तस्मात्सद्य-
५ स्क्रियै श्वेताश्वो दक्षिणा हिरण्याभिभूतरग्नो। यच्छ्वेताश्व आदित्यस्य तद्रूपमथ यद्धिरण्याभिभूतरग्नो रश्मीनां तत्तस्य चितृतः सतश्चतुर्विꣳशौ माध्यंदिनार्भवौ भवतश्चतुश्चत्वारिꣳशꣳ होतुः पृष्ठं। चतुर्विꣳशमग्निष्टोमसाम। चितृदन्यत्सर्वꣳ। श्वेतमश्वं ददात्यनुक्रिया यच्छ्यमाणो[4] व्रीहिषु दीक्षते। स द्व्यहेन
१० संतिष्ठत औपवसथ्यादेकमहः[5]। सुत्यमेकमहस्तस्य चितृत एव सतश्चत्वारिꣳशौ माध्यंदिनार्भवौ भवतश्चतुश्चत्वारिꣳशꣳ होतुः पृष्ठं। चतुश्चत्वारिꣳशमग्निष्टोमसाम। चितृदेवान्यत्सर्वꣳ। श्वेतां वडबां ददाति। परिक्रिया यच्छ्यमाणो माषेषु दीक्षते। स अहेण संतिष्ठत आ क्रयादेकमहरौपवसथ्यादेकमहः[6]
१५ सुत्यमेकमहस्तस्य चितृत एव सतो ऽष्टाचत्वारिꣳशौ माध्यंदिनार्भवौ भवतो। ऽष्टाचत्वारिꣳशꣳ होतुः पृष्ठमष्टाचत्वारिꣳ-

---

१ •ग्र• found in M only.

२ Thus M; all the other MSS more or less corrupt.

३ Thus here and infra all the MSS.; are we to read अभिहित• i.s.o. अभिभूत• ?

४ All MSS. exc. M ins. भवति।

५ औपवसथाद• or औपवसथाद• MSS.

६ Thus M., औपवसथाद• the other MSS.

ग्रमग्निष्टोमसाम चिवृदेवान्यत्सर्वं ' यथाश्रद्धं ददात्यतिक्रिया यज्यमाणस्तिलेषु दीक्षते ' स चतुरहेण संतिष्ठत आ क्रथादेकमहरोत्तरवेदेरेकमहरौपवसथ्यादेकमहः[१] सुत्यमेकमहर्स्तुष्टोम एष भवति ' ॥ २३ ॥ षष्ठः ॥

व्रात्यस्तोमेन यज्यमाणो भवति ' ते राजनि वा ब्राह्मणे वा प्रतिग्रहमिच्छन्ते मासाय वर्तवे वा ' ते यमभिसंजानते तꣳ स्वपतिं कुर्वन्ति ' स एषां व्रतानि चरति ' सो ऽधःसंवेश्यमाꣳसाश्यस्त्युपायी भवति ' तद्धि दीक्षितव्रतमथ यत्कृष्णं वासः कृष्णत्वषं परिधत्ते दीक्षितवसनस्य[२] तद्रूपमथ यत्कृष्णवलत्यावजिने धारयति कृष्णाजिनयोस्तद्रूपमथ यत्सुवर्णरजतौ रुक्मौ बिभर्ति परिघर्म्ययोस्तद्रूपमथ यत्कृष्णमुष्णीषं धारयति दीक्षितोष्णीषस्य तद्रूपमथ यच्चर्ममयैर्बाणवल्लिस्रिसृधम्वं धारयति दीक्षितदण्डस्य तद्रूपमथ यद्ब्रात्यवादं वदति दीक्षितवादस्य तद्रूपमथ यत्खुर्यावुपानहौ[३] धारयति नेदीक्षितः सन्नमेध्यमधितिष्ठानीति[४] तत्तस्य ह वा एतद्रूपस्य यज्ञस्य प्रतोदद्दण्ड एव यूपः ' प्रतोदपरिषेवणं[५] चषालꣳ ' रथमुखमा-

---

१ Thus M ; ॰रौपवसथाद॰ the other MSS.

२ Thus M ; ॰वसनीयस्य D ; ॰सवनीयस्य Be 7 ; the other MSS. still more corrupt.

३ Thus M ; यत्खुर्यांतावुपानहौ Be 7 D , यत्खलुयावुपानहौ B Be U.

४ Thus Be 7 ; ॰तिष्ठानीति M.

५ ॰परिषेवणं M.

हवनीय ' ईषे[१] वेदि[२]युगमुत्तरवेदिरुत्तरयुगमुत्तरनाभिर्धनुर्धी[२] हविर्धाने ' पक्षसौ आग्नीध्रीयमार्जालीयौ ' कूबरꣳ सदः ' किंकरावताना[३] धिष्णिया ' वन्धुरं[४] पत्नीशालꣳ ' रथोपस्थो गार्हपत्यो ' ऽधिष्ठानं पुराणगार्हपत्यस्थं यमजं प्रमायं[५] पचन्ते ५ स एषां पशुर्यमपूपꣳ स्थालीपाकꣳ स चरुपशुपुरोडाशौ ' यां परिष्कन्दꣳ[६] क्रयति सा पुरोनुवाक्या ' यदाहरति सा याज्या ' यदश्नन्ति स वषट्कारो ' यां कुम्भां[७] विमते सा पुरोनुवाक्या ' यामधीवाक्याꣳ[८] सा याज्या ' यां विगणꣳ[९] क्रयति स प्रस्तस्य[१०] प्रतिगरो[१०] ' यदभिक्रोशन्ति स उद्गीथस्थं १० य एवमेतं यज्ञक्रतुं परोचसुपेत्य[११] प्रत्यक्षं नोपेयुः ॥ २४ ॥

यथा दीक्षितावक्रीर्णा विच्छिन्नसोमपीथा अनाप्याश्चा एवꣳ स्युस्तस्माद्व्रात्यावस्थितस्य[१२] व्रात्यस्तोमेनानीजानस्य नाश्नं '

---

१ Thus corrected; ईषे M; ईषा the other MSS.

२ Thus M, धनुषी the other MSS.

३ Thus M, किंक (or कु)रायतना the other MSS.

४ बंधुरं M; वधुरं Be.

५ Thus M; प्रमायं Be; प्रमाय Be 7 BU·D.

६ प्रस्कंदं MSS. exc. M.

७ कुंभ्यां MSS. exc. M.

८ ०मधिवाक्यां MSS. exc. M.

९ गणं MSS. exc. M.

१० प्रस्तप्रतिगरो MSS. exc. M.

११ परोचसुपेत्य Be BU; परोचादुपेत्य Be 7; पुरोचाउपेत्य M.

१२ ०व्रात्याव० i.s.o. ०व्रात्याव० M.

विच्छिन्नसोमपीथ इव ह्येष ऽनाग्नाञ्चस्तेषां ये ऽनाहिताग्नयस्ते
यथाग्टहं विपरेत्याग्नीनाधाय त्रयस्त्रिꣳशता त्रयस्त्रिꣳशता
दक्षिणाभि स्वपतिमुपसमायन्ति । तेषां ब्रह्मबन्धुरमागधो
मागधवाक्यो ब्रह्मबन्धुरपुꣳश्चलू पुꣳश्चलूवाक्या जरत्कद्रथो
जरत्प्रयोग्याभ्यां[1] युक्तो । वृद्धो वा एष यो ब्रह्मबन्धुरमागधो ५
मागधवाक्यो । वृद्धा ब्रह्मबन्धुरपुꣳश्चलू पुꣳश्चलूवाक्या । वृद्धो
जरत्कद्रथो जरत्प्रयोग्याभ्यां[1] युक्तो । वृद्धेनैव वृद्धं निरवदयते
तदेतद्ब्रात्यधनꣳ समवग्रान्तं दण्डोपानहꣳ शामूलाजिनꣳ[2] । रथे
तिष्ठन्सुब्रह्मण्यः सुब्रह्मण्यामाक्रयति । दक्षिणानां काल एतदेवास्य
भवत्यृत्विजो दक्षिणा विभजन्ते । तस्य प्रातःसवनीयाननुवर्तन्ते १०
संज्ञान्यै हवीꣳष्यसंज्ञातमिव वा एते चरन्ति ये व्रात्यं चरन्ति ।
समेवैनान्ज्ञापयन्ति । माध्यंदिनीयाननुवर्तत[3] ऐन्द्रामारुत[4]
एकादशकपाल[5] । ऐन्द्रो वै व्रात्यो मारुतो ग्रामो । ग्रामेणै-
वैनान्समीचो दधाति । तृतीयसवनीयाननुवर्तत आदित्येभ्यो
भुवद्ब्रह्मश्वरभूता इव वा एते चरन्ति ये व्रात्यं चरन्ति । १५
भूतिमेवैनाग्गमयन्त्यनूबन्ध्यस्य पशुपुरोडाशमनुवर्तत आदित्य-

---

१ ॰प्रयोगाभ्यां MSS. exc. M.

२ शाल्मूकारितं M, शार्दूलाजिनं the other MSS, but cp. Karmānta.

३ ॰वर्तन all.

४ ॰मारुता all.

५ ॰कपाल M, ॰कपाला the other MSS.; this passage is missing in Be 7 D.

सुरप्रतिष्ठिता इव वा एते चरन्ति ये व्रात्यं चरन्तीयं वा अदितिरस्मामेव प्रतितिष्ठन्ति ॥ २५ ॥

स एष ज्येष्ठानामग्निष्टोमस्तस्य चत्वारि षोडशानि द्वौ पवमानावुभे एवाच्छावाकस्य स्तोत्रे एष एव[1] सङ्कनीयसामुक्थ्यस्तस्य षट् षोडशानि सर्वे पवमानाः सर्वाण्यच्छावाकस्य स्तोत्राणि तेन हैतेन मरुत ईजिरे तेषां विष्णुः स्थपतिरासीथो[2] हैतेन दैव्या व्रात्या ईजिरे तेषां बुधः सौम्य स्थपतिरासीथो हैतेन कुरुब्रह्मणं पुत्रा ईजिरे तेषामौपोदितिर्गौपालायनो वैयाघ्रपद्य स्थपतिरास तेन हेड्वा पञ्चालान्व्रात्या अभिप्रययुस्तान्ह पितर ऊचुर्मा पुत्रकाः पञ्चालान्याभिष्टोपवादिनो वै पञ्चाला उप वो वदिष्यन्तीति तान्हानादृत्यैव प्रययुस्ते ह केशिनो दाल्भ्यस्योपवसथमाजग्मुस्तान्ह स्वो भूते बर्हिष्यमाणꣳ सर्पतो[3] ऽन्वालेभिरे पवित्रं वै बर्हिष्यमान आत्मानं पवयिष्यामह इति वदन्तो ऽथ ह पञ्चालेषु गन्धर्वायणो वालेय आग्निवेश्यो ऽनूचान आस तान्ह[4] सह[4] सर्पतः पप्रच्छ के सर्पन्तीति[5] वयं मरुत इति तेषां वः क स्थपतिरित्यहं विष्णुरित्यौपोदितिर्गौपालायनो वैयाघ्रपद्यः प्रत्युवाच यत्किं चकर्थ कस्तच्चारेतीति ह परोचाव्रतमनु-

---

१ om. M.

२ स्थपतिरास वेनो Be.

३ संसर्पतो MSS. exc. M.

४ तान्हस्मह सह M; तान्सह UB Be; न्हसह Be 7 D.

५ Thus M; प्रसर्पतीति the other MSS. Read perhaps सर्पथेति ?

निर्दिदेशेति[1] । नान्दोवाचाविदुषो व उपावादिष्माप वो ऋमह इति । पिता वै[2] तत्प्रचानुपावादीदिति हैनमूचुः पापीयसी ते प्रजा भविष्यतीति । तथा[3] हैवास[3] । ततो[3] ह वा एतत्पञ्चालेषु गन्धर्वायणा वालेया आग्निवेश्याः पापायिता इव । महाकुलं[4] ह[4] तत्पुरा[4] बभूव । स यो व्रात्यमुपवदेद्देवमेवैनमुपवदेदथ यो व्रात्यो ऽसं प्रतिवचनाय स्यादेवमेवैनं प्रतिब्रूयात् । ॥ २६ ॥

अथातो भाल्लविस्तोमा इत्याचक्षते । चिकृदभ्यावर्ति पञ्चदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । पञ्चदशमभ्यावर्ति सप्तदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । सप्तदशमभ्यावर्त्येकविंशमग्निष्टोमसाम सर्वे षोडशाः पवमाना । एकविंशमभ्यावर्ति त्रिणवमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रिणवमभ्यावर्ति त्रयस्त्रिंशमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रयस्त्रिंशमभ्यावर्ति त्रिणवमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रिणवमभ्यावर्त्येकविंशमग्निष्टोमसाम सर्वे षोडशाः पवमाना । एकविंशमभ्यावर्त्ति सप्तदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । सप्तदशमभ्यावर्ति पञ्चदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । पञ्चदशमभ्यावर्ति चिकृदग्निष्टोमसाम सर्वे षोडशाः पवमानाः । ॥ २७ ॥ सप्तमः ॥

---

१ Conjecturally; परोक्षाव्रतमनुदिनिदेशेति M; परोक्षादव्रतमनुनिर्देशेति Be 7 DU; परोक्षादव्रतमनुदिदिशेनिने B; परोक्षादु व्रतमनुदिदिशेनि Be.

२ All MSS exc M ins the aksara स्यां।

३ तथाचैवस्यात्ततो MSS.

४ Thus M चैतत्पुरा the other MSS.

अथ वै भवति देवा वै यज्ञे ऽकुर्वत तदसुरा अकुर्वतेति[1] स हेक्षां चक्रे प्रजापतिः कथं[1] न्वहमसुरैर्देवान्व्यावर्तयेयमिति[1] स एतं यज्ञक्रतुमनिरुक्तमुपहव्यमपश्यत्तस्मिन्नेनानुपाक्रयतेति[1] स यत्राह प्रातर्यावभ्यो देवेभ्य इति मरुद्भ्यः प्रातर्यावभ्यो देवेभ्य इति तत्राहाथ यत्राह सोमः पवत इतीन्दुः पवत इति तत्राहाथ यत्राहेन्द्राय पुरोडाशानामिति प्रक्राय पुरोडाशानामिति तत्राहाथ यत्राह वायव इन्द्रावायुभ्यामिति नियुत्वते प्रक्रनियुद्भ्यामिति तत्राहाथ यत्राह मित्रावरुणाभ्यामित्यृतायुभ्यामिति तत्राहाथ यत्राहाश्विभ्यामिति नासत्याभ्यामिति तत्राहाथ यत्राहेन्द्राय सोमानिति प्रक्रायेन्दूनिति तत्राहाथ यत्राहेन्द्राग्निभ्यामिति प्रक्रजातवेदोभ्यामिति तत्राहाथ यत्राह विश्वेभ्यो देवेभ्य इति मरुद्भ्यो विश्वेभ्यो देवेभ्य इति तत्राहाथ यत्राहेन्द्राय मरुत्वत इति प्रक्राय गणवत इति तत्राहाथ यत्राह महेन्द्रायेति महते प्रक्रायेति तत्राहाथ यत्राहादित्येभ्य इति मरुद्भ्य आदित्येभ्य इति तत्राहाथ यत्राह वनस्पतय इति वनर्नृपायेति[2] तत्राहाथ यत्राह देवाय सवित्र इति महते[3] देवाय सवित्र इति तत्राहाथ यत्राह विश्वेभ्यो देवेभ्य इति मरुद्भ्यो विश्वेभ्यो देवेभ्य

---

१ कथन्वहमसु० M; कथमन्वहमसु० Be 7 D; कथयन्कथमसु० Be BU.

२ Conjecturally; वनेर्पापायेति M, वनेनय्यवयेति Be 7 D; वनेनय्यवयेति B U; वनेर्नर्यापायेति Be.

३ Thus M, समहते Be 7 Be D, मसहते BU.

इति तच्चाहाथ ॰यच्चाह देवानां पत्नीभ्य इति महतीभ्यो देवानां पत्नीभ्य इति तच्चाहाथ यच्चाहेन्द्राय हरिवत इति अग्नाय मघवत इति तच्चाह धाना इन्दुभ्य[1] इत्यु हैके संप्रदिशन्ति ॥ २८ ॥

तदेतदर्वागेव यज्ञायज्ञियस्य[2] स्तोचाद्यज्ञायज्ञियस्य वाव[3] स्तोचे स तां निरुवाच तꣳ हासुरा उपेक्षामेव चक्रिरे किं वा वै करोति[4] किं वा नेति स यदा विदां चकार न वा इम एतर्हि पापभद्रयोयोरीशत इति तदेनां निरुवाच देवो वो द्रविणोदा इति प्रजापतिर्वै देवो द्रविणोदाः पूर्णा विवष्ट्यासिचमिति पूर्णा व्युदचत्यासिचमिति[5] तदुद्वा सिञ्चध्वमुप वा पृणध्वमित्यास्य कामंकामं पूरयाध्वा इति तदादिद्वो देव ओहत इति साध्येभ्यो देवेभ्यः प्रजापतिः कामंकाममूहते[6] सप्तदश स्तोमो[7] भवति[8] सप्तदशः प्रजापतिः प्रजापतेराप्त्या अश्वो ऽसितज्ञुर्दक्षिणा[8] प्राजा-

---

१ Thus M Be, दुंदुभ्य the other MSS.

२ ॰यज्ञौयस्य M Be

३ om. all exc. M.

४ करोतती (sic!) M, indication of pluti?

५ व्युदचत्य॰ B·Be U, द्युदचत्य॰ Be 7; युदचत्य॰ D, युदचंत्य॰ M — आसिच॰ BUD, आग्निच॰ M, आग्निष॰ Be 7 (pr. m.) Be, आसिचत॰ Be 7 (sec. m.).

६ Uncertain reading ॰मूहनं M मूहतः the other MSS.

७ स्तोमा भवंति M, स्तोमो भवति the other MSS

८ ऽसितज्ञुर्दक्षि॰ Be ऽसितज्ञुर्दक्षि॰ all the MSS exc M

पत्यो वा[१] अश्वः[१] । प्रजापतेरनुरूपत्याय । यः पाप्मना भ्रातृव्येण व्याविष्टस्येत[२] स एतेन यज्ञक्रतुना यजेत । स्येव पाप्मना भ्रातृव्येणावर्तत । इन्द्रो वृत्रꣳ हत्वा परां परावतमगच्छदपाराधमिति मन्यमानस्तं देवा यज्ञेनान्वैषुस्ते[३] ५ ग्रतमाग्निरं[४] दुद्वां[४] चक्रिरे[४] भूयो भागधेयं भूयसीं प्रीतिमभ्युपावर्त्स्यतीति[५] वदन्तः । स ह प्रातःसवने नाजगाम । ते[६] सर्व एव प्रातःसवनस्य भक्षयां[७] चक्रुः[७] । को ह्यपेन्द्रस्य[८] सोमस्य भक्षयिष्यतीति । तꣳ संतिष्ठमाने प्रातःसवने ऽच्छावाकस्य ग्रस्तं प्रति[९] जक्षुस्ते[१०] सर्व एव चमसाध्वर्यव आनन्दिनो

---

१ Thus M; वाश्वः the other MSS.

२ Thus corrected (cp. Śat. Br. XII. 4 4. 2), व्याविर्त्स्येति all exc. M, which has व्याविवर्त्तेत् ।

३ अन्वैषुस्ते M; अन्वेषुस्ते the other MSS.

४ आग्निरं दुदुहं चक्रिरे Be 7 Be D; आग्निरं दुदुहे चक्रिरे B; आग्नीर्दुहां चक्रिरे M; cp. on this passage Pañc Br. XVIII. 5. 12.

५ ०पावर्तिष्यतीति M.

६ I.s.o. ते (thus M Be B), ततः Be 7 D.

७ Thus M; नानक्षयां चक्रुः or तातक्षयांचक्रुः the other MSS. (in Be 7 the passage is missing). Probably the negation has fallen out somewhere.

८ अपेंद्रस्य M.

९ प्रतिप्रति M.

१० Thus my conjecture; चक्ष्युस्ते M; चक्षुस्ते or चक्षुस्ते the other MSS., cp. Āp. śrs. XXII. 10. 13.

ऽच्छावाकस्य ग्रस्तं॰ प्रत्यागर्तुं[१] दध्रिरे[२]। सेन्द्रा इव ह्यमन्यन्त तस्मात्तीव्रसोमे सर्व एव चमसाध्वर्यव आनन्दिनो ऽच्छावाकस्य ग्रस्तं प्रत्यागृणन्ति[३]। सेन्द्रा इव हि मन्यन्ते। तर्हि वाव तदासीत्तदु वा आहुः सर्व एवैतर्हि यज्ञः सेन्द्र इति। तꣳ हाभिषुण्वुः[४] ॥ २९ ॥ ५

दृहा दृहा दृहेतीहेहीहेहीहेहीति[५] ह वा एनं तदूचुर्दृंह-दृंहदृंहदितीदं[६] ते दृहदन्नाद्यं तदभ्युपावर्तन्तेति ह वा एनं तदूचुस्तदेतन्माध्यंदिनस्य सवनस्यान्यत्रापि निदानꣳ। म॰ घृतकलशमेकधनानां॰ प्रातःसवने ऽवनयेद्धि माध्यंदिने सवने। विमथितं तृतीयसवने। सास्य तीव्रता। सप्तदश स्तोमो भवति। सप्तदशः प्रजापतिः। प्रजापतेराप्त्यै। गर्भिणी वडवा ललामी दक्षिणेन्द्रियं वै गर्भः। इन्द्रियं ललामः। सेन्द्रियत्वाय[८]। यो ज्यान्या वोपतपता वाणिमानं नीतः स्यात्स एतेन यज्ञक्रतुना यजेताश्नुते हैव तीव्रतामिन्द्रो ऽकामयत वि पाप्मानꣳ हनीय १०

---

१ Thus M only; प्रत्यागर्तं or ॰गर्त्तं the other MSS.

२ M ins. न before दध्रिरे।

३ प्रतिग्र॰ MSS. exc. M.

४ Thus M; ह वा अभि॰ U; ह्वाभि॰ Be B; सहाभि॰ Be 7 D.

५ Thus M Be B; दृहे तीहे दृहे दृहेहीति U; Be 7 D (which write only once दृहा): दृहेतिहेहिहेहिहेहीति।

६ Before दृदं M has once more बृहद्।

७ Uncertain; M. reads as above given; संश्रितकलशं Be 7 UDB; संश्रितंकलशं Be.

८ Thus M Be BU सेंद्रत्वाय Be 7: सेंद्रात्वाय D.

श्रैष्ठ्यं देवानां गच्छेयमिति स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत ततो वै स वि पाप्मानमहत श्रैष्ठ्यं देवानामगच्छद्यः कामयेत वि पाप्मानꣳ हनीय श्रैष्ठ्यꣳ समानानां गच्छेयमिति स एतेन यज्ञक्रतुना यजेत व्येव पाप्मानꣳ हते श्रैष्ठ्यꣳ समानानां गच्छति तस्यातिग्राह्यो वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। अधस्पदं तमीं कृधि यो अस्माꣳ अभिदासत्युपयामगृहीतोऽसीन्द्राय त्वा वैमृधाय जुष्टं गृह्णामीति परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा वैमृधायेति तस्य चित्पत्यद्दशौ विपर्यासꣳ स्रोमौ भवतस्ताः षड् गायत्र्यो गायत्री वै छन्दसां वि पाप्मानमहत गायत्र्यैव तद्यजमानो वि पाप्मानꣳ हते ॥ ३० ॥

इन्द्रोऽकामयतौद्भिद्यꣳ श्रैष्ठ्यं देवानां गच्छेयमिति स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत ततो वै स औद्भिद्यꣳ श्रैष्ठ्यं देवानामगच्छद्यः कामयेतौद्भिद्यꣳ श्रैष्ठ्यꣳ समानानां गच्छेयमिति स एतेन यज्ञक्रतुना यजेतौद्भिद्यꣳ हैव श्रैष्ठ्यꣳ समानानां गच्छति तस्यातिग्राह्यो ऽयं क्रत्वरगृभीतो विश्वजिदुद्भिदित्सोमः। ऋषिर्विप्रः काव्येनोपयामगृहीतोऽसीन्द्राय त्वोद्भिदे जुष्टं गृह्णामीति परिमृज्य सादयत्येष

---

१ Thus M only; गायत्र्यैव वै छंदांसि all the other MSS.

२ All MSS. ins. ह वै exc. M

३ हवै MB.

४ M ins. (against Taitt. Br.) वयोधाः।

ते योनिरिन्द्राय त्वोद्विद इति। तस्य पञ्चदशैकविꣳशौ विपर्यासꣳ स्तोमौ भवतस्तावः षड् बृहत्यो। बृहती वै छन्दसामुदभिनद्बृहत्यैव[१] तद्यजमान उद्भिनत्तीन्द्रो ऽकामयत वलं[२] भित्त्वा पशून्सृजेयेति। स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत। ततो वै स वलं[२] भित्त्वा पशूनसृजत। यः कामयेत वलं[२] भित्त्वा पशून्सृजेयेति स एतेन यज्ञक्रतुना यजेत। वलमेव[२] भित्त्वा पशून्सृजते। तस्मादिग्राह्य इन्द्र ओषधीरसनोदहानि वनस्पतीꣳरसनोदन्तरिक्षम्। विभेद वलं नुनुदे विवाचो ऽथाभवद्दमिताभिक्रतूनामुपयामगृहीतो ऽसीन्द्राय त्वा वलभिदे जुष्टं गृह्णामीति। परिस्रुज्य सादयत्येष ते योनिरिन्द्राय त्वा वलभिद इति। तस्य सप्तदशैकविꣳशौ विपर्यासꣳ स्तोमौ भवतस्तावः षड्गायत्र्यो। गायत्री[३] वै[३] छन्दसां[३] वलमभिनद्गायत्र्यैव[३] तद्यजमानो वलं भित्त्वा पशून्सृजते। ॥ ३१ ॥ अष्टमः ॥

क्षतपेयेन यक्ष्यमाणो भवति। स यदग्नानां कामयते तस्याग्नितो भूत्वा॰ दीक्षते यदा[४] लभते[४] तस्य। स एकाहं नाश्नात्यथाश्नाति। द्व्यहं नाश्नात्यथाश्नाति। त्र्यहं नाश्नात्यथाश्नाति। सो ऽचैव विराजमाप्नोति[५]। राजानं क्रीत्वोद्धातिथ्यं

---

१ बृहतीत्येव M.

२ वलं most of the MSS

३ Thus M, गायत्रेव छंदसां वलमिद्गायत्रेव the other MSS.

४ यदलंगते M.

५ Thus my conjecture; विराडाप्नोति M विराजा यजतेति the other MSS.

निर्वपति। यद्यु वा एतदुपात्येति चतुरहं नाश्नात्यथाश्नाति। पञ्चाहं नाश्नात्यथाश्नाति। षडहं नाश्नात्यथाश्नाति। तिस्र उपसदस्त्रिःश्रत्संपद्यन्ते। त्रिःश्रदक्षरा विराडन्नं विराड्विराजैवान्नाद्यमवरुन्द्धे। अथ य एकादश स्तन एवास्ये स। दुह एवैनां तेनाथ य एकत्रिःश्र स्तन एवास्ये स। दुह एवैनां तेन। स उपसत्साज्यव्रतो भवति। श्रीतस्य सर्विषस्त्रिभिरङ्गुलीभिरुपहन्त्यथ द्वाभ्यामथैकया। श्रीतस्य वै सर्पिषस्त्रिभिः पर्वभिरुपहन्त्यथ द्वाभ्यामथैकेन। विलीने वा सर्पिषि चीणि परूःश्यवदधात्यथ द्वे अथैकं चिस्तनद्विस्तनैकस्तनव्रतस्य रूपाणि कुर्वन्न नादित्याद्दिवा पर्यावर्तते नाग्नेरधि नक्तमौदुम्बरः सोमचमस आत्मन्त्स्वयंब्रह्मा चिवेदाः स गोचः॥ ३२॥

सप्तदश स्तोमो भवति। सप्तदशः प्रजापतिः। प्रजापतिमन्नाद्यं नोपानमत्तं देवा ऋतसत्याभ्यामन्वैषुः। स यदश्नाति यदेवाग्नेनावरुद्धं तस्यावरुद्ध्या इति तदथ यन्नाश्नाति यदेवानग्नेनावरुद्धं तस्यावरुद्ध्या इति तदथ यदुपसत्साज्यव्रतो भवत्येतद्वै देवानां प्रियं धाम यदाज्यं। देवानामेव प्रियं धामावरुन्द्ध इति तदथ यन्नादित्याद्दिवा पर्यावर्तते नाग्नेरधि

---

१ °पद्यते Be 7 BD ; °पद्यंते M Be U.

२ Thus M ; विलीनस्य the other MSS.

३ Thus M, विलीनस्य वैव Be U ; विलीनस्यैव Be 7 D ; विलीनस्य वै B.

४ ब्रह्म M.

५ Thus M B U ; चिवेदः Be Be 7 D.

६ °मन्वैषुः all the MSS. exc. Be which has . °मनैषुः ।

नक्तमेते वै देवानामृतसत्रे । नेद्देवानामृतसत्रे पृष्टतः करवाणीति तदाह यदौदुम्बरो भवत्यूर्वा अन्नाद्यमुदुम्बर । ऊर्ज एवान्नाद्यस्यावरुद्ध्या इति तदाह यत्सोमचमसो भवत्येतद्वै देवानां परममन्नं यत्सोमः । परमेणैवास्मा अन्नाद्येनावरमन्नाद्यमवरुन्द्ध इति तदाह यच्चतुःस्रक्तिर्भवति यदेव दिशो ऽन्नाद्यं प्राविशत्तस्यावरुद्ध्या इति तदाह यत्त्रिवेदा[1] भवति न ह्येतामेकवेदा दक्षिणामुद्यन्तुमर्हतीति तदाह यत्सगोत्रो भवत्यात्मा वै सगोत्र आत्मन्नेव यज्ञस्य यशो ऽन्नाद्यं प्रतिष्ठापयानीति तत् ॥ ३३ ॥

तं माध्यंदिनीयैश्चमसैः सहोन्नीय जुह्वति । तस्मत्त्विजो ऽहतं दक्षिणानां काले ब्रह्मण उपातिदिशन्ति । तं ब्रह्मणः सन्तं[2] पर्युपविश्य भक्षयन्ति यदृतं मन्यन्ते तेन । यदृतेन भक्षयन्ति तदृतपेयस्यर्तपेयत्वं ॥ दिशो ऽकामयन्तान्नाद्यः स्यामान्नाद्यमवरुन्धीमह्यन्नाद्यमस्मासु प्रतितिष्ठेदिति । ता एतं यज्ञक्रतुमपश्यन्तमाहरन्नेनायजन्त । ततो वै ता अन्नाद्यो ऽभवन्नाद्यमवारुन्धतान्नाद्यमासु अत्यतिष्ठद्यः कामयेतान्नादो मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति स एतेन यज्ञक्रतुना यजेतान्नाद्येवास्य प्रजा भवत्यन्नाद्यमवरुन्द्धे ऽन्नाद्यमस्यां प्रतितिष्ठति । तस्य चतसृषु बर्हिष्यवमानो[3] ऽष्टास्वष्टास्वाज्यानि[3]

---

१ त्रिवेदो M

२ Thus corrected according to the Karmānta. सन्तं all the MSS.

३ °मानोष्टाष्टान्याज्यानि M, °मानोष्टाष्टाज्यानि Bc, °मानमष्टास्वाज्यानि B Bc 7 UD; cp. supra XV, 18 (p. 222, 12).

द्वादशो माध्यंदिनः पवमानः षोडशानि पृष्ठानि सविꣳशꣳ[१] आर्भवः पवमानश्चतुर्विꣳशमग्निष्टोमसाम। तं दिशां चतुष्टोम इत्याचक्षते॥ छन्दाꣳस्यकामयन्त यज्ञो ऽस्रुवीमहि यज्ञो ऽवरुन्धीमहि यज्ञो ऽस्मासु प्रतितिष्ठेदिति। तान्येतं यज्ञक्रतु-
५ मपश्यन्तमाहरन्तेनायजन्त। ततो वै तानि यज्ञो ऽस्रुवत यज्ञो ऽवारुन्धत यज्ञ एषु प्रत्यतिष्ठद्यः कामयेत यज्ञो ऽस्रुवीय यज्ञो ऽवरुन्धीय यज्ञो मयि प्रतितिष्ठेदिति स एतेन यज्ञक्रतुना यजेत। यज्ञ एवाश्नुते यज्ञो ऽवरुद्धे यज्ञो ऽस्मिन्प्रतितिष्ठति। तस्य स्तोमा असुवतैकस्तोमय तिसृष्वेकस्तोमय तिसृषु। तमेतं
१० छन्दसामेकचिक इत्याचक्षते॥ स्तोमा अकामयन्तेति समानः परिवादस्तोस्य[२] स्तोमास्त्रिवृदथ चयः पञ्चदशास्त्रिवृदथ चयः सप्तदशास्त्रिवृदथ चय एकविꣳशास्तमेतꣳ स्तोमानामेकचिक[३] इत्याचक्षते॥ ॥ ३४ ॥

इन्द्राग्नी वा अकामयेताꣳ समानलोकौ स्याव समानं
१५ लोकमियावेति। तावेतं यज्ञक्रतुमपश्यतां। तमाहरतां। तेना-यजेतां। ततो वै तौ समानलोकावभवताꣳ समानं लोकमैताꣳ समानलोकावयथ[४] यौ कामयेताꣳ राजा च पुरोहितश्च

---

१ Thus all the MSS (only संविंश D); in Be 7 स has been cancelled.

२ परीवाद॰ M.

३ Thus MD Be 7; एकंचिक BU, एकचिंश Be

४ Thus M; °लोकावयज Be 7 BUD, °लोकावयद्व Be.

समानलोकौ स्याव समानं लोकमियावेति तावेतेन यज्ञक्रतुना यजेयाताꣳ[१] समानलोकावेव भवतः समानं लोकमितो ऽस्वरयो यज्ञायुधः प्रासङ्ग्यग्रसः सा ब्राह्मणस्य दक्षिणाश्वतरीरथः सर्वायुधो ऽप्रासङ्गः काꣳस्यस्रुणीवन्धः[२] सा राजन्यस्य दक्षिणा । तस्य चित्पत्यङ्दग्नौ विपर्यासꣳ स्तोमौ भवतस्तिष्टुदेव ब्राह्मणस्य पङ्क्तदग्नो राजन्यस्य । तमेतमिन्द्राग्नियोः कुल्लाय इत्याचक्षत । एष एव सन्धितापुचीय एष सख्योर्यज्ञ एष भ्रात्रोः ॥ ३५ ॥ नवमः ॥

अभिचरणीयैः सोमैर्यज्यमाणो भवति । स द्वयानि यज्ञायुधान्युपकल्पयते बाधकानि च तैल्वकानि च श्वानसो[३] ऽधिषवणे फलके पुरुषास्थस्य[४] वृषणौ । स यत्राँध्वर्युरुपाꣳशुं ग्रहीष्यन्नाजानमभिषुणोति तस्य यो ऽꣳशुः परापतति तमेतस्मिन्यत्र आधायोपसंगृह्याथाहासुं जुह्वय त्वा होष्यामीत्यां तमिनोराखे । ऽथैतं भङ्गमाहवनीये ऽनुप्रहरतीदमहममुमामुष्यायणं परिप्लुना[५] भङ्गेन[५] विध्यामीत्यत्र यं यजमानो द्वेष्टि

---

१ यजेतां all exc. M.

२ °तूणीबंधः Be, °तूणिबंधः U, तूणीबंधः M, °तूणिबंधः B, त्रीणिबंधः Be 7 D

३ Thus M Be; श्वनभ्ये Be 7 D (cp Āp. XXII. 4. 17, Śānkh. XIV. 22. 18, Ṣaḍv. br. III. 8), श्वाननभ्ये U. श्वाननभोग्यो B, cp. the Dvaidhasūtra.

४ Thus M, all the other MSS. corrupt

५ Thus M, परिप्लुनासङ्गेन Be U B परिप्लानाभंगेन Be 7 D.

तं मनसा ध्यायत्यथैतत्पात्रं खरे यथायतनꣳ सादयत्यसुष्य त्वा प्राणे सादयामीति। स यं कं च यज्ञं गच्छत्येवमेवैनं गच्छति। यदु[1] किं[1] च[1] पात्रꣳ सादयत्येवमेवैनत्सादयति। स एष चिदग्निष्टोम एकस्तोम[2] एकहविर्धानस्तꣳ श्येन इत्याचक्षते॥ ऽथेषुः[3]। समानमभिचरणीयꣳ शिल्पं। तिसृषुतिसृषु[4] स्रुवते। ५ रथो हविर्धानमथ संदꣳशः। समानमभिचरणीयꣳ शिल्पं। द्वौ चयस्त्रिꣳशौ मध्यत स्तोमौ भवतो। द्वे[5] हविर्धाने॥ अथेन्द्रवज्रः। समानमभिचरणीयꣳ शिल्पं। पञ्चदश एष भवति॥ ॥ ३६ ॥

दुरग्नेन[6] यज्यमाणो भवति। स उपकल्पयते षष्टिꣳ १० शतमानानि हिरण्यानि त्रिꣳशतꣳ सुवर्णानि त्रिꣳशतꣳ रजतानि[7] बक्नयद्धिरण्यꣳ। स आमावास्येन हविषेष्ट्वा सौर्यं चरुं निर्वपति। तस्मिन्सुवर्णꣳ शतमानं ददात्यथ साद्यꣳ क्रते ऽग्निहोत्रे चान्द्रमसं चरुं निर्वपति। तस्मिन्रजतꣳ[8] शतमानं ददाति। स एवमेवैताभ्यामिष्टिभ्यामहरहर्यजमानो मासमेत्यथ १५ दीक्षते। दीक्षणीयायां द्वादशमानꣳ हिरण्यं ददाति।

---

१ यत्किंच M.

२ This word twice in Be 7 B U D.

३ Thus M only; येषु all the other MSS

४ तिसृषु once in M, which adds also य after स्रुवते।

५ द्वेद्वे M.

६ Thus M U B Be, दुराग्नेन D; दुराश्येन Be 7.

७ राजत० M.

प्रायणीयायां चतुर्विꣳशतिमानं ददात्यातिथ्यायां द्वे[१] चतुर्विꣳशतिमाने[१] ददाति[१] । प्रथमायामुपसदि चत्वारि ददाति । द्वितीयस्यामुपसद्यष्टौ ददाति । तृतीयस्यामुपसदि षोडश ददाति । चतुर्थ्यामुपसदि द्वाचिꣳशतं[२] ददाति । पञ्चम्यामुपसदि चतुःषष्टिं ददाति । षष्ठ्यामुपसद्यष्टाविꣳशꣳ शतं चतुर्विꣳशतिमानानां[३] ददात्यथातः शतसंख्येवाग्नीषोमीयस्य ऊत्र्यायां वपायां द्वे शते ददात्याग्नेयस्य ऊतायां वपायां चत्वारि ददाति । प्रातःसवनीयेष्वष्टौ[४] ददाति । माध्यंदिनीयेषु षोडश ददाति । दक्षिणानां काले द्वाचिꣳशतं ददाति । तृतीयसवनीयेषु चतुःषष्टिं ददात्यनूबन्ध्यस्य ऊतायां वपायामष्टाविꣳशꣳ शतानां[५] ददाति । स यदेताभ्यामिष्टिभ्यामहरहर्यजते सूर्याचन्द्रमसोरेव तत्सायुज्यꣳ सलोकतामाप्नोति ॥ ३७ ॥

[६]अथ यद्धिरण्यदक्षिणो[७] भवति हिरण्मयमेव तद्यजमान

---

१ Thus M; चिꣳशतिमानं ददात्यथ Be B; in the other MSS. this passage is missing

२ Thus M U; चिꣳशतं Be; in the other MSS. this passage is missing.

३ Thus M; ॰शतिमानं the other MSS.

४ ॰सवनीयेष्टौ Be 7 D.

५ Thus M Be 7; शतमानानां Be B U.

६ During the printing I was so happy as to obtain, for the remaining part of this praśna, from Mr. Muthu Dikshitar of Lalgudi (Manakkāl, Madras) a copy (designed by me as L) from a MS. in his possession. This MS. is in Grantha and independent from my MSS., but, on the whole, not much better.

७ Thus M; यद्धिरण्यं दक्षिणा the other MSS.

आत्मानꣳ सꣳस्कुरुते। तस्य यदूर्ध्वं नाभेस्तदुदर्णमवाङ्[1] रजतं। यदा ह वै हिरण्मयो भवत्यथामृतो भवति। हिरण्मया ह वै देवास्तस्मात्ते ऽमृताः। सप्तदशस्तोमो भवति। सप्तदशः प्रजापतिः। प्रजापतेराप्त्या। उभे सामनी भवतश्छन्दोमयावेतत्यचौ[2] यजमान आत्मानꣳ सꣳस्कुरुत। एतस्य लोकस्य ५
जित्यै। स यदेतेन[3] यज्ञक्रतुना यजते सूर्याचन्द्रमसोरेव तत्सायुज्यꣳ सलोकतां जयति। तेन दुरग्नो। दुरग्न इव ह्येतयोर्देवतयोर्लोको॥ ऽथ दुर्णाम्नेन[4] यज्यमाणो भवति। स उपकल्पयते ऽनड्वुच्चं च चयस्त्रिꣳशत[5] च निष्काꣳस्तेन हैतेनानड्वहो लोकं जयति। तेन हैतेन ज्योतिष्मन्तं लोकं जयति। १०
तेन हैतेन ज्योतिषो ऽधि स्वर्गं लोकं जयति। सप्तदशस्तोमो भवति। सप्तदशः प्रजापतिः। प्रजापतेराप्त्या। उभे सामनी भवतश्छन्दोमयावैवैतत्यचौ[6] यजमान आत्मानꣳ सꣳस्कुरुत। एतस्य लोकस्य जित्यै। स यदेतेन यज्ञक्रतुनेष्ट्वा न नश्यति तेन

---

१ Instead of अवाङ् (thus M Be B U) Be 7 D : अधो; अर्वा L.

२ Thus Be B; °मयावेवतत्यचौ M; °मयावेनतत्तृतीयेपचौ L; the other MSS. deficient.— Here and infra (l. 13) Be after °पचौ ins. तृतीये पत्ते।

३ यद् only given by M.

४ दुर्ण° or दुर्न° all MSS. exc. M L which have here and infra each time दूर्ण°।

५ चयस्त्रिꣳशां M.

६ Thus Be, °मयावेवतत्यचौ M L; °मयायैवतत्यचौ the other MSS.

दुर्णाग्रस्तंदुर्णाग्रस्य[१] दुर्णाग्रत्वं[२] ॥ केशी ह दाल्भ्यो ऽपचिति-कामो ऽपचितिनेजे न[३] नो[३] नामानि[३] परिहरन्ता[४] इति । ततो ह वा एतत्पञ्चालराजानां[५] नामानि परिहरन्ते[६] ॥ ३८ ॥

ग्रीर्षण्या इति केशानाचक्षते । कुग्रा इति दर्भाञ्चया-
५ वितिं[७] गैरेयकविमत्यौ[८] । ततो वै सो ऽपचितिमानभवद्यः कामयेतापचितिमान्स्यामिति स एतेन यज्ञक्रतुना यजेतापचितिमानेव[९] भवति । तस्य चतुर्विंशो बहिष्पवमानस्तिवृत्पञ्चदशान्याज्यानि । तास्तिस्रो गायत्र्यस्तुर्विंशो माध्यंदिनः पवमानः पञ्चदशसप्तदशानि[१०] पृष्ठानि । ते द्वे त्रिष्टुभौ । त्रिणव
१० आर्भवः पवमान एकविंशमग्निष्टोमसाम । सैका जगत्येतानि वै छन्दसामपचिततमान्यपचितिमानेव भवति य एवं वेदासावादित्यो ऽकामयत त्विषिमान्स्यामिति । स एतं यज्ञक्रतु-

---

१ दुर्नग्र० Be, दूर्णाग्र० M L ; the other MSS om.

२ Most of the MSS. दुर्णग्र० or दूर्णाग्र० (both times).

३ Thus M; L om. नो; तंननामानि Be, तन्नोनामानी Be 7 U D; तंनोनामनी B.

४ Thus M Be 7 D; ०हरंत Be B U L.

५ Thus M; ०पांचाल०. the other MSS.

६ Thus M Be L; ०हरंत्या Be 7 D U; ०हरत्या B.

७ Uncertain; दर्भानद्यावितिं M; दर्भान्नद्यावितिं L; दर्भानविद्यावितिं Be B.

८ Uncertain reading, गैरेयकविमंथौ (or मेथौ?) M; गैरेयकविमत्यौ Be 7; गौरेयकविमत्यौ Be B; गेरेय० D; गैरयकचितिमत्यौ L

९ Thus M L; एषु instead of एव all the other MSS.

१० Thus M Be U, पंचदशःसप्त० B L, Be 7 om. पंचदश ।

मपश्यत्तमाहरत्तेनायजत। ततो वै स त्विषिमानभवद्यः कामयेत त्विषिमान्स्यामिति स एतेन यज्ञक्रतुना यजेत। त्विषिमानेव भवति। तस्य[1] सौर्यो ऽतिग्राह्यः। सौर्यः[2] पशुरुपालम्भ्य। एकविꣳश एष भवति॥ ॥ ३९ ॥ दशमः ॥

इन्द्रो ऽकामयतर्षभ इव पशूनामैश्वर्यमाधिपत्यꣳ राज्यं देवानां परीयामिति। स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत। ततो वै स ऋषभ इव पशूनामैश्वर्यमाधिपत्यꣳ राज्यं देवानां पर्यैद्यः। कामयेतर्षभ इव पशूनामैश्वर्यमाधिपत्यꣳ राज्यꣳ समानानां परीयामिति स एतेन यज्ञक्रतुना यजेतर्षभ इव पशूनामैश्वर्यमाधिपत्यꣳ राज्यꣳ समानानां पर्येति। तस्यातिग्राह्यो वृषा सो अꣳशुः पवते ह्विष्मान्सोम इन्द्रस्य भाग ऋतयुः प्रतायुः। स मा वृषाणं वृषभं कृणोतु प्रियं विशाꣳ सर्ववीरꣳ सुवीरमुपयामगृहीतो ऽसीन्द्राय वृषभाय जुष्टं गृह्णामीति। परिस्तृज्य सादयत्येष ते योनिरिन्द्राय वृषभायेति। तस्य पञ्चदशस्य सत एकविꣳशꣳ होतुः पृष्ठं ककुदो[3] रूपमिन्द्रेण ह स्म वै पूर्वे समाजिगमिषन्तो वनिष्ठुसवेन यजन्ते[4] तन्नो[5] न[5] इन्द्र[5] आविर्भविष्यति तस्मै[5] कामान्वक्ष्याम

---

१ तस्याः Be 7 D.

२ om. all MSS. exc. M L Be.— After the tenth adhyāya M breaks off.

३ ककुभो L.

४ Thus Be L; यजंतेसुपैतमिंद्र Be 7; यजंत उपतानिद्र B; यजत उपैतानिंद्र U; यजंतेसुपैतान इंद्र D.

५ तस्मात् MSS. exc. L which has तस्मिन्।

इति[1] वदन्तो[1] वनिष्ठुसवेन यक्ष्यमाणो भवति[1] स उपकल्पयते घृतमुच्चवेहतः[2] घृतं दार्वाचितानि घृतꣳ सर्पिष्याचाञ्कृतं पयः-पाचाञ्कृतं दधिपाचाञ्कृतं वसापाचानौदुम्बरीं नावमुभयतो-ऽभिपतनां[3] परिगृह्णीतामथ प्रणेतृनेतेनोपकल्पेन चिचामा-यंतीमुपरमत्यूद्य चित्रयेति पूर्वाग्निमन्ववस्थत्युत्तपनीयꣳ शालीनो ऽन्वाहार्यपचनमाहिताग्निरथैतानि दार्वाचितानि प्रद्योष एवाग्नावादधाति[4][1] तेषु[5] प्रद्योतिषूच्चवेहतो[5] निघ्नन्त्यथैषामभ्य-र्धान्वनिष्ठून्मेदाꣳसीति[6] अपयन्त्यथोदित आदित्य आयात-यत्यौदुम्बरीं[6] नावमुभयतोऽभिपतनां[7] परिगृह्णीतां प्रणेतृभि-स्तस्यामुपस्तृणीते पञ्चाग्नता सर्पिष्याचैः पञ्चाग्नता पयःपाचैः पञ्चाग्नता दधिपाचैः पञ्चाग्नता वसापाचैस्तस्यां वनिष्ठून्मेदाꣳ-सीति संप्रकीर्यायाभिघारयति पञ्चाग्नता वसापाचैः पञ्चाग्नता दधिपाचैः पञ्चाग्नता पयःपाचैः पञ्चाग्नता सर्पिष्याचैरथ पुरोऽनुवाक्यामन्वाह ॥ ४० ॥

---

१ Thus Be L; वक्ष्यामीति Be 7 B U D.

२ Thus L; °मुच्चवैगतः Be 7 D; °मुच्चवेनिहतान् Be B U.

३ Uncertain reading; उभयतोपतनां Be 7 B; उभयतोभिपतनां Be U; उभयतोवतानां (or °वतारां) D; उभयतोभिपवमानं L.

४ °दधति L.

५ तेन प्रद्योतिषू एवहतोनिघ्नन्ति L; तेषु प्रद्योतिष्ठं (or ष्ठ)च्चवैहतो घ्नंत्य° Be 7 D; तेन प्रद्योतिषुहवेहतांनिघ्नंत्य Be B U. अभ्यर्धाद् i. s. o. अभ्यर्धान् L.

६ Uncertain r, अयातयत्य° U B. अयापयत्य° D. अधापयत्य° Be 7. अयाभीतयत्य° B, आधारयति L.

७ °पतामां B. °वतानां Be 7. °भिपतनां Be U. °सुभयतस्त्वभिपतनां L.

इन्द्रो यातो ऽवसितस्य राजा शमस्य च शृङ्गिनो वज्रबाहुः। सेदु राजा क्षयति[1] चर्षणीनामरान्न नेमिः परि ता बभूवेति[1] यजतीन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति। ततो ददातु दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् स्याहेति[1] ब्रह्म एवास्मा इन्द्र आविर्भवति[1] ५
तस्मै[2] कामान्वृणते[11] कानान्य[3]ꣳ ह[3] वाश्वꣳ ह हस्तिराङ्गिरसो याजयां चकार[1], तस्य होपवसथीये ऽहन्[4]क्रुद्धा[4] वीयाय[4][1] स होवाचाध्वर्यो[5] वि[5] वै[5] मे श्रद्धागात्सं मे यज्ञ[ꣳ] स्रापयेति[1] तꣳ होवाचान्यद्वै तदुपवसथः[6] श्वस्ते यज्ञः स[ꣳ]स्रातेति[7][1] स होवाच समेव मे स्रापयेति[1] तस्य[8] ह तावद्विदिलाग्रेण[9] हविर्धाने १०

---

१ क्षेति (as TBr. II. 8. 4. 3) Be B D U, क्षयति (as RV. I. 32. 15) Be 7.

२ तस्मिन् Be L.

३ Corrected; कामानाह B U Be (pr. m.); कामानार्दह Be 7; कामानार्दहं D; कानीयवांह Be (sec. m.); कनीयवान्हय L.

४ My conjecture; हन्श्रद्धाविधाय B U L; हन्श्रद्धाविधाय Be; हन्पंचाद्पिधाय Be 7 D.

५ Thus Be; all the other MSS. corrupt.

६ Uncertain r.; होवाचान्यद्वैतदु॰ Be 7 D; होवाचाध्वर्यवेतदु॰ Be B U, होवाच कर्ध्वयवेत उप॰ L.

७ ॰स्रातेति Be B U; ॰स्रादेति Be 7 D, ॰स्रायेति L.

८ तस्या MSS. exc. L.

९ तावद् only in Be (sec. m.); भवद् L; instead of विदिला (thus L Be) विर्दिला the other MSS.

चर्मण्युलूखलमुसले निधायाꣳशून्समवचुदां[1] चकार[1] यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे। इह द्युमत्तमं वद जयतामिव दुन्दुभिरित्यथ होढ्चमसे वसतीवरीभ्यो ऽध्वर्यो[2] निःषिच्य समुदायुत्य जुहवां चकार यथा जना सꣳस्रवे व्रतानि[3] को-
५ व्रतिनां[4] व्रतमालोभयाति[5]। कानान्वस्य[6] प्रस्थितं[7] वाध्यश्वस्य[8] तीव्रसुतꣳ श्रवदिन्द्रं[9] जुषस्व स्वाहेति[10] स एष उन्मत्तस्य वा वीतश्रद्धस्य वा[11] नीतस्य[11] वा यज्ञः[10] सा[12] यदागता[12] स्यादथ चतुष्टोमेनाग्निष्टोमेन यजेत पुरा भेषाच्छान्त्यै[13] ॥ ४१ ॥

मनुर्वैवस्वतो ऽकामयत प्रजाꣳ सृजेय प्रजामवरुन्धीय
१० प्रजां विन्देया[13] मा[12] प्रजया पशोरन्निति[12][10] स एतं

---

१ °समवभूयाश्चकार L.

२ अपो only in Be L.

३ इतानि MSS. exc. L: व्रतानि।—जनासस्रुषे L.

४ व्रतिनां Be; व्रतीनꣳ L; इतीनां the other MSS.

५ व्रतमालोभयाति Be, °यति L; व्रतमामालोपयति the other MSS.

६ Thus Be L; the other MSS. corrupt.

७ प्रस्थितं all exc. Be which has प्रस्थितं।

८ वाध्र्याश्वस्रीष्टसुतं Be B; वाध्यश्वःस्रीष्टसुतं U, वाध्यश्वेडीष्टसुत Be 7, वाध्यश्वेडीष्टसुत D, वार्ध्याश्वस्रिष्टसुतं L.

९ श्रवदिंद्रां Be 7 D; सिंद्रवदिंद्रा Be. निवपतींद्रा B, निवपंतींद्रा U; निवदिन्द्रो L.

१० Thus Be L, वतितस्य BUD, वक्ततस्य Be 7.

११ स MSS.

१२ यदागत Be L; यदागन्ना B Be 7 DU.

१३ Conjecturally. विन्देय सा प्रजयाचचौरन्निति BU. विदेयँ साप्रजमाच° Be. विंदेय साप्रजयाचचरंतीति Be 7 D, विन्देयप्रजयाचचौ° L

यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत[1] ततो वै स •प्रजामसृजत प्रजामवारुन्द्ध प्रजामविन्दतैनं प्रजयाचचत[1] यः कामयेत प्रजाꣳ सृजेय प्रजामवरुन्धीय प्रजां विन्देया[2] मा प्रजया चचीरन्निति[2] स एतेन यज्ञक्रतुना यजेत[1] प्रजामेव सृजते प्रजामवरुन्द्धे प्रजां विन्दत[3] ऐनं[3] प्रजया चचते[1] तस्य[4] प्राचीन- स्तोमास्त्रयस्त्रिवृतस्त्रयः पञ्चदशास्त्रयः सप्तदशास्त्रय एकविꣳशाः॥ सो ऽकामयतान्नादो मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति[1] स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत[1] ततो वै तस्यान्नादो प्रजाभवदन्नाद्यमवारुन्द्धान्नाद्यमस्यां प्रत्यतिष्ठद्यः कामयेतान्नादो मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति स एतेन यज्ञक्रतुना यजेतान्नाद्येवास्य प्रजा भवत्यन्नाद्यमवरुन्द्धे ऽन्नाद्यमस्यां प्रतितिष्ठति[1] तस्य दश स्तोमा[1] दशसुदशसु स्तुवते विराजो रूपं॥ वागाम्भृण्यकामयतापरि- मितं यशो ऽश्नुवीयेति[1] सैतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत[1] ततो वै सापरिमितं यश आश्नुत[1] यः कामयेतापरिमितं यशो ऽश्नुवीयेति स एतेन यज्ञक्रतुना यजेतापरिमितमेव यशो

---

१ •चचते all exc. Be L.

२ विंदेय मा प्रजामाचचरंनिति Be D; विंदेय प्रजयाचचरंतीति B Be 7 U विन्देय मा प्रजामाचचीरन्निति L.

३ Thus corrected; विंदत एवं Be L; विंदैतैनं the other MSS.

४ Only in Be L.

ऽश्नुते । तस्य दशसु वह्निष्यवमानः शते सहस्रे ऽयुते प्रयुते ऽर्बुदे न्यर्बुदे समुद्रे मध्ये ऽन्ते परार्धे ॥ ४२ ॥

यमो वैवस्वतो ऽकामयत पितृणामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति । स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत । ततो वै स पितृणामैश्वर्यमाधिपत्यꣳ राज्यं पर्यैद्यः कामयेत समानानामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति स एतेन यज्ञक्रतुना यजेत । समानानामैश्वर्यमाधिपत्यꣳ राज्यं पर्येति । तस्य शते वह्निष्यवमानः सहस्रे ऽयुते नियुते प्रयुते ऽर्बुदे न्यर्बुदे समुद्रे मध्ये ऽन्ते परार्धे पद्मे पद्मे । नित्यमुक्ता मनसैव स्तुवानो मन्यत एतावति[१] मे[१] स्तुतमित्यथ[१] सकृत्प्रवर्ग्यं । आतिथ्येन प्रचर्य गार्हपत्ये प्रवर्ग्यं प्रहृणक्ति । तेनाहवनीये प्रचरति । तं काल उद्दासयति । शिरो वा एतद्यज्ञस्य यदातिथ्यं । यग्नः प्रवर्ग्यः । ग्रीवास्वेव यज्ञस्य यज्ञो दधातीति नु सकृत्प्रवर्ग्यो । ऽथ सुते प्रवर्ग्यः । पवमानेन चरित्वाग्नीध्रे[२] प्रवर्ग्यं प्रहृणक्ति । तेनाहवनीय एव प्रचरति । तं तदानीमेवोद्दासयति । शिरो वा एतद्यज्ञस्य यत्पवमानो । यग्नः प्रवर्ग्यः । ग्रीवास्वेव यज्ञस्य यज्ञो दधातीति नु सुत्याप्रवर्ग्यो । ऽथ सकृत्प्रवर्ग्यो । ऽथ सुते प्रवर्ग्यो । ऽथ सुत्याप्रवर्ग्यः[३] ॥ ४३ ॥ एकादशः ॥

---

१ Uncertain r.; एतावतीमेस्तुतमित्यथ Be, एतावन्ति मे स्तुत० L; एतावती (ति) मेत्यथ the other MSS.

२ MSS exc L ins. वै ।

३ The close of this chapter must contain several corruptions.

[1]पुरूरवा ह पुरा ऐडो राजा कन्याण आस[1] तꣳ होर्वश्यप्सराभिदध्यौ[1] तꣳ संवत्सरं कामयमानानुचचारै[1] वꣳ ह स्म वै[2] पूर्वे ऽभिश्राम्यन्ति[1] तद्धातिचिरं मेने[1] तस्य ह धावतः पुरो रथं कर्तं दर्शयामास[1] तꣳ ह दृष्ट्वा राजावतस्थौ[1] तꣳ ह्यवस्थाय न ददर्शाथो ह पुनरातस्थौ[1] तꣳ ह्यस्थायैव ददर्श[1] स ह सारथिं पप्रच्छ सारथे किं पश्यसीति[1] त्वां भगव इति होवाच रथमश्वान्यन्थानमिति[1] स हेक्षां चक्रे दृष्यामि वै किलेति[1] तꣳ ह वाग्भ्युवाच न वै दृष्यस्यहं वै त्वामेतं[3] कर्तमदीदृशमित्यथ कस्त्वमित्यहमुर्वश्यप्सरेति होवाच[1] सा त्वा संवत्सरं कामयमानान्वचारिषं[1] तां मा जायां विन्दस्वेति[4][1] दुरुपचारा ह वै भवति[5] देवा[5] इति[5] होवाच[1] का तं[6] उप- चर्येति[6][1] घृतं[7] ममोपसदः[7] स्यु:[7][1] घृतꣳघृतं मा सर्पिष्कुम्भा

---

१ This and the following adhyāyas are found also in a badly corrupted tradition. I did not note all the various readings nor all my emendations; the list of them would fill more space than the text itself.

२ Thus L only; चैव or ह्येव the other MSS.

३ त्वयितं or त्वयितम॰ MSS.

४ L Be sec. m. विन्दस्वेति।

५ Thus L U Be 7; भवंति देवा इति B Be (pr.m.); भगवती देवीति Be (sec. m.).

६ Thus L Be (sec. m.); तवाचार्येति the other MSS.

७ Instead of these three words given thus by Be and L (which only gives म instead of मम), the other MSS.: तं ज्ञानीमसदस्यु or तंज्ञानीय इति सदस्य।

अहरहरागच्छेयुस्तदाग्नना स्यां । न त्वा नग्नं पश्येयमिति । सर्वमेवैतद्भगवति सुकरमिति होवाच । कथा त्वपि[1] जाया पतिं नग्नं न पश्यतीत्यन्तर्वासं वसीथा[2] इति होवाचानग्नो भवेति[3] । तथा सहोवासान्तर्वासं वसानः । सा ह स्म जाता-
५ ञ्ज्ञातानेव पुत्रानपविध्यति । तान् ह राजोवाच पुत्रकामा ह वै भगवति वयं मनुष्याः स्मो जाताञ्ज्ञातानु त्वमपविध्यसीति । सा होवाच पर्यवेतरात्रयो भवन्ति क्षीणायुषो ऽन्ये । भूयः प्रियं करवावहा इति । सायुं[4] चामावसुं च जनयां चकार । सा होवाचेमौ विभृतेमौ[5] सर्वमायुरेष्यत इति । प्राङायुः
१० प्रवव्राज । तस्यैते कुरुपञ्चालाः[6] काशिविदेहा इत्येतदायवं प्रव्राजं । प्रत्यङमावसुस्तस्यैते गान्धारय[7] स्सृञ्जयो ऽराट्टा इत्येतदामावसवम्[8] । ॥ ४४ ॥

अथो ह्यस्या एषा पूर्वचित्तिरपरा स्वसा बभूव । सा हेचां चक्रे ज्योग् वै मे स्वसा मनुष्येष्ववात्सीद्धन्तैनामच्छाया-

---

१ त्वयि L, त्वयि the other MSS.

२ वसीथा L Be (sec. m.) वासीत्याह the other MSS.

३ भवति MSS. exc. L, which has वेन ह वासनो भवतीति ।

४ प्रायुं Be (sec. m.).

५ निश्चवे° Be L ; the other MSS. om. these words.

६ °पांचालाः L B.

७ The proper names given acc. to Be (sec. m.), the other MSS. गांधारा (or री) पयस्यर्ग्वोदारा (or त्य) श्रा (or श्वा) ।

८ इत्येतन्मावसुम् or इत्येतन्मामवसुम् or इत्येतन्मामावसम् MSS.

नीति[1] तया सहागत्यैव संगमं न लेभे[1] अथो हास्या अविधूयमुपस्थापदासै[1]वꣳ[1] ह स्म वै पूर्वासां महिषीणाꣳ रूपं[2] भवति[1] तद्वत्करूपं कृत्वा प्रमाथं[3] चिकायाथो[4] हास्या उरणः चीरप आसन्दीपादे बद्ध आस[1] तꣳ सा प्रममाथ[1] तस्मिन्हि-यमाणे रुरुवे[5] ऽयमवीरज[6] इति[1] तच्छ्रुत्वा राजोत्पपात[1] ५ तामभ्यानग्न[7] तामभ्युपेयाय[1] तꣳ[8] सा[8] नकुली[8] भूत्वा प्रत्युपेयाय[1] तस्य हान्तर्वासमवलुलोपाथ ह सा विद्युतं जनयां चकार[9][1] [10]तꣳ सा विद्युति नग्नमनुचख्यावथो ह राजाजगामास्मारुहं वा अहमजीत उरणमत्यस्मारुहंहि नूनमिति[11] प्रत्यहं प्रजहिष्यामीति[1] किं व्यभूदिति[1] नग्नं १० लाद्गर्भमिति[12] होवाच[1] तस्यां प्रव्रजितायामप्रियविद्धः

---

१ Thus (only अपि० or अवा०) MSS.

२ Only in Be (sec. m.).

३ Thus Be L (sec. m.); प्रथं the other MSS.

४ विध्यायाथो Be (sec. m.); धिक्यायाथो or चिक्यायाथो or विध्यायाथो the other MSS.

५ रुवेमे Be (sec. m.); रूपेमे L; रूपे the other MSS.

६ Corrupt; यमवीरजा Be (sec. m.) L; यमविराजा the other MSS.

७ ०भ्यानरस MSS.

८ Conj.; तंकुली Be (sec. m.); तसंनेकुली the other MSS.

९ Thus L Be (sec. m.); जनयामास the other MSS.

१० Be 7 ins. साके चकार, B Be (orig.) ins सांचोवकार।

११ These corrupted words without any var. r. in all MSS.

१२ चाद्दर्भमिति MSS.

शोचꣳश्चाच[1] तꣳ होवाच बृहस्पतिराङ्गिरसो हन्त त्वा प्रदेन[2] याजयिष्याम्यापथि त्वा पुनर्जिन्विष्यामीति[3] तꣳ प्रदेन[4] बृहस्पतिराङ्गिरसो याजयां चकार ताꣳ ह्यवभृथादेवोदेत्य प्रतिददर्श ताꣳ ह पुत्रौ प्रतीत्योचतुरिह नौ नय यंच ते गतिर्बलिनौ[5] वां[5] पितरमशूशुच[5] इति सा[6] होवाच सं वां[7] पुत्रकौ जनेय साहमिह तिस्र एव रात्रीर्वत्स्यामि नो ब्राह्मणस्य वचो मोघमसदिति तया सह तिस्र[8] एव[8] रात्रीरुषित्वान्तर्वासं वसानस्तस्याꣳ रेतः सिषिचे[9] सा होवाच कथमिदꣳ स्यादिति कथꣳ हि नूनाꣳमिति[10] राजा प्रत्युवाच सा होवाच नवां कुम्भीमाहरेति तस्यामेनन्निःषिषेचाथ[11] ह कुरुचेचे बिसवत्यो[12] नाम पुष्करिण्यस्तासामुत्तरार्ध्यां सुवर्ण-

---

१ Conj.; शोभं चकार or चक्कार MSS.

२ दर्शने MSS.

३ °जिष्णिष्या° MSS.

४ प्रतेन MSS.

५ Thus Be (sec. m., only °शूशुच); °बलिचैनाम्पितरं शूशुच or बलिचेनामपित° the other MSS.

६ From सा unto होवाच (p. 399. 8) only in Be L.

७ वा Be.

८ om. Be.

९ cp. p. 399, n. 6.

१० नूनाचमिति L, नूनामिति the other MSS.

११ Thus L; तस्यामेनं° Be (sec. m.), तस्यामेषं the other MSS.

१२ विसवत्यो Be (sec m.), विवस्वत्येनाः the other MSS

भवनी[1] तस्यामेनञ्चिचखान[1] तदश्वत्थो जज्ञे ग्रम्या परिवृतो रेतसो ऽश्वत्थ आग्नयाच्छम्येवैव ग्रमीगर्भस्य सृष्टिरेतच्चिदान-मंथ[1] वै भवति सर्वेण[2] वै देवाः सुवर्गं लोकमायञ्चिति[1] स यच्च हैतद्यज्ञो देवेभ्यो ऽधि मनुष्यान्प्रत्यवरूरोहाश्वत्थ[3] हैव तत्प्रत्यवरूरोह[1] तस्यारणी चक्रिरे[4] ऽयं वाव स यज्ञ ५ इत्यथो खलु य एव कश्चाश्वत्थः[5] स ग्रमीगर्भः[1] स यदा-हैर्वश्यस्यायुरसि पुरूरवा इत्येतेषामेवैतत्पितापुत्राणां नामानि गच्छात्यथो सामान्यमेवैतदूहेत[6] तस्यां प्रव्रजितायां पुनरेवा-प्रियविद्धः[7] ग्रोचꣳश्चचार[1] तꣳ होवाच बृहस्पतिराङ्गिरसो हन्त त्वौपग्रदेन[8] याजयिष्यामि वि वै ते ऽप्रियमेवैष्यतीति[1] १० तमौपग्रदेन बृहस्पतिराङ्गिरसो याजयां चकार[1] ततो वै तस्याप्रियं[9] विनिनाय[1] तौ ह वा एतौ पौरूरवसौ नाम ग्रदौपग्रदौ[1] स यो वित्तꣳ सिषाधयिषेत्तꣳ ग्रदेन याजयेत्तस्य

---

१ ॰निधानमथ MSS exc. L.

२ cp. TS., I. 7. 1. 2.

३ ॰वरोहाश्वत्थं or ॰त्थ MSS.

४ चक्रिरे L Be (sec. m.); चक्रिरे the other MSS.

५ Thus L; खलु य एवाश्वत्थः Be (sec. m.); खल्वेवकश्च(स्य)श्वत्थः the other MSS.

६ Thus L; सामान्यमेवैत्यूहते Be (sec. m.), ॰मेवैत्य कहते the other MSS.

७-९ only in L Be (sec. m.)

८ त्वा om. MSS.

दशसु वह्निष्यवमान[1] एकैकोपशीयत[2] ऐकविꣳशत्यै[3] सुनोतीडैवाथ[3] यो ऽप्रियं विनिनीषेत्तमौपशदेन[4] याजयेत्तस्यैकविꣳशत्यां वह्निष्यवमान[1] एकैकावशीयत आ दशभ्यो[11] ऽथ प्राजापत्यौ नाम शदौपशदौ[1] तस्य तिसृषु वह्निष्यवमानस्तिस्र-
५ स्तिस्र उपशीयन्त आ षट्चिꣳशतः[1] षट्चिꣳशत्सु वह्निष्यवमानस्तिस्रस्तिस्रो ऽवशीयन्त आ तिसृभ्यो[11] ऽथ नैध्रुवस्य[5] कश्यपस्य शदौपशदौ[1] तस्य चतसृषु वह्निष्यवमानश्चतस्र-श्चतस्र उपशीयन्त आष्टाचत्वारिꣳशतो[1] ऽष्टाचत्वारिꣳशत्सु वह्निष्यवमानश्चतस्रश्चतस्रो ऽवशीयन्त आ चतसृभ्यः[11] ॥ ४५ ॥

१० **द्वादशः** ॥

देवासुरा ह यत्र महासंग्रामꣳ[6] संयेतिरे[7] तद्वेमानि[8] भूतानि द्वेधैव[9] व्यपचक्रमुर्देवानेवान्वन्यान्यसुरानेवान्वन्यानि[10]।

---

१ Thus L, एकैक उप० Be (sec. m); एकेनोप० the other MSS.

२ Corrected; एकविंशत्यौ L, एकविंशत्यै Be (sec. m.), एकविंशते (or नै)त्य the other MSS

३ सुनोति द्वैवाथ L; सुनोतीडैवाथ Be (sec. m); सुनोति एषाय the other MSS

४ Thus L; विनौर्निषे० Be (sec m.); वितौनिषे० or वितिनिषे० the other MSS.

५ ०ध्रुव L Be

६ महा० only in L and Be (sec. m).

७ सं only in Be (sec. m.); ग्र० L.

८ तवेमानि L and Be (sec. m.), तं धुमानि the other MSS

९ Thus L; द्वेधै Be; द्वैधै the other MSS

१० व्यपंच० L Be; व्यवच० the other MSS.

बृहस्पतिर्देवानां पुरोहित आसीदुशना[१] काव्योऽसुराणां ।
ब्रह्मण्वन्तो देवा आसन्ब्रह्मण्वन्तोऽसुरास्ते बहून्संग्रामान-
विजयमाना आसां चक्रिरे । तेषां न कतरे चन भविष्यदा-
जज्ञुर्गन्धर्वो[१०] ह वै सूर्यवर्चा भविष्यदाजज्ञे । तस्यो हेन्द्रो
जायायां[२] उपहास्य[२] आस । तां होवाचामुदिताङ्गि[३] त्वमिदं ५
गन्धर्वं पृच्छ किमर्थमिदं देवासुरा न विजयन्तीति । तं तथेति
होवाच त्वमपि श्व आगच्छतादिति । स ह्यन्तः समुद्रे
हिरण्मया[४] नावया सहजानि कुमार्यां[५] चक्रे । ऽथो हेन्द्र
आजगाम । स ह सौवर्णः पटरो भूत्वा नौमण्ड[६] उपश्लेष[७] ।
तं ह्यागतमेव विदित्वा[८] पप्रच्छामुदिताङ्ग[९] त्वमिदं ब्रूहि १०
किमर्थमिदं देवासुरा न विजयन्तीति । मोचैरिति होवाच
कर्णिनी वै नौराप[१०] इति । ब्रह्मण्वन्तो देवा इति होवाच
ब्रह्मण्वन्तोऽसुरा इति । तच्छुत्वेन्द्रो हरिशुकरूपं[११] कृत्वोत्पपात ।

---

१ Thus MSS.

२ Thus L and Be (sec. m.), which has, however, °हास्यमास ; याजयश्चाप उपहास्य आस the other MSS

३ °मुदितांगि or °तांचि MSS.

४ हिरण्मया MSS. exc. B.

५ Uncertain ; सहजनिकुमार्यां L ; r. सहजानिः ? cp. TS. III. 2. 8. 5.

६ नौर्मण्ड L ; नौर्मंडप Be (sec. m.) , नैर्मंड्ये the other MSS.

७ °श्लेष MSS. exc Be which has : °श्लेषे ।

८ विद्वा L.

९ °मुतांग L, Be (rightly ?) ; °मुदितांचि the other MSS.

१० Thus L ; नौरूप Be (sec. m.) ; नौराप the other MSS.

११ Emended ; हरिः शुकोरूप L ; हरिः शुक्ररूपं the other MSS.

स ह लघुरिवाचरदप्रतिष्ठितः[१] । स होवाच लघुरिव वा अस्म्यप्रतिष्ठितो[२] । हन्त मा याजयेति । तमेकविꣳशतिस्तोमेनाग्निष्टोमेन बृहस्पतिराङ्गिरसो याजयां चकार । ततो वै स प्रतितस्थावर्धो[३] हेन्द्रः[४] कामदुघा अवरुरुधे[५] । तꣳ ह सायमेतमुवाच प्रातरेतादिति । प्रातरेतमुवाच सायमेतादिति । स एवमेव संवत्सरं नेनीयामास । स होवाच प्रातरेतादिति । मा सायमात्थ सायमेतादिति । मा प्रातरात्थ को ऽयमेतः कतमो ऽयमेतो । यमेनमेतं[६] मघवन् ब्रवीषीति[७] होक्ता प्रवव्राजार्धो हेन्द्र उक्थानि कामदुघाश्चकार । ताꣳ ह स वरुणाय प्रददाविदं तव[८] मम[८] चेदमसुष्य[८] च नौ सहेति । बृहस्पतय आङ्गिरसायेदं नावाख्यास्ता विधारयानावहस्वेदमज्यसीति[९] विष्णवे शिपिविष्टाय चेत्येषैवोक्थानाꣳ

---

१ ॰चरद॰ only in L and Be

२ ॰वाक्षिनप्रति॰ Be, वा अस्मिनप्रति॰ L; ॰वलाप्रति॰ the other MSS.

३ Emended; प्रत्यतस्थानथो L; प्रत्यवस्थापयदथो the other MSS.

४ चेंद्रं MSS.

५ अभिरुरुधे L; अभिरुरोधे Be; आरुरोहे the other MSS.

६ यमेनमेतं (or ॰तत्) L Be, यमैवमेतरन् or यथमेवमेतरन् the other MSS.

७ Thus L; ब्रवीषि इति Be; ब्रवीति the other MSS.

८ तवचमस इदमसुष्य Be; तवचमसेवेदमसुष्य L; नौव (नावि) मम चेदसुष्य the other MSS

९ Thus (hopelessly corrupted as it seems) Be; नावास्थास्तद्विधारयाग्नावदहस्वेदमज्यमसीति L; नावास्थाचा (or ग्ना) पिधारयाथा (or द्या) पदस्वेदमंजयेति the other MSS.

सृष्टिरेतन्निदानमथो हास्यैव मनुर्वैवस्वतः शून्यमानः मन्स्खास[1] । तस्मै चतुर्थीं प्रददौ । ताꣳ सो ऽस्यां न्यदधात्सेयं[2] कृष्टिरेवैष[2] कृष्टेः[2] सृष्टिरेतन्निदानं । तौ ह वा एतावौशनसौ नाम पुनस्तोमौ भवतः । स यो गुरुरिव मन्येत गरमिव गीर्वाद्याज्यं वा याजयित्वाप्रतिग्राह्यस्य वा प्रतिगृह्य तं द्वादशस्तोमेनाग्निष्टोमेन याजयेदश्नुते हैव लघुतामथ यो लघुरिव चरेदप्रतिष्ठितस्तमेकविꣳशतिस्तोमेनाग्निष्टोमेन याजयेत्प्रत्येव तिष्ठति ॥ ४७ ॥ चयोदशः ॥

अथ प्रणोदः । समानमभिचरणीयꣳ ग्निष्ट्यं । प्रातःसवनीयानानुवर्तते ऽग्नये प्रवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेष भवत्यथ विबाधः । समानमभिचरणीयꣳ ग्निष्ट्यं । माध्यंदिनीयानानुवर्तते ऽग्नये विबाधवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथ प्रतिनोदः[3] । समानमभिचरणीयꣳ ग्निष्ट्यं । तृतीयसवनीयानानुवर्तते ऽग्नये प्रतीकवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथाग्नेरतिव्याधः । समानमभिचरणीयꣳ ग्निष्ट्यमनूबन्ध्यस्य पशुपुरोडाशमनुवर्तते ऽग्नये वसुमते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथेन्द्रवज्रः । समानमभिचरणीयꣳ ग्निष्ट्यं । पञ्चदश एष भवति । पुनरुर्णा ह

---

१ Thus L Be, सन्स (or न्स) हास the other MSS.

२ सेयं कृषिरेवैषकृषे L, सोयं कृषिरेवैष कृषेः Be, सेवेकृष्टिरेवैवतुष्टेः the other MSS.

३ प्रतीनोदः L

वै ग्रैव्यो राजा पुण्यकृद्भ्यो याज्याम[1] स ह पापीयाञ्जनतां[1] प्रतिहितां[1] प्रतिख्यायर्त्विजः[1] पप्रच्छास्ति खित्स यज्ञक्रतुर्यै-नाहमिष्ट्वेव प्रथायामित्यस्ति[2] होति[2] हैनमृत्विजः प्रत्यूचुस्तस्मा अध्वर्युरयोनौनपुरोरुक्कान्[3] ग्रहान्जगाह[3] स्वराण्युद्गाता सामान्यनैडान्यनिधनानि[4] परांडेवर्ग्मयूं[5] होतानूवाच[5] ५ स ह्वभृथादेवोदेत्य ममार[6] यं द्विष्यात्तस्यैवं यज्ञं[6] कुर्यादुप-सृतं[7] वा याजयेत्तिप्रं[7] हैवास्मात्लोकात्प्रैत्य[8] य राग्निमराया-वित्याचक्षते[8] चतुष्टोमे राग्निक्रतं[8] धान्यं ददाति[8] स राग्नि-श्चतुष्टोम एव मरायक्रतूं[8] स मरायो[8] ऽथाञ्जनाभ्यञ्जना-वित्याचक्षत[9] आक्ताचा[9] अलंकृता[9] ऋत्विजः प्रचरन्ति[9] स १०

---

१ पापो (पापा) जनतां etc. as above Be L, पापीयांजानता प्रतिहितां प्रतिवा (or र्वा) वर्त्विजः the other MSS.

२ प्रथयामी(मि)त्यस्ति हाइ (हा) इति Be L; प्राथणमित्यास्ति हीइ इति the other MSS.

३ Conjecture, ०धोनौनपुरोरुक्कान् Be, अथेनाग्पुरोरुक्कान् L; अधोनपुरो-रुक्तान् the other MSS.

४ सामान्यनैनत्निनिध० Be, मान्यनैनन्यनिध० L; सामान्यनैलास्य० (लास्य०) the other MSS.

५ पराडेवग्मं Be; पराङ्वग्मं L; परां (or परा) इति (or इव) दु (or ड) ग्मय the other MSS.

६ यज्ञे MSS.

७ ०दुपाक्तं L.

८ राग्नी० Be; राग्नि० the other MSS.

९ आंक्ताचालंकृता Be; आङ्क्ताकालंकृता L; आक्ताचालंकृता the

आञ्जनो ॥ ऽभ्यक्ताः[१] शमूलवाससः[२] । सो ऽभ्यञ्जनो ॥ ऽथ विषूचीनशालो भ्रातव्यवतो यज्ञः । स तथा देवयजनं जोषयते यथा प्राचीनमाहवनीयात्प्रवणꣳ स्यात्प्रतीचीनं गार्हपत्यादिति । तदेते विषूचीनशाले मापयन्ति[२] । प्रचरन्ति प्राञ्चः प्रत्यञ्चः प्रचरन्ति । मध्ये गार्हपत्यो भवति । मध्यत आसीनाय भक्षानाहरन्त्यनुदिशꣳ स्तोमौ स्याताम्[३]त्येतदेकमेकविꣳशौ[३] स्याताम्[३]त्येतदेकमनादृत्य तच्चतुष्टोमावेव कुर्वन्ति ॥ ॥ ४८ ॥

[४]देवासुरा ह यत्र महासंग्रामꣳ[५] संयेतिरे तद्ध शिबिरौशीनरो देवानां वर्गादसुराञ्जिगाय[६] । तस्मो हेन्द्रो जितवरं ददौ । स होवाच शिबिर्नैष्ठ्यं[७] भयं न गच्छेदिति । तं वर्षिष्ठीयप्रस्थे[८] सर्वतोमुखेन याजयां चकार । ततो ह वा एतच्छिबिं नैष्ठ्यं[७] भयं न गच्छति । यं कामयेतानपजय्यं जयेदिति तं वर्षिष्ठीयप्रस्थे[८] सर्वतोमुखेन याजयेदनपजय्यमेव

---

१ भक्ताश्शमूलवासः L Be, भक्ताः शन्मूलवासः the other MSS.

२ ०यंति Be; ०यति the other MSS.

३ ०मेकविंशौ L Be; विंशौ the other MSS.

४ For the following cp. also Eggeling, Catal. of the MSS. of the India Office vol. I, p. 87 (designed by me as E).

५ महा० om. all exc. E L

६ Thus (०सुरांजि०) Be L only; ०सुराणाजिगाय० or ०सुराणांजि० the other MSS.

७ नैष्ठ्यं L Be; ज्यैष्ठ्यं or ज्येष्ठ्यं the other MSS.

८ Thus L Be; ०प्रस्थेन the other MSS

जयति। तदेताश्चतस्रः शाला अनुदिशं मापयन्ति। प्रचरन्ति प्राञ्चः प्रचरन्ति दक्षिणा प्रचरन्ति प्रत्यञ्च उदञ्चः प्रचरन्ति। मध्ये गार्हपत्यो भवति। मध्यत आसीनायाश्चतरीरथैर्भक्षान्संवहन्त्यनुदिशꣳ स्तोमाः स्थुरित्येतदेकमेकविꣳशाः स्थुरित्येतदेकमनादृत्य तच्चतुष्टोमानेव कुर्वन्ति॥ पार्थः। पार्थी[१]ह स्थपतिर्देवानैक्षत्[२] ह[२] सुतसोमान्त्सहस्रदक्षिणान्त्सहस्रमसुनोत्[२] ह[३] देवानाप[३]। स[३] एतान्त्सोमानाहरिष्यन्नुपकल्पयते[३] शालाः[४] सहस्रꣳ सहस्राणि सहस्रमश्चतरीरथाꣳस्तदेताः शाला अनुदिशं मापयन्ति द्वे च शते पञ्चाशतं च पुरस्तादेवं दक्षिणत एवं पश्चादेवमुत्तरतः। प्रचरन्ति प्राञ्चः प्रचरन्ति दक्षिणा प्रचरन्ति प्रत्यञ्च उदञ्चः प्रचरन्ति। मध्ये गार्हपत्यो भवति। मध्यत आसीनायाश्चतरीरथैर्भक्षान्संवहन्त्यनुदिशꣳ स्तोमाः स्थुरित्येतदेकमेकविꣳशाः स्थुरित्येतदेकमनादृत्य तच्चतुष्टोमानेव कुर्वन्ति॥ ॥ ४९ ॥ चतुर्दशः ॥

यमाभ्याꣳ स्तोमाभ्यां यक्ष्यमाणो भवति। स तया देवयजनं जोषयते यथान्तरेण चात्वालोत्करावुदक्संचारी स्यादिति। तदेते प्रबाहुक् शाले मापयन्ति। स दक्षिणार्ध्यां[५] शालामध्यव-

---

१ Thus Be; पार्थ and पार्श्व the other MSS

२ Instead of सह Be सन, L सन्न; सवन the other MSS.

३ Thus my conjecture, सहति एतान्सोमानाहरि॰ MSS. exc. Be which has only सोमानाहरि॰ and L, which has सहेतिसहातान्सोमा॰।

४ शाला Be; शालाहं L, शालापि the other MSS.

५ Thus L Be, दक्षिणस्यां the other MSS.

साय मथित्वाग्नीन्विहृत्य दीक्षणीयामिष्टिं निर्वपत्यथोत्तरार्धाꣳ
ग्रालामध्वसाय मथित्वाग्नीन्विहृत्य[1] दीक्षणीयामिष्टिं[1] निर्व-
पति[1] तयेह प्रचर्याथामुत्र प्रचरतोह दीक्षाऽऽतोर्ऽहोत्यथा-
मुत्रेह प्रायणीयामिष्टिं निर्वपत्यथामुत्र तयेह प्रचर्याथामुत्र
प्रचरतोह पदेन चरित्वा राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यथा-
मुत्र तेनेह प्रचर्याथामुत्र प्रचरतोह प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां
प्रचरत्यथामुत्रेह मध्यमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथामुत्रेह
महावेद्यै पूर्वं परिग्राहं परिगृह्णात्यथामुत्रेहोत्तमाभ्यां प्रवर्ग्योप-
सद्भ्यां प्रचरत्यथामुत्रेहाहवनीयं प्रणयत्यथामुत्रेह सदोहविर्धाने
संमिनोत्यथामुत्रेहाग्नीषोमौ प्रणयत्यथामुत्रेह[2] यूपस्याहृता यूप-
मुच्छ्रयति स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोत्यथा-
मुत्र तस्येह प्रसिद्धं वपया चरित्वा वसतीवरीर्गृह्णात्यथामुत्रेह
पशुपुरोडाशं निर्वपत्यथामुत्र तेनेह प्रचर्याथमुत्र प्रचरतोहा-
ग्नीषोमीयेण प्रचरत्यथामुत्रेह[3] वसतीवरीः परिहृत्य पयाꣳसि
विग्निष्योपवसन्त्यथामुत्रेह त्वेव संविग्नतोह राजानमुपावहृत्य
प्रातरनुवाकमुपाकरोत्यथामुत्रेहानुपूर्वꣳ सवनानि[4] संतिष्ठन्त
आ समुदितादेवमेवोत्तरस्याꣳ ग्रालायाꣳ सवनानि[4] संतिष्ठन्त
आ समुदितादिहावभृतेन प्रचरत्यथामुत्रेहोदयनीयामिष्टिं

---

१ These six words, indicated by ० in Be, are given only by L.

२ प्रणयत्य० L Be; प्रणयंत्य० the other MSS.

३ चरत्य० MSS.

४ Thus L Be, सवनीयानि the other MSS.

निर्वपत्यथामुत्र[1] तयेह प्रचर्यायामुत्र प्रचरतीहैव मैत्रावरुणीं वशामुपाकरोत्यथामुत्र[1] तयेह प्रचर्यायामुत्र प्रचरति[1] समान्युद्वसनीयेष्टिरथ[1] यत्प्राक्[2] सवनेभ्यो[2] ऽधि व्यतिषक्तानि कर्माणि क्रियन्ते तस्माद्यमावन्तरुदरे व्यतिषक्तौ सह[3] म्रियाते[1] अथ यदनुपूर्वꣳ सवनानि संतिष्ठन्ते तस्मादनुपूर्वौ जायेते[1] ५ अथ यदूर्ध्वꣳ[4] सवनेभ्यो ऽधि व्यतिषक्तानि कर्माणि क्रियन्ते तस्मात्सहाग्रयन्ति सह पाययन्ति सह चरतो[1] ऽथ यत्समान्यरणिस्तस्मात्समानौ[5] योनिरग्निश्च ह वा आदित्यश्च समानलोकं[6] जिगीषमाणावेतं यज्ञक्रतुमपश्यतां तमाहरतां तेनायजेतां[1] ततो वै तौ समानलोकावभवताꣳ समानं १० लोकमैतां[7][1] यः कामयेताग्नेश्चादित्यस्य च समानं लोकमियामिति स एतेन यज्ञक्रतुना यजेताग्नेश्चैवादित्यस्य च समानं लोकमेति[11] ॥ ५० ॥ पञ्चदशः ॥

वाजयाजी ह वा अन्यो भवत्यन्य उ वाजपेययाज्येष ह वै वाजयाजी यः पेयैरनिष्ट्वाथ वाजेन यजत एष उ वाजपेय- १५ याजी यः पेयैरिष्ट्वाथ वाजेन यजते[1] तस्मादु पेयैरेवेष्ट्वाथ

---

१ Thus L Be; सामान्योद्व० the other MSS.

२ यत् only in L; प्रातः instead of प्राक् L; सवनीयेभ्यो L Be.

३ Only in L and Be.

४ यदनुपूर्वꣳ MSS. exc. and Be.

५ यस् om. L Be; यत्समान्यरणी the other MSS.

६ समानं L Be; समानलोका the other MSS.

७ After ऐतां L Be have समानलोकावयत्; the other MSS. read समानंलोकावयवस्य or ०काव्यवस्य।

वाजेन यजेत । पेयैर्यज्यमाणो भवति । सो ऽनिष्टैव पौर्ण-
मासीं दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स
तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायै[1] मे यज्ञिये
ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन
५ कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयाꣳसि विश्रि-
ष्योपवसन्त्यथैताꣳ सवनेष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेका-
दशकपालं वैश्वदेवं द्वादशकपालं । तया द्वादशाहानि यजते ।
ऽथ चयोदशे ऽह्नि पौर्णमासेन हविषा यजते येनास्यानिष्टं
भवत्यथ चतुर्दशे ऽहन्यामावास्येन हविषा यजते येनास्यानिष्टं
१० भवत्यथैतेषां यज्ञक्रतूनामेकेन यजते । ऽथ पुनर्दीक्षते । स
एवमेव संवत्सरं यजते । तस्याहानि चित्पञ्चदशो[2] ऽथ
चित्सप्तदशो ऽथ चिद्देकविꣳशो ऽथ चित्त्रिणवो[3] ऽथ
चित्त्रयस्त्रिꣳशो ऽथ चिच्चतुष्टोमो[4] । मासानामेव रूपं
पेयाः[5] । संवत्सरस्य रूपं वाज । एवमस्यैष[6] संवत्सरः परीष्ट
१५ एवमाप्तो भवत्यथाहीनविधिस्तस्याहानि[7] चित्पञ्चदशः[8] सप्त-
दशस्त्रयस्त्रिꣳशस्त्रिद्देवाथैकविꣳशो[8] ऽथ त्रिणवो ऽथ चतुष्टोम-

---

१ आमावास्यै Be, मावास्यै L (the other MSS. om. this passage).

२ Thus L Be ; ०पंचदशः सप्तदशः the other MSS.

३—४ Thus L Be ; the other MSS. have only चिद्दत्चतुष्टोमो ।

५ Thus L Be ; रूपमपेयान् or ०पेयात् the other MSS.

६ Thus L Be ; स्य एष the other MSS.

७ ०त्रिधस्तस्या० Be.

८ Thus L Be ; ०पंचदशःचतुष्टो० the other MSS.

स्त्रिवृदेवाथ त्रयस्त्रिꣳशो ऽथ चतुष्टोमस्त्रिवृदेवाथ[१] चतुश्चत्वारिꣳशो ऽथ चतुष्टोमो ऽथातिरात्रो[1] द्वादश[२] मासाः सप्तदश क्रतवो[1] नवसु मासेषु नव क्रतूनुपैत्यथातिग्रिष्यन्ते त्रयश्च मासा अष्टौ च क्रतवः[1] स द्वौ त्रिरात्रौ कुरुत एकं च द्विरात्रं[1] यद्यु वा एतदुपात्येति चतुष्टोमेनाग्निष्टोमेन यजेत[1] मासानामेव रूपꣳ स्तुतशस्त्राणि संवत्सरस्य रूपमग्निष्टोमो[३] वाज[३][1] एवमस्यैष[३] संवत्सरः परीष्ट एवमाप्तो भवत्यथातो ऽयुजश्चैव[४] युग्माꣳश्चैकस्याꣳ स्तुवते ऽथ तिसृष्विति न्वयुजो[1] ऽथ युग्मांश्चतसृषु स्तुवते ऽथाष्टास्विति युग्मा[1] अयुजां चैव[५] युग्मानां चैव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुः[1] ॥ ५१ ॥

अथातो दिग्गामेव[1] चित्रत्राच्यै[1] पञ्चदशो दक्षिणायै[1] सप्तदशः प्रतीच्या[1] एकविꣳश उदीच्यै[1] त्रिणव ऊर्ध्व[६]

---

१—१ Wholly uncertain; चतुष्टोमैर्विꣳशो थ चतुष्टोमस्त्रिवृदेवाथ चतुश्चत्वारिꣳशोथाष्टाचत्वारिꣳशोथ चतुष्टोमोथातिरात्रोद्वादश L Be; चतुष्टोमस्त्रिवृदेवाथ चतुश्चत्वारिꣳशोथ चतुष्टोमोथातिरात्रोथ द्वादश the other MSS., partly incomplete.

२ Thus MSS. exc. Be, which reads ०ष्टोमस्यैष and L, which omits वाज।

३—५ Thus, on the whole, L, युजश्चैकस्यां स्तुवते थ तिसृष्विती न्वायुजो थ युग्मांश्चतसृषु स्तुवते थाष्टासुरिति युग्मा अयुजांश्चैव Be; युजश्चैव युग्यां (orथा-) श्चैवतस्यां स्तुवते (ति) थ तिसृष्विति न्वयुजो थ पुमांश्चतसृषु स्तुवते थाष्टासुरित्यथ युग्मा अयुजश्चैव the other MSS.

६ Only in Be.

ऊर्ध्वायै । चयस्त्रिꣳशो ऽसुतो ऽर्वाच्यै । सर्वासमेव चतुष्टोमो । दिशामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर्॥ यात ऋतूनामेव । चिदृदसन्तस्य । पञ्चदशो ग्रीष्मस्य । सप्तदशो वर्षाणामेकविꣳशः शरदस्त्रिणवो हेमन्तस्य । चयस्त्रिꣳशः शिशिरस्य । सर्वेषामेव चतुष्टोम । ऋतूनामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर्॥ यात ऋषीणामेव । चिदृदसिष्ठस्य । पञ्चदशो भरद्वाजस्य । सप्तदशो विश्वामित्रस्यैकविꣳशो जमदग्नेस्त्रिणवः कश्यपस्य । चयस्त्रिꣳशो गौतमस्यागस्त्यस्य चतुष्टोम । सर्वेषामेव चतुष्टोम । ऋषीणामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर्॥ यातो देवतानामेव । चिदृदग्नेः । पञ्चदश इन्द्रस्य । सप्तदशः प्रजापतेरेकविꣳशो ऽसुष्य तपस्त्रिणवश्चन्द्रमसस्त्रयस्त्रिꣳशो विश्वेषां देवानाꣳ । सर्वासामेव चतुष्टोमो । देवतानामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुः॥ ॥ ५२ ॥

अथातो दर्शपूर्णमासयोरयनमित्याचक्षते । सूर्याचन्द्रमसोरयनमित्येक आहुः । पौर्णमासेन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं

---

१ कश्य॰. Be, काश्य॰ the other MSS.

२ Thus L and Be; all the other MSS om. च्छग॰ ।

३ Instead of सुष्य Be उप, L सु ।

४ Thus L Be, the other MSS. have एवं after देवानां ।

५ पूर्ण॰ MSS exc. L

क्रीणाति यथा मन्यते पौर्णमास्यै मे यज्ञिये ऽहन्सुत्या संपत्स्यत इति ' तस्य तथा संपद्यते ' प्रसिद्धेन कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति ' तस्याग्नीषोमीय उपालम्भ्यो भवति ' तस्य प्रातःसवनीयाननुवर्तन्ते पौर्णमासहवीꣳषि ' प्रेषवन्तः सवनीया अनुब्रूहि यजेतीतरेषाꣳ हविषाम्ह्जुधा ज्योतिरुक्थ्याः संतिष्ठत " आमावास्येन सोमेन यक्ष्यमाणो भवति ' दीक्षते ' तस्यापरिमिता दीक्षा द्वादशोपसदः ' स तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायै मे यज्ञिये ऽहन्सुत्या संपत्स्यत इति ' तस्य तथा संपद्यते ' प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतद्धरिन्द्राय वत्सा अपाक्रता भवन्त्यैन्द्रं पयो दोहयति सांनाय्यस्य वातृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विग्निष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति ' तस्यैन्द्र ऋषभ उपालम्भ्यो भवति ' तस्य प्रातःसवनीयाननुवर्तन्त आमावास्यानि हवीꣳषि ' प्रेषवन्तः सवनीया अनुब्रूहि यजेतीतरेषाꣳ हविषाम्ह्जुधा ज्योतिरतिरात्रः संतिष्ठते ' सूर्याचन्द्रमसयोरेव तत्सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर्य उ चैनदेवं विदुः " ॥ ५३ ॥ षोडशः[१] ॥

॥ इत्यष्टादशः प्रश्नः ॥

---

१ इत्यन्तरा तिथिः समाप्ता MSS.

साविच्ꣳ स्वर्गकामश्चिनीत[1] पशुबन्धे चेच्चीयते षड्धोतारꣳ
हुत्वा यूपाहुतिꣳ हुत्वा यूपꣳ समयजुषं कृत्वा वेदिं विमि-
मीते[1] वेदिहतीये यजेतेति विज्ञायते[1] तस्याः सौमिकं
मानमेतावदेव नाना[1] सौमिकात्प्रक्रमात्तृतीयो ऽꣳशः प्रक्रमः
५ स्यात्तेन वेदिं विमिमीते[1] ऽपि वा पदाच्छ्रोण्या[1] पार्श्वमानी
पदं तिरः पशुमानेन तयोर्यः कर्णसंमितः प्रक्रमः स दृश्यते[1]
पदाद्वा नवमस्तदच्छ्रोण्या[2] तयोस्तु यः कर्णसंमितः स प्रक्रमार्थ-
स्तेन[3] मेया सौमिकी वेदिरग्नीन्वादध्याद्धृतमुपेयादिध्मा-
बर्हिः संनह्य[4] स्वयजुर्हरतीदमेव प्रथिष्ठं पौरोडाशिकं
१० चिर्यजुषा तूष्णीं चतुर्थं पूर्वं प्रतिग्राहं परिगच्छति करणं
जपत्युद्धन्युद्धृतादाग्नीध्रस्त्रिर्हरति[1] यदाग्नीध्रस्त्रिर्हरत्यथैतमग्निं
प्रत्यञ्चं यूपावटीयाच्छङ्कोर्विमिमीते[1] पञ्चःसंमितश्चेत्य इति
रथचक्रमात्र एवैष उक्तो भवत्यथाप्युदाहरन्ति द्वुरश्निः[5] प्रथमं
चक्रं द्वौ साधौ मध्यं त्रिभागोनास्त्रय उत्तममिति[1] तेषा-
१५ मन्यतममाचीꣳ, रज्जुमुभयतःपाशां कृत्वोत्तरवेदिदेशस्य मध्ये
ग्रङ्कुं निहत्य तस्मिन्पाशौ प्रतिमुच्य तस्मिन्नन्ते ऽन्यꣳ ग्रङ्कुं

---

१ Thus MHBU; यद्० Be Ben.

२ Thus M Ben.; नवमात्तस्याच्छ्रोण्या U; नवमस्तस्याच्छ्रोण्या H; नवमस्तल-च्छ्रोण्या Be; B om. the whole phrase.

३ Thus MHU; ०मार्धस्तेन Be Ben.

४ Thus MHUB. संगृह्य Be Ben.

५ ०रश्निं M.

प्राञ्च तेनैनं प्रदक्षिणं परिमण्डलं[१] परिलिखत्यूपोद्धृत्य स्रुच्यां कर्षूः खानयन्त्युच्छ्रयन्त्यपस्या[२]। दक्षिणतश्च पश्चाच्च वर्षीयसीः कुर्वन्त्यथ याचत्याज्यस्थालीꣳ सस्रुवाꣳ स्फ्यं दर्भस्तम्बमुदपात्रमौत्तरवेदिकाꣳश्च[३] संभारान्दधि मधुमिश्रꣳ हिरण्यं च शर्कराः[४] सिकताश्च[४] दर्भानित्येतत्समादायोत्तरार्धे सꣳसादयन्त्यथ द्वाभ्यामात्मन्यग्निं[५] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति। स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति। श्वेतमश्वमभिमृशन्तःशर्करमिमामुपदधाति प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ शङ्कुमुद्गृह्योदपात्रमुपनिनीय दर्भस्तम्बमुपदधाति वाक्त्वा समुद्र उपदधालिति वा तूष्णीं वाथैनꣳ सुवाज्यस्य जुहोति मजूरब्दो ऽयावभिरिति पञ्चभिस्त्वयादेवतं कृत्वा सूददोहसं करोति॥ १॥

अथ चात्वालस्याहृता चात्वालं परिलिखत्युत्तरवेदेराहृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्साद्य यूपावटं[६] कृत्वा[६] प्रोक्ष्य व्याघार्यालङ्कृत्य सिकता निवपत्यग्ने तव श्रवो वय इति

---

१ परि॰ om. M. and some of the other MSS.

२ खानयत्य॰ M.

३ च om. M.

४ सिकताः शर्कराश्च M.

५ Thus MHUB; ॰त्मंनग्निं Be Ben.

६ Om. M Be Ben.; M om. also प्रोक्ष्य।

षङ्गिरनुच्छन्दसमर्थोर्ध्वचित उपदधाति चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं नया देवतयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुव्यूहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य सं ते पयाꣳसीति चिष्टुभा राजन्यस्य । यथासुष्टु यथाग्नर्करमनुव्यूहति । तस्यां[1] नव[1] परिमण्डला[1] लेखा लिखत्यथ[2] दध्ना मधुमिश्रेण शर्करा: समज्य सायमग्निहोत्रꣳ हुत्वाग्नीन्परिस्तीर्योपवसत्यथ प्रातर्हुते ऽग्निहोत्रे याचत्युदपात्रं भस्म पुरीषमूषान्सिकता यावदुत्तममङ्गुलिकाण्डं यज्ञपरुषा संमितं तावन्मात्री:[3] पञ्चाग्नीतिशतꣳ हिरण्येष्टका: शर्करा वा घृतात्कास्तावत्यो[4] लोकंपृणा अपरिमिता वा चतस्र: स्वयमातृण्णा: सहस्रꣳ हिरण्यशल्कानूर्ध्वं चिभ्यो । ऽपरिमितानित्येक आहुस्ते यदि सहस्रं भवन्ति दर्दे घृते पत्त्रनाडीध्वोते[5] भवतो । ऽथोदित आदित्ये द्राभ्यामात्मन्यग्निं[6] गृह्णीते मयि गृह्णाम्यये अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृशाधिद्रवणं जपत्यथामिदं न्ययनं नमस्त इति द्राभ्यामथापरार्धं उदपात्रमुपदधाति वाक्षा

---

१ Thus Ben. UH (the last तस्या); तस्यां नव मंडला Be; तस्मिन्नेव परिम० MB.

२ लिखिला MB.

३ °मात्रं M.

४ घृतान्कास्ता० M.

५ Thus MHU; °नाडीध्वेते B. °नाडीग्रीवे Be Ben.

६ Thus MBHU, °त्मंनग्नि Be Ben.

समुद्र उपदधे सुप्रजावनिꣳ रायस्पोषवनिं मह्यं यजमाना-
येति। तथादेवतं कृत्वा सूददोहसं करोत्यथ संभाराग्निवप-
त्यग्नेर्भस्मासीति भस्माग्नेः पुरीषमसीति पुरीषꣳ संज्ञानमसि
कामधरणमित्यूषान्मयि ते कामधरणं भूयादिति सिकता।
अथैनान्संप्रयौति सं वा वः प्रियास्तनुवः सं प्रिया हृदयानि ५
वः। आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो मसेत्यथैनान्कल्प-
यति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः। कल्पन्ता-
मग्नयः पृथग्मम ज्यैष्ठ्याय सवृता इति। ताꣳस्तथा कल्प-
यति यथा न लेखाः संलोपयन्ति[1]। सद्यो वा सर्वं क्रियते
सद्यस्काले॥ २॥ प्रथमः॥ १०

अथान्तमायां लेखायां पूर्वपक्षस्य दिनेष्टका उपदधाति
संज्ञानं तया देवतयाङ्गिरस्वद्ध्रुवा सीद विज्ञानं तया देवत-
याङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश। तासामन्तरालेष्वेतेषामेव
दिनानां मुहूर्तेष्टका उपदधाति चित्तया देवतयाङ्गिरस्व-
द्ध्रुवा सीद केतुस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश। १५
सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां पूर्व-
पक्षस्य चपेष्टका उपदधाति दर्शा तया देवतयाङ्गिरस्वद्ध्रुवा
सीद दृष्टा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश।
तासामन्तरालेष्वेतासामेव[2] चपाणां मुहूर्तेष्टका उपदधाति
दाता तया देवतयाङ्गिरस्वद्ध्रुवा सीद प्रदाता तया देवतयाङ्गि- २०

---

१ संलोपयंते Be Ben.

२ Thus MU; एतेषामेव the other MSS.

रस्वद्भुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षस्य दिनेष्टका उपदधाति प्रस्तुतं तया देवतयाङ्गिरस्वद्भुवा सीद विष्टुतं तया देवतयाङ्गिरस्वद्भुवा सीदेति पञ्चदश । तासामन्तरालेष्वेतेषामेव दिनानां मुहूर्तेष्टका उपदधाति सविता तया देवतयाङ्गिरस्वद्भुवा सीद प्रसविता तया देवतयाङ्गिरस्वद्भुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षस्य क्षपेष्टका उपदधाति सुता तया देवतयाङ्गिरस्वद्भुवा सीद सुन्वती तया देवतयाङ्गिरस्वद्भुवा सीदेति पञ्चदश । तासामन्तरालेष्वेतासामेव क्षपाणां मुहूर्तेष्टका उपदधात्यभिगास्ता तया देवतयाङ्गिरस्वद्भुवा सीदानुमन्ता तया देवतयाङ्गिरस्वद्भुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां पूर्वपक्षेष्टका उपदधाति पवित्रं तया देवतयाङ्गिरस्वद्भुवा सीद पवयिष्यꣳस्तया देवतयाङ्गिरस्वद्भुवा सीदेति द्वादश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षेष्टका उपदधाति सहस्राꣳस्तया देवतयाङ्गिरस्वद्भुवा सीद सहीयाꣳस्तया देवतयाङ्गिरस्वद्भुवा सीदेति द्वादश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां मासेष्टका उपदधात्यरुणस्तया देवतयाङ्गिरस्वद्भुवा सीदारुणरजास्तया देवतयाङ्गिरस्वद्भुवा सीदेति त्रयोदश । सर्वासां पारे सूददोहसः करोत्यथाचैके[1]

[1] Thus Be HUB ; ॰थाचैकेक Ben. ; चचैके M.

लेखान्तरालेषु[1] सिकता निवपन्त्येजत्का जोवत्का इत्यथाभ्य-
न्तरायां लेखायां मुहूर्तानां मुहूर्तेष्टका उपदधातीदानीं तया
देवतयाङ्गिरस्वद्ध्रुवा सीद तदानीं तया देवतयाङ्गिरस्वद्ध्रुवा
सीदेति पञ्चदश[1] सर्वासां पारे सूददोहसः करोत्यथाभ्यन्त-
रायां लेखायां क्लिष्टकास्वर्क्लिष्टकाश्चोपदधात्यग्निष्टोमस्तया ५
देवतयाङ्गिरस्वद्ध्रुवा सीदोक्थ्यस्तया देवतयाङ्गिरस्वद्ध्रुवा
सीदेति षडभिर्ऋतुस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद सूर्य ऋतु-
स्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति तिस्रः[1] सर्वासां पारे
सूददोहसः करोत्यथ मध्ये[2] नाभ्याः संवत्सरेष्टका उपदधाति
प्रजापतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद संवत्सरस्तया देव- १०
तयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रः[1] सर्वासां पारे सूददोहसः
करोति[1] ॥ ३ ॥

तदेताश्चतस्रः स्वयमातृण्णा याचति[1] ता दिक्षूपदधाति
भूरग्निं च पृथिवीं चेति पुरस्ताद्ध्रुवो वायुं चान्तरिक्षं चेति
दक्षिणतः स्वरादित्यं च दिवं चेति पश्चाद्भूर्भुवः स्वश्चन्द्रमसं च १५
दिशश्चेत्युत्तरतः[1] सर्वासां पारे सूददोहसः करोत्यथ लोक-
पृणा उपदधाति लोकं पृण छिद्रं पृणाथो सीद स्विधा लम्।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्निति[1] तथादेवं
करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदित्यथ सूददोहसं करोति

---

१ Thus Be Ben.; लेखाभ्यंतरेषु M; लेखांतरेषु HU; लेखायां B.

२ मध्यमे M.

ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इति [1] प्राच्याच श्लोकंपृणत्या प्रवौत्यग्निं प्राचीभिः संप्रच्छादयन्ति [1] संप्रच्छन्नं पलाशशाखया परिकर्षति श्लोकं पृण छिद्रं पृणेत्यथानभिमृष्टं चितिकुष्ट्या भवत्यथाग्निमभिमृशति[1] यत्ते ऽचितं यदु चित्तं ते अग्न इति द्वाभ्यामेव चितिकुष्ट्याभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्यग्ने देवाꣳ इहावहेत्याग्नेय्या गायत्र्यैतां चितिमभिमृशञ्जपति[2] अवद्रवणे[2] वाङ्म आसन्प्राणदा इत्यथ[3] कृष्णमश्वमभिमृशञ्जपति[2] तनुपुरीषमुपदधाति पृष्टो दिवीति [1] तथादेवतं कृत्वा सूददोहसं करोत्यथ पाशमप आनीय हिरण्यशल्काꣳसंप्रकीर्य द्वाभ्यांद्वाभ्याꣳ[4] शताभ्यां प्रोक्षति सहस्रस्य प्रमा असीति पुरस्तात्सहस्रस्य प्रतिमा असीति दक्षिणतः सहस्रस्य विमा असीति पश्चात्सहस्रस्योन्मा असीत्युत्तरतो [1] ऽस्य मध्यं[5] द्वाभ्याꣳ शताभ्यां प्रोक्षति साहस्रो ऽसि सहस्राय त्वेत्यधोत्तरार्धे तिष्ठन्निष्टका धेनूः कुरुत इमा जे अग्न इष्टका धेनवः सन्त्वित्यान्नादनुवाकस्यैके ऽर्कपर्णेनाजशीरेण[6] चरमायामिष्टकायां जुह्वति [1] स° यद्यहैनं[7]

---

१ परि instead of अभि M.

२ Thus HUB; द्वे अधिद्रवणे ज° Be Ben; द्वाभ्यामधिद्रवति M.

३ अत्र instead of अथ M Ben. U.

४ द्वाभ्यां twice in BU only.

५ om. M.

६ कं° om. B Be H.—°नाद्याच्चो° Be Ben.

७ Thus M; यद्यदुहैनं B; दुयेहैनं Ben; यदुहैनं Be; यद्यदहैनं HU.

करिष्यन्नवत्यथैतस्यार्कपर्णस्य[१] पुटमन्तरवसाविणं कृत्वोदङ् तिष्ठन्मुखदघ्ने धारयन्नाहाहरानयेति। स यत्र धारेष्टकां[२] प्राप्नोति तत्प्रतिपद्यते त्वमग्ने रुद्र इत्यान्नादनुवाकस्यैतदर्कपर्णं यं द्वेष्टि तस्य संचरे पशूनां न्यस्यति। यद्यु वै न द्वेष्यात्खवटे न्यस्त्यथैनमुपतिष्ठते त्वमेव तां वेत्थ यो ऽसि सो ५ ऽसीत्येतेनानुवाकेनाथ संहारविहाराभ्यामुपतिष्ठते संवत्सरो ऽसि परिवत्सरो ऽसीत्येतेनानुवाकेनाथाह होतरग्नेरुक्थेनाग्निमनुशंसेति। [३]यदि होता न कामयते यजमान एव जघनेनाग्निं तृणानि संस्तीर्य तेषूपविश्याग्नेरुक्थेनाग्निमनुशंसति। भूर्भुवः स्वरित्येताभ्यामृग्भ्यां[४] चिक्षिरेकैकामन्वाह प्रणवे- १० नाभिसंधानमेवमन्यचाप्यृगुपसंधाने प्रणवेनैवाभिसंधानमं च[५] ये ब्राह्मणा बज्रविदस्तेभ्यो यद्दक्षिणा न नयेद्दुरिष्टं स्यादग्निमस्य वृञ्जीरन्तेभ्यो यथाश्रद्धं दद्यात्सिष्टमेवैतत्क्रियते। नास्याग्निं वृञ्जत इति ब्राह्मणम्। ॥ ४ ॥ द्वितीयः ॥

अथाभ्याधानप्रभृति पाशुबन्धिकं कर्म तायते। सिद्धु- १५ मात्रमग्निप्रणयनात्कृत्वाग्निं प्रणीयोपसमाधायाध्वराज्ञतिभिरभिहूय[६] नानाचतुर्गृहीतैरेता[६] आज्ञतीर्जुहोति। त्वमग्ने रुद्र

---

१ °त्यथैतदर्क° Be Ben.

२ °रेष्टकाग्निं M.

३ Before यदि Be HU ins. स।

४ द्वाभ्यां instead of चतसृभ्यां M.

५ प्रणवेनैवचाभि° M.

६ Thus HU (only °ज्ञतीभि°); °ध्वराज्ञतीभिरभिहूयमानां चतु° M; °ध्वराज्ञतीरभिहूयमानानां चतु° Be Ben; °ध्वराज्ञतिभिर्हूत्वा नानाचतु° H.

इति शतरुद्रीयस्य रूपमग्नाविष्णू इति वसोर्धारायाः अन्नपत इत्यन्नहोमः। सप्त ते अग्ने समिधः सप्त जिह्वा इति विश्वप्रीरित्यथ स्रुवेणोपघातमेकविꣳशतिमाज्यतीर्जुहोत्यसवे स्वाहा वसवे स्वाहेति। ऊलाज्यवेव सꣳस्रावान्यजमानस्याञ्जलावावंपति[1]। तैर्यजमानो मुखं विमृष्टे राज्ञी विराज्ञीत्येतेनानुवाकेनोत्तरपरिग्राहप्रभृति पाशुबन्धिकं कर्म तायते। सिद्धमा मनोतायाः कृत्वा मनोतामनुद्रुत्य पशोरवदानानि संभृत्यौदुम्बरे[2] पात्रे[3] युष्णो मृत्युग्रहं गृह्णाति विपश्चिते पवमानाय गायतेत्यनुद्रुत्योपयामगृहीतोऽसि मृत्यवे त्वा जुष्टं गृह्णामीति। दर्भैः परिमृज्योत्तरवेद्याꣳ सꣳसादयत्येष[4] ते योनिर्मृत्यवे त्वेत्यथ पशुना चरत्यथ वनस्पतिना चरत्यथ पुरस्तात्स्विष्टकृतो ऽथैतं ग्रहꣳ होष्यन्नप उपस्पृशति विद्युदसि विद्य मे पाप्मानमित्यथ जुहोत्यप मृत्युमप क्षुधमपेतः शपथं जहि। अधा नो अग्न आवह रायस्पोषꣳ सहस्रिणम्॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे। तान्यज्ञस्य मायया सर्वानवयजामहे स्वाहेत्यथ ऊलोपस्पृशेदृष्टिरसि वृत्र मे पाप्मानमित्यथ स्विष्टकृता चरत्युपह्रयमानायामिडायामुप-

---

१ Thus (आवपति) M Be Ben BU (sec. m.); आनयति HU (pr. m.).

२ Thus all exc B, which has ०बरेण पात्रेण।

३ सं om. HU

४ Thus M Be Ben, ०स्पृशेद् BHU.

गच्छन्ति[1] ग्रहमुपक्षतं[2] ग्रहं यजमानो भक्षयति भक्षो ऽस्यमृत-
भक्षस्य ते मृत्युपीतस्यामृतवतः स्वगाकृतस्य मधुमत उप-
क्षतस्योपक्षतो भक्षयामीति। भक्षयित्वात्मानं प्रत्यभिमृशते
मन्द्राभिभूतिः केतुर्यज्ञानामित्यान्तादनुवाकस्यानूयाजप्रभृति
पाशुबन्धिकं कर्म तायते। सिद्धमा दक्षिणानां कालाद्दक्षि- ५
णानां काले धेनुमृषभमनड्वाहं दत्त्वैकविंशतिर्दक्षिणा[3]
ददाति। शतं ददाति। सहस्रं ददात्यन्विष्टकं दक्षिणा
ददाति। यदि न विन्देत मन्थानेतावतो दद्यादोदनाच्चा।
पष्ठौहीं वन्तर्वतीं दद्याद्धिरण्यं ददाति। वासो ददाति।
तेनायुः प्रतिरत इति ब्राह्मणं। तं चेत्सौम्ये ऽध्वरे चिन्वीत १०
प्रथमायामुपसदि चेत्करणं। मध्यमोत्तमे उपसदावन्तरेणोप-
धानं। काले ऽग्निप्रणयनं। दक्षिणानां काले दक्षिणाः। सव-
नीयस्य यूष्णो मृत्युग्रहस्य चेद्हीने मन्त्रे वा चिन्वीत प्रथमे
ऽहनि दक्षिणाः प्रथमे ऽहनि यूष्णो मृत्युग्रहो। न मन्त्रे
दक्षिणा नीयन्ते। नाचिकेत एव मृत्युग्रहः स्यादित्येतदपर- १५
मग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्यामिक्षया वेति।
तस्मै सायमग्निहोत्रे हुते सायंदोहः प्रातरग्निहोत्रे हुते
प्रातर्दोहः। पशुपुरोडाशेन सह अपणमसमुदिते चर्या।
संतिष्ठते सावित्रः। ॥ ५ ॥ तृतीयः ॥

---

१ उपप्रगच्छन्ति M.

२ ग्रहमिडोपक्षतं M.

३ ददाति instead of दत्त्वा M.

अथ नाचिकेतस्य[1] प्रसिद्धं चेचकरणं यथा सावित्रस्यैतावदेव नाना । नाच लेखा भवन्त्यथ याजुषीरुपदधाति लोको ऽसि स्वर्गो ऽसीत्यञ्जलिनैकविंशतिं यथा निपतन्ति[2] तास्तच्चोपदधाति । तदेतदन्यत्रापि[3] प्रकीर्णानामुपधानस्य[4] निदानं । यदि[5] पाङ्क्तः पञ्च पुरस्तात्पञ्च दक्षिणतः पञ्च पश्चात्पञ्चोत्तरत एकां मध्ये । ऽथ यदि चिदृत्सप्त पुरस्तात्तिस्रो दक्षिणतः सप्त पश्चात्तिस्र उत्तरत एकां मध्ये । ऽथ यदूर्ध्वाः[6] पश्चात्कोट्याः[7] प्रभृत्यूर्ध्वाः[8] स्वयमातृण्णावकाशाद्[9]थ यदि प्राचीः स्वयमातृण्णावकाशात्प्रभृति[9] प्राचीः । स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वं[5] । स यदीच्छेत्तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति प्राङा होतुर्धिष्ण्यादुत्सर्पेदित्याहवनीयसकाशाद्यं प्रागाद्यशस्वती सा मा प्रोर्णोतु तेजसा यशसा ब्रह्मवर्चसेनेति । तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवतीत्यथ यदीच्छेद्बूयिष्ठं मे अद्धीरन्बूयिष्ठा दक्षिणा नयेयुरिति

---

१ नाचिकेतस्य Be Ben.

२ निपतेंति HUB, निपतति Be: निवपंति M: निवपति Ben.

३ तैरेतद॰ M..

४ Thus H Be; प्रकीर्णानामुपदधा॰ U; प्रकीर्णानुपधा॰ Ben: प्रकीर्णामुपधा॰ B; प्रक्षीर्णानामुपधा॰ M

५ स यदि M.

६ Thus MB; यदूर्ध्व H; या ऊर्ध्वाः Be Ben; यद्यूर्ध्व U.

७ Thus BH; कोट्याः U; कोट्या H Ben; कोटरा Ben; कोट्यः M.

८ ०र्ध्वा या।

९ ०काशेप्र॰ M.

दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य स्वाहेति स्रुवेणोपहत्याहवनीये जुह्वयाङ्गूयिष्ठमेवास्मै श्रद्दधते भूयिष्ठा दक्षिणा नयन्तीति ब्राह्मणꣳ संतिष्ठते नाचिकेतः ॥ ६ ॥ चतुर्थः ॥

अथ ब्रह्मचितः[1] प्रसिद्धं चेचकरणं यथा सावित्रस्तावदेव नाना नाच लेखा भवन्त्यथ पुरस्तादुदौचीर्दग्रहोचेष्टका उपदधाति चित्तिः स्रुक्तया देवतयाङ्गिरस्वद्ध्रुवा सीद चित्तमाज्यं तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति दशाथ हृदयेष्टकामुपदधाति सुवर्णं घर्मं परिवेद वेनमित्यनुद्रुत्य देवैः समानमीन आत्मा जनानामित्यातोऽथ यजुरिष्टके उपदधात्यग्निर्यजुर्भिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद सविता स्तोमैस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति सेनेन्द्रस्य तया देवतयाङ्गिरस्वद्ध्रुवा सीद धेना बृहस्पतेस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति सर्वासां पारे सूददोहसः करोत्यथ दक्षिणतः प्राचीश्चतुर्होत्रेष्टका उपदधाति पृथिवी होता तया देवतयाङ्गिरस्वद्ध्रुवा सीद द्यौरध्वर्युस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रो ऽथ हृदयेष्टकामुपदधाति ब्रह्मेन्द्रमग्निमित्यनुद्रुत्य यज्ञमेतं चतुर्होतॄणामात्मानं कवयो निचिक्युरित्यातोऽथ यजुरिष्टके उपदधातीन्द्र उक्थामदैस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद मित्रावरुणावाग्निषा तया देवत-

१ ब्रह्मचित्स्य M Be.

याङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति पथ्या पूषण्वत्या देवतयाङ्गिरस्वद्ध्रुवा सीद वाग्वायोस्त्या देवतयाङ्गिरस्वद्ध्रुवा सीदेति। सर्वासां पारे सूददोहसः करोत्यथ पश्चादुदीचीः पञ्चहोचेष्टका उपदधात्यग्निर्होता तया देवतयाङ्गिरस्वद्ध्रुवा सीदाश्विनाध्वर्यू तया देवयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रोऽपि वाश्विनाध्वर्यू इत्येतेनैव मन्त्रेण द्वे इष्टके समानतयादेवत उपदधाति। तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति[1] मन्त्रꣳ[1] संनमयत्यथ[1] हृदयेष्टकामुपदधाति शतं नियुतः परिवेदेत्यनुद्रुत्य प्राणमुखं तेन कॢप्तो ऽस्तेनाहमस्मीत्यातो। ऽथ यजुरिष्टके उपदधात्यङ्गिरसो धिष्ण्येरग्निभिस्त्या देवतयाङ्गिरस्वद्ध्रुवा सीद मरुतः सदोहविर्धानाभ्यां तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति दीक्षा सोमस्य तया देवतयाङ्गिरस्वद्ध्रुवा सीद पृथिव्यग्नेस्त्या देवतयाङ्गिरस्वद्ध्रुवा सीदेति। सर्वासां पारे सूददोहसः करोत्यथोत्तरतः प्राचीः षड्ढोचेष्टका उपदधाति वाग्घोता तया देवतयाङ्गिरस्वद्ध्रुवा सीद दीक्षा पत्नी तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति षडथ हृदयेष्टकामुपदधाति सुवर्णं कोशꣳ रजसा परीवृतमित्यनुद्रुत्येन्द्रस्यात्मानꣳ शतधा चरन्तमित्यातो। ऽथ यजुरिष्टके उपदधात्यापः प्रोक्षणीभिस्त्या देवतयाङ्गिरस्वद्ध्रुवा सीदौषधयो बर्हिषा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ

---

१ इत्यच संनमयत्य॰ M; इति संच सनमयत्य॰ H Be Ben. U (pr m.); संनमत्य॰ BU (sec. m.).

पत्नीष्टके उपदधाति वसूनां गायत्री तया देवतयाङ्गिरस्वद्ध्रुवा सीद रुद्राणां त्रिष्टुक्तया[1] देवतयाङ्गिरस्वद्ध्रुवा सीदेति सर्वासां पारे सूददोहसः करोत्यथोपरिष्टात्प्राचीः सप्तहोत्रेष्टका उपदधाति महाहविर्होता तया देवतयाङ्गिरस्वद्ध्रुवा सीद सत्यहविरध्वर्युस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति षडपि वानाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरावित्येतेन मन्त्रेण द्वे द्वे इष्टके समानतयादेवते उपदधाति तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति मन्त्रꣳ संनमत्यथ[2] हृदयेष्टकामुपदधातीन्द्रो राजा जगतो य ईश इत्यान्तादनुवाकस्यांथ यजुरिष्टका उपदधात्यदितिर्विद्या तया देवतयाङ्गिरस्वद्ध्रुवा सीद सोमो दीक्षया तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति क्षयोदग्रांथ पत्नीष्टका उपदधात्यादित्यानां जगती तया देवतयाङ्गिरस्वद्ध्रुवा सीद विष्णोरनुष्टुक्तया[3] देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यष्टादग्र सर्वासां पारे सूददोहसः करोत्यथ यथावकाग्रं ग्रहेष्टका उपदधाति वाचस्पते विधे नामन्निति दग्रहोतुर्वाचस्पते वाचो वीर्येणेति चतुर्होतुः सोमः सोमस्य पुरोगा इति पञ्चहोतुर्भूर्भुवः सुवरिति षड्ढोतुर्वाचस्पते हृदिधे नामन्निति सप्तहोतुः सर्वासां पारे सूददोहसः करोत्यथ यथावकाग्रमेव प्रतिग्रहेष्टका उपदधाति देवस्य त्वा सवितुः प्रसव इत्यनुद्रुत्यैषा ते

---

१ चिष्टुप्तया M.

२ Thus MH; संनमत्य° the other MSS.

३ °नुष्टुप्तया

काम दक्षिणोत्तानस्त्वाङ्गिरसः प्रतिगृह्णात्वित्येकान्नविंशमपि वा गन्धर्वाप्सराभ्यः स्वगलङ्करणे दृत्येतेन मन्त्रेण दे दृष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति मन्त्रं संनमयति[१] । स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वं । संतिष्ठते ब्रह्मचित् । ॥ ७ ॥ पञ्चमः ॥

अथ समस्तस्य । प्रसिद्धं चेच्चकरणं यथा सावित्रस्यैतावदेव नाना । सावित्रो ऽग्निः प्रथमा चितिर्लोकंपृणा[२] द्वितीया । नाचिकेतस्तृतीया । लोकंपृणा[३] चतुर्थी । ब्रह्मचित्यञ्चमी । सर्वासु चितिषु स्वयमातृण्णा[३] । पुरीषान्ताश्चितयो । ऽग्ने देवाꣳ दृंहावर्चेत्येताभिः पञ्च[४] चितीरभिमृशति[५] । तं चेत्सौम्ये ऽध्वर उत्तम[६] एव चक्रे चिन्वीत प्राग्दीक्षणीयायै दिवः श्येनोभिर्यजेतोदवसानीयायां[७] अपाघाभिः[८] । सकृत्प्रयुज्य[९] समस्यति । संतिष्ठते समस्तः । ॥ ८ ॥ षष्ठः ॥

---

१ Thus U (pr. m.); संनमति the other MSS.; M om. this passage.

२ ॰पृणाभिर् (॰भिश्) M Be UH, but cp. Âp. xix. 15. 11.

३ ॰त्तृण्णाः M.

४ Thus H; पंचभिः पंच चितीर॰ U; पंच चितयो भिमृशति Be Ben: पंच चितयोभिमृशंते M; पंचभिश्चितीरभिमृशति B.

५ उत्तमे U; instead of उत्तम एव चक्रे M has उत्तरवेद्यां ।

६ Thus HU (sec. m.); ॰सानीयायापा॰ M Ben Be U (pr. m.); ॰सायायापा॰ B; cp. Sâyaṇa on T Br., vol. iii, p. 815; अपाघाभिः MU Be; the other MSS. indistinctly (घ or द्य).

७ प्रयुज्यैनं UH; प्रयज्य न M.

अथ वैश्वसृजस्य[1] प्रसिद्धं चेचकरणं यथा साङ्चित्स्यै[2] तावदेव नाना[3] तिस्रो लेखा भवन्त्यथान्तमायां लेखायामुपदधाति यच्चामृतं यच्च मर्त्यमित्यष्टादश[4] सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां[5] लेखायामुपदधाति सर्वा दिशो दिक्षिति पञ्चदश[6] सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामुपदधाति सर्वान्दिवꣳ सर्वान्देवान्दिवीति नव[7] सर्वासां पारे सूददोहसः करोति[8] स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वं[9] तं चेद्यहीने[10] सत्रे[11] वा चिन्वीत ग्रतराचे[12] विश्वजिति सर्वपृष्ठे दक्षिणानां काले ब्रह्मा सदस्योमीनो वैश्वसृजान्व्याचष्ट[13] ऋचां प्राची महती दिगुच्यत इति[14] पक्षो ऽर्धर्चशो ब्राह्मणे[15] वाक्यशस्तस्मा अध्वर्युः प्रतिगृणात्यों बृहदृतं[16] बृहत्सत्यं बृहदरात्स्म बृहदिति[17] तस्योत्तमे पर्याये ऽरात्स्म[18] बृहत्संपद्यते[18] संतिष्ठते वैश्वसृजः[19] ॥ ९ ॥ सप्तमः ॥

---

१ ॰र्यांतमायां M.

२ चेदुदीचीसाविचे Be Ben.

३ सहस्रराचे ins. M

४ वैश्वसृजान् Be Ben ; विश्वंसृजान् UHB ; वैश्वसृजं M.

५ इत्यच्च M.

६ ब्राह्मणं B.

७ Thus BUH ; Be Ben have each time तद् after बृहत् and M reads everywhere ब्रह्मन् instead of बृहत्।

८ परात्रह्मन्संप॰ M.

एतेनारुणकेतुको व्याख्यातो । यावन्मात्रमवीष्टका[1] । लोकंपृणाश्च स्वयमातृण्णाश्चाप एव । पुष्करपर्णꣳ रुक्मꣳ हिरण्मयं[2] पुरुषं कूर्ममित्यातपति वर्ष्या इति यथासमाम्नातं[3] । पल्वल्या इत्यविग्रोष्या[4] इत्यर्थं । उत्तरवेद्यावपनकाले तां तूष्णीं जानुदघ्नी[5] खात्वान्यच्च मृदं निवपति । विदेरग्निरित्यादि लुप्यते । ध्रुवासीति प्रतिपद्यते । हस्तग्राहमवीष्टका उपदधाद्भद्रं कर्णेभिरिति द्वाभ्याꣳ शान्तिं कृत्वा ताभ्यामुपदधात्यापमापामिति पञ्चभिर्महानाम्नीभिरुष्णोदकꣳ । शिवा न शन्तमेति सौषध्योः[6] ऽपोः[6] ऽध्वर्यवे ददाति । स ताः प्रतिगृह्य शिवा न इत्युपदधाति । सुमृडीकेति भूमिवतीमुपदधादेताः पुरस्तात्स्तुतिः प्रत्यचमित्यष्टौ मध्ये शुक्रं ते अन्यदिति च । साकंजानामित्येकादश पुरस्ताद्विचिणतो ऽचिदुःखोत्थितस्यैवेति षडिहेह वः स्वतपस इति चातिताम्राणीति चतस्रो मदन्तीस्तिस्राः प्रवर्ग्यवदाद्यन्तयोः शान्तिं कृत्वात्यूर्ध्वाच इति चीर्णतुमण्डलान्यव द्रप्स इति चारोग इत्यष्टौ[7] सूर्यनामभिः पदशो

---

१ यावन्मात्रम० MU.

२ om. MB Be Ben.

३ ०म्नाता M.

४ इत्यशोष्यां MU BH

५ ०दघ्नं MU (sec. m.).

६ त्यौषध्योपो B, सौषध्या ापो UH; सौषध्य ापो M, त्यौषध्या ापो Be; सोषध्या ापो Ben.

७ Thus B Ben; इति सप्त सूर्य० Be; इत्यष्टौ सप्त सूर्य० HU; M om. सूर्यनामभिः ।

यत्ते ग्निल्यमिति च । व्याहृतीर्जपित्वापो व इति यजमान उपतिष्ठत । एवमुत्तरैरुपस्थानं व्याहृतीर्जपित्वा । सप्त सूर्याः सप्त दिशो नानासूर्या यद् द्यावश्चित्रं देवानामिति चतस्रः सौरीः पुरस्तात्केदमभ्रमित्येकामर्धमासा इत्युपरिष्टात्काला अप्सु निविशन्त इति दक्षिणतः । किꣳ स्विदासीदिति पञ्च वैष्णवीः । पृच्छामि त्वा परं मृत्युमिति चतस्रो मृत्युमतीः । पृच्छामि त्वा पापकृत इति चतस्रो निरयवतीरा यस्मिन्नग्ने नयेति द्वे । अग्निश्च जातवेदाश्चेत्यष्टौ दिश्या दिशो व इति यजमानः । प्रभ्राजमाना इत्येकादश रुद्राः । प्रभ्राजमान्य इत्येकादश रुद्राण्यः पदशो मध्ये । रूपाणि व इति यजमानः । खानभ्राडित्येकादश गन्धर्वगणाः पदशः पञ्चाद्गौरीमिमायेत्येका । वराहवः खतपस इति सप्त वाताः पदशः समानमेतदिति वृष्टिमती । यदक्षरमिति श्लोको । जमदग्निरित्याप्यायितस्त्वच्छंयोरिति शंयुः । महस्वदित्यष्टौ संयानीः । स संग्राम इति द्वे च । पवित्रवन्तः पवित्रं ते ब्रह्मा देवानामसतः सद्यः इति चतस्रः पवित्रवत्य उत्तरतो ऽग्नौ य ऋचा इति सप्त मध्ये । ऊर्ध्वो मणिमिति पञ्च

---

१ द्वे ins. M.

२ Thus BHU ; वैष्णव्यः M Be Ben.

३ निरपवती॰ B , पवमतीर॰ Ben ; यमवतीर॰ Be.

४ एकां H Be Ben U.

५ ॰तीं HU ; दृष्टिभिर् M ; Be Ben om. the word.

६ om. B.

वैश्वदेवीरुत्तरत । आ तमग्ने रथमिति तिस्र । आतनुष्वति चतस्र । आ मन्द्रैरित्येकां यजमान उपदधादृणभिश्चेति द्वे । सुब्रह्मणोमित्येकामरुणाश्वा इति चतस्रो रेवतीर्ब्रह्मण उदरणमसीति चतस्रो ब्रह्मसदना । अष्टयोनीमित्यष्टौ दिश्या । मिंचश्च वरुणश्चेत्यष्टौ दिश्याः । पुष्करपर्णꣳ रुक्मꣳ हिरण्मयं पुरुषं कूर्ममिति महाग्निवदेव[1] । तान्युपधाय हꣳसः शुचिषदिति द्वे दूरोहणे पुरुषमभितस्तदित्यदमिति द्वे मध्ये । वसूनाꣳ रुद्राणामित्यष्टावुत्तरतो । रश्मयो व इति यजमान आरोगस्येत्यष्टावुपरिष्टादापो व इति यजमानः । प्रभ्राजमानानामित्येकादश प्रभ्राजमानीनामिति चैकादश मध्ये । रूपाणि व इति यजमानो । अग्नेः पूर्वदिश्यस्येत्यष्टौ दिश्या । दिशो व इति यजमानो । दक्षिणपूर्वस्यामिति चतस्रो नरकवतीर्यथाङ्गिरमा यस्मिन्निन्द्रियाणि शतक्रतविति द्वे दक्षिणत । इन्द्रघोषा वः संज्ञानमिति षड् दिश्या । आदित्य सर्व इति पञ्च दिश्या । एवा ह्येवेति षड् दिश्या । आपमांपामिति नवोपरिष्टादापाꣳ रसमित्येकां । कामस्तदग्र इति संकल्पवतीमापो हि यदित्योघवतीं । विधाय लोकानिति स्तम्भनवतीं । केतव इत्येकामिमा नु कमिति तिस्र । आप्नवस्येति सप्तदश चषणो । विश्वौषणीमिति द्वे । पर्जन्यायेति

---

१ Thus H Be; °वदेव B. M Ben U om. एव, but M has एतानि instead of the following तानि।

तिस्रः। पुनर्मामैत्विति च तिस्रः[१]। स्वयमातृण्णामिं समानमुत्तरꣳ सावित्रेण। स्वयमातृण्णा लोकंपृणाश्चैता आपः पञ्च चितयो भवन्ति। प्रतिदिग्गं चितीः[२] पुष्करपर्णादिभिः प्रच्छादनं। लोकं पृणयैव द्वितीयामन्याः प्रथमचितिवन्न पुष्करपर्णादय। उत्तरतो[३] लोकंपृणयापवर्गा। दीर्घदारुभिमन्त्रं[४] कृत्वा पृष्टो दिवीति पुरीषव्यूहनमन्त्येष्टके[५]। अतरुद्रीयहोमा ऽनुग्रꣳसनान्ते ऽग्निप्रणयनꣳ। ह्रियमानायां[६] वैश्रवणयज्ञो ब्राह्मणेन[७] व्याख्यातो ऽन्नकामस्य सर्वकामस्य[८] वा पर्वणिपर्वणि वैश्रवणयज्ञः। सोत्तरवेदिषु क्रतुषु चिन्वीतेति यथाब्राह्मणं[९]। तस्यैतद्व्रतमिति यथाब्राह्मणं संमिताश्च[१०] व्रतसमुच्चया[१०]। आपो न बीभत्या यथाब्राह्मणमेककामः[११]

---

१ चतस्रः M, चतिस्र. the other MSS.

२ चितिं H चितिः U.

३ उत्तर Be Ben

४ °मंचं M.

५ °मंत्येष्टकोर्ध्वं MUH.

६ Uncertain reading; ह्रियमानायां U Be BU; ह्रियमाणायां M; ह्रीयमाण Ben.

७ Thus Sāyaṇa (comm. on Taiṭt. Ār.); ब्राह्मण MUH; ब्राह्मणे Be Ben ८ B om. the word

८ स्वर्ग° M.

९ चेतव्यम् ins. M.

१० Uncertain reading, HU read as given in the text; संमितं व्रतसमुच्चय B; समितव्रतसमुच्चय Be Ben; संमितव्रतसमुच्चय M.

११ यथाब्राह्मणमेककामः Be Ben; यथाब्राह्मणकामः HBUM.

सर्वकामो वा[1] आपो[1] वा इदꣳ सर्वमिति ब्राह्मणं[2] विज्ञायते ब्रह्म वा आपो यदाप[3] उपधीयन्ते ब्रह्म[4] वै[4] तदात्मन्धत्ते ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोति य एतमग्निं[5] चित्तुत इति[1] संतिष्ठत आरुणकेतुकः संतिष्ठत आरुणकेतुकः ॥ १० ॥ अष्टमः ॥[6]

॥ इत्यत्येकोनविꣳशः प्रश्नः ॥

---

१ वापो UBH वा आपो Be.

२ om. M.

३ Thus MU (pr. m.), यदप all the other MSS.

४ ब्रह्मैव M.

५ Be Ben ms. चित्वा।

६ Adhyāya numbers for this praśna are found only in M.; the MSS agree all in designing this prasna as काठकसूत्रम् or काठकम्

# CORRIGENDA.

| | | | | | | |
|---|---|---|---|---|---|---|
| Page | 20, | l. 8, | *read* | तन्नः | *instead of* | तन्न |
| | 70, | l. 12 | ,, | °धारयत्य° | ,, | °धारयत्य° |
| ,, | 96, | l 10 | ,, | षोडश्यतय्य | ,, | °तर्य |
| ,, | 187, | l. 4 | ,, | ब्रवी° | ,, | ब्रत्री° |
| ,, | 200, | l 1 | ,, | उवेवैष[१] | ,, | उ[१]वैवैष[१] |
| ,, | 226, | l. 5 | ,, | सुवर्णमयै° | | |
| ,, | 336, | note ६ | ,, | °स्थरि° | | |